CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

४८८

वेदान्तनयभूषणम्

सर्वतन्त्रस्वतन्त्रश्रीमत्स्वयम्प्रकाशानन्द-
स्वामिपादविरचितम्

सम्पादको व्याख्याकारश्च

डा० स्वामिरामकृष्णप्रपन्नाचार्य्यः
(वेदान्ताचार्यः पीएच्० डी०)

वि०सं० २०४३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

४८८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वेदान्तनयभूषणम्

सर्वतन्त्रस्वतन्त्रश्रीमत्स्वयम्प्रकाशानन्द-
स्वामिपादनिरचितम्

सम्पादको व्याख्याकारश्च

डा० स्वामिरामकृष्णप्रपन्नाचार्य्यः
(वेदान्ताचार्य्यः पीएच्० डी०)

वि०सं० २०४३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

● प्रकाशक :
किरातेश्वरप्रकाशनम्
लखनपुरपञ्चायत
सीतापुरी किरातेश्वरधाम
झापा, मेच्यञ्चलम् (नेपाल)

● भारते पुस्तकप्राप्तिस्थानम्
प्रशान्तप्रकाशनम्
कैलासभवनम्
लाहौरी टोला वाराणसी

● प्रथमसंस्करणम्
केवलं ५०० प्रति

दा. नं. १८३४८

© पुनर्मुद्रणं स्वायत्तीकृतम्

● मूल्यम् : १५५) भा० रु०
२५१) ने० रु०

संवत् २०४३
विजयादशमी
१२-१०-१९८६

● मुद्रक :
प्रकाशधवनः
प्रकाशप्रिंटिङ्गप्रेसः
विश्वनाथगली, साक्षीविनायकः
वाराणसी (उ०प्र०)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

VEDANTANAYABHUSHANAM

Sarvtantra Swatantra
Shrimat Swami Swayam Prakashananda

Editor
Dr. Swami Ramkrishna Prapannacharya
Vedantacharya (PH. D.)

1986

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

• **PUBLISHER**

Kiratesware Prakashan

Lakhanpur Panchayat I

Sitapuri, Kirateswar Dhama

Jhapa Mechi Anchal (Nepal)

• *Books Available at :*

Prashant Prakashan

Kailash Bhawan

Lahoritola, Varanasi (U. P.)

INDIA

© Dr. Swami R. K. Prapannacharya

Copies 500

• **Price Rs. :** 155–I. C.
261'50–N. C.

1986

• Printed by :

Prakash Printing Press

Sakchi Vinayak, Viswanath Gali

Varanasi (U. P.)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समर्पणम्

भवभयभञ्जनमुनिमनरञ्जनदशरथनन्दनमर्यादापुरुषोत्तमकुलदेवतानां
श्रीमन्महाराजमुकुन्दसेनराजगुरुकामदेवपन्तोत्तमसुतेन्दिरारमणजानां
नेपालराष्ट्रान्तर्गतपाल्पाठूलीहुंगीग्रामस्वजनुषालङ्कृतवतां
पदवाक्यप्रमाणत्रय्यन्ताद्यनेकनिगमागमनिचयाकूपाराणां
समग्रभारतनेपालाभिजनेष्वन्तेवसत्सम्पत्परम्पराणां
म.म. बुकीर्तिसुब्रह्मण्यसीतारामवाचस्पतिचित्रधराद्यनेकान्तेवसज्जुषां
दिगन्तविश्रान्तकीर्तिकल्पपन्तकुलकमलदिवाकराणां
मन्दारमरन्दमकरन्दयशश्शेवधीनां
महामहोपाध्यायपदभाजां
श्रीमन्नीलदेवशास्त्रिसूरिकुलतिलकानां
पावनस्मृतौ
समर्पयति
प्रणतिततिविलसनपुरस्सरम्
प्रेक्षावत्कुलवशंवदः प्रपन्नः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रथमो भागः

भूमिका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनुक्रमः

भूमिका

विषयः	पृष्ठ संख्या
१. वही पुरा करेगा	
२. वेदान्तनयभूषणका परिचय	
३. परिमितं वक्तव्यम्	
४. सम्मतयः	
५. भूमिका	३१
६. वेदान्तपदार्थः	२
७. वेदान्तनयभूषणनामकरणम्	२
८. नयशब्दन्यायशब्दयोः पर्यायत्वम्	२
९. ग्रन्थकर्तुः परिचयः	२
१०. वेदान्तनयभूषणस्य भाषा शैली च	२–३
११. स्वयम्प्रकाशानन्दस्य कालः	३–४
१२. तत्रान्तरिकानि प्रमाणानि	५–७
१३. जन्मस्थानम्	७–७
१४. तत्कर्तृका अन्ये ग्रन्थाः	७–९
१५. अध्यासः	९–१०
१६. अवच्छेदवादः	१०–११
१७. बिम्बप्रतिबिम्बवादः	११–११
१८. आभासवादः	११–१२
१९. आत्मख्यातिः	१२–१२
२०. आख्यातिवादः	१२–१२
२१. अन्यथाख्यातिवादः	१२–१३
२२. अनिर्वचनीयख्यातिः	१३–१३
२३. सत्तात्रयम्	१३–१४
२४. विवर्तवादः	१४–१४
२५. विवर्तशब्दस्यानेकार्थः	१४–१५
२६. मायाऽविद्ययोर्भेदः	१५–१५
२७. वेदान्तनयभूषणस्य विषयवस्तु	१६–२५
२८. मातृकाविवरणं संकेतश्च	२५–३१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रथमाध्यायस्य प्रथमपादः

अधिकरणानि	पृष्ठसंख्याः
१. जिज्ञासाधिकरणम्	३५–४८
२. जन्माद्यधिकरणम्	४८–५१
३. शास्त्रयोनित्वाधिकरणम्	५१–५४
४. समन्वयाधिकरणम्	५४–५९
५. ईक्षत्यधिकरणम्	५९–६३
६. आनन्दमयाधिकरणम्	६३–७०
७. अन्तराधिकरणम्	७०–७२
८. आकाशाधिकरणम्	७३–७६
९. प्राणाधिकरणम्	७६–७९
१०. ज्योतिश्चरणाधिकरणम्	७९–८४
११. प्रातर्दनाधिकरणम्	८४–८९

प्रथमाध्यायस्य द्वितीयपादः

१. सर्वत्र प्रसिद्ध्यधिकरणम्	८९–९२
२. अत्रधिकरणम्	९२–९४
३. गुहाप्रविष्टाधिकरणम्	९४–९७
४. अन्तराधिकरणम्	९७–१०१
५. अन्तर्याम्यधिकरणम्	१०१–१०५
६. अदृश्यत्वाद्याधिकरणम्	१०५–१०७
७. वैश्वानराधिकरणम्	१०७–१०९

प्रथमाध्यायस्य तृतीयः पादः

१. द्युभ्वाद्यधिकरणम्	११०–११२
२. भूमाधिकरणम्	११२–११५
३. अक्षराधिकरणम्	११५–११७
४. ईक्षतिकर्माधिकरणम्	११७–११९
५. दहराधिकरणम्	१२०–१२५
६. अनुकृत्यधिकरणम्	१२५–१२७
७. प्रमिताधिकरणम्	१२७–१३०
८. देवताधिकरणम्	१३०–१३५
९. अपशूद्राधिकरणम्	१३५–१३९
१०. कम्पनाधिकरणम्	१३९–१४१
११. ज्योतिरधिकरणम्	१४१–१४३
१२. अर्थान्तरत्वादिव्यपदेशाधिकरणम्	१४३–१४४
१३. सुषुप्त्युत्क्रान्त्यधिकरणम्	१४४–१४६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रथमाध्यायस्य चतुर्थः पादः

१. आनुमानिकाधिकरणम्	१४६–१४९
२. चमसाधिकरणम्	१५०–१५१
३. संख्योपसंग्रहाधिकरणम्	१५१–१५३
४. कारणत्वाधिकरणम्	१५३–१५४
५. बालाक्याधिकरणम्	१५४–१५८
६. वाक्यान्वयाधिकरणम्	१५८–१६१
७. प्रकृत्यधिकरणम्	१६१–१६३
८. सर्वव्याख्यानाधिकरणम्	१६४–१६४

अथ द्वितीयाध्यायस्य प्रथमः पादः

१. स्मृत्यधिकरणम्	१६४–१६५
२. योगप्रत्युक्त्यधिकरणम्	१६५–१६६
३. विलक्षणत्वाधिकरम्	१६६–१६८
४. शिष्टापरिग्रहाधिकरणम्	१६८–१६९
५. भोक्त्रापत्त्यधिकरणम्	१६८–१६९
६. आरम्भणाधिकरणम्	१६९–१७३
७. इतरव्यपदेशाधिकरणम्	१७३–१७४
८. उपसंहारदर्शनाधिकरणम्	१७४–१७५
९. कृत्स्नप्रसक्त्यधिकरणम्	१७५–१७६
१०. सर्वोपेताधिकरणम्	१७६–१७७
११. प्रयोजनवत्त्वाधिकरणम्	१७७–१७७
१२. वैषम्यनैर्घृण्याधिकरणम्	१७७–१७८
१३. सर्वधर्मोपपत्त्यधिकरणम्	१७८–१७८

द्वितीयाध्यायस्य द्वितीयः पादः

१. रचनानुपपत्त्यधिकरणम्	१७९–१७९
२. महद्दीर्घाधिकरणम्	१७९–१८०
३. परमाणुजगत्कारणत्वाधिकरणम्	१८०–१८१
४. समुदायाधिकरणम्	१८१–१८१
५. अभावाधिकरणम्	१८३–१८४
६. एकस्मिन्नसम्भवाधिकरणम्	१८५–१८६
७. पत्यधिकरणम्	१८६–१८६
८. उत्पत्त्यसम्भवाधिकरणम्	१८६–१८८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वितीयाध्यायस्य तृतीयः पादः

१. वियदधिकरणम्	१८८–१९०
२. मातरिश्वाधिकरणम्	१९०–१९०
३. असम्भवाधिकरणम्	१९०–१९१
४. तेजोऽधिकरणम्	१९२–१९२
५. अबधिकरणम्	१९३–१९३
६. पृथिव्यधिकाराधिकरणम्	१९३–१९४
७. तदभिध्यानाधिकरणम्	१९४–१९५
८. विपर्ययाधिकरणम्	१९५–१९६
९. अन्तराविज्ञानाधिकरणम्	१९६–१९७
१०. चराचरव्यपाश्रयाधिकरणम्	१९७–१९७
११. आत्माधिकरणम्	१९८–१९८
१२. ज्ञाधिकरणम्	१९९–२००
१३. उत्क्रान्तिगत्यधिकरणम्	२०१–२०२
१४. कर्त्रधिकरणम्	२०२–२०२
१५. तक्षाधिकरणम्	२०२–२०२
१६. परायत्ताधिकरणम्	२०३–२०३
१७. अंशाधिकरणम्	२०३–२०४

द्वितीयाध्यायस्य चतुर्थः पाद.

१. प्राणोत्पत्त्यधिकरणम्	२०५–२०६
२. सप्तगत्यधिकरणम्	२०६–२०७
३. प्राणाणुत्वाधिकरणम्	२०७–२०८
४. प्राणश्रैष्ठ्याधिकरणम्	२०८–२०९
५. वायुक्रियाधिकरणम्	२१०–२१०
६. श्रेष्ठाणुत्वाधिकरणम्	२१०–२११
७. ज्योतिराद्यधिकरणम्	२११–२१२
८. इन्द्रियाधिकरणम्	२१२–२१३
९. संज्ञामूर्तिक्लृप्त्यधिकरणम्	२१३–२१५

अथ तृतीयाध्यायस्य प्रथमः पादः

१. तदन्तरप्रतिपत्त्यधिकरणम्	२१५–२१७
२. कृतात्ययाधिकरणम्	२१७–२१९
३. अनिष्टादिकार्यधिकरणम्	२१९–२२०
४. साभाव्यापत्त्याधिकरणम्	२२०–२२१
५. नातिचिराधिकरणम्	२२१–२२२
६. अन्याधिष्ठिताधिकरणम्	२२२–२२४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तृतीयाध्यायस्य द्वितीयः पादः

१. सन्ध्याधिकरणम्	२२५–२२५
२. तदभावाधिकरणम्	२२६–२२७
३. कर्मानुस्मृतिशब्दविध्यधिकरणम्	२२८–२२८
४. मुग्धाधिकरणम्	२२८–२२८
५. उभयलिंगाधिकरणम्	२२९–२२९
६. प्रकृतैतावत्त्वाधिकरणम्	२३०–२३०
७. पराधिकरणम्	२३१–२३१
८. फलाधिकरणम्	२३१–२३१

तृतीयाध्यायस्य तृतीयः पादः

१. सर्ववेदान्तप्रत्ययाधिकरणम्	२३२–२३३
२. उपसंहाराधिकरणम्	२३४–२३४
३. अन्यथात्वाधिकरम्	२३४–२३६
४. व्याप्त्यधिकरणम्	२३६–२३७
५. सर्वाभेदाधिकरणम्	२३७–२३८
६. आनन्दाद्यधिकरणम्	२३८–२३९
७. आध्यानाधिकरणम्	२४०–२४१
८. आत्मागृहीत्यधिकरणम्	२४१–२४३
९. कार्याख्यानाधिकरणम्	२४४–२४५
१०. समानाधिकरणम्	२४६–२४७
११. सम्बन्धाधिकरणम्	२४७–२४८
१२. सम्भृत्यधिकरणम्	२४८–२४९
१३. पुरुषविद्याधिकरणम्	२४९–२५०
१४. वेधाद्यधिकरणम्	२५१–२५२
१५. हान्यधिकरणम्	२५२–२५४
१६. साम्परायाधिकरणम्	२५५–२५६
१७. गतेरर्थवत्त्वाधिकरणम्	२५६–२५६
१८. अनियमाधिकरणम्	२५६–२५७
१९. यावदधिकाराधिकरणम्	२५७–२५८
२०. अक्षराद्यधिकरणम्	२५८–२५८
२१. इयदधिकरणम्	२५८–२५९
२२. अन्तरत्वाधिकरणम्	२५९–२६०
२३. व्यतिहाराधिकरणम्	२६१–२६१
२४. सत्याद्यधिकरणम्	२६१–२६२
२५. कामाद्यधिकरणम्	२६२–२६३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२६. आदराधिकरणम् २६३–२६४
२७. तन्निर्धारणाधिकरम् २६४–२६५
२८. प्रदानाधिकरणम् २६५–२६६
२९. लिङ्गभूयस्त्वाधिकरणम् २६६–२६७
३०. ऐकात्म्याधिकरणम् २६७–२६८
३१. अङ्गावबद्धाधिकरणम् २६८–२६९
३२. भूमज्यायस्त्वाधिकरणम् २६९–२६९
३३. शब्दादिभेदाधिकरणम् २७०–२७०
३४. विकल्पाधिकरणम् २७०–२७१
३५. काम्याधिकरणम् २७१–२७१
३६. यथाश्रयभावाधिकरणम् २७१–२७१

तृतीयाध्यायस्य चतुर्थः पादः

१. पुरुषार्थाधिकरणम् २७२–२७२
२. परामर्शाधिकरणम् २७३–२७४
३. स्तुतिमात्राधिकरणम् २७५–२७५
४. पारिप्लवाधिकरणम् २७६–२७६
५. अग्नीन्धनाद्यधिकरणम् २७६–२७६
६. सर्वापेक्षाधिकरणम् २७७–२७७
७. सर्वान्नानुमित्यधिकरणम् २७७–२७८
८. आश्रमकर्माधिकरणम् २७८–२७९
९. उभयलिङ्गाधिकरणम् २७९–२८०
१०. विधुराधिकरणम् २८०–२८१
११. तद्भूताधिकरणम् २८१–२८१
१२. आधिकारिकाधिकरणम् २८२–२८२
१३. बहिरधिकरणम् २८२–२८२
१४. स्वाम्यधिकरणम् २८३–२८४
१५. सहकार्यन्तरविध्यधिकरणम् २८४–२८४
१६. अनाविष्काराधिकरणम् २८४–२८५
१७. ऐहिकाधिकरणम् २८४–२८५
१८. मुक्तिफलाधिकरणम् २८६–२८६

चतुर्थाध्यायस्य प्रथमः पादः

१. आवृत्त्यधिकरणम् २८७–२८९
२. आत्मत्वोपासनाधिकरणम् २८९–२९०
३. प्रतीकाधिकरणम् २९०–२९१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

४. ब्रह्मदृष्ट्यधिकरणम् २९१–२९१
५. आदित्यादिमत्यधिकरणम् २९२–२९३
६. आसीनाधिकरणम् २९३–२९४
७. एकाग्रताधिकरणम् २९४–२९४
८. आप्रायणाधिकरणम् २९५–२९६
९. तदधिगमाधिकरणम् २९६–२९७
१०. इतरासंश्लेषाधिकरणम् २९७–२९७
११. अनारब्धाधिकरणम् २९८–२९८
१२. अग्निहोत्राद्यधिकरणम् २९८–२९९
१३. विद्याज्ञानसाधनत्वाधिकरणम् ३००–३००
१४. इतरक्षपणाधिकरणम् ३०१–३०१

चतुर्थाध्यायस्य द्वितीयः पादः

१. वागधिकरणम् ३०२–३०३
२. मनोऽधिकरणम् ३०३–३०४
३. अध्यक्षाधिकरणम् ३०४–३०५
४. आसृत्युपक्रमाधिकरणम् ३०५–३०६
५. संसारव्यपदेशाधिकरणम् ३०६–३०७
६. प्रतिशेषाधिकरणम् ३०८–३१०
७. वागादिलयाधिकरणम् ३१०–३१०
८. अविभागाधिकरणम् ३११–३११
९. तदोकोऽधिकरणम् ३११–३१२
१०. रश्म्यधिकरणम् ३१३–३१३
११. दक्षिणायनाधिकरणम् ३१४–३१४

चतुर्थाध्यायस्य तृतीयः पादः

१. अर्चिराद्यधिकरणम् ३१५–३१५
२. वाय्वधिकरणम् ३१६–३१६
३. तडिदधिकरणम् ३१७–३१७
४. आतिवाहिकाधिकरणम् ३१८–३१८
५. कार्याधिकरणम् ३१८–३२०
६. अप्रतीमकालम्बनाधिकरण ३२०–३२०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चतुर्थाध्यायस्य चतुर्थः पादः

१. सम्पद्याविर्भावाधिकरणम् ३२१–३२१

२. अविभागेन दृष्टत्वाधिकरणम ३२१–३२२

३. ब्राह्माधिकरणम् ३२२–३२२

४. सङ्कल्पाधिकरणम् ३२२–३२३

५. अभावाधिकरणम् ३२३–३२४

६. प्रदीपाधिकरणम् ३२४–३२४

७. जगद्व्यापाराधिकरणम् ३२५–३२६

समाप्तश्चायमध्यायः

परिशिष्टम्—१६

(क) वेदान्तनयभूषणस्य कारिका सूची ३२९–३५२

(ख) सूत्रानुयोजिनीश्रुतिसङ्केतः ३५३–३५५

(ग) वेदान्तनयभूषणे प्रयुक्तलौकिकन्यायाः ३५६–३५६

(घ) वेदान्तनयभूषणे समुद्धृतग्रन्थसङ्केतः ३५७–३५८

(ङ) वेदान्तनयभूषणे समुट्टङ्किताचार्यनामनिर्देशः ३५९–३६०

(च) ब्रह्मसूत्रेषु निर्दिष्टर्षि नामसङ्केतः ३६१–३६२

(छ) वेदान्तनयभूषणे प्रयुक्तपारिभाषिकशब्दानां निर्देशः ३६२–३८५

(ज) वेदान्तनयभूषणे प्रमाणत्वेन प्रयुक्तग्रन्थनामसङ्केतः ३८६–३९१

(झ) सहायकग्रन्थसङ्केतः ३९२–३९६

●

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वही पुरा करेगा

'उन माताओंको जिन्होने वात्सल्यभावसे सहयोग दिये'

भाग्यरेखा कहां पर बनी है। यह कहना कठीन है। परन्तु मानव अभिमान करता है कि मै भाग्यरेखाको पूर्णतया जानता हूँ। वस्तुतः यह विश्वास करनेकी बात नहीं है। यदि जान जाय तो वह मानव नहीं होगा। कुछ और ही होगा।

परन्तु यही तो आश्चर्यकी बात है। फिर कुछ न कुछ प्रयत्न तो करता ही है। साथ ही भाग्यवादी बन कर बैठा रहना भी अकर्मण्यता ही है। यह सोचकर १९७३ में आचार्य परीक्षा उत्तीर्ण करनेके बादमें अपने अलमस्त स्वप्नेको लेकर सरयूसंस्क्रत [1]विश्वविद्यालय बहराइच उत्तर प्रदेश, हिमाचलप्रदेश सोलन, हरियाणाप्रदेश भीवानी, होशियापुर पञ्जाब, आदिके महाविद्यालय तथा कालेजोंके प्राचार्य, प्राध्यापक, पदकेलिए दौड़ लगाता रहा। किन्तु पक्षपात, जातिवाद, नमस्कारवाद और परिचयवादके सामने योग्यताकी सदासे ही हत्या होती रही है। यह मुझे पूर्णतया पता लगा। इन कटु अनुभवोंको लेकर मैं १९७५ में इलाहाबाद पहुँचा। सायं काल सात बजे 'हनुमत् निकेतन' में पहुँचा। रात्रिमें शरण लेनेके लिये पहुँचा था। किन्तु हनुमानने रात्रि शयनके लिये साफ शब्दोंमें इनकार कर दिया। बहुत अनुनय विनय करने पर भी हनुमान् और उनके साहन बाहन सभी एक मुख हो कर निकेतनसे बाहर करने के लिये तैयार हो गये। मैंने कहा आपलोग नराज नहोवें। मै अब स्वयं ही चला जाउँगा। साथ ही मैंने रास्ता लिया।

हनुमान्के द्वारसे बाहर निकलते ही दूसरे द्वारके उपर मेरी नजर पड़गई। घोड़ोके लगाम पकड़े हुये कृष्ण रथ हांक रहे थे। पीछे अर्जुन बैठा हुआ था। मैंने कहा अभी तुम भी बोलनेकी स्थितिमें नहीं हो। भले ही द्वापरके अन्तमें बोल गये हो। यह सोचता हुआ बाहर निकला। तब तक रातके ९ बज चुका था। अब कहां जाये ? यहाँ मेरा कोहि भी परिचित नहीं है। ऐसा सोचता हुआ मैं और आगे सिविललाईके तर्फ बढ़ता गया। दैव संयोगसे एक मन्दिर मिल गया। वह था सिविललाईन राम मन्दिर। तब तक रातके १० बज रहा था। अब क्या करता। किन्तु उपर मन्दिरसे एक काले काले रङ्गके बूढ़े आदमी नीचे उतर आये। उन्होंने पूछा आप रामतीर्थ मिशनसे आये है ? मेने कहा नहीं। किन्तु रामतीर्थ मिशनको मै अच्छी तरह जानता हूँ। मैं वहाँ रह चुका हूँ। वृद्धने पूछा आप किस किसको जानते हो ? मैने कहा महामण्डलेश्वर स्वामी गोविन्द्र प्रकाशजीको अच्छी तरहसे जानता हूँ। इस पर उस वृद्धने मुझे बुलाकर भीतर लेगया। फिर एक अढेड़ बुढे नोकरको उन्होंने कहा। स्वामीजीको कमरा खोल दो। भोजन बनाकर खिलाओ। इतना कह कर वृद्ध चऌ दिये। इधर भोजन न सही कमरा तो मिल ही गया। वह उत्तम वृद्ध कोई प्रभावशाली व्यक्तित्वका था। परन्तु कौ था ? यह पता नहीं चला। ऐसा ही सो गया। मैंने दूसरे दिन प्रातः उठकर नित्य नियम किया। तब तकमें वही वृद्ध सामने आ खड़े हुये। उन्होंने कहा सामको आपने भोजन किया ? मैने कहा नहीं। इस पर उन्होंने नोकरको फटकारा।

मैंने कहा अब रहने दिया जाय। बात रुक गई। वह व्यक्ति था सेठ बालमुकुन्द बग्गा। परन्तु वह वृद्ध जाते ही मुझे वह नोकर फटकारने लगा। 'क्यों तुमने सेठजीको कहा ? क्या तुम्हारे बापके नोकर बैठा है ?' आदि हुआ।

---

१. यह विश्वविद्यालय बननेकी योजनामें था। किन्तु बन नहीं पाया। इसके संस्थापक नेपालके प्रसिद्ध योगी नरहरिनाथजी थे।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तव तक प्रातः ७ बज चुका था। मै चलनेके लिये तैयार था। किन्तु कथा प्रवचनका समय भी निकट आगया था। पुरुषवर्ग, मातायें, वृद्धजन, तथा युवा, युवति, बच्चे सभी सत्सङ्गभवनके ओर जारहे थे। इसी बोचमें एक माताजी आखड़ी हो गई। माने मेरा परिचय लिया। मै चलनेके लिये तैयार था। माने काहा स्वामीजी ? आज आप न जायें। कल प्रात: जावें। मैने कहा ? माँ ! मुझे वाराणसी पहुँचना है। मेरा काम है। माने आग्रह किया। अगर आप आज ही जाना चाहते हैं, तो भी कुछ प्रवचन सुनाकर ही जाइयेगा। माके बहुत आग्रह पर मैं रुक गया। उस दिन मैने आधे घण्टेका प्रवचन किया। प्रवचनके बाद पुनः एक महिना प्रवचन करनेका आग्रह भक्तोंने किया। उसे मैने स्वीकार किया। तथा वाराणसीके लिये चल पड़ा। वाराणसी पहुँचने पर रिसर्चके लिये मेने विचार किया। किन्तु प्रारम्भिक रहन सहन खान पान पुस्तक तथा किराये भाड़ाके लिये द्रव्यको अत्यन्त आवश्यकता थी। उसे कौन पुरा करता ? यह एक समस्या थी। किन्तु थी जटिल समस्या। इसे हल करनेका कोई उपाय नहीं था। वाराणसेय संस्कृत विश्वविद्यालय तथा काशी हिन्दू विश्व-विद्यालय दोनोंमें रिसर्चके स्थान पाने के लिये घोर वरिश्रम किया। किन्तु मेरे लिये प्रवेश पाना असम्भव नहीं तो अवश्य कठिन था। अनेक प्रयास करने पर भी प्रवेश नहीं पा सका। ऐसी स्थितिमें मैं पुनः इलाहाबाद राममन्दिरमें पहुँचा।

इस वार मैने पूरा एक महिना तक गोता पर प्रवचन किया। इसी बीचमें दिल्ली 'राष्ट्रिय संस्कृत संस्थान' से सम्ब्रन्ध जोड़ा। पीएच० डी० के लिये आवेदन पत्र दिया। दैनिक समस्या सुलझानेके लिये गङ्गानाथ झा केन्द्रीय संस्कृत विद्यापीठ के तात्कालिक प्राचार्य महामहोपाध्याय डा० ब्रह्ममित्र अवस्थीजीसे बात करने पर भी वही समस्या बनी रही। पहले द्रव्यके ही समस्या थी। उधर राममन्दिरमें प्रवचन भी चल ही था। प्रवचनमें अनेक बुद्धिजीवी, शिक्षक, जज, वकील, लेखक, विद्वान्, तथा भक्तजन माताओंने भाग लिया था। इन भाग लेने वाली माताओंमें सेठ श्रीकुलभूषण बग्गाके धर्मपत्नी श्रीमती राजमाताजी तथा भारत प्रसिद्ध वैद्यनाथ आयुर्वेद संस्थानके संस्थापक स्वर्गीय पं० रामलाल जोशीजीके धर्मपत्नी श्रीमती वैद्यनाथ माताजी भी उपस्थित थे। दोनों मातायें रोज प्रवचनमें आया करतो थां।

प्रसङ्गवश एक दिन मैने राज माताजीसे कहा 'मुझे रिसर्च करना है किन्तु मासिक खर्चकी आवश्यकता है' इतनी बात सुनते ही माने उत्साहके साथ कहा 'आप रिसर्च कोजिये'। मैने कहा मा ! बुद्धि, मिहेनत और लगनसे तो मै काम कर सकता हूँ। किन्तु मासिक खर्चसे मैं लाचार हूँ। हैरान हूँ। ऐसी स्थितिमें रिचर्संसे मैं कैसे पार पा सकूंगा। इस पर माने अत्यन्त धैर्यसे उत्तर दिया 'स्वामीजी ? आप रिसर्च कीजिये वही पुरा करेगा'। इस पर माको मेने एक और सुझाव दिया। मा ? आप यदि पूर्ण सहयोग करेंगी तो मैं कमर कस कर रिसर्चका काम सुरू करूँगा। माके दृढ सङ्कल्पने रिसर्चका रूप लेलिया। अतः प्रवचन समाप्त होते ही मैने 'गङ्गानाथ झा केन्द्रोयसंस्कृतविद्यापीठ' में म० म० डा० ब्रह्ममित्र अवस्थीजीके निर्देशकत्वमें रिसर्चका कार्य प्रारम्भ किया। श्रीमती राज माताजीने मुझे पुस्तक खरीदनेसे लेकर सभी आवश्यक कार्योंमें पूर्णरूपेण सहयोग दिया। परन्तु रिसर्चका कार्य केवल इलाहाबादमें ही नहीं। अपितु वाराणसी आदिमें भी जाना पड़ता था।

इसी सिलसिलेमें डेढ़ वर्षके लिये मुझे वाराणसीमें रहकर कार्य करना पड़ा। मेरा काम वाराणसीमें था। परन्तु मैं सङ्कटमें पड़ गया था। सङ्कटमें ही नहीं अपितु धर्मसङ्कटमें पड़गया था। हे भगवन् ? अब क्या होगा। इतनेमें ही याद आगया। माको फोन करूँ। मैने बनारससे इलाहाबाद सिविललाईंको फोन किया। फोनमें मा बोली मैं आदमी भेज रही हूँ। दूसरे दिन खर्च लेकर आदमी आ पहुँचा। मैने मन ही मन कहा मा ! तू धन्य है। मा ! तुमने कमाल कर दिया। परन्तु यह झूठो प्रसंशा नहीं है। यह मेरी अन्तरात्माकी पुकार है। मुझे प्यारे पुत्रके भाँति ही माका सहयोग प्राप्त हुआ। एक अपरिचित असहाय व्यक्तिको इतना सहयोग करना साक्षात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ईश्वर पूजा है। मैं बीमार हुआ तो मा स्वयं खाना लेकर अस्पताल पहुँची। स्वयं अपने ही डेरे पर निवास स्थान देकर वर्षों सेवा की। मैं माकी क्या प्रसंशा करूँ। मेरे पास ऐसा कोई शब्द नहीं। मा! तू धन्य है।

इस बीचमें वयोवृद्धा श्रद्धावती श्रीमती वैद्यनाथ माताजी भी सहयोग और सेवामें लगी रही। सेवाके भागी बनी रही। आप स्वयं वृद्धा हैं। तथापि समय समय पर बीमार अवस्था में वैद्यनाथ माताजीने भी पूर्ण सहयोग किया। यद्यपि वादमें विद्यापीठसे भी मासिक दो सौ प्राप्त होते रहे। किन्तु यह छात्रवृत्ति अपर्याप्त था। साथ ही एक साल वादमें प्राप्त हुये। इतने लम्बे अन्तरालमें ये मातायें सहयोग नहीं करती तो मैं कैसे गुजारा करता? परन्तु इन दोनों माताओंने बडी और छोटी बहनोंकी तरह मिलकर सहायता प्रदान की। यदि ये मातायें साथ नहीं देते तो सायद रिसर्च नहीं होता। ये दोनों मेरे कर्मके मा हैं। आज पाठकोंके सामने 'वेदान्तनय भूषण' शोध प्रबन्ध उपस्थित है। यह थिसिस इन दोनों माताओंके परिश्रमका फल है। इन माताओंकी जितनी बढाई की जाय उतना ही कम है। अतः किन शब्दोंमें लिखुं। आज भी दोनों मातायें समय समय पर सेवायें करती आ रही है। इन माताओंके सेवाओंके उल्लेख जिन शब्दोंमें करूँ, तो भी थोड़ा ही होगा।

इस प्रकार माताओंने जो सहयोग दिये थे। उस ग्रन्थमें क्या लिखा है। यह माताओं तथा सामान्य पाठकोंको भी जानना आवश्यक था। अतः हिन्दी रूपान्तर कर छपानेका विचार हुआ। किन्तु प्रकाशनकी समस्या और जटिल है। केवल मूल मात्र ५२ फर्मके है। हिन्दी सहित डेढ सौ फर्मका होना था। इस परिस्थितिमें प्रकाशित होना ही असम्भव था। केवल मूल मात्र भी सातवें वर्षमें किसी मुश्कीलसे पाठकोंके सम्मुख उपस्थित हो रहा है। इस प्रकाशनमें वैद्यनाथ माताजीका सबसे बड़ा सहयोग है। मुझे डीग्री प्राप्त होनेके पश्चात् विद्यापीठके प्राचार्य गयाचरणत्रिपाठीजीसे प्रकाशनके बारेमें चर्चा की। किन्तु विलम्बका चक्कर था। अतः प्राचार्यजीसे स्वयं प्रकाशनके लिये लिखित अनुमति लिया। उसके बाद फिर माताओंसे ही प्रकाशनके लिये चर्चा किया। यह चर्चा सुनते ही वयोवृद्धा वैद्यनाथमाता जो ने प्रकाशनके लिये द्रव्य सङ्ग्रहरूपमें देना सुरू किये। इस वर्ष कुछ कागज खरीदने के लिये द्रव्य सङ्ग्रह हो गये थे। फिर माको पत्र लिखा। वह पत्र कलकत्ता पहुँचा। वहाँसे माने पञ्च सहस्र श्री अशोक कुमार शर्माके हातमें वाराणसी भेज दिये। उनदिनों माके आखोंके अप्रेसन हो रहा था। इस परिस्थितिमें भी वैद्यनाथ माताजोने १५ हजार सहायता देकर दर्शन जगत्का बड़ा उपकार किया। किन्तु प्रकाशनमें इससे भी बहुत अधिक व्यय करना पड़ा है।

इस प्रकार प्रेमराई चामलिङ्ग (श्रीदन्तकाली पाना पाव रोटी धरान ३ शान्तिपथ नेपाल, त्रि० वि० वि० कीर्तिपुरके सांस्कृतिक अध्यापक, स० ध० से० स० के महासचिव गोविन्द टण्डन, श्रीप्रपन्न (प्रवेशचन्द्र कोहली अम्बाला केण्ट, हरियाणा) इन सज्जनोका भी यथायोग्य सहयोग प्राप्त हुये हैं। अतः ये भी धन्यवादके पात्र हैं। परन्तु इतना सहयोग होने पर भी काम सन्तोषजनक नहीं रहा। जिसके कारण लगभग अठ महिना तक चिन्तित रहना पड़ा। घोर चिन्तित रहनेसे मुझे हार्ट एटेक अर्थात् हृदय रोग हो गया। काफी क्षति उठानी पड़ी। जिससे हरिद्वार कुम्भमें ग्रन्थ उपस्थित नहीं हो सका। इस कारण कुम्भ भी नहीं जापायें। अब एक वर्ष दुइ महिनेके बाद आप लोगोंके सामने ग्रन्थ उपस्थित हो रहा है। यद्यपि इस ग्रन्थने आठ महिना पूर्व ही निकलना था। किन्तु जो दुःख है। वह मनके भीतर ही है। घायलकी गति घायल जाने जो कोई घायल होय। जो घायल होगा। उसीको पता है। ऐसी स्थितिमें मुझे प्रूफ लाके देनेका काम लक्ष्मणाचार्यने (किरात वान्तवा राई) पांचथर रवि मेची पू० नेपालने किया। अपने बलबुतेसे बाहर होने पर भी अच्छी तरह सहयोग दिया। दुर्गाप्रसाद नेपाल (भोजपुर कोशीअञ्चल) ने समय समयमें प्रूफ वाचने का सहयोग दिया। प्रशान्तप्रकाशनके मालिक मदनमोहन धवन लाहौरीटोला, वाराणसीने पारिभाषिक शब्दोंके पृष्ठ परिवर्तन करनेके अतिरिक्त भी बहुत कुछ सहयोग दिये है। अतः आप सबको शुभाशीः सहित धन्यवाद देते हैं।

डा० स्वामी प्रपन्नाचार्य
विजयादशमी

मिति
१२-१०-१९८६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वेदान्तनयभूषणका परिचय

यह ग्रन्थ १६ शताब्दीके प्रख्यात विद्वान् सर्वतन्त्रस्वतन्त्र स्वामी स्वयम्प्रकाशानन्द सरस्वतीके लिखे हुये हैं। महर्षि व्यास रचित ब्रह्मसूत्रोंके अधिकरणों पर स्वामीजीने 'वेदान्तनयभूषण' नामक भाष्य संस्कृतमें लिखे हैं। वेदान्त दर्शन समझनेके लिये वेदान्तनयभूषण बहुत ही उत्तम ग्रन्थ है। परन्तु किसी कारणवश चार सौ वर्ष पूर्व लिखित ग्रन्थ प्रकाशमें नहीं आया था। भाग्यवश मुझे इस पर शोध (रिसर्च) करनेको मिला। यह ग्रन्थ हस्तलिखित पाण्डुलिपियोंमें था। अत्यन्त पाण्डित्य पूर्ण होनेके साथ ही मार्मिक भी है। इस ग्रन्थका पाण्डुलिपि वाराणसेय संस्कृत विश्वविद्यालयके हस्तलिखित पुस्तकालय सरस्वती भवनमें चार प्रतियां थी। तीन प्रतियां अपूर्ण तथा एक प्रति पूर्ण थी। उन प्रतियोंका नाम क, ख, ग, घ, रखा गया है। एक प्रति एशियाटिक सोसाइटी कलकत्तामें है। उसका नाम मैने च, रखा। सभी मातृकायें अपूर्ण हैं। केवल घ, मातृका पूर्ण है। अतः इस 'घ' मातृका पर मैने काम किया है। इस ग्रन्थमें मैने जो काम किये। वे ये हैं। एकदम जीर्ण शीर्ण कागजोंमें लिखे हुये प्रतियोंको साफ कागजमें साफ, करके उतारा। उसके बाद एक-एक अक्षरका अध्ययन किया। जो अक्षर नहीं पढे जाते थे। उन्हें कठिनाइयोंसे पढ़कर पाठभेद किया। प्रमाणोंके मूल ग्रन्थोंको अनुसन्धान कर सूची बनाई। लौकिक न्यायोंका सूची तैयार किया। ग्रन्थके अन्दर उल्लिखित आचार्योका सूची बनाई। श्रुतियोंके सूची अध्ययन पुरःसर तैयारी की। ग्रन्थमें प्रयुक्त पारिभाषिक शब्दोंके सूची बनाई। जहाँ ग्रन्थके पंक्ति साफ नहीं लगती थी। उन उन स्थलों पर टिप्पणी भी लिखी। जहां लक्षण नहीं घटता। वहाँ लक्षणोंको घटाया है। इस प्रकार ग्रन्थके प्रत्येक अध्यायके प्रत्येक अधिकरणके संस्कृतमें सरल-अर्थ व सारांश लिखे हैं। उसके बाद सभी मातृकाओंके विवरण सूची दिये गये हैं।

अन्तमें मूल ग्रन्थके अध्याय तथा अधिकरणोंके सूची और मूलके विषयोंको लेकर भूमिका लिखी गई है। भूमिकाके अन्दर जो विषय दिये गये हैं। वे ये हैं। सबसे पहले वेदान्तका अर्थ दिया गया है। उसके बाद ग्रन्थका नामकरण, नय और न्यायका पर्याय, ग्रन्थकारका परिचय, ग्रन्थका भाषा और शैली, ग्रन्थकारका समय, उसमें अन्तः तथा बाह्य प्रमाण, जन्मस्थान, ग्रन्थकारका अन्य ग्रन्थ, अध्यास, अवच्छेदवाद, विम्बप्रतिविम्ववाद, आभासवाद, अख्यातिवाद, अन्यथाख्यातिवाद, अनिवचनीयख्यातिवाद, विवर्तवाद, विवर्तका अर्थ, सत्तात्रय, माया और अविद्याका स्वरूप, आदि विषय भूमिकामें लिखा गया है। इन विषयों पर लिखनेके बाद मुझे विद्यावारिधि (पीएच्. डी.) के उपाधि प्राप्त हुआ।

सम्पादक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परिमितं वक्तव्यम्

सुचिरं कदाचित्स्वाध्यायप्रसङ्गे संक्षेपशारीरके महामण्डलेश्वरस्वामिगङ्गेश्वरानन्दपादलिखितां भूमिकामधीयानः पादटिप्पण्यां ब्रह्मविद्याभरणस्य तत्कर्तुस्स्वामिनोऽद्वैतानन्दबोधेन्द्रस्य परिचयो लब्धः। ततश्चाधिवाराणस्यां परमसमर्चनीयानां श्रीमतां सुधांशुशेखरशास्त्रिगुरुचरणानां, निखिलनिगमागमाकूपारमीमांसक (अ०) सुब्रह्मण्यशास्त्रिगुरुचरणानातन्तेवसत्तया वेदान्तशास्त्राध्ययनप्रसङ्गे स्वामिनोऽद्वैतानन्दस्य सुविदितस्य शिष्यस्य स्वामिनस्स्वयम्प्रकाशानन्दस्य तत्कृतस्य च वेदान्तनभूषणस्य नाम श्रुतं मया। ग्रन्थोऽयमद्यावध्यप्रकाशित इति तदा न तद्द्रष्टुमशक्यत। तदैव मे मनस्यभिलाषस्समुत्पन्नो यत्कदामुं ग्रन्थरत्नं साक्षात्कुर्यामिति। अभिलाषश्चायं क्रमशोऽङ्कुरितोऽपि सुसमयमपेक्षमाणो मनस्येवातिष्ठत्। सत्यं यच्चिन्तितं तन्न भवति।

परिव्राजकवृत्त्या प्रयागमागतस्य मम गङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठस्य नामश्रवणसमकालमेवास्य संस्थानस्य दिदृक्षा समुत्पन्ना। अयस्कान्तमिव चायोऽहमपि विद्यापीठममुं बलादाकृष्ट इव सम्प्राप्तः।

तत्र किल तात्कालिकप्राचार्य्यैः परमश्रद्धेयमहामहोपाध्याय-श्री डा० ब्रह्ममिश्र-अवस्थिमहोदयैस्सह परमसौहार्दपूर्वकं साप्तपदीनभावेनाधिविद्यापीठाजिरे मनसोल्लासेन च साक्षात्कारस्समजनीति। तत्र डा० अवस्थिमहाभागा बहुविधनिगमागमनिचये कृतभूरिपरिश्रमाश्शोधार्थिकसंसदि च प्रतिलब्धकीर्तिकल्पा इति कर्णाकर्णिकयाकर्णितमासीत्। परं परिमितेन कालेन साक्षात्कृत्यालौकिकप्रमोदावसरो लब्धः। चेतसि बहुविधविचाराप्लावितत्वेऽपि 'विद्यावारिधि' उपाधिं समधिगन्तुमहिया प्रणतिततिविलसनपुरस्सरं मया निवेदितम्। 'विद्यावारिधि' उपाधये कृते च निवेदने तत्र भवद्भिस्सहर्षमुरीकृत्याहमकिञ्चनस्सनाथीकृतः।

एवञ्च सम्प्राप्तकालक्रमानुसारेण यतिवरस्वयम्प्रकाशानन्दस्वामिपादविरचितवेदान्तनयभूषणग्रन्थरत्नस्य सम्पादनकर्मणि व्यापृतः। वेदान्तनयभूषणभाष्यमेतद्दर्शनदृशां शेवधिरिति के न जानते? परञ्चास्य प्रबन्धरत्नस्य सम्पादनकर्मणि सहजसौहार्दभरितेन साहाय्येन निखिलमपि निर्विघ्नमिव सम्पाद्यमानमिदङ्कृत्यं मेऽभूदिति कैश्शब्दैस्तेषामुपकृतिमभिव्यञ्जयानीति। यद्यपि ते नक्तंदिवं निजकर्मणि व्यापृताः। तथापि शोधार्थिकान् छात्राननिशं सुतीकृत्यानुकम्पयन्ति। अतो हार्देनैव भावेन हार्दिकं कुसुमाञ्जलिमेवार्पयामीति।

एतत्प्रसङ्गे वाराणसेयसंस्कृतविश्वविद्यालयस्य सरस्वतीभवनस्थभारद्वाजमहाभागेभ्यः, पं०जनार्दनपाण्डेयमहाभागेभ्यः, कलिकत्ता 'एशियारिक सोसाइटि' पुस्तकालययाध्यक्षभ्यः, गोयनकापुस्तकालयाध्यक्षयाज्ञिकमहाशयेभ्यः, अस्माकं कार्यालयाधीक्षकेभ्य पं०सुबोधचन्द्रपन्तमहाभागेभ्यो धन्यवादान् पुस्तौमि। अत्र येषां कर्मकराणान्नामधेयानि न परिकर्मितानि तेषां महानुभावानां कृतेऽपि शिष्टानुवादा विलसन्तु।

तत्रापि शोधकार्यमिदं मधुकरीवृत्तिरिति के न जानते? वेदान्तनयभूषणस्य शुद्धपाठनिर्धारणे किल महती समस्या जाता। तस्यां वेलायां शिवसायुज्यलीनप्रख्यातयशसां श्रीकरपात्रस्वामिमहाभागानां, कैलासवासिपण्डितराजश्रीराजेश्वरशास्त्रिद्राविडमहाभागानां, पण्डितमूर्धन्यानां काशीहिन्दूविश्वविद्यालयस्य मीमांसाधर्मशास्त्रदर्शनविभागाध्यक्षाणां मम गुरुचरणानां अ० सुब्रह्मण्यशास्त्रिणां तथा एस्० सुब्रह्मण्यशास्त्रिमहाभागानां पण्डितवर्य्यपट्टाभिरामशास्त्रिवर्य्याणामपि वेदान्तनयभूषणस्य पाठनिर्धारणे ग्रन्थपङ्क्तिपरिष्फोरणे च साहाय्यं लब्धम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उदासीनस्वामियोगीन्द्रानन्दमहाभागानामपि काले काले समुचितपरामर्शंप्रदाने महान् सहयोगो वर्तते। मुद्रणावसरे काशीहिन्दूविश्वविद्यालयस्य न्यायविभागाध्यक्षपण्डितवर्य्यश्रीरुद्रधरझामहाभागेनापि पाठशुद्धीकरणे समीचीनं सहाय्यमाचाचरितम् ।

एभिस्संख्यावद्भिरशेमुषीकैश्चित्रगवीकैश्च मम सम्पादनकर्मणि यदेव सहाय्यं लब्धं तेनाधमर्णोऽस्मीति ।

वेङ्गलोरविश्वविद्यालयमहोसुरस्य (मैसुर) माध्वदर्शनविभागाध्यक्षप्रोफेसर के० टी० पाण्डुरङ्गजी (Head of the Depart ment Sanskrit Benglore university) तथा काशी हिन्दूविद्यालयस्थ संस्कृतकालेजस्य भू० पू० दर्शनविभागाध्यक्षकेदारनाथत्रिपाठीमहाभागाः तथा अन्ये चापि धन्यवादार्हाः । अन्ते च महता परिश्रमेण सावधानेन च क्रियमणे संशोधनेऽपि बहुत्र स्खलनञ्जातमेव नास्त्यत्र सन्देहः । अतस्त-द्विशोध्यावधेलिममिति । हृद्रोगपीडित सन् सम्पादितङ्कार्य्यमिदं विवित्सुतत्त्वबुभुत्सूनाञ्च महते श्रेयसे कल्पत इति । १६ शताब्दीतोऽप्रकाशितग्रन्थोऽयं प्रथमसंस्करणत्वेन प्राकाश्यमेति । द्वितीयसंस्करणे यथेच्छं परिमार्जनं भविष्यतीति शम् ।

विजयादशमी
२०४३

डा० स्वामिप्रपन्नाचार्य्यः
वाराणसी ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निर्देशकः

चैत्रपूर्णिमा वि० सं० २०३६

महामहोपाध्यायः
डा० ब्रह्ममित्रावस्थी रीडर
गङ्गानाथझा केन्द्रीयसंस्कृतविद्यापीठम्
(गङ्गानाथ झा अनुसन्धानसंस्थानम्)
मोतीलालनेहरुपार्कः कम्पनीबागः
इलाहाबाद उत्तरप्रदेशः (भारत)

दिल्लीराष्ट्रियसंस्कृतसंस्थानतः 'विद्यावारिधि' इत्युपाधये स्वामिस्वयम्प्रकाशानन्दकृतं वेदान्तनयभूषणम्' नामकं ग्रन्थं शोधप्रबन्धभावेन महता श्रमेण वैदुष्येन चाद्यन्तं स्वामिरामकृष्णप्रपन्नाचार्य्यस्समपादयदिति प्रमाणयन्नग्रे सारयंश्च महान्तं मोदमनुभवामीति ।

डा० ब्रह्ममित्र अवस्थी

परीक्षकः

आचार्य्यः पं० केदारनाथ त्रिपाठी
दर्शनविभागाध्यक्षः
काशीहिन्दूविश्वविद्यालयः वाराणसी-५

अनुसन्धात्रा ग्रन्थकारसम्बन्धे ग्रन्थसम्बन्धे च कतिपयनूतनतथ्यानामाविष्करणं कृतम् । तथा च शोधप्रबन्धस्यामूलचूलपठनानन्तरमिदन्निर्विवादं सिध्यति यच्छोधकर्ता समालोचनात्मकपरीक्षणविधौ सिद्धान्तप्रतिपादने चोभयत्र समानरूपेण क्षमः । शोधप्रबन्धस्य भाषातीव मनोरमात एव सन्तोषावहा ।

केदारनाथ त्रिपाठी

श्रीपट्टाभिरामशास्त्रिवेदमीमांसानुसन्धानकेन्द्रम्

संरक्षक :—आचार्य डॉ० पी० एन० पट्टाभिरामशास्त्री
राष्ट्रपतिद्वयसम्मानितः

४/७, हनुमानघाट
वाराणसी-१
१-११-८६

श्रीस्वयम्प्रकाशानन्दस्वामिभिः प्रणीतं डाक्टरश्रीरामकृष्णप्रपन्नाचार्यस्वामिभिः प्रकाशितं वेदान्तनयभूषणं नामात्युत्तमं ग्रन्थं स्थालीपुलाकन्यायेनापठम् । अतिप्रशस्तं ग्रन्थरत्नमिदम्प्रथमतया प्रकाशितम् । सम्पादकैः स्वामिरामकृष्णप्रपन्नाचार्यैः पञ्चषमातृकाः परिशील्य शुद्धं पाठं निर्णीय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विस्तृतभूमिकादिभिस्सम्पादितं विदुषां मनांस्यावर्जयति। प्रस्थानत्रये वादग्रन्थेषु च प्रविविक्षूणां छात्राणां सौकर्याय प्रणीतोऽयं ग्रन्थः श्रीस्वयम्प्रकाशानन्दस्वामिभिः। प्रस्थानत्रयं भगवत्पादैर्निर्मितं महासागरसदृशम्। सागरे तरितुं लोका बिभ्युः, प्रथमं तटाकादिषु तरणं शिक्षित्वा सागरप्रवेशस्सुकरः। अतस्स्वयम्प्रकाशानन्दस्वामिभिस्तटागतुल्योऽयं ग्रन्थो निर्मितः। ग्रन्थमिमं सपरिष्कारं प्रकाशयित्वा श्रीस्वामिरामकृष्णप्रपन्नाचार्यास्साधुकर्मानुष्ठितवन्तः। ग्रन्थस्य विलोकनेनावगम्यते–यत्सम्पादकानां मातृकावस्थायां विद्यमानग्रन्थानां प्रकाशनतत्परता चिरन्तनग्रन्थसम्पादननैपुण्यञ्चेति। अध्येतारो ग्रन्थमिममधीत्य प्रस्थात्रयसागरे प्रविश्य वेदान्ततत्त्वबोधपरिष्कृतमतयो भवन्त्विति विश्वनाथमभ्यर्थये।

पट्टाभिराम शास्त्री

दापमालिका०

पावका नः सरस्वती

मिति १०।९।१९७६

स्वामियोगीन्द्रानन्दोदासीनः
के० ३७/२, शोराकुँवा
वाराणसी

श्रीकाञ्चीकामकोटिपीठाधिपतेः श्रीहर्षमिश्रसमानाध्ववैदुष्यस्य श्रीमतोऽद्वैतानन्दस्वामिनो ब्रह्मविद्याभरणमुपकुर्वाणोऽयं वेदान्तनयभूषणः कदा प्राकाश्यमेष्यन्नद्वैतग्रन्थपरिवारमलङ्करिष्यतीति चिरं प्रतीक्षन्ते वेदान्तरसलिप्सवः। अतीव संस्तुत्योऽयं तत्सम्पादश्रमः।

योगीन्द्रः

ओम् ब्रह्म प्रावादिष्म
तन्नो मा हासीच्छ्रुतं मे गोपाय
२३।४।१९७६

स्व० अ० सुब्रह्मण्यशास्त्री, मीमांसारत्नम्
मीमांसादर्शनधर्मशास्त्रविभागाध्यक्षचरः
काशी हिन्दूविश्वविद्यालयः वाराणसी

अद्वैतवेदान्ते स्वयम्प्रकाशानन्दसरस्वतीप्रणीतवेदान्तनयभूषणसञ्ज्ञकः प्रबन्धराजोऽतीव व्युत्पादकोऽनेकन्यायमीमांसापरिकर्मितः न्यायशास्त्रप्रसिद्धन्यायैरुपवृंहितः व्युत्पित्सूनां व्युत्पत्तिङ्करणः प्रसिद्धो वर्तते। विद्वद्भिस्समादृतश्चायङ्ग्रन्थः। भामतीविवरणप्रस्थानयोरुपन्यस्तप्रक्रियाविश्लेषणरूप इति नात्युक्तिकोटिमाटीकते। अस्य ग्रन्थस्य टिपण्यादिभिः परिस्कृत्य मुद्रणं प्रकाशनञ्च वेदान्तशास्त्राधिजिगांसूनां महत उपकाराय कल्पत इत्याशास्ते। स्तुत्योऽयं सम्पादकश्रमः।

सुब्रह्मण्यशास्त्री

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एस्० सुब्रह्मण्यशास्त्री, मीमांसाशिरोमणिः
राष्ट्रपतिसम्मानितः
(१९७०)
भूतपूर्व यु० जि० सि० अफिसर
वाराणसेयसंस्कृतविश्वविद्यालयः
२०।४।१९७६ वाराणसी

अद्वैतानन्दसरस्वतीशिष्यैस्स्वयम्प्रकाशानन्दसरस्वतीभिर्विरचितो वेदान्तनयभूषणसञ्ज्ञको ग्रन्थोऽतीव व्युत्पादकः। विविधमीमांसान्यायभूषितस्तर्कशास्त्रप्रसिद्धन्यायैस्समलङ्कृतो नातिसरलो नात्यन्तं कठिनो भामतीविवरणादिग्रन्थोक्तप्रक्रियाविवरणरूपो विदुषां मान्यो विराजते। अस्य ग्रन्थस्य शोधनं यथावद्विधाय टिपण्यादिभिरलङ्कृत्य मुद्रणं जिज्ञासूनां महोपकाराय कल्पते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Examinar's Report

Report on the thesis "Critical edition of Vedantanaya bhusana of Svayamprakasananda" submitted by Swami Ramakrishna Prapanna-charya for the Degree of Vidyavaridhi (Ph. D) to be awarded by Rashtriya Sanskrit Sansthan, New Delhi.

The work itself is very well-planned. It is not a commentary on each sutra of Vedanta sutras· But it gives a list of each adhikarana neatly arranging the points as visaya, samsaya, purvapaksa and sidhanta. The main arguements in favour of Purvapaksa and Siddhanta are briefly summarised. These points are sometimes summarised in lucid verses and then elaborated in prose. the purpose of this work is not merely to give a gist of advaita position under each adhikarana of Vedantasutras but also to answer the objection raised by other Bhasyakaras and later critics of Advaita inter-pretation. The author belongs to post-advaita Siddhi period and is well aware of Dvaita-Advaita dialectics initiated by Nyayamrita and Advaita Siddhi, and developed by a host of writers on both the sides. Though the present work is not a Vada-grantha but is a Vyakhyana-grantha, the points raised in the Vada-granthas of both sides are incorporated into the adhikarana frame-work of Vedanta sutras and Advaita position is justified. There is a happy blend of the pariskara style and the essay style. It is very useful to know clearly the purvapaksa and siddhanta positions of each adhikarana according to Advaita inter-pretation and also the methodology of sruti inter-pretation adopted in Advaita. Preparation of the critical edition of such a useful work has added a very valuable work to Advaita literature.

In addition to giving the readings, the editors has added useful notes of reference and inter-pretation throughout the work in the introduction he has discussed the date and authership problems. He has noted the views of Sri Gopi-nath Kaviraja and other earlier scholars in the matter. With a view to help the readers to understand Advaita doctrines underlying the whole work, he has discussed some of the Advaita concepts such as adhyasa, avacchedavada, abha-basavada, the Khyati theories, vivartavada etc. in the introduction. He has given a detailed summary of Vedantanaya bhusana also. Seven usefnl appendices and a bibliography are added.

—**Prof. K. T. Pandurangji**

Head, Depa. of Sanskrit

Bangalore, University.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भूमिका

वेदान्तनयभूषणस्य विश्लेषणात्मकमध्ययनम्

वेदान्तपदार्थः

सम्पाद्यमानोऽयं ग्रन्थो वेदान्तशास्त्रविषयकः। वेदान्तश्च ब्रह्मविद्याप्रतिपादकं शास्त्रम्। उपनिषदश्च तच्छास्त्राश्रयभूताः। उपनिषदोऽधिकृत्यैव समस्तं वेदान्तशास्त्रं प्रवर्तते। वेदान्तो नाम उपनिषत्प्रमाणकमिति[1] वचनादवगम्यते। अपि च ये विरक्ता अद्वैतविद्यामुपगम्य निश्चयेन शीलयन्ति, तेषां समूलस्य संसारबन्धस्य विशरणात्, अत्यन्तावसादनाद्वा, तेषां ब्रह्मगमयितृत्वाद्वा, ब्रह्मविद्य।पनिषदिति सङ्कीर्त्यते। उपनिषद्ग्रन्थस्तु तादर्थ्याद्गौण्या वृत्त्या 'उपनिषद्' इत्यभिधीयते[2]। 'उप सामीप्ये निषण्णं प्रजापशुब्रह्मवर्चसादिफलमस्यामित्युपनिषदुपासना'[3] इति। उपशब्दसामीप्यमाचष्टे, सङ्कोचकाभावाच्च तत्प्रत्यगात्मनि पर्यवस्यति। निशब्दो निश्चयवचनः, तथा च सामीप्येन निश्चयेन ब्रह्मात्मैक्यं सादयति-बोधयति, रागादीन् शिथिलयति, सर्वक्लेशान् नाशयतीत्युपनिषद्ब्रह्मविद्या। तत्साहचर्याद्ग्रन्थोऽप्युपनिषदिति[4]। सदेर्धातोर्विशरणगत्यवसादनार्थस्योपनिपूर्वस्य क्विप्प्रत्ययान्तस्य रूपमुपनिषदिति। उपनिषच्छब्देन च व्याचिरव्यासितग्रन्थप्रतिपाद्यवेद्यवस्तुविषया विद्योच्यते। तथा हि ये मुमुक्षवो दृष्टानुश्रविकविषयवितृष्णास्सन्त उपनिषच्छब्दवाच्यां वक्ष्यमाणलक्षणां विद्यामुपसद्योपगम्य तन्निष्ठतया निश्चयेत शीलयन्ति तेषामविद्यादेस्संसारवीजस्य विशरणाद्धिंसनाद्विनाशनादित्यनेनार्थयोगेन विद्योपनिषदित्युच्यते[5]। सामीप्यवचनोपसर्गेण प्रत्यगात्मनो ब्रह्मसामीप्यमुच्यते। सामीप्ये च तयोरभेदरूपं विवक्षितम्। निशब्दो निश्चयार्थकतया चोपसर्गद्वयेन प्रत्यगात्मब्रह्मणोरभेदनिश्चयरूपा विद्योक्ता। विशरणावसादनगतयो धात्वार्थाः, क्विप्प्रत्ययश्चात्र कर्तरि विवक्षितः। तथा च प्रत्यगात्मब्रह्मगोचरा विद्या विदुषामनर्थं शातयति शिथिलीकरोति-अवसादयति नाशयति वा ब्रह्मगमयति वेत्युपनिषच्छब्दव्युत्पत्त्या सफला ब्रह्मविद्योच्यते[6]। यद्वा उपः सामोप्येन विषयतया निः नितरां ब्रह्मस्वरूपं परमश्रेयोऽस्यां विद्यायां स्थितमित्युपनिषद्ब्रह्मविद्या। ग्रन्थे तु ब्रह्मविद्याप्रयोजकत्वाल्लक्षणयोपनिषच्छब्दप्रयोगः। एवं व्याख्येयस्य ग्रन्थस्य ब्रह्मविद्यार्थत्वोक्त्या मानान्तरानधिगतं ब्रह्म तस्य विषयः, तद्विद्याद्वारा मुक्तिः[7]।

१. वे. सा. पृ० ३

२. वे. द. वि. पृ० २

३. कृ. य. तै. आ. प्र. ७ अ. ३ सा. भा.

४. गौ. पा. का. मि. भू. पृ० १

५. क. उ. शा. भा. पृ० १२

६. ई. उ. भ. पु. व्या. पृ० २

७. उपेतिशब्दः सामीप्ये निशब्दो निर्णयार्थकः।
सदेर्विशरणार्थत्वमित्येपोपनिषद्भवेत् ॥
परमात्मनं सामीप्येन प्रत्यगभेदेन विषयीकृत्य निर्णयरूपा
अविद्यां शृणाति नाशयतीति निर्वचनमुपनिषच्छब्दे द्रष्टव्यम्। (ब्र. वि. भ. पृ० १३१)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वेदान्तनयभूषणनामकरणम्

तदेवं वेदान्तो नाम उपनिषत्प्रमाणशास्त्रम्। उपनिषदाञ्च तात्पर्यनिर्णायकानि ब्रह्मसूत्रादीनित-द्भाष्यतट्टीका इति वेदान्तशब्देनोच्यते, शास्त्रेऽस्मिन्भूषणभूतोऽयं ग्रन्थो वेदान्तनयभूषणनाम्नाभिधीयते। भूषणत्वञ्चास्य क्वचिद्विवरणात् क्वचित्संशयनिवृत्त्या, क्वचिदाक्षेपपरिहारेण। अत्र च ग्रन्थे प्रत्यधिकरणीभूतानु-पनिषन्मन्त्रान् पुरस्कृत्य तदनन्तरं संक्षेपेण विषयसंशयपूर्वपक्षोत्तरपक्षनिर्णयादिभिस्सज्जीकृतत्वाद्वेदान्तनयभूषणग्रन्थ-रत्नस्य नामधेयमन्वर्थम्। सूत्रभाष्यविवरणभामत्यादिसमस्तानामपि वेदान्तविवरणीभूतग्रन्थानामुपजीव्यं तावदुप-निषद एव सन्तीति। ग्रन्थकृदत्र प्रत्यधिकरणं मन्त्रवाक्यमुपन्यस्यानन्तरं सूत्रार्थन्यायानवतारयति, अतस्तात्पर्य-निर्णायकब्रह्मसूत्रादीनां वेदान्तानां[1] न्यायावतारणोऽयं वेदान्तनयभूषणग्रन्थो भूषणमिवास्तीति न संशयलेशः।

नयशब्दन्यायशब्दयोः पर्यायत्वम्

वेदान्तनयभूषणे प्रयुक्तनयशब्दस्य न्यायशब्दस्य च पर्यायत्वं प्रतिभाति। यद्यपि न्यायशास्त्रे प्रयुक्ताः प्रतिज्ञाहेतूदाहरणोपनयनिगमनरूपा न्याया अत्र न विवक्षिताः। परन्तु विषयः, विशयः, पूर्वपक्षः, उत्तरपक्षः, निर्णय इतिरूपा न्याया एव ग्रन्थकारसम्मताः। अत्र 'व्यवहारे भाट्टनय' इत्याभाणकस्य समर्थितत्वात्सर्वोऽपि व्यवहारः भाट्टनयानुसारेणैव प्रवर्तते। तदेव न्यायनययोरेकस्मिन्नेवार्थे पर्यवसायित्वात्पर्यायत्वमेवेति। अत एव नयशब्दस्थाने बहुषु स्थलेषु 'न्याय' इत्यपि पाठो दृश्यते। क्वचिच्च केवलं 'वेदान्तभूषणम्' इत्येव नामधेयं निर्दिष्टमस्ति। एषु स्थलेषु लिपिकानवधानाद्वा, अन्येन केनापि हेतुना वा भाव्यम्। यतो हि मूलग्रन्थे 'वेदान्तनय-भूषणम्' इत्येव नामधेयमुपलभ्यते।

ग्रन्थकर्तुः परिचयः

वेदान्तनयभूषणकाराः श्रीमत्स्वयम्प्रकाशानन्दसरस्वतीचरणा अप्रतिमशेमुषीभाज इति भूषणग्रन्थाव-लोकनादवगम्यते। यद्यपि निरन्तरसरस्वतीसाधनारतप्रखरलोकोत्तरवैदुष्यमासादितानां स्वामिपादानां नैकोऽपि ग्रन्थः प्रकाशितः। नापि कैश्चिद्विद्वद्भिः तेषां विशेषोल्लेखः कृतः। आधुनिकतमैर्विद्वद्भिरपि किमपि सङ्केतादिकं प्रायशो न दत्तम्। ईदृशः पाण्डित्यप्रकर्षवतः स्वयंज्योतिःस्वरूपस्य परिचयोऽपि दुर्लभ एव, तथापि वेदान्तनय-भूषणस्य स्वाध्यायमात्रेणेदमेव ज्ञायते यदनेनाद्वैतानन्दसरस्वतीभ्य आमूलचूलं शास्त्रमधीतमिति। अत एव च वेदान्तनयभूषणस्यान्तिमपुष्पिकायाम् 'अद्वैतानन्दगिरा लिखिते'ति लिखितम्। अन्यत्र च 'विस्तरस्त्वस्मद्गुरुकृत-ब्रह्मविद्यामरणे द्रष्टव्यम्' इत्यादिवचनसन्दर्भेण चावगम्यते गुरुरस्य ब्रह्मविद्याभरणकृदद्वैतानन्दः। ततश्चाधीत-विद्योऽयं स्वयम्प्रकाशानन्द इति।

वेदान्तनयभूषणस्य भाषा शैली च

वेदान्तनयभूषणस्य भाषा नाति कठिना नापि सरला परं 'भाष्यं प्रसन्नगम्भीरम्' (पं. पा. पृ० ६। इति वद्विषयगाम्भीर्याप्लाविता वर्तते। सरलेति न हेया, कठिनेति च न भेतव्या, परं दर्शनदृशां पथदर्शनपरेति। दुरूहेऽपि विषये सुबोधिनीयं भाषा, न क्वचिदपि तस्यां शब्ददारिद्र्यमनुभूयते। कठिनतरस्य दुरूहस्यापि प्रतिपाद्यस्य सरलया प्राञ्जलया च भाषया-ग्रन्थस्य हृदयं स्फुटीभवति। यद्यपि क्वचित्क्वचित्प्रयुज्यमाना नव्यन्यायशैल्यपि बहुष्वधिकरणेषु प्रवहति। यथा 'अनुगतपदार्थतावच्छेदकानिरुक्तिः स्वोपादानगोचरजन्यकृतिजन्यान्यत्वे सति समवेतत्वस्य पक्षतावच्छेदकत्वात्' (वे. न. भू. शा. यो. अ. पृ० ३१) इष्टसाधनत्वव्याप्यरजतत्ववत्ताज्ञानाभावेनेष्टसाधनत्वानु-मित्यभावेन रजतार्थिनस्तत्र प्रवृत्त्यनुपपत्तेः'। वे. न. भू जि. अ. पृ० १०।

---

१. वेदान्तवाक्यार्थनिर्णायकान्यधिकरणानि न्यायाः [वै. न्या. भा. पृ० १]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवं क्रमेण तदन्यत्वमारम्भणाधिकरणेऽपि ग्रन्थकर्त्रा विशेषरूपेण 'वाचारम्मणम्'। छा० ६।१।४। इत्यत्र श्रुतिस्वारस्यव्याख्यानप्रसङ्गे नव्यरीतिःसन्दर्शिता। यथा 'विच्छिन्नं सत्तादात्म्यापन्नं स्वप्रकारकप्रतीतिविशेष्यताव्यापकीभूतसंसर्गाभावप्रतियोगि दृश्यत्वात् घटवत्' इत्यादि। तदग्रतश्च पुनस्तदनुमानं संघटयन्नाहात्र प्रतियोगिता च प्रकारताघटकसम्बन्धेन प्रकारतावच्छेदकधर्मेण चावच्छिन्ना बोध्या। तेन सम्बन्धान्तरधर्मान्तरावच्छिन्नाभावमादाय नार्थान्तरम्; अभावश्चावच्छिन्नवृत्तिकान्यत्वेन विशेषणीयस्तेनाव्याप्यवृत्यभावमादाय नार्थान्तरम्, अन्योन्याभावमादायार्थान्तरवारणाय संसर्ग इति। वे. न. भू. पृ० ३७५। अन्यत्रापि च नैयायिकमतनिदर्शनपूर्वकमित्थमाह 'शुक्तौ समवायसम्बन्धेन रजतभ्रमे शुक्तेर्विशेष्यतासत्वेन तत्समानाधिकरण्यात्यन्ताभावस्य रजते सत्त्वादर्थान्तरवाराणाय सामानाधिकरण्यमपहाय व्यापकत्वानुधावनम्' निरूक्तप्रतियोगितावच्छेदकधर्मवत्त्वमपहाय तदवच्छिन्नप्रतियोगिताकत्वनिवेशश्च साध्याप्रसिद्धिवारणाय, रजतावयवनिष्ठरजतत्वेन घटाभावमादाय घट एव प्रसिद्धेः। व्यधिकरणधर्मावच्छिन्नाभावानभ्युपगमे तु शुक्तिरूप्यादिकमेव प्रसाध्यङ्गको दृष्टान्तः। एतदेव 'प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वं मिथ्यात्वं' वदन्ति। अ. सि. पं मि० पृ०। वे. न. भू पृ० ३७५।

क्वचिदन्यामपि शैलीमाश्रित्य व्यवहरति ग्रन्थकृत्। यथा नन्विदं रजतमिति ज्ञानं नैकं किंत्विदमित्यनुभवरूपं रजतमिति स्मरणरूपञ्चेति ज्ञानद्वयं दोषवशाच्चेदंरजतयोर्ज्ञानयोश्च भेदाग्रह, भेदाग्रह एव प्रवृतौ कारणम्। वे न. भू. पृ० ९ (अपि च 'श्रुतिर्लाक्षणिकेऽप्यर्थे सावकाशा' इति। वे. न भू. २। 'किञ्च पृथिव्याः प्रतिष्ठितत्वं मुख्यमेव सम्भवति, पृथिव्या अचलत्वाभ्युपगमात्, स्वर्गादीनाञ्ज्योतिश्चक्रारूढत्वेन चलत्वाभ्युपगमात्'। वे. न. भू. पृ० ६७। इति।

क्वचिल्लौकिकन्यायप्रयोगोऽपि दृश्यते। यथा 'न च स्थूलारून्धतीन्यायेन प्रधानव्युत्पादनमिहेति वाच्यम्, तथात्वे मुख्यारून्धतीव्युत्पादनायेतरेषां नक्षत्राणां त्यागवदिहापि प्रधानस्य त्यागोवत्यापत्तेः। वे न. भू. पृ० ५२। तत्र प्राणिरूढ्युन्मेषकस्य 'सर्वाणि वा इमानि भूतानि गायन्ति'। छा. १।११।७। इति। 'सर्वभूतानि जोवन्ति' इति च प्राणिप्रायः पाठस्य सत्वेन बालाक्यधिकरणन्यायानवतारेण भूतशब्दस्य प्राणिपरत्वावशेयः' वे. न. भू. पृ० १०५। तदेवं प्रसन्नगम्भीरा प्रमोदभरमेदुरा यथावसरञ्च शास्त्रविषयगाम्भीर्यानुसारम् लौकिकन्यायैर्नव्यन्यायशैलीप्रयोगेण च परिष्कृता वेदान्तनयभूषणस्य हृदयहारिणी भाषा न केषां मन आवर्जयेत्।

स्वयम्प्रकाशानन्दस्य विशिष्टा शैलीयमस्ति यत्सूत्राणामर्थस्फुटीकरणात्प्रागेव श्रुतिवाक्यमवतारयति। अनन्तरं तद्रीत्या सूत्रव्याख्यानं व्याचष्टे। एषा सरणिः न सूत्रव्याख्यानात्मकेषु ग्रन्थान्तरेषु दृश्यते। यत्र प्रबलप्रमाणद्वारा समर्थनं स्यात्तत्र लौकिकन्यायान्नप्यवतारयति। अत्र प्रतिसूत्रं व्याख्यान्न प्रवर्तते, अपितु प्रत्यधिकरणम्। अत्र प्रसङ्गे तस्य मौलिकी प्रतिभा सर्वत्र स्फुटीभवति। तद्यथा ब्रह्मण. स्वरूपकथने जिज्ञासाधिकरणे बहुभिर्बहुविस्तृतव्याख्यानं कृतम्। परन्तु वेदान्तनयभूषणकारेण 'अख्यातिः' 'अन्यथाख्यातिः' 'सत्ख्यातिः' इत्यादिपूर्वपक्षिविषयान्समालोचयता मितैरेव शब्दैर्ग्रन्थाशयो ग्रन्थरहस्यञ्च तथा विवृत यथा नान्यैरशक्यत। अत एव माधुर्यगुणसमन्विता सुग्राह्या शैली वेदान्ततत्त्वबुभुत्सूनां महते श्रेयसे कल्पते। अपरं वैशिष्ट्यमिदमस्ति यत्कारिकया पूर्वपक्षाशयमुद्भाव्य तज्जिज्ञासां शमयितुं पुनरपि कारिकामेवावतारयति। कारिकास्वपि स्वातन्त्र्येण कल्पना न कल्पिता, अपितु श्रुतिस्मृतीतिहासादिमानविलसिता एव कारिकाः प्रायशो नयनगोचरीभवन्ति। तस्मान्नात्यन्तसरला नात्यन्तकठिना, परमनेकन्यायमीमांसादिपरिकर्मिता सुरम्या शैली स्वयम्प्रकाशानन्दस्वामिनः।

स्वयम्प्रकाशानन्दस्य कालः

वेदान्तनयभूषणग्रन्तरत्नस्य निर्मातुस्स्वयम्प्रकाशानन्दस्य कालनिर्णयविषये सन्ति किल भूयस्यो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विप्रतिपत्तयः। समेऽपि गीर्वाणवाणीविलासचतुरा अत्र विषये नैकमत्यमावहन्ति। तथा च स्वर्गीय म० म० डा० गोपीनाथकविराजमहोदयेनैव विशेषरूपेण प्रस्तुतग्रन्थकार-स्वयम्प्रकाशानन्दविषये प्राचुर्य्येण 'काशी की सारस्वत-साधना' नामके लघुतमे पुस्तके। पृ० ६४। चर्चितम्। परं प्रत्यक्षाप्रत्यक्षरूपेण चर्चाविषयीभूतस्य ग्रन्थकारस्य नामनिर्देशेऽपि महती भ्रान्तिरिति निश्चप्रचं निगदितुं प्रभवामः।

तत्र कविराजैरित्थं प्रत्यपादि, स्वामिनस्स्वयम्प्रकाशानन्दस्य समय १६ तः १७ ई० संवत्सर इति। अयं[1] स्वयम्प्रकाशानन्दः काश्यामेव विद्वत्समाजे ख्यातिं लब्धवानिति। अयं खलु वेदान्तादिषट्शास्त्रनिष्णात आसीत्। अद्वैतानन्दस्य प्रधानतमः शिष्य आसीदिति। अनेन रत्नगिरिदीक्षितस्य पुत्रेण वैद्यनाथशास्त्रिणा विरचिते 'परिभाषार्थ-संग्रह' ग्रन्थे चन्द्रिकाटीका व्यरचि। अपरं ग्रन्थरत्नं तु 'वेदान्तनयभूषणं' कृष्णद्वैपायनविरचितब्रह्मसूत्राणामुपरि भाष्यरूपेण विराजते। स्वयम्प्रकाशानन्दस्य प्रधानः शिष्यः महादेववेदान्तीति प्रचुरो लोकवादः। महादेवाय वेदान्तीत्युपाधिस्स्वयं तद्गुरुणा स्वयम्प्रकाशानन्देनैव दत्त इति। महादेववेदान्तिनो विष्णुसहस्रनामके ग्रन्थे व्याख्या वर्तते। तत्रैव ग्रन्थसमाप्तौ पुष्पिकायां स्वग्रन्थसमाप्तिकालो निर्दिष्टः। तद्यथा

श्रीमत्स्वयम्प्रकाशाङ्घ्रिलब्धवेदान्तसम्पदः ।
महादेवो ऽकरोद्व्याख्यां विष्णुसहस्रनामगाम् ॥
खवाणमुनिभूमाने।१७५०। वत्सरे श्रीमुखाभिधे।
मार्गासिततृतीयायां नगरे चाप्यलङ्कृते (चाप्यलङ्कृते) [१] ॥

एतत्साक्षिकमेव प्रमाणं म० म० कविराजेनापि स्वीकृत्य 'महादेववेदान्ती ने १७५० या १६९३ में विष्णुसहस्रनाम पर टीका लिखो थी' इति प्रमाणितम्। डा० आद्याप्रसादमिश्रेणापि तन्मात्रप्रमाणकमुद्धरणमुपस्था-पयता उदयवीरशास्त्रिमतमालोचयता 'स्पष्ट है कि सं० १७५० अर्थात् सं० १६९३ ई० में महादेव वेदान्ती ने विष्णुसहस्रनाम व्याख्या समाप्त की। (सा० द० ऐ० प० पृ० ३१५), इत्यादि प्रतिपादितम्।

काञ्चीकामकोटिपीठतः १९७४ संवत्सरे प्रकाशितशाङ्करभाष्यभूमिकायां स्वयम्प्रकाशानन्दस्य परिचयोऽनेन प्रकारेण विवृतः। वेदान्तनयभूषणग्रन्थोऽयं सूत्रवृत्त्यात्मकः, अद्वैतानन्दसरस्वीनां शिष्यैस्स्वयम्प्रकाशानन्दैः विरचितः। ग्रन्थकृता स्वगुरुणा कृतस्य ग्रन्थस्य संग्रहों मया रच्यत इति प्रतिज्ञा कृता। अत एवायं ग्रन्थः ब्रह्मविद्याभरणसंग्रहः स्यादित्यपि वक्तुं शक्यते। अत एव संग्रहेण पद्ये विषयानुक्त्वा व्याख्यापि क्रियते। तत्र कालः क्रि १६०० मुद्रितः। तत्रैव च मूलभूतं लिखितपुस्तकं कुम्भकोणे शङ्कराचार्यमठे कलकत्तायां एशियाटिक सोसाइटीत्यत्रोपलभ्यत इत्यपि निर्दिष्टम्।

गौडपादकारिकासु 'मिताक्षरा' टीकाऽपि स्वयम्प्रकाशानन्दसरस्वत्या कृतेति श्रुतिपथमवतरति। कारिकान्तपुष्पिकायां स्वयमेव व्याख्याकारः व्याचष्टे 'इति श्रीगौडपादीयवृत्तौ श्रीमत्परमहंसपरिव्राजकाचार्य-स्वयम्प्रकाशानन्दसरस्वतीस्वामिकृतायां मिताक्षरायां चतुर्थप्रकरणम्' इति। एवञ्च म० म० गोपीनाथ-कविराजस्य १६-१७ मतं, तथा कामकोटिपीठात्प्रकाशितशाङ्करभाष्यभूमिकायामुद्धृतमतं स्वयम्प्रकाशानन्दस्य कालनिर्णये कथञ्चित्साम्यं भजते। परमेतावन्मात्रकालनिर्णयेन न सन्तोषभावहन्ति विद्वत्तल्लजानां हृदयानि।

१ (क) ब्रह्मविद्यामरणभूमिकायां 'ख—चिह्नितं श्रीस्वयम्प्रकाशानन्दतीर्थसंगृहीतात् गौरीमायूरपरिसरगतारयपुरस्थापितात् पुस्तकालयादाहृतं शुद्धसुविशदहस्तलेखञ्च ग्रन्थलिप्याम् तालपत्रे लिखितं समग्रम्। ब्र० वि० भ० भू० पृ० २।

(ख) अद्वैतग्रन्थकोषेऽपि प्रकाशक ज्ञानेन्द्रशर्मा जनवाणी प्रेस, पब्लिसर्स प्राइवेट लिमिटेड १७९ अपर चितपुर रोड, कलकत्तातः प्रकाशितः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आन्तरिकाणि प्रमाणानि

स्वयम्प्रकाशानन्दोऽद्वैतानन्दस्य शिष्य इत्यत्र किं विनिगमकमिति जिज्ञासायां स्वयम्प्रकाशानन्दविरचित-वेदान्तनयभूषणग्रन्थस्य कानिचिदुद्धरणानि प्रस्तूयन्ते ।

तत्र स्वयम्प्रकाशानन्देन स्वपरिकर्मितवेदान्तनयभूषणग्रन्थे बहुत्र स्वकीयस्य परमादरणीयस्याद्वैतानन्दस्य बहुमानपुरस्सरं नामधेयमुद्धृतम् । यथा

अधिकञ्चेह वक्तव्यं सूत्राणां योजनापि च ।
अस्मद्गुरुकृते भाष्यव्याख्याने दृश्यतां बुधैः ।।

(वे० न० भू० पृ० ८०)

अत्र 'भाष्यव्याख्यान' पदेन 'अद्वैतानन्दस्य' ब्रह्मविद्याभरणमेव विवक्षितम् । ब्रह्मविद्याभरणातिरिक्तं रत्नप्रभादिकमपि भाष्यव्याख्यानं भवितुं युक्तमिति न शङ्कनीयम् । अन्यत्र ग्रन्थकर्ता स्वयमेव 'अस्मद्गुरुकृतभाष्य-व्याख्याने ब्रह्मविद्याभरणे द्रष्टव्यम्' इति । वे० न० भू० पृ० ८६ । इत्याद्यभिधानात् । ततोऽप्यग्रे स्वपरिकर्मित-वचनप्रामाण्यमापादयितुमित्थमाचष्टे 'अधिकञ्चास्मद्गुरु कृतभाष्यव्याख्याने ब्रह्मविद्याभरणे व्यक्तम्' । वे० न० भू० पृ० २५५ । इति । अपि च यत्र ग्रन्थस्य हृदयं विस्तृतं प्रतिभाति, अथवा दूषणान्तरोद्भावने नहि किमपि नावीन्यप्राविण्यमादधाति तत्रापि 'ब्रह्मविद्याभरण एव दूषितानि विस्तरभयान्नेह लिख्यते' वे० न० भू० पृ० ३७१ । इति स्पष्टोक्तिप्रदर्शनेन ग्रन्थकारः सहृदयः प्रतिभाति । ग्रन्थान्ते चैकां पुष्पिकां ग्रन्थकारः प्रत्यपर्यात । सा चैवम्

श्रीमत्स्वयम्प्रकाशानन्दगिरां पादपङ्कजाश्रितया ।
[1]अद्वैतानन्दगिरालिखित तत्कृतिरभीष्टमातनुताम् ।। इति

अन्यत्र च 'इति श्रीपरमहंसपरिव्राजकाचार्य्यसर्वतन्त्रस्वतन्त्र-श्रीमदद्वैतानन्दसरस्वतीचरणारविन्दभृङ्गायमानस्य स्वयम्प्रकाशानन्दस्य कृतिषु वेदान्तनयभूषणे चतुर्थाध्यायस्य चतुर्थपादस्समाप्तः' इति 'वे० न० भू० ४१४' पुष्पिकायां परिकर्मितम् । एभिस्सुदृढैर्ग्रन्थहार्दसञ्चितमानैर्निश्चितं किल स्वयम्प्रकाशानन्दोऽद्वैतानन्दस्य' शिष्य इति ।

अपि च । १५५०-१६६२ ई० । अप्पयदीक्षितकृतस्य 'सिद्धान्तलेशसंग्रह' ग्रन्थस्य व्याख्याकारोऽच्युत-कृष्णानन्दतीर्थः । तस्य गुरुः स्वयम्प्रकाशानन्दसरस्वतीतिमङ्गलपुष्पिकातोऽवगम्यते । यथा

यो मे विश्वेश्वरक्षेत्रं विश्वेश्वरसमो गुरुः ।
समध्यास्ते स्वमञ्ज्योतिवणीसञ्ज्ञो भजामि तम् ।।

---

१. अत्र कारिकायां ग्रन्थकर्तुः स्वयम्प्रकाशानन्दस्वामिनोऽभिधानपदात्पूर्वं विशेषणीभूतं श्रीमत्पदं, 'लिखिता' क्रियायाः कर्तृ-भूतस्याद्वैतानन्दपदस्य निर्विशेषणत्वञ्चावलोक्य गिरां पादपङ्कजाश्रित इत्यवलोकनेन चैवं प्रतिभाति यदद्वैतानन्दोऽयं स्वयम्प्रकाशानन्दस्वामिनः शिष्यः । अन्यत्र च प्रत्यध्यायं पुष्पिकासु 'अद्वैतानन्दसरस्वतीचरणारविन्दभृङ्गायमानस्य' पदावलोकनेन विपरीततया प्रतिभाति । तस्य सङ्गतिश्चेत्थम् श्रीमतः स्वयम्प्रकाशानन्दस्य गुरव अद्वैतानन्दसरस्वती-स्वामिनः । तच्छिष्यश्चापि-अद्वैतानन्दः । ग्रन्थश्चायं स्वयम्प्रकाशानन्दस्वामिमुखारविन्दादुच्चारितः शिष्येणाद्वैतानन्देन च लिपिबद्धः कृत इति प्रतिभाति । 'गीः' शब्दश्चात्र सन्यासिनो देहेऽनासक्त्या कर्तृत्वेन विवक्षितः । सरस्वतीपर्यायभूतो वा 'गीः' शब्दः सन्यासिनां शाखाविशेषं सूचयतीति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यस्य शिष्यप्रशिष्याद्यैः व्याप्तें साम्प्रतं मही ।
सर्वज्ञस्य गुरोस्तस्य चरणौ संश्रये सदा ॥
गुरोरपि गरीयान्मे यः कलाभिरलङ्कृतः ।
अद्वैतानन्दवाण्याख्यास्तं वन्दे शर्मवारिधिम् ॥

(सि० ले० क्रु० व्या० १)

अत्राच्युतकृष्णानन्दतीर्थेन गुरोः परमगुरोश्चापि नामधेयं गृहीतम्। वाणीसञ्ज्ञः पदेन स्वयञ्ज्योतिः पदेन च स्वयम्प्रकाशानन्दस्य सरस्वत्युपाधिसङ्केतः। 'शर्मवारिधि' 'अद्वैतानन्द' पदेन च परमगुरोरद्वैतानन्दस्य मङ्गलात्मकं नामधेयं परिगणितमिति प्रतिभाति। अत एव तु 'गुरोरपि गरीयान्' पदसङ्गतीकरणं जायते। ग्रन्थान्तिमपुष्पिकायाञ्च 'इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमत्स्वयम्प्रकाशानन्दसरस्वतीशिष्यश्रीचरणारविन्दसल्लग्नरजोभूतस्याच्युतकृष्णानन्दतीर्थस्य कृतौ शास्त्रसिद्धान्तलेशसंग्रहव्याख्यायां कृष्णालङ्कारव्याख्यायाञ्चतुर्थः परिच्छेदः समाप्तः' इति लिखितम्। अनेन प्रमाणेन पूर्वनिर्दिष्टा स्वयम्प्रकाशानन्दस्य गुरुशिष्यपरम्परा सुपुष्टा भवति। अत्रेयं विप्रतिपत्तिर्जगर्ति यद्गुरोर्नामान्ते सरस्वतीपदमस्ति[1]शिष्यस्य नाम्नान्ते तीर्थान्तपदमिति कथं तयोर्गुरुशिष्यभावस्संगच्छते ? परं तस्येत्थं समाधानं भवितुमर्हति। अच्युतकृष्णानन्दस्य दीक्षागुरु तीर्थास्पद इति नामान्ततीर्थपदेन ज्ञायते। विद्यागुरुस्स्वयम्प्रकाशानन्द इति। यस्मिन्कस्मिन्नपि साधुसम्प्रदाये सम्प्रदायानुसारेणैव नामकरणं दृश्यते श्रूयते च। तदेवं स्वयम्प्रकाशानन्दसरस्वतीशिष्यः 'अच्युतकृष्णानन्दतीर्थः' इत्यास्पदभेदे क्रमशो गुरुशिष्यभावो विरुद्ध एव प्रतीयते। प्रकृते चाच्युतकृष्णानन्दतीर्थेनाप्ययदीक्षितस्य ग्रन्थे व्याख्यानं कृतम्। दीक्षितस्य '१५५० तः १६६२ ई०' समयःपुरावृत्तविदाम्वरेण निर्दिष्टः। अतो दीक्षितानन्तरमेव स्वयम्प्रकाशानदस्य समय इति।

अपि च मिथ्यात्वलक्षणनिरूपणे "प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वं मिथ्यात्वमिति लक्षणम् 'अ. सि. पृ० २९' वर्तते। परं नेदं लक्षणमद्वैतसिद्धिकारस्य। एतल्लक्षणमाद्यशङ्कराचार्य्यस्य साक्षाच्छिष्येण पद्मपादाचार्येण कृतायां पञ्चपादिकाव्याख्यायां प्रकाशात्मयतिकृत 'विवरणे' दृश्यते। परं तत्र 'प्रतिपन्नोपाधावभावप्रतियोगित्वम्' 'पं. पा. वि. पृ० १७४' इत्याकारकं लक्षणं दृश्यते। इदमेव लक्षणं वेदान्तदेशिकविरचितशतदूषण्यां दृश्यत्वानुमाननिरासवादे 'प्रतिपन्नोपाधौ निषेधप्रतियोगित्वं बाध्यत्वम्' 'श. दू. पृ० ८०' समुल्लिखितम्। तथा च विवरणे 'अभाव' पदं शतदूषण्याञ्च 'निषेध' पदं, तेन तयोः प्रायशः पर्यायवाचित्वमेव प्रतीयते। परन्तु व्यासतीर्थस्य 'न्यायामृत' 'प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्व'। न्या. मृ. पृ० २८। मित्थं परिष्कृतम्। पूर्वापेक्षया लक्षणेऽस्मिन् 'त्रैकालिक' पदमधिकं दृश्यते। मधुसूदनसरस्वतीभिर्लक्षणमिदं यथावदद्वैतसिद्धौ अ. सि. पृ० २१। समुट्टङ्कितम्। इदमेव लक्षणं वेदन्तनयभूषणकाराः स्वयम्प्रकाशानन्दस्वामिनः तदन्यत्वमा-

---

१. (क) इति श्रीस्वयम्प्रकाशानन्दतीर्थाङ्घ्रिलब्धवेदान्तिसत्पदेन महादेवेन विरचिते सांख्यप्रवचनसूत्रवृत्तिसारे तन्त्राध्यायः षष्ठः समाप्तः 'इति वृतिसारपुष्पिकातोऽवगम्यतेस्वयम्प्रकाशानन्दोऽपि तीर्थनामासीदिति। सां० सू० वृ० छा० प०।

(ख) परं तत्त्वानुसन्धानपुष्पिकायान्तु 'इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमत्स्वयम्प्रकाशानन्दसरस्वतीपूज्यपादशिष्यभगवन्महादेवसरस्वतीमुनिविरचिते तत्त्वानुसन्धाने चतुर्थः परिच्छेदः' । त० सं० ४ प० पृ० ४२०।

(ग) अद्वैतचिन्ताकौस्तुभेऽपि 'इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत्स्वयम्प्रकाशानन्दसरस्वतीपूज्यपादशिष्यभगवन्महादेवानन्दसरस्वतीमुनिविरचिते तत्त्वानुसन्धानव्याख्यानेऽद्वैतचिन्ताकौस्तुभे चतुर्थः परिच्छेदः'। अ०चि०कौ० ४ प० पृ०४२१। इति लिखितम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रम्मणाधिकरणे प्रपञ्चमिथ्यात्वानुमानं पुरस्कृत्य तदैव 'प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वं' मिथ्यात्वमिति वदन्ति'। वे. न. भू. पृ० ३७५। इत्याद्यविकलमुद्धरन्ति। पुनस्तावदनुपदमेवापरं मिथ्यात्वलक्षणं परिष्कृतम्। यद्यपि सर्वस्य प्रपञ्चस्य मिथ्यात्वमारम्मणाधिकरण उक्तम्"""इत्युक्त्वा' स्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वरूपमिथ्यात्वम्'। वे. न. भू. ३।२।१। इति स्थापितम्। इदञ्च लक्षणं माध्वकुलभूषणव्यासतीर्थस्यांशित्वहेतुविचारे 'न्या. मृ. पृ० ८७' ग्रन्थे दृग्गोचरीभवति। अतः षोडशशताब्दीकात् व्यासतीर्थादर्वाचीनः स्वयंप्रकाशानन्दः सिध्यति।

अपि च स्वयम्प्रकाशानन्दस्य शिष्यो महादेववेदान्तीति स्वगुरोरपेक्षया दर्शनजगति प्रसिद्धः। अनेन विष्णुसहस्रनामकस्तोत्रग्रन्थे टीका व्यरचि। तस्याः टीकायास्समाप्तिपुष्पिकायां सश्रद्धं स्वगुरोर्नामोल्लेखपुरस्सरं ग्रन्थसमापनसंवत्सरोऽपि निर्दिष्टः। तत्र 'श्रीमत्स्वयम्प्रकाशाङ्घ्रिलब्धवेदान्तसम्पदः' इत्युक्त्वा 'खवाणमुनिभूमान' इति ज्योतिर्विदाङ्कसङ्केतमानेनायं। १७५०। समयः सिध्यति। तदेवं महादेववेदान्त्युट्टङ्कितमितसंवत्सर एव स्वयम्प्रकाशानन्दस्य कालनिर्णये प्रामाण्यं भजत इति मन्यामहे। तथाच म. म. गोपीनाथकविराजोऽपि स्वयम्प्रकाशानन्दस्य स्थितिं षोडशसप्तदशकयोरन्तरे मनुते[1]। एञ्च बहुविधबाह्याभ्यन्तरयुक्तिप्रमाणैश्च परीक्षितस्य स्वयम्प्रकाशानन्दस्य कालनिर्णये तस्यैव शिष्यमहादेववेदान्तिनः प्रस्तुतवन्तः।

जन्मस्थानम्

वेदान्तादर्शभूतस्य वेदान्तनयभूषणग्रन्थरत्नस्य निर्मातुस्स्वम्प्रकाशानन्दस्य जनिभूविषये महतायासेनाऽस्माभिरनुसन्धीयमानेऽपि न किंचिदपि सन्तोषकरं सामग्रीजातं लब्धम्। केवलमच्युतकृष्णानन्दतीर्थप्रणीतकृष्णालङ्कारव्याख्याया मङ्गलपुष्पिकायां यल्लब्धं तदेव सन्तोषावहत्वेनोपाह्रियते। तद्यथा

> यो मे विश्वेश्वरक्षेत्रं विश्वेश्वरसमो गुरुः
> समध्यास्ते स्वयञ्ज्योतिर्वाणीसञ्ज्ञो भजामि तम्। कृ. अ. व्या. पृ० १।

एतया पुष्पिकया निश्चीयते यत्स्वयम्प्रकाशानन्दस्य विद्याध्ययनाध्यापनक्षेत्रं विश्वेश्वरक्षेत्रङ्काशीति। परमत्र विषये जनिभूः कुत्रासीदिति निर्णयविषयाशाप्रत्याशादविष्ठायितेति। तथापि 'समध्यास्ते' इत्यनेन पदेनापि विश्वेश्वरक्षेत्रे जनिं लेभ इति निश्चप्रचं निगदितुं प्रभवामः। अत्र विषये म. म. गोपीनाथकविराजेन काशीवास्तव्य इति प्रतिपादितम्। तद्विषये नानाविधयुक्तिप्रमाणनिचयादिकन्तु न विशेषितम्। तथापि सामान्यविशेषोहापोहकरणसामर्थेन चर्चितम्। अतस्साम्प्रतं पद्येनानेनैव प्रमाणयितव्यमस्ति यत्स्वयम्प्रकाशानन्दः काशीवासीति।

तत्कर्तृका अन्ये ग्रन्थाः

श्रीमत्स्वयम्प्रकाशानन्दविरचितग्रन्थेषु सम्पाद्यमानस्यास्य वेदान्तनयभूषणस्यैव केवलं क्वचित्कचिच्छ्रूयते नामोल्लेखो ग्रन्थसूचीषु। अस्यापि ग्रन्थान्तरेषूद्धरणन्त्वस्माभिर्न लब्धम्। एतद्विरचितमितरद्ग्रन्थद्वयं परिभाषार्थसंग्रहचन्द्रिका, मिताक्षरा (गौडपादीयकारिकासु व्याख्या) चापि वरीवर्ति। एषु वेदान्तनयभूषणं सर्वातिशायित्वेन राजानति। अयं ग्रन्थो महर्षिव्यासनिर्मितब्रह्मसूत्राणां गभीरावर्तभावपरिस्फोरणे क्षमः।

---

१. स्वयम्प्रकाशानन्द का नाम भी उस समय के काशीस्थ सन्यासियों में प्रतिद्ध था। ये अद्वैतानन्द के शिष्य थे। न्होंने परिभाषार्थसंग्रहचन्द्रिका तथा वेदान्तनयभूषण इन दोनों ग्रन्थों की रचना की थी। इनमें प्रथम ग्रन्थ रत्नगिरिदीक्षित के पुत्र वैद्यनाथ शास्त्री रचित परिभाषार्थसंग्रह की टीका तथा द्वितीय ग्रन्थ ब्रह्मसूत्र भाष्यरूप हैं। इसका नामान्तर है वेदान्तभूषण, इनके प्रधान शिष्य थे वेदान्ती महादेव। इन्होंने विष्णुसहस्रनाम पर टीका रची थी। जिसकी समाप्ति १७५० वि. या. १६९३ ई० में हुई थी। का. सा. सा. पृ० ६४ मे. म. म. गो. कविराज।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वितीयग्रन्थस्तु रत्नगिरिदीक्षितस्य पुत्रेण वैद्यनाथशास्त्रिणा विरचिते 'परिभाषार्थसंग्रह' नामकग्रन्थे 'चन्द्रिका' व्याख्या वर्त्तते। अस्य ग्रन्थस्य पूर्णनाम 'परिभाषार्थसंग्रहचन्द्रिका' इति बहुषु सूचीपत्रेषु दृश्यते। व्याकरणविषयकोऽयं ग्रन्थः प्रतिभाति। तथापि आफ्रेटमहाशयेन विरचिते ग्रन्थसूचीनिबन्धे वैद्यनाथशास्त्रिविरचित 'परिभाषार्थसंग्रहः' वेदान्त[1]विषयको निर्दिष्टः। किन्तु 'त्रिवेन्द्रम्' ग्रन्थसूचीनिबन्धे चाद्यन्तपाठक्रमनिर्देशाद्[2] व्याकरणस्यैव प्रतिभाति। इयञ्चन्द्रिकाव्याख्या भृशं तत्तंदिवमन्विष्यमाणाऽपि भारतीयमातृकालयेषु मया न लब्धा। किन्तु सा 'चन्द्रिका' 'इंगलेण्डनगरे' भारतीपुस्तकालये दक्षिणभारतीयमणिप्रवालाक्षरैर्लिखिता विराजत एतावज्ज्ञातम्। अत एव कस्य व्याकरणस्य वेदान्तस्य वा ग्रन्थस्य परिभाषार्थसंग्रहस्योपरि 'चन्द्रिका' चन्द्रिकायितेति निश्चेतुमशक्यम्। केवलमेतावदेव सुदृढतरं वक्तुं शक्यते यत्स्वयम्प्रकाशानन्दस्य 'परिभाषार्थसंग्रहचन्द्रिका' ग्रन्थः वर्तत इति।

तृतीयो ग्रन्थः 'मिताक्षारा' वर्त्तते। अयमपि न स्वतन्त्रो ग्रन्थः, परमजातवादस्य प्रथमाचार्यस्य भगवच्छङ्कराचार्यपादस्य परमगुरुगौडपादाचार्यस्य माण्डुक्यकारिकासु 'व्याख्या' वर्त्तते। एकैककारिकाया नातिव्यास समासेनापि मध्यमणिन्यायेनेयं व्याख्या कृता दृश्यते। व्याख्येयं कारिकाभिप्रायव्यक्तीकरणे सफला मिताक्षारा च। मिताक्षाराव्याख्याया अन्तिम 'अलात' प्रकरणे 'इति श्रीगौडपादीयवार्तिकवृत्तौ श्रीमत्परमहंसपरिव्राजकाचार्यस्वयम्प्रकाशानन्दसरस्वतीस्वामिकृतायां मिताक्षरायाश्चतुर्थप्रकरणम्' इति लिखितम्। अस्यां पुष्पिकायामिदन्नामविषयकं वैलक्षण्यं प्रतिभाति। तदिदं यदियं सरस्वतीस्वामिकृता' इति निर्दिष्टा। अत्र वेदान्तनयभूषण इव स्वगुरुपरम्परादि 'अद्वैतानन्दसरस्वती' इत्यादि न किमपि निर्दिशति। ग्रन्थव्याख्यानशैली च क्वचित्सादृश्यं भजते क्वचिच्च वैपरीत्यम्, तथा सत्यपि व्याख्येयं स्वयम्प्रकाशानन्दस्वामिकृतेति निर्देशात्तेनैव विदुषा रचितोऽयं ग्रन्थः

1. Paribha̅sa̅rth Sangrah. Veda̅nta opport T T, 2256 by Vaidyanath Shastrin oppert T T 6328, 10048, "theodor dufrecht, Catalogus Catologasum".
2. A Descriptine Catalogue of the Sanskrit Manuscripts in H. H. the Maharayaak's Palace library Trivandrum

परिभाषार्थसंग्रहः

प्रणम्य परमं देवं भवानीपतिमव्ययम्।
क्रियते वैद्यनाथेन परिभाषार्थसंग्रहः ॥

व्याख्यानतो विशेषप्रतिसत्तिर्नहि सन्देहादलक्षणम्। व्याख्यानतः व्याख्यानात् हेतुः पञ्चम्यन्ताद् 'आद्यादित्वात्' तसिः। प्रतिपत्तिशब्दोऽवयववाची। तथाचायमर्थः

'सुप्तिङन्तं पदमि' त्यत्र प्रत्ययग्रहणपरिभाषया लब्धमन्तग्रहणम्। ननु संज्ञाविधौ प्रत्ययग्रहणवचनाप्रवृत्ताविह सत्यपि अन्तग्रहणे सुबन्तमात्रग्रहणापत्या वाक्यस्यापि पदत्वं स्यात्, न यस्मादिति सूत्रानुवृत्या समाधानाददोषः।

इति श्रीरत्नगिरिदीक्षितपुत्रवैद्यनाथशास्त्रिणः कृतो परिभाषार्थसंग्रहे 'परिभाषार्थसंग्रहव्याख्या'

नन्विति, यस्मात्प्रत्ययविधिरिति सूत्रात् तदाद्यन्तमनुवर्त्य यस्मात्स्वादिप्रत्ययविधिः तदादि-तदन्तस्यैव समुदायस्य पदसञ्ज्ञा नान्यस्येति। यस्मादिति। सूत्रानुवृत्येति। इति श्रीमत्परमहंसपरिव्राजकाचार्यस्वयम्प्रकाशयतीन्द्रविरचितायां परिभाषार्थसंग्रहव्याख्यायां प्रथमाध्यायस्य चतुर्थः पादः समाप्तश्चाध्यायः। भगवन्नीलकण्ठपादाम्भोजैकरसिकमनस्कोऽहं भवानि। श्रीपद्मनाभाय परमगुरवे नम। परिभाषार्थसंग्रहव्याख्यानं सम्पूर्णम्।
श्रीमते पद्मनाभाय नमः पद्मायै नमः शुभमस्तु हरिःओम् इति लिखितम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति विरोधाभावात्स्वीकार्यमेव। यद्यपि वेदान्तनयभूषणस्य पुष्पिकायां 'स्वयम्प्रकाशानन्दस्य कृतिषु' लिखितत्वाद्वेदान्तनयभूषणग्रन्थलेखनात्पूर्वमेव लेखकेनानेके ग्रन्था विरचिता इति प्रतीमः। यतो हि 'कृतौ' इति वक्तव्ये 'कृतिषु' इति निर्देशो बहुग्रन्थनिर्मातृत्वं सूचयति।

स्वयम्प्रकाशानन्दस्वामिप्रणीतोऽयं वेदान्तनयभूषणन्नाम ग्रन्थो वेदान्तशास्त्रमेव सुभूषयितुम्प्रावर्त्तत इति ग्रन्थनामत एव सुतरां व्यज्यते। अत्र ग्रन्थे सुविचारितानामर्थानां विवरणात् प्राक् वेदान्तशास्त्रे विशिष्य विचारणीयानां विषयाणां विवरणं नाप्रासङ्गिकं भवेदिति तत्र सुविचारिताः स्वीकृता वा केचित् सिद्धान्ताः प्रसङ्गतः प्रस्तूयन्ते।

अध्यासः

'तदभाववति तद्वत्ताज्ञानमध्यास' इति जिज्ञासाधिकरणे वेदान्तनयभूषणकारस्तल्लक्षणमुपचिक्षेप। तच्च रजतत्वाभाववति रजतत्वप्रकारकज्ञानमित्यर्थः। भगवता भाष्यकृता उपक्रमेऽध्यासो न सम्भवतीत्याक्षेपपूर्वकं समाधानमुक्तम्। तत्र च 'स्मृतिरूपः परत्र पूर्वदृष्टावभासः' इत्यध्यासलक्षणम्। यद्यप्यत्र लक्षणवाक्येऽध्यासपदन्न श्रूयते तथापि पूर्वपक्षे स्थितमध्यासपदमत्रानुसञ्जनीयम्। अत्राध्यास इति लक्ष्य निर्देशः, अवशिष्टन्तु लणणं ज्ञातव्यम्। अत्र भामतीपतिभिर्लघुलक्षणं गुरुलक्षणञ्चेति द्विधा लक्षणं कृतम्। अवसन्नो भासोऽवभासः, अवमतो भासो वा अवभास इति। अत्रावसादः प्रत्ययान्तरेण बाधः, अर्थादधिष्ठानतत्त्वसाक्षात्कारेण निवृत्तिरवसादः, इति। अवमानस्य यौक्तिकज्ञानेनाप्रामाणिकत्वं बोध्यते। तथा च तदभाववति तत्प्रकारकज्ञानमिति फलितार्थः। तथाविधज्ञानीयप्रकारताश्रयत्वमर्थाध्यासस्य लक्षणम्। अत एवाध्यासशब्दोऽद्वैतवेदान्तनिष्णातैर्ज्ञाने चार्थे च प्रयुज्यते। अध्यासलक्षणे विद्यमानावभासपदेनैव लक्षणलाभात् पदान्तरवैर्थ्यं नाशङ्कनीयम्। संक्षिप्तविस्तृतलक्षणद्वयमेव जिज्ञासूनां प्रतिपत्तिसौकर्याय प्रतिपिपादयिषितम्। संक्षिप्तलक्षणे यौगिकेऽवभासपदेन लभ्यमाने विशेषणान्तरविरहेण तद्वैयर्थ्यशङ्कैव नोदेति। अस्य लघुत्वञ्चावभास इत्येकपदलभ्यत्वेन, अत एवोक्तं 'सकृच्च्युतपदार्थस्य द्वयक्लृप्तिर्न दुष्यति' इति। विस्तृतलक्षणञ्च पूर्वदृष्टस्य परत्रावभास' इति। अत्र परत्र शब्देनाधिष्ठानमुपस्थाप्यते। अत्र भाष्यकृतां हार्दाभिप्रायस्फुटीकरणचतुरैः मिश्रैर्विषयशब्दो विशेष्यार्थकस्तथा-अधिष्ठानपर्यवसायीति प्रतिपादितम्। आरोपविषये-आरोपणीयमिति सप्तमीसमासः, तस्याश्च वृत्तिमत्त्वमर्थः, तथाचाधिष्ठाननिष्ठं यदारोपणीयं तस्याधिष्ठानेन समं मिथुनीभावं विना न सम्भवति। एवञ्च मिथुनीकरणस्याध्यासोपपादकत्वं सम्भवति। एवञ्च परमार्थे सति 'अनृतस्य' आरोपणमध्यास इति। अत्र 'परत्रावभास' इत्येतावन्मात्रोक्तौ प्रत्यभिज्ञायामतिव्याप्तिः। तस्य निराकरणं 'स्मृतिरूप' पदेन क्रियते। एवं सत्यपसिद्धान्तापत्तिरित्याशंक्य समाहितमधिष्ठानसत्ताविषमसत्ताकविषयावभासकत्वमिति लक्षणं पर्यवस्यति।

'स्मृतिरूप' इत्यनेनासन्निहितविषयत्वमित्यर्थकरणेनापि प्रत्यभिज्ञायां दोषवारणं भवति। तथाप्यपसिद्धान्तवारणायेदृशं लक्षणं कृतम्। अस्य लक्षणस्य चिदात्मन्यधिष्ठानासमसत्ताकशरीरेन्द्रियाद्यध्यासोऽस्तीति समन्वयो भवति। ननु स्वप्नज्ञानादौ नातिव्याप्तिः, तत्रापि स्मर्यमाणे पित्रादौ निद्रादिदोषवशादसन्निधानापरामर्शे पूर्वदृष्टस्यैव सन्निहितदेशकालस्यैवारोप इति नातिव्याप्तिः, एवं पीतः शंखः, तिक्तो गुड इत्यादावपि लक्षणसमन्वयो द्रष्टव्यः। अत एव वेदान्तनयभूषणकारैः स्वयम्प्रकाशानन्दसरस्वतीपादैः 'तदभाववति तद्वत्ताज्ञान' मित्यध्यासलक्षणमुपपादितम्। अत एव शुक्तिकायामिदं रजतमिति ज्ञानं, तत्र हि शुक्तिकायान्न रजतमस्ति, अथ च प्रतीयते, प्रतीयमानं तद्रजतं दोषादिसहकृतं शुक्त्यवच्छिन्नचैतन्याज्ञानपरिणामोऽनिर्वाच्यः स तु देशान्तरस्थम् 'वे. न. भू. जि. अ पृ० ८' इत्यध्यासमूलं सङ्गच्छते! एवञ्च वेदान्तविद्भिरध्यासस्य त्रीणि कारणानि प्रदर्शितानि। तत्र प्रथमं धर्मिसामान्यज्ञानं, प्रमेयप्रमाणप्रमातृदोषाः, आरोप्यसजातीयवस्तुसंस्कारश्च। एतददोष-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रयमेव 'अध्यासस्य' कारणमिति। यदि धर्मिणः सामान्यतया ज्ञानन्न स्यात्तदा विशेषज्ञानासम्भवः। अत एव जिज्ञासाधिकरणे जिज्ञासितं ब्रह्मतत्त्वमपि जिज्ञासाविषयतामापद्यते। अन्यथा कस्य किमर्थं जिज्ञासा, सर्वगतत्वाद्ब्रह्मणः। एवञ्चाध्यस्तस्याधिष्ठानसदृशता प्रमेयदोषः इत्युच्यते। आत्मानात्मनोः सादृश्यस्योपपादनं वस्तुत्वस्यान्तरत्वं धर्मद्वारा प्रतिपद्यते। आत्मनि वास्तविकवस्तुत्वमस्ति, अनात्मनि च कल्पितं वस्तुत्वम्, अनयैव दिशा देहादिपञ्चकोषेषु सापेक्ष्यान्तरत्वम्, आत्मनि च निरपेक्ष्यान्तरत्वमुपपद्यते। प्रमातृदोषस्त्वन्तःकरणगताज्ञानस्य विक्षेपशक्त्या विद्यमानः प्रारब्धरूपसंस्कार एव स्वीक्रियते। तच्चागामिसञ्चितप्रारब्धकर्मफलभोगी जीवात्मा, अहङ्कारास्पदीभूतः साक्षादुपतिष्ठते। प्रमाणदोषस्त्वविद्यैवेति वेदान्तवित्सम्मतम्। तथा ह्यात्मन्यपरं किमपि प्रमाणं नास्तीति कृत्वा स्वरूपमेव प्रमाणमूरीक्रियते। अतः स्वरूपस्थाविद्यैव प्रमाणदोष इति।

एवञ्च कारणत्रितयजन्योऽध्यासो दृश्यमानप्रपञ्चजातस्य मूलकारणत्वेनावतिष्ठते। वस्तुतोऽयमध्यासः कर्तृत्वभोक्तृत्वप्रवर्तकलोकव्यवहारहेतुभूतः। अत एव 'एवमनाद्यनन्तो नैसर्गिकोऽध्यासः मिथ्याप्रत्ययरूपः कर्तृत्वभोक्तृत्वप्रवर्तकः सर्वलोकप्रत्यक्षः। अस्यानर्थहेतोः प्रहाणाय, आत्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभन्ते। (ब्र. सू. शां. भा. पृ० १८) इत्युपोद्घातभाष्यमपि सङ्गच्छते। तथा च भाष्यकृतां भाष्यमनुगच्छन्नध्यासबलेनैव सकलनयनगोचरीभूतः प्रमाणप्रमेयरूपलोकव्यवहार उपपद्यत इति। एवञ्च सर्वलोककारणीभूतोऽध्यास एक एव, तथापि ज्ञानाध्यासार्थाध्यासभेदेन द्विधा विभज्यते। तत्र ज्ञानाध्यासस्यैवापरनाम स्वरूपाध्यास इति। तत्रार्थाध्यासस्य षड्भेदाः प्रदर्शिताः। तथा हि

१—देहस्य मनोहरगौरत्वादीन्द्रियाणाञ्च काणत्वबधिरत्वखञ्जत्वादिधर्माणामात्मन्यध्यासो धर्माध्यास इति।

२—कर्तृत्वभोक्तृत्वादिधर्मावच्छिन्नान्तःकरणधर्मिण आत्मन्यध्यासः धर्मसहितधर्म्यध्यासः।

३—शरीरादावात्मनः तादात्म्यरूपसम्बन्धः सम्बन्धाध्यासः।

४—सम्बन्धसहितस्य शरीराद्यनात्मपदार्थस्यात्मन्यध्यासः सम्बन्धसहितसम्बन्ध्यध्यासः।

५—आत्मनि-अनात्मपदार्थरूपस्याध्यासोऽनात्मनि चात्मनोऽध्यासोऽन्यतराध्यासः।

६—लोहानलवदात्मानात्मनोः परस्पराध्यासोऽन्योन्याध्यासः।

एवञ्चाध्यासस्य कारणानि विविधानि चोपपाद्य वेदान्तशास्त्रेषु 'अध्यासस्य' प्रसिद्धोदाहरणानि यथा-स्वप्नः, माया, गन्धर्वनगरम्, शुक्तिरजतम्, मनोराज्यम्, प्रतिबिम्ब, इत्याद्युदाहरणानि सन्ति।

अवच्छेदवादः

अद्वैतवेदान्तेषु प्रातिभासिकस्य जगतः व्याख्यानप्रसङ्गे पक्षद्वयं प्राधान्येन स्वीक्रियते। भामतीकर्तुरवच्छेदवादविवरणकारस्य बिम्बप्रतिबिम्बवादश्च। तत्र भामतीकारस्यायं भावः, मूर्तरूपवद् द्रव्यं रूपवतो द्रव्यान्तरस्य प्रतिबिम्बं गृह्णाति, यथादर्शे मुखं प्रतिबिम्बते, यथा जपाकुसुमगतं लौहित्यं स्फटिके भासते, एवं यद्यात्मा रूपवान् स्यात्तदा तस्यात्मनः प्रतिबिम्बो भवतीति वक्तुं शक्यते। परन्त्वात्मा रूपादिरहित इति श्रुतिषु प्रतिपाद्यते। यथा 'अशब्दमस्पर्शमरूपमव्ययम्'। क. उ. १।३।१५। इत्यादि। एवं 'न सन्दृशे तिष्ठति रूपमस्य' (क. उ. छ २।३।९। इति च। अतो नीरूपस्यात्मनः प्रतिबिम्बः कथं भवितुमर्हति। अतः प्रतिबिम्बवादस्यासम्भवादवच्छेदवादः मिश्रैस्समर्थितः। यथा नीरूपस्याप्याकाशस्य घटाद्यवच्छेदो दृश्यते। घटाकाशमठाकाशादिव्यवहारोऽपि भवति। अत एवोक्तम्

घटसंवृतमाकाशे लीयमाने घटे यथा।
घटो लीयेत नाकाशं तद्वज्जीवो नभोपमः।

ब्र. वि. उ. १२।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति सम्पद्यते। अमुमेवाभिप्रायं मनसि निधाय वाचस्पतिमिश्र आह 'रूपवद्धि द्रव्यं रूपवतो द्रव्यान्तरस्य छायां गृह्णीयादिति। एवञ्च मायावच्छिन्नञ्चैतन्यमीश्वरः, अन्तःकरणावच्छिन्नञ्चैतन्यञ्जीव-इत्युच्यते। अत एवाह 'सत्यं प्रत्यगात्मा स्वयम्प्रकाशत्वादविषयोऽनंशश्च, तथाप्यनिर्वचनीयानाद्यविद्यापरिकल्पितबुद्धिमनस्सूक्ष्मस्थूल-शरीरेन्द्रियावच्छेदेनानवच्छिन्नोऽपि वस्तुतोऽवच्छिन्न इव, अभिन्नोऽपि भिन्न इव, अकर्तापि कर्तेव, अभोक्तापि भोक्तेव, अविषयोऽप्यस्मत्प्रत्ययविषय इव, जीवभावापन्नोऽवभासते। नभ इव घटमणिकमल्लिकाद्यवच्छेदभेदेन भिन्नमिव, अनेकविधधर्मकमिव, भासते। तथा हि 'यथा घटाकाशो नाम न परमाकाशादन्यः, अथ चान्य इव यावद्घटमनुवर्तते'। भामती २।१।३। 'स एव त्वविद्योपधानभेदाद्घटकरकाद्याकाशवद्भेदेन प्रथते'। भामती २।१।७। तदेवम् 'औपाधिकत्वाच्च भेदस्य घटकरकाद्याकाशवद्विरुद्धधर्मसंसर्गस्योपपत्तेः'। भामती २।३।११। तदेवमयमर्थाध्यासोपक्रमेण भाष्यव्याख्याने भामतीनिबन्धे च विस्तरेण प्रतिपादितः।

बिम्बप्रतिबिम्बवादः

बिम्बप्रतिबिम्बवादस्य सबलः प्रतिष्ठापको विवरणकारः। तन्मते भाष्यकारशङ्कराचार्यः स्वयं बिम्ब-प्रतिबिम्बभावं स्वीकरोति। तद्यथा 'यथा चोदशरावादिकम्पन्नात्तद्गते सूर्यप्रतिबिम्बे कम्पमानेऽपि न तद्वान् सूर्यः कम्पते'। शां. भा. २।३।४६। 'स च जलसूर्यकादिप्रतिबिम्बस्य सूर्यादिप्रवेशवज्जगदाधारे शेषे–परेऽक्षरे आत्मनि सम्प्रतिष्ठते'। प्र. उ. शां. भा. ४।९। 'नामरूपाद्यनेकोपाधिभेदात्सर्वत्रापि जलादिप्रतिबिम्बवदनेकधाऽ-वभासते'। क. उ. शां. भा. ६।२। 'जलभेदगतप्रतिबिम्बवद्धिरण्यगर्भः प्राणप्रज्ञात्मा'। ऐ. उ. शां भा. ३।१। 'तस्य प्रतिबिम्बाख्यपुरुषस्य निष्पत्तिः'। बृ. उ. शां. भा. पृ. ४५८। 'जलधाराद्यपनय इव सूर्यादिप्रतिबिम्बः सूर्ये'। मु. उ. शां. भा. ३।९। 'अस्मिन्नात्मनि हि निरुपाधिके जलसूर्यप्रतिबिम्बभेदा इवादित्ये प्राणाद्युपाधिकृता'। बृ. उ. शां. भा. १।४।७। 'तदुच्यते बृद्धिह्रासभाक्त्वमिति' जलगतं हि सूर्यप्रतिबिम्बं जलबृद्धौ वर्धते, जलह्रासे ह्रसति, जलचलने चलति, जलभेदे भिद्यत इत्येवञ्जलधर्मानुयायि भवति, न तु परमार्थतः सूर्यस्य तथात्वमस्ति'। ब्र. सू. शां. भा. ३।२।२०। तदेवं प्रतीयते यद्भाष्यकाराणां बिम्बप्रतिबिम्बवाद एवाभीष्ट इति। शङ्करपादानां साक्षाच्छिष्यैः पद्मपादाचार्यैर्भाष्यव्याख्यानावसरे पञ्चपादिकायामुक्तम् 'बिम्बस्थानीयब्रह्मस्वरूपता प्रतिबिम्ब-स्थानीयस्य जीवस्योपदिश्यते'। पं. पा. प्र. व. पृ० १०८। सङ्गच्छते। स्वयम्प्रकाशानन्दसरस्वतीभिरपि 'बिम्बते शस्य जीवानां प्रतिबिम्बत्वमिष्यताम्'। वे. न. भू. पृ० ४५३। इत्युक्तम्।

आभासवादः

अत्रैव प्रसङ्गे सुरेश्वराचार्या आभासवादं प्रथयन्ति। तेषां मते 'आभास एव च'। ब्र. सू. २।३।५०। इत्यादिष्वाभासवादो दृश्यते। माण्डूक्यकारिकायामपि 'आभास' शब्द उपलभ्यते। तथा हि

जात्याभासञ्चलाभासं वस्त्वाभासं तथैव च। मा. का. ४।४५। 'तत्र हि जात्याभासो यथा चैत्रमैत्रदेव-दत्तादयो जायन्त इति व्यवहारः, चलाभासञ्चलनमिवाभासत इति, यथा स एव मैत्रो गच्छतीति, वस्त्वाभासो वस्तु-द्रव्यं धर्मि तद्वदवभासत इति वस्त्वाभासः। स एव चैत्रो गौरो दीर्घ इति जायते, मैत्रः स्पन्दते दीर्घो गौरः इत्येवमवभासते'। मा. का. मिताक्षरा पृ० ६३। शङ्कराचार्य्यैरपि 'जीवो हि नाम देवताया आभासमात्रः'। छा. उ. शां. भा. ६।३।२। इत्यादिभिराभासवादः स्वीकृतः। अन्यत्रापि 'आभासेन कल्पितविषयस्यावभासनं भवति'। मा. का. शां. मा. ३।४। मण्डनमिश्रेणापि 'अयञ्च क्रियाकारकफलात्मक आभास ईषदपि परमार्थवस्तु न स्पृशति'। नै. सि. अ. २।५१। अन्यत्र भाष्यकारैः 'आभास एव चैष जीवः परमात्मनो जलसूर्यादिवत्'। ब्र. सू. शां भा. २।३।५०। तथा च नैष्कर्म्यसिद्धिकारवचनेनायमाभासः क्रियाकारकफलस्वरूपाविद्यक इत्येवावतिष्ठते। आभास

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शब्दस्याध्यासभाष्यव्याख्याने वाचस्पतिमिश्रेण 'अवसन्नोऽवमतो वा भासोऽवभासः' इत्युक्तम्। कल्पतरुपरिमले च 'अवसादः उच्छेदः, अवमानः तिरस्कारः' इत्यर्थः प्रतिपादितः।

आत्मख्यातिवादोपन्यासः

भ्रमविषये दार्शनिकानां मतभेदो विद्यते। तत्र विज्ञानवादिनो बौद्धाः भ्रमस्थले 'शुक्ताविदं रज' मित्यादौ बाह्यस्य वस्तुनो विज्ञानातिरिक्तस्याभावादान्तरं ज्ञानमनाद्यविद्यावासनावशात् पुरोवर्तित्वेनावभासते। तत्रेदं बोध्यम्, सौत्रान्तिकमतेऽनुमेयं बाह्यमस्ति वस्तुसत्तत्र ज्ञानाकारस्यारोप इति तन्मतस्थितिः। यद्यपि विज्ञानवादिनां बाह्यवस्तु न सत्तथापि, अलीकं बाह्यमनाद्यविद्यावासनावशादस्तीत्यङ्गीकर्तव्यम्। तत्र ज्ञानाकारस्यारोपः। तत्र तैरियं युक्तिर्दीयते यद्यादृशमनुभवसिद्धरूपं तादृशमेव स्वीकर्तव्यमित्युत्सर्गः। अस्यान्यथात्वं पुनः बाधकप्रत्ययवशान्नेदं रजतमिति बाधस्येदन्तारूपधर्ममात्रबाधोपपत्तौ धर्मिणोऽपि बाधकल्पना नोपपत्तिमती। धर्ममात्रबाधेनापपत्तौ धर्मधर्मिणोरूभयो बाधकल्पने प्रमाणाभावात्।

एवञ्च रजतं बहिर्बाधितं सद्गान्तरे ज्ञाने व्यवतिष्ठत इति ज्ञानाकारस्य बहिरध्यासः सिध्यति। अत्र विषयेऽनुमानमपि दर्शयन्ति' 'रजतज्ञानरूपं प्रमाणं विमतं सम्प्रयोगमन्तरेणापरोक्षत्वात् संवेदनवत्' इत्यनुमानं भवति। एवञ्चान्यधर्मस्य ज्ञानधर्मस्य रजतस्य ज्ञानाकारस्याध्यासोऽन्यत्र बाह्ये भवतीति। एतदेव वेदान्तनयभूषणकारैः स्वयम्प्रकाशातन्दसरस्वतीभिः 'एतेन ज्ञानगतमेव रजतं बहिष्ट्वेन भासते, नेदं रजतमिति बाधस्येदन्त्वसंसर्गविषयत्वमात्रोपपत्तौ रजतविषयत्वकल्पने गौरवादिति परास्तम्'। वे. न. भू. १।१।१। इत्यादिशब्दैरूक्तम्।

अख्यातिवादः

अत्र प्रसङ्गे प्राभाकराः 'शुक्ताविदं रजत' मित्यादौ भ्रमस्थले 'अख्याति' मेवाभ्युपयन्ति। अत्र विषयेऽयं विकल्पः ज्ञानाकारत्वं रजतादेः, अनुभवाद्वा व्यवस्थाप्यते-अनुमानाद्वेति। तत्रानुभवपक्षेऽपि द्विधा विकल्पो भवति, किमनुभवाद् व्यवस्थाप्यते उत नेदं रजतमिति बाधकानुभवाद् व्यवस्थाप्यत इति। तत्र प्रथमः पक्षो नोपपद्यते। यतो हि-इदमिति रजतमावेदयति नत्वान्तरम्, अहमस्मीति तदा प्रतीतिः स्यात्। तन्मते-आत्मज्ञानयोर्भेदाभावः। न द्वितीयःकेन सन्निहितत्वरूपा इदन्ता बाध्यते। स च बाधः रजतस्य देशान्तरसम्बन्धेऽपि पर्यवस्यन्, आत्मरूपतां न साधयति। अत इदमपि न युक्तम्। तस्मान्न रजतस्य निषेधः, न वा इदन्तायाः, अपितु विवेकाग्रहप्रसञ्जितस्य रजतमिति व्यवहारस्य रजतज्ञानेन शुक्तिकायां रजतन्न प्रसञ्जितम्। अतः 'यत्र यदध्यासस्तद्विवेकाग्रहनिबन्धनो भ्रमः' इत्यख्यातिवादिनां भ्रमस्थले सिद्धान्तः। वेदान्तनयभूषणे 'नन्विदं रजतमिति ज्ञानन्नैकं किन्त्विदमित्यनुभवरूपं, रजतमिति स्मरणरूपञ्चेति ज्ञानद्वयं दोषवशाच्चेदंरजतयोः ज्ञानयोश्च भेदाग्रहः, भेदाग्रह एव प्रवृत्तौ कारणम्, न तु विशिष्टज्ञानं गौरवाद्बाधश्च भेदग्रहः',। वे न. भू. १।१।१। इत्थमुद्भाव्यान्यथाख्यातिमुखेन निराकृतेति नाख्यातिः।

अन्यथाख्यातिवादः

अत्र प्रसङ्गे नैयायिका अन्यथाख्यातिमुखेन प्रत्यवतिष्ठन्ते। अनुमानमुखेन तेषामियं युक्तिः, विवादाध्यासितं रजतादिज्ञानं पुरोवर्तिवस्तुविषयं, रजतार्थिनो नियमेन तत्र प्रवर्तकत्वात्। एवञ्च यद्यदर्थिनं यत्र नियमेन प्रवर्तयति तज्ज्ञानं तद्विषयम्, यथा समीचीनरजतज्ञानं, तथाचेदम्। एवञ्च यत्र यदध्यासस्तस्यैव विपरीतधर्मत्वकल्पनामपेक्षते। तस्मादप्यन्यथाख्यातिरेव वस्तुस्थितिरिति तन्मतावलम्बिनः समाचक्षते। वेदान्तनयभूषणे स्वयम्प्रकाशानन्दसरस्वतीभिः प्रभाकरमतनिराकरणव्याजेन 'इष्टपुरोवर्तिज्ञानसहकृतप्रवर्तकमित्युच्यते,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तदान्यद्रजतमेव 'नेदं रजत' मिति भ्रमदशायामन्यथाख्यातिभीत्या उक्ताभावस्य पुरोवर्तिनि स्वीकर्तव्यत्वेन तत्रापि प्रवृत्यापत्तेः' । वे. न. भू. १।१।१ । इत्यादिभिर्वचोभिरन्यथाख्यातिवाद उद्धृतः प्रत्याख्यातश्च ।

अनिर्वचनीयख्यातिः

निर्विशेषाद्वयब्रह्मवादिनस्तु 'इदं रजत' मित्यादिभ्रमस्थलेऽनिर्वचनीयवादमभ्युपयन्ति । तेषामियं युक्तिः, यद्देशान्तरस्थितस्यासन्निहितस्येन्द्रियसन्निकर्षाभावेन कथमिदं रजतमित्यनुभव इति न तद्वाख्यातुं शक्यते । आत्मख्यातिवादेऽपि प्रतिपत्तुः प्रत्ययादव्यतिरेकादहं रजतमिति प्रतीतिः कुतो न स्यात् । अख्यातिवादिनां मतेऽपि सन्मिथ्याविभागो न स्यात् । अत इदं रजतमित्यादौ रजतस्य कथं भानं स्यात् । अतो यद्यसदित्युच्यते तर्हि न भासेत । सदित्युच्यते तर्हि न बाध्येत । सदसदात्मकमेव चेत्तर्हि विरोधः । अतः ख्यातिबाधयोरन्यथानुपपत्या-अनिर्वचनीयं रजतमुत्पद्यत इति ब्रूमः । यतो हि द्विविधं वस्तूनां सत्त्वं, सत्त्वमत्त्वञ्च । तत्र पूर्वं स्वतः, अपरन्तु परतः, यथा स्वरूपेण घटस्सन् इत्युच्यते, पटत्वेन घटो नास्तीति पटत्वावच्छिन्नप्रतियोगिताकोऽभावः पटत्वेना-सन्नित्युच्यते । यदि सर्वं घटादिजातं वस्तु, सदसदात्मकं तर्हि सद्ग्रहणवेलायामसन्कुतो न गृह्यते, एवमसद्ग्रहण-वेलायां सदिति कुतो न गृह्यते, इति विचिकित्सायां जातायाञ्चेदं समाधानं, चेतनो हि युगपदुभयं गृह्णाति कदाचिद्भावं गृह्णाति कदाचिदभावं गृह्णातीति लोके व्यवस्थादर्शनात् । अत एवोक्तम्

स्वरूपपररूपाभ्यान्नित्यं सदसदात्मके ।
वस्तुनि ज्ञायते किञ्चिद्रूपं कैश्चित्कदाचन ॥

एवञ्च मरुमरीचिष्विदं जलमिति ज्ञानं यदि तत्त्वगोचरं स्यात्तर्हीदं ज्ञानं समीचीनमिति न भ्रान्तो न वा बाध्येत । अतोऽतोयात्मभावान् मरीचीन् तोयात्मना गृह्णन् कथमभ्रान्तः स्यात् कथं वा अबाध्यः । अतो मरीचीनां तोयात्मकत्वन्न सत्, नाप्यसत्, वस्त्वन्तरमेव वस्त्वन्तरस्यासत्त्वमास्थीयते । अतः 'इदं रजतं' 'इदं जल' मित्यादौ प्रतीयमानं रजतादिकन्न सत्, नाप्यसत्, भानायोगात्, नाप्युभयात्मकं, परस्परंविरोधात्, इत्यनिर्वचनीयमेव रजतजलादिकमास्थातव्यम् । तदनेन क्रमेणाध्यस्तं तोयं परमार्थतोयमिव भासते । अत एव 'पूर्वदृष्ट' मिव न तु तत्त्वतः । तस्मादनिर्वचनीयं रजतम् । तथा देहादिसर्वोऽपि प्रपञ्चोऽनिर्वचनीयोऽपूर्वोऽपि पूर्वमिथ्याप्रत्यय उपदर्शित इव भासते । तस्य परत्र चिदात्मन्यध्यास उपपद्यते । अतो भ्रमस्थले वेदान्तिभिराविद्यकं रजतमास्थीयत इति । तच्चानिर्वचनीयमेवेति ।

सत्तात्रयम्

अद्वैतवेदान्तिभिर्लोकव्यवहारार्थं त्रिविधाः सत्ताः स्वीकृताः । पारमार्थिकी, व्यावहारिकी, प्रातिभासिकी च । तत्र प्रातिभासिकी सत्ता खलु प्रतिभासकाल एव तस्याः सत्त्वन्न त्वनन्तरभाविकाले । यथा शुक्तिशकले परि-दृश्यमानं रजतं यस्मिन्नेव काले प्रतिभाति, तत्कालमेवावतिष्ठते । शुक्तिकाया बोधे च नावतिष्ठते । तच्च रजतं प्रतीतिकालेऽनृतमपि सत्यवद्भासते । वस्तुतस्तस्यां शुक्तिकायां कालत्रयेऽपि रजतन्न भूतन्न भविष्यति नास्त्येव । अत एव व्यवहारकालेऽपि प्रातिभासिकसत्ताया बाधो भवति । अर्थाद्व्यवहारकालपर्यन्तमपि नावतिष्ठते तत्प्रातिभासिकमिति । तच्चागन्तुकदोषजन्यत्वमेव । तस्य व्यवहारकाले बाधो जायते ।

व्यावहारिकी सत्ता तु व्यवहारदशायान्न बाध्यते । यद्यपि व्यावहारिकी सत्तापि ब्रह्मण्यध्यस्ता, न तु स्वतन्त्रा, तथापि प्रातिभासिकसत्तावत्प्रतीतिकालेऽपि न स्थायिनीति न, अपितु व्यावहारिकी सत्ता यावद्ब्रह्मज्ञानं न भवति तावत्स्थायिभावेनातिष्ठते । अत एव व्यवहारसत्ताया व्यवहारदशायां सत्वेऽपि परमार्थदशायां तस्याः बाधः । आत्मसाक्षात्कारात्पूर्वं प्रपञ्चजातस्य सत्यत्वप्रतीतिः, तावत्कालपर्यन्तं निखिललौकिकवैदिकपरापरव्यव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हारा: सत्यवत्प्रतीयन्ते । अत एव 'तस्मात् प्राक् ब्रह्मात्मताप्रतिबोधादुपपन्नः सर्वो लौकिको वैदिकश्च व्यवहार:' इति (ब्र. सू. शां. भा. २।१।१४। भाष्यकारा आहुः । तस्मादात्मसाक्षात्कारे जाते परिदृश्यमानस्य प्रपञ्चजातस्य बाधः । केवलं त्रिकालाबाध्यमात्मतत्त्वमेवातिष्ठते । अतोऽपि ब्रह्मज्ञानेऽनवस्थितत्वमेव व्यावहारिकसत्त्वमित्यायातम् । यथा च प्रातिभासिक-व्यावहारिक-सत्तान्यत्वे सति त्रिकालाबाध्यत्वं पारमार्थिकं सत्त्वमिति । अर्थात् प्रातिभासिकी सत्ता प्रतिभासकालमेव दृश्यते, यथा शुक्तिकायां दृश्यमानं रजतं तत्कालं, शुक्त्यवच्छिन्नचैतन्यज्ञानात् रजतं निवर्तते । आगन्तुकदोषजन्यत्वात् । व्यावहारिकसत्ता घटपटादीनां यावद्ब्रह्मज्ञानन्न जायते तावत्कालं तद्रूपेण भाति, पारमार्थिके ज्ञाने जाते च व्यवहारिकत्वमपि न तिष्ठति । परन्तु पारमार्थिकी सत्ता कालत्रयेऽपि न नश्यति । सा तु ब्रह्मसत्तैवेति समुररीक्रियते । तच्चास्ति, भाति, प्रियरूपत्वात् भूते, भविष्यति, प्रयोगाधिकरण-काले च ब्रह्म न बाध्यते । तदेव पारमार्थिकसत्तायाः साक्षात्कारे जाते नान्या काचन सत्तावतिष्ठते । सैव त्रिकालाबाध्यपारमार्थिकी सत्ता ब्रह्मसत्तेति ।

विवर्तवादः

अद्वैतवेदान्ते परिदृश्यमानमिदं सर्वमपि प्रपञ्चजातं ब्रह्मणो विवर्त इत्यास्थीयते । मायाशवलितसद्ब्रह्मण्यनित्यस्यासतः प्रपञ्चस्य प्रतीतिर्भ्रान्तिरूपेति । सा चाध्यासरूपा भासमानस्य जगतो ब्रह्मण्यध्यस्तत्वात् । तथा चायं प्रपञ्चो न ब्रह्मणो विकारः, नापि ब्रह्मणः परिणामः, अपितु विवर्तभूतः । परिणामो विकारो वा तात्त्विकोऽन्यथाभावरूपेण दृश्यतेऽनुभूयते च जगति । यथा लोके पयो दधिरूपेण परिणमते । तच्च धीवरपामर-साम्यात् दधि इत्येव लोकसामान्ये प्रयुज्यते । विवर्तस्त्वधिष्ठानविपरीतरूपेण वर्तत इति विवर्तः, अतात्त्विकोऽन्यथारूपो वा विवक्षितः । यथा रज्जौ सर्पः मरुभूमौ जलं, शुक्तिशकले च रजतम् । एवं प्रकारेण सन्दृश्यमानमखिलं प्रपञ्चजातं ब्रह्मणो विवर्तः । तद्यथा मन्दान्धकारे भवनाजिरे समापतितरज्जौ भ्रमवशात्सर्पबुद्धिर्जायते । अनन्तरकाले भ्रमापगमे च रज्जुरेवावतिष्ठते न तु सर्पः, तद्वदेव ब्रह्मसाक्षात्कारे जाते-अविद्याया अपगमान्नाम-रूपप्रपञ्चापगमे केवलात्मसत्तैवावतिष्ठते । तथा चात्मातिरिक्तसत्तासामान्याभावात्सर्वमात्मन्यध्यस्तम् । तस्माज्जगदिदमखिलमपि ब्रह्मणो विवर्तरूपमित्यभ्युपगम्यते । अत एव च विवर्तवादाभ्युपगमे आत्मनो निर्विकारत्व-सिद्धिरिति भाष्यकारादिभिस्तदन्यत्वारम्भणाधिकरणे । शां. भा. २।१।१४ । प्रतिपादितम् । तत्रैव च 'इदन्त्वेन सन्दृश्यमानप्रपञ्चजातस्य निस्सारत्वसिद्धिः, ब्रह्मणश्चाद्वैतसिद्धिरिति विवर्तप्रयोजनमपि साधितम् ।

विवर्तशब्दस्यानेकार्थः

विवर्तशब्दस्य बहुविधा अर्थाः प्रतिपादिता दृश्यन्ते । भर्तृहरेः वाक्यपदीये ब्रह्मकाण्डे 'अनादिनिधनं ब्रह्म' इति मङ्गलवाक्ये विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः' । वा. प. ब्र. का. १ । इति कारिकायामागतविवर्तपदेन-अद्वैतवादिनां विवर्तवाद एवोरीकृत इति । तत्रैव 'शब्दस्य परिणामोऽयमित्याम्नायविदो विदुः' । वा. प. ब्र. का. १२० । इत्यादिकारिकायां परिणामपदस्यापि प्रयोगो विहितः । वाचस्पतिमिश्रकृतायां न्यायकणिकायामपि 'पुनरभिन्नस्य शब्दब्रह्मणो विवर्त वा परिणामं वाऽऽचक्षते' । न्या. क. २९३ । इति तदेवालिखितम् । मण्डनमिश्रोऽपि पदद्वयमिदमस्मिन् प्रसङ्गे प्रयुंक्ते । द्रष्टुरेव चिदात्मनस्तथा तथा विपरिणामाद्विवर्तनात्' । ब्र. सि. ब्र. कां. पृ. ७ । 'अतो वाचो विपरिणामो विवर्तो वा जगत्' । ब्र. सि. ब्र. का. पृ. १८ । इति । आचार्यशङ्करस्तु विवर्तपदमेव प्रयुंक्ते । 'त्रिगुणप्रधानं मृद्वदचेतनञ्चेतनस्य पुरुषस्यार्थं साधयितुं स्वभावेनैव विचित्रेण विकारात्मना विवर्तते' । ब्र. सू. शां. भा. २।२।१ । इत्यादि । वैयाकरणः कौण्डभट्टोऽपि मङ्गलमाचरन् सर्वजगद्विवर्तरूपमेव मनुते 'स्फोटरूपं यतः सर्वं जगदेतद्विवर्तते' । वै. भू. सा. १ । इति । जयन्तभट्टः विवर्तवादमस्वीकुर्वन्नपि पूर्वपक्षतया विवर्तपदं प्रयुञ्जानो दृश्यते न्यायमञ्जर्याम् । 'विवर्तवादोऽपि न समञ्जसः तथा हि विवर्तते क्षीरमिव दधिरूपेण परिणामित्वेन विकारितया वा' ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्या. म. शब्द. वि. वा. खण्डने । इत्यत्र विवर्तपदस्य परिणामार्थो दृश्यते । वैयाकरणैश्च[१] विवर्तपदेन सह परिणामपदप्रयोगः कृत एव । परं वेदान्तशास्त्रे स्वीक्रियमाणो विवर्तः परिणामभिन्नः । परिणतं हि वस्तु न पुनः विनश्यत् कारणात्मरूपतामापद्यते, परिणतं दधि कथमपि न पुनः दुग्धभावं भजते, विवर्तभूतञ्च जगत् कारणात्मनि ब्रह्मणि लीयमानं ब्रह्मभावमेवापद्यत इति विवर्तपरिणामयोर्भेदः ।

मायाऽविद्ययोर्भेदः

यथा चिकित्साशास्त्रञ्चतुर्व्यूहम्, रोगः, रोगहेतुः, आरोग्यम्, भैषज्यमिति । एवमिदमपि शास्त्रञ्चतुर्व्यूहमेव । तद्यथा संसार, संसारहेतुः, मोक्षः, मोक्षोपायः, इति । पा. यो. सू. का. भा. पृ० १८५ । जागतिकानामिदञ्चतुर्व्यूहशास्त्रप्रवृत्तित्वं सम्भवति, तत्रापि मोक्षस्य प्रेप्सवो जीवाः सन्ति । मोक्षश्च 'अविद्यास्तमयः' । ब्र. सि. पृ० ११९। सा अविद्या चाज्ञानपदेनापि बोध्यते । सा वस्तुतो न भावरूपा, नाप्यभावरूपा, पररमियं भावाभावविलक्षणा, तथ्यातथ्याभ्यामनिर्वचनीया, अनिरूपणीया, त्रिगुणात्मिका चलाचलप्रपञ्चस्य मूलकारणरूपा सती जड़रूपेति । अचेतनस्य चेतनव्यतिरेकेणाभावप्रतिपादनाच्चेतनयारभेदायोगाच्च चेतनं नित्यशुद्धबुद्धमुक्तसत्यपरमानन्दाद्वयं ब्रह्म, अचेतनमज्ञानादिजड़जातमज्ञानं त्रिगुणात्मकं सदसद्भ्यामनिर्वचनीयं भावरूपं ज्ञाननिवर्त्यमिति । तच्चाज्ञानं द्विविधं मायाऽविद्याभेदात् । तत्र शुद्धसत्त्वप्रधानं सन्माया इत्युच्यते । मलिनसत्त्वप्रधानं सदविद्या इत्युच्यते ।

अथवा अज्ञानस्य शक्तिर्द्विधा ज्ञानशक्तिः क्रियाशक्तिश्चेति । तत्र रजस्तमोभ्यामनभिभूतं सत्त्वं ज्ञानशक्तिः, क्रियाशक्तिरपि द्विधा आवरणशक्तिर्विक्षेपशक्तिश्चेति । तत्र रजस्सत्त्वाभ्यामनभिभूतं तम-आवरणशक्तिः । तदुक्तं तम आवरणात्मकमिति । सा च नास्ति, न प्रकाशते, इति व्यवहाहेतुः । तमस्सत्वाभ्यामनभिभूतं रजश्च विक्षेपशक्तिः । एवञ्च लोभादीनां विक्षेपकत्वं प्रसिद्धमेव । इयमव विक्षेपशक्तिराकाशादिप्रपञ्चोत्पत्तिहेतुः । उक्तञ्च 'विक्षेपशक्तिर्लिङ्गादिब्रह्माण्डान्तञ्जगत्सृजेत्' इति । तथा च पूर्वोक्ताज्ञानमावरणशक्तिप्रधानं सदविद्या इत्युच्वते । विक्षेपशक्तिप्रधानं सन्मायेति । यथा एक एव देवदत्तः क्रियानिमित्तवशेन पाठकः, पाचकः, इति व्यपदिश्यते । तथा एकमेवाज्ञानं विक्षेपावरणशक्तिनिमित्तभेदेन मायाऽविद्येति च व्यपदिश्यते । । त. सं. ह. ले. डा. गं. झा. के. वि. इ. १२।७३० । श्रुतिरपि 'माया चाविद्या च स्वयमेव भवति' । नृ. उ. ता. उ. ९) इयमेव माया जीवरेश्वरयोर्भेदमुत्पादयति । अत एव मायावच्छिन्नश्चैतन्यमीश्वरः, अविद्योपाधिकञ्चैतन्यजीव इति व्ययदिश्यते ।

१. एतद्विषये डा० मुरलीधरपाण्डेयस्य 'श्रीशङ्करात्प्रागद्वैतवादः' इति ग्रन्थस्य पृ० २२९-२४१ पर्यन्तमवलोकनोयम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वेदान्तनयभूषणस्य विषयवस्तु

प्रथमोऽध्यायः

समन्वयाध्यायः

वेदान्तनयभूषणग्रन्थो वेदान्तसूत्रम् (ब्रह्मसूत्रमधिकृत्य कृत इति वेदान्तसूत्रमिवास्याप्यान्तरो विभागः) कृतोऽस्ति। तदेवमत्रापि वेदान्तसूत्रमिव चत्वारोऽध्यायायाः, प्रत्यध्यायञ्च चत्वारः पादाः, पादानाञ्च विभागोऽधिकरणमुखेन कृतः। प्रतिपादञ्चाधिकरणसंख्या न नियता, तथापि सम्पूर्णाधिकरणसंख्या १९१ अत्र निबद्धाः। स्वयम्प्रकाशानन्द अधिकरणान्यधिकृत्यैव वेदान्तन्यायान्विचारयति। तत्र समन्वयाध्यायनामकस्य प्रथमाध्यायस्य प्रथमे पादे-एकादशाधिकरणानि सन्ति।

तत्र प्रवर्तमानेऽस्मिन्नध्याये निखिलवेदान्तवाक्यानां साक्षात्परम्परया वा प्रत्यगभिन्नाद्वयब्रह्मणि तात्पर्यं समन्वेतीति समन्वयाध्याय इति। तत्र प्रथमे पादे स्पष्टब्रह्मलिङ्गान्युक्तानि वाक्यानि विचारितानि। तथा च ब्रह्म जिज्ञास्यमजिज्ञास्यं वेति विचारयता ग्रन्थकृता पूर्वपक्षतया तत्तद्दार्शनिकसम्प्रदायेषु स्वीकृताः पक्षाः समुपस्थापिता विवेचिताश्च। तेषु शरीरवमात्मेन्द्रियाणि वा, मन आत्मा उत क्षणिकविज्ञानमेव, शून्यमेव वात्मतत्त्वमित्यादि प्रामुख्यं भजते। अत्रैव प्रामाण्यमभ्युगच्छता जीवस्य देहाद्यतिरिक्तत्वं कर्तृत्वादिकञ्च स्वीकुर्वतां मते-ईश्वरप्रतिपादकवाक्यानाञ्जीवासङ्गत्वप्रतिपादकवाक्यानाञ्च सङ्गतिर्विवेचिता। ये चेश्वरमिच्छन्तो जीवस्य कर्तृत्वाभावं स्वीकृत्यासङ्गश्रुतिमुपपादयन्ति। अथवा—ईश्वरमभ्युपगच्छन्तस्तस्य सर्वज्ञत्वं स्वाभाविकमुपगम्य तद्गतधर्मराहित्यप्रतिपादकश्रुतीनामविवक्षितार्थत्वमाहुः। अपरे च ये जीवब्रह्मणोरेक्यमभ्युपगम्य सर्वाः श्रुतयो विवक्षितार्था एवेत्यौपनिषदं मतं मन्यन्ते। तेषां समेषामपि पक्षान्प्रस्तूय ग्रन्थकृदेवमङ्गीकरोति यदेवं विधबहुमतदर्शनसंक्षुब्धहृदयस्य विचारमन्तरा निर्णयायोगेन तज्जिज्ञासापूर्वकं विचारः कर्तव्यो वेति प्रथमसूत्रेण विचारकर्तव्यता सुतरां सिद्ध्यत्येवेति जिज्ञासाधिकरणस्योपयोगः। तदेवं प्रथमाधिकरणे ब्रह्मणोः जिज्ञास्यत्वं प्रतिपाद्य ब्रह्मणोऽभ्यर्हितत्वेन तटस्थस्वरूपलक्षमुपपादितं द्वितोयाधिकरणेन। जगज्जन्मादिकारणत्वस्य प्रतिपादनबलात्सर्वज्ञत्वं सर्वशक्तित्वञ्चाक्षिप्य ब्रह्मणस्तदेव वेदकर्तृत्वेन साधितं शास्त्रयोनित्वाधिकरणेन तृतीयेन। समन्वयाधिकरणे च तुरीये 'सदेव सौम्य (छा. ६।२।१) इत्यादिवेदान्ता ब्रह्मप्रनिपादनपरा उत नेति सन्दिह्य, वेदान्तानां विधिनैरपेक्ष्येण प्रामाण्यं साधितम्। ईक्षत्यधिकरणे पञ्चमे च जगदुत्पत्तिस्थितिलयकारणं ब्रह्मेति समाधितम्। आनन्दमयाधिकरणे च षष्ठे सांख्यादिस्मृतिन्यायविरोधपरिहाराय सप्रपञ्चनिष्प्रपञ्चश्रुत्योर्विरोधे सप्रपञ्चश्रुतीनामाविद्यकविषयत्वमन्यासान्तु पारमार्थिकविषयकत्वमिति प्रतिपादनाय साधनफलादिव्युत्पादनं कृतम्। अन्तरधिकरणे 'अथ य एष अन्तरादित्य' (छा. १।६।६) इत्यादिश्रुतौ पठितम् 'अन्तरादित्य' वाक्यञ्जीवं प्रतिपादयत्युत ब्रह्मेति विशंक्य तद्भावयेन ब्रह्मोपास्तिर्विधीयत इत्युपपादितम्। आकाशाधिकरणे च किमाकाशशब्दो परंब्रह्म विवक्षितमुत भूताकाशमिति शङ्कामुद्भाव्य गौण्या वृत्या आकाशशब्दो ब्रह्मणः प्रतिपादक इति प्रख्यापितम्। प्राणाधिकरणे पठितः प्राणशब्दः पञ्चवृत्यात्मकप्राणपरो ब्रह्मपरो वेति इत्युद्भाव्य प्राणशब्दस्य ब्रह्मपरत्वं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

साधितम्। ज्योतिश्चरणाधिकरणे विद्यमानो 'ज्योतिः' शब्दः भौतिकज्योतिःपर उत ब्रह्मपरो वेति विचिन्त्य ब्रह्मणः प्रतिपादक इत्युक्तम्। प्रतर्दनाधिकरणेऽपि प्राणशब्दः पठितः, तत्रेयं विचिकित्सा यत् किमयं सन्दर्भः प्राणपर उत इन्द्रपर, उत प्राणजीवात्मपरः, किंवा परमात्मपरः इति ? तत्र ब्रह्मपर एवायं सन्दर्भ इति स्थापितम्। अतो जिज्ञासाधिकरणादारभ्य प्रतर्दनाधिकरणान्तमेकाधिकदशाधिकरणैः स्पष्टब्रह्मलिङ्गयुक्तानि वाक्यानि विचारितानि।

तत्र प्रथमाध्यायस्य द्वितीयपादे सप्ताधिकरणानि निबद्धानि सन्ति। पूर्वस्मिन्पादे स्पष्टब्रह्मलिङ्गानि यानि वाक्यानि तान्यत्र विचारितानि। अस्मिन्पादे तु प्रतिपादितसर्वज्ञत्वाद्युपजीव्यसविशेषविषयान्यस्पष्ट ब्रह्मलिङ्गानि प्रायशो निरूपितानि। तत्र, सर्वत्र प्रसिद्ध्यधिकरणे 'मनोमय' (छा. ।१४।२) इत्यादौ पठितः मनोमयशब्दो जीववाचक उत ब्रह्मवाचक इति शङ्कामुत्थाप्य मनोमयादिवाक्यं ब्रह्मपरमिति साधितम्। द्वितीयाधिकरणे च 'अत्ता' जीव उताग्निरुत परमात्मा इत्यस्योत्तरं परमेश्वर इति निरूपितम्। गुहाप्रविष्टाधिकणे च गुहाशब्देन बुद्धिजीवौ गृह्येत उत जीवात्मपरमात्मनाविति, विचिकित्सामुद्भाव्य जीवात्मपरमात्मनोः ग्रहणमिष्यत इत्युक्तम्। अन्तराधिकणे च छायात्मा प्रतिपाद्यत उत जीव उत आदित्याभिमानिनी देवतोत परमात्मेति पक्षचतुष्टयमुद्भाव्यास्य सन्दर्भस्य ब्रह्मप्रतिपादकत्वमेवोपपद्यत इत्युक्तम्। अन्तर्याम्यधिकरणे च 'अन्तर्यामी' शब्देन देवता गृह्यते, आहोस्वित् प्रधानमुत कश्चिद्योगी, परमात्मा वेति परिशंक्य 'अन्तर्यामीशब्देन परमात्म एव विवक्षित इत्याहृतम्। अदृश्यत्वाद्यधिकरणे च 'अथ परा यया तदक्षरमधिगम्यते' (मु. उ. १।१।६) इत्यादिश्रुत्यन्तःपाति 'अक्षरशब्देन' प्रधानजीवयोरन्यतरद्ग्राह्यमुत परमात्मेति शङ्कामुत्थाप्य परमात्मैव ग्राह्य इति प्रतिपादितम्। वैश्वानराधिकरणे वैश्वानरशब्देन प्रसिद्धो जाठराग्निर्वा, तदभिमानिनी देवता वा, जीवात्मा वा, परामात्मा वेति किं गृह्यते इत्याशंक्य परमात्मा एव ग्राह्य इति निर्णीतम्। एवञ्चात्र सप्तभिरधिकरणैरस्य स्पष्टब्रह्मलिङ्गत्वे तत्तदुपास्यविषयश्रुतिवाक्यानां सार्थक्यादीनि प्रतिपादितानि।

तृतीयपादे च, पूर्वस्मिन्पादे सविशेषप्रधानान्यस्पष्टब्रह्मलिङ्गानि वाक्यानि निरूपतानि। इह तु प्रायेण निर्विशेषवाक्यान्यस्पष्टब्रह्मलिङ्गानि प्रतिपादितानि। तत्र द्युभ्वाद्यधिकरणे किं द्युभ्वाद्यायतनं सांख्याभिमतं प्रधानमुतास्मदभिमताविद्या उत वायुः उत जीवः, उत परमात्मा इति विविधान् विकल्पानुद्भाव्य, ब्रह्मैवेत्युपपादितम्। भूमाधिकरणेऽपि, किमात्मा भूमशब्दवाच्य उत प्राण इति विकल्प्य 'भूमा' परमात्मैवेति साधितम्। अक्षराधिकरणे च योगवृत्त्या ब्रह्मैवाक्षरार्थ इत्युक्तम्। ईक्षतिकर्माधिकरणे च 'त्रिमात्रप्रणवः, अन्योऽयम् कश्चित्पदार्थोऽपरं ब्रह्म वा परब्रह्म वा इति विकल्पं कृत्वा परमेव ब्रह्म त्रिमात्रप्रणवधेयमिति समर्थितम्। दहराधिकरणे च सूत्रे पठितेन 'दहर' शब्देन दहराकाशो विवक्षित उत परं ब्रह्म, उत भूताकाश, आहोस्विज्जीव एवं विकल्प्य, दहराकाशः परं ब्रह्मैवेति संसाधितम्। अनुकृत्यधिकरणे परब्रह्मण एव सत्त्वमित्यापादितम्। प्रमिताधिकरणे कठवल्लीपठित 'अङ्गुष्ठमात्र'शब्दः किञ्जीवपरक उत परमात्मपरक इति विकल्पमुद्भाव्य 'अङ्गुष्ठामात्र' शब्दः परेशप्रतिपादक इत्युपपादितम्। देवताधिकरणे देवानां ब्रह्मविद्यायामधिकारोऽस्तीति चिन्तितम्। अपशूद्राधिकरणे त्रैवर्णिकानामेव ब्रह्मविद्यायामधिकारः शूद्रस्य तु नास्त्यधिकार इत्युक्तम्। कम्पनाधिकरणे च कठवल्लीपठितवज्रप्राणशब्दस्य च ब्रह्मपरकत्वमुपपादितम्। ज्योतिरधिकरणे तु ज्योतिःशब्देन सूर्यादिज्योतिर्न गृह्यते, परन्तु परमात्मैव गृह्यत इति स्थापितम्। अर्थान्तिरत्वादिव्यपदेशाधिकरणे 'आकाशो ह वै' (छा० ८।१४।१) इति श्रुतौ पठित 'आकाशशब्दो न भूताकाशपरः, परं परमात्मपर एवेति व्युत्पादितम्। सुषुप्त्युत्क्रान्त्यधिकरणे च 'ज्योतिर्ब्राह्मणे श्रूयमाणं प्रकरणं प्रत्यगभिन्नब्रह्मपरमेव साधितम्। एवञ्चात्र त्रयोदशभिरधिकरणैर्ब्रह्मणः स्पष्टं ब्रह्मलिङ्गं संशाधितम्।

तत्र तुर्ये पाद अष्टावधिकरणानि सन्ति। तथा च जिज्ञास्यब्रह्मणो जगज्जन्मादिकारणत्वं लक्षणं युक्तम्। तच्च प्रधान एव सङ्गच्छते, न ब्रह्मणीत्यसम्भवमाशंक्य तत्समाधानमुक्तम्। प्रवर्तमानेऽस्मिन्पादे ब्रह्मणो जगत्कारणत्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विरोधित्वे प्रतीयमानपदजातस्य ब्रह्माविरोधित्वं व्यवस्थापितम्। तथा चानुमानिकाधिकरणे कठवल्लीषु पठितेन 'अव्यक्त' शब्देन प्रधानं ग्राह्यम्, वा रूपकविन्यस्तशरीरमिति विचिन्त्य, शरीरपरमेव ग्राह्यमिति प्रतिपादितम्। चमसाधिकरणे च 'अजामेकाम्' (श्वे. उ. ४।५) श्रुतिपठित 'अजा' पदेन सांख्याभिमतमूलप्रकृतिर्ग्राह्या, उत तेजोऽबन्नलक्षणा छान्दाग्योक्तेति विकल्प्य सांख्यीप्रकृतेर्ग्रहन्न भवतीत्युक्तम्। संख्योपसंग्रहाधिकरणे 'यस्मिन् पञ्च पञ्चजना' (बृ० ४।४।१७) इति श्रुतिपठित 'पञ्चजन' शब्देन सांख्याभिमतानां तत्त्वानां ग्रहणमुत प्राणादिकस्येति विकल्पं प्रदर्श्य प्राणादिकमेव गृह्यत इत्युपपादितम्। कारणत्वाधिकरणे किं वेदान्तवाक्यानि ब्रह्म प्रतिपादयन्ति न वेति शङ्कामुद्भाव्य विरोधाभावाद्वेदान्तानां ब्रह्मप्रतिपादकत्वमुपपद्यत इत्युपपादितम्। बालाक्यधिकरणे च 'स वै वेदितव्य' इत्यत्र वेदितव्यत्वेन श्रुतः प्राणो वा हिरण्यगर्भो वा जीवसामान्यं वा परमात्मा वेति सन्दिह्य ब्रह्मपरमेवेदं प्रकरणमिति साधितम्। वाक्यान्वयाधिकरणे 'आत्मा वारे' (बृ० ४।५।६) इति श्रुतौ पठित 'आत्मा शब्देन जीव, उत परमात्मा इति सन्दिह्य प्रतिवचने परमेव ब्रह्म गमयतीति साधितम्। प्रकृत्यधिकरणे च जन्मादिसूत्रोक्तं जगज्जन्मादिकारणत्वं तत्कर्तृत्वमेवोपादानत्वमिति सन्दिह्य ब्रह्मणोऽभिन्ननिमित्तोपादानत्वं साधितम्। सर्वव्याख्यानाधिकरणे च सर्वेषां वेदान्तानामद्वैते ब्रह्मणि समन्वयः प्रतिपादितः। एवञ्चाष्टभिरधिकरणैश्चतुर्थपादः परिसमाप्तः।

द्वितीयाध्यायः

अविरोधाध्यायः

पूर्वस्मिन्नध्यायेऽध्यारोपापवादाभ्यां निष्प्रपञ्चप्रत्यगभिन्नब्रह्म-जगत्कारणत्वादिप्रदर्शनमुखेन वेदान्तैः प्रतिपाद्यत इति निरूपितम्। प्रवर्तमानेऽस्मिन्नध्याये स्मृतिन्यायविरोध आशंक्य परिहृतश्च। अत्रापि चत्वारः पादास्सन्ति। अत्र प्रथमे पादे त्रयोदशाधिकरणानि सन्ति। तत्र स्मृत्यधिकरणे प्रथमे सांख्यस्मृतिविरोधः परिहृतः। योगप्रत्युक्त्यधिकरणे च सांख्यस्मृतिविरोधवद्योगस्मृतिविरोधोऽपि नादरणीय इति प्रतिपादितम्। विलक्षणत्वाधिकरणे—इत आरभ्य आपादपरिसमाप्ति न्यायविरोधः परिहृतः। शिष्टापरिग्रहाधिकरणे च महतो ब्रह्मणो जगत्कारणत्वप्रतिपादकानां समन्वयो दर्शितः। भोक्त्रापत्यधिरणे' तत्त्वमसि 'सर्वं खल्विदं ब्रह्म' (छा० ३।१४।१) इत्यादिश्रुत्या बोध्यमानो जीवगतो भेदो ब्रह्मणाऽभेदो वा जोवगतः परस्परमभेदो वा इत्यादि सन्दिह्य सर्वथाभेदकभेदांशमादाय च भोक्तृभोग्यव्यवहार इति साधितम्। आरम्भणाधिकरणे च परिणामवादं पूर्वपक्षतयोपन्यस्य तन्निराकरणपूर्वकविवर्तवादः सिद्धान्ततया व्यवस्थापितः। इतरव्यपदेशाधिकरणे-पूर्वस्मिन्नधिरणेऽनन्यत्वपदेन ब्रह्मव्यतिरेकेणाभावे उक्ते जीवांशे भेद इतरांशे तु मिथ्यात्वमित्युक्तम्। तत्र जीवब्रह्मणोरैक्य ईश्वरस्य जगत्कर्तृत्वं नोपपद्यत इत्याक्षिप्य जीवेशयोर्हि नात्यन्तमभेदः किन्त्वौपाधिको भेद इति प्रतिपादितम्। उपसंहाराधिकरणे च यथा साहाय्यस्य दुग्धस्य दधिभाव इष्यते, तथैव चेतनस्य ब्रह्मणो जगद्भावो भवितुं युक्त इति साधितम्। कृत्स्नप्रसक्त्यधिकरणे निरवयवस्य जगत्कारणत्वं नोपपद्यत इत्याक्षिप्य विवर्तवादः स्वीकृतः। अत्रैव तेन स्वकीयस्य दर्शनस्य समीचीनत्वमपि प्रतिपादितम्। सर्वोपेताधिकरणे जीवस्य नानास्वाप्निकपदार्थसृष्ट्यनुकूलशक्तिवच्च सर्वशक्तिमत्त्वे बाधकाभाव इति प्रख्यापितम्। प्रयोजनवत्त्वाधिकरणे-ईश्वरस्याप्तकामत्वादिन्यायबाधो निराकृतः। वैषम्यनैर्घृण्याधिकरणे च परमेश्वरस्य वैषम्यनैर्घृण्यदोषमाक्षिप्य कस्मैचित्सुखं, कस्मैचिद्दुःखमित्यादिपक्षपातित्वं निर्घृणत्वञ्च परमात्मनि समापतिते, यथा हि राजा चोरकुलं मारयन्नहि निर्घृण इति, स्वकार्य्यनिर्वाहकेभ्यः सुखं प्रयच्छन्न पक्षपातीत्येवमीश्वरोऽपि तत्तत्कर्मानुसारेण सुखादि कुर्वाणो न निर्घृणः पक्षपाती वेति व्यवस्थापितम्। स्वधर्मोपपत्त्यधिकरणे च निर्गुणस्य ब्रह्मणो जगदुपादानत्वानुपपत्तिं प्रदर्श्य विवर्तवादाभ्युपगमे दोषाभाव उपपादितः। एवञ्च त्रयोदशाधिकरणैश्च पादोऽयं समाप्तः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वितीयाध्यायस्य द्वितीयपादे अष्टावधिकरणानि सन्ति। तत्र पूर्वस्मिन्पादे स्मृतिन्यायविरोधो वेदान्त-समन्वये परिहृतः। प्रकृतपादे तु सांख्यादिमतस्याभासत्वं व्यवस्थापितम्। तत्र प्रथमे रचनानुपपत्त्यधिकरणे सांख्याः जगत्कारणत्वं प्रधानस्य येनानुमानेन वदन्ति, तदनुमानस्याभासत्वं व्युत्पादितम्। अत्र तेषामयं तर्को यद्यत्कार्यं यदन्वितं प्रतीयते तत्तदुपादानकं यथा मृदन्वितो घटो मृदुपादानकः, तथा सुखदुःखमोहान्वितस्य जगतश्च सुखदुःखमोहात्मकं प्रधानमुपादानम्। अचेतनप्रधानद्वारा जगदुत्पत्तिर्भवितुन्नार्हति, मृदादिकं हि घटाद्युपादानं, तत्कुलालादिचेतनापेक्षमेव दृष्टम्। अचेतनस्य च प्रधानस्य चेतनाधिष्ठानमन्तरा कार्यजनकत्वानुपपत्तेः। वत्सवृद्ध्यर्थञ्च क्षीरादिप्रवृत्तिः, वत्सचूषणादिप्रयुक्तेवेति, तत्रापि चेतनः सिद्धः। अतो हेयमिदं दर्शनमित्युपदर्शितम्।

महद्दीर्घाद्यधिकरणे च चेतनाज्जगदुत्पत्तिं वदता समन्वयः प्रदर्शितः। कारणगुणः कार्ये स्वसमानजातीयं गुणान्तरमारभत इति न्यायेन सह विरोधोऽस्ति न वेति सन्दिह्य, यथा शुक्लैस्तन्तुभिरारब्धे पटे शुक्लरूपं दृश्यते। तथा चेतनारब्धं स्याच्चेज्जगत चेतनत्वमापद्यत इत्याशङ्क्य, यथा परमाण्वारब्धे द्व्यणुके परमाणुगतपारिमाडिल्यान्न स्वसजातीयपरिमाणारम्भकं, तथैव ब्रह्मणारब्धेऽपि च जगति न चैतन्यमिति सिद्धान्तः स्वीकृतः। तदेवं ब्रह्मोपादानत्वे प्रपञ्चस्य न किंचिद्बाधकमिति साधितम्।

एवञ्च परमाणुजगत्कारणत्वाधिकरणे वैशेषिकाद्यभिमतस्य परमाणुकारणवादस्याभासत्वं साधितम्। वैशेषिकाणां मते परमाणवः समवायिकारणं, परमेश्वरस्य सिसृक्षावशात्परमाणौ क्रिया, तथा च परमाणोस्संयोगस्तदसमवायिकारणकं द्व्यणुकञ्जन्यते। एवं क्रमेण पृथिव्यादीनाञ्चतुर्णां भूतानामुत्पत्तिः। वेदान्तिमते नैतत्स्वीकार्य्यम्, आरम्भक-संयोगस्यापि सदानतत्वप्रसङ्गात्। परमाणुसंयोगयोस्सम्बन्धश्च न सिध्यति। समवायश्चेन्न, समवायस्यासम्बद्धस्य सम्बन्धत्वानुपपत्तेः। सम्बन्धान्तराभ्युपगमेऽनवस्था। एवमत्रधिकरणे इतरदर्शनानां मतानि निरस्तानि।

समुदायाधिकरणे च बाह्याभ्यान्तरशून्यवादिनां बौद्धानां मतमालोचितम् तत्र चत्वारः प्रस्थानभेदाः, वैभाषिकाः, सौत्रान्तिकाः योगाचाराः माध्यमिकाश्चेति, तत्रान्त्ययोर्मतयोरस्मिन्नधिकरणे निराकरणं कृतम्। तत्र योगाचाराणाम् क्षणिकविज्ञानरूपेण पृथिव्यादीनि चत्वारि भूतानि, भौतिकाश्च रूपादयश्चक्षुरादयश्चाभिमताः। सर्वत्रापि पृथिव्यादिपरमाणुसंघातरूपं कार्यम्, तथा रूपविज्ञानवेदनासञ्ज्ञासंस्कारसञ्ज्ञिताः शरीररूपेण संहन्यन्त इति मन्यन्ते। तदेतदसमञ्जसम्, चेतनस्य कस्यचिद्भेदेन तत्प्रेरणाभावात्। अतो नेदं दर्शनमुपपन्नमिति शून्यवादिनस्तु विज्ञानस्यापि सत्त्वेनासत्त्वेन वा निर्वक्तुमशक्यत्वाच्छून्यमेवेदं सर्वमिति मन्यन्ते। तन्न, शून्यत्वे जगदान्ध्यप्रसङ्गात्। एवञ्च समुदायाभावाधिकरणद्वयेन बौद्धमतं पराकृतम्।

एकस्मिन्नसम्भवाधिकरणे त्वार्हतमतन्निराकृतम्। आर्हताः पदार्थद्वयमेव स्वीकुर्वन्ति। जीवश्चाजीवश्चेति। जीवस्य चास्रवसंवरनिर्जरबन्धमोक्षभेदान् स्वीकृत्य निरन्तरगमनशीलस्यापि जीवस्य धातिकर्मवशाच्छरीरेऽवस्थितिमभ्युपगम्य तस्य चोपरि गमनरूपं मोक्षं स्वीकुर्वन्ति। तन्मतमयुक्तम्। एकस्मिन्सत्त्वासत्त्वयोरनुपपत्तेः तस्मादार्हतमतमनुपपन्नमिति प्रसाधितम्।

पत्यधिकरणे च माहेश्वरमतं समालोचितम्। माहेश्वराः कार्यकारणं, योगविधिदुःखान्तान्पञ्चपदार्थान्नभ्युपगच्छन्ति। कार्याणि पृथिव्यादीनि पञ्चतत्त्वानि रूपादयः पञ्चगुणाश्चेति दशविधानि पञ्चज्ञानेन्द्रियपञ्चकर्मेन्द्रियाणि, मनोबुद्धिचित्तहङ्कारा इति विविधिमन्तःकरणमिति, चतुर्दशविधं करणम्। पशुर्जीवः, पशुपतिरीश्वरो निमित्तकारणं, पाशो मायादिः, स चेश्वरः स्वतन्त्रत्वाद्धर्माधर्मावनपेक्ष्य जगत्सृजतीति। तदयुक्तमिति। धर्माधर्मावनपेक्ष्य सुखदुःखादिफलप्रदत्वे-ईश्वरस्य वैषम्यादिकं प्रसज्येत, कर्मानुष्ठानवैफल्यञ्च स्यात्। तादृशेश्वरे मानाभावाच्च। अतः केवलनिमित्तकारणवादोऽप्रामाणिकः व्युत्पादितः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उत्पत्त्यसम्भवाधिकरणे च जीवोत्पत्तिप्रतिपादकपञ्चरात्रागमेन विरोधं दर्शयित्वा जीवस्य नित्यत्वप्रतिपादिकाभिः श्रुतिभिश्च समन्वयः प्रदर्शितः। पाञ्चरात्रागमे हि भगवानेको वासुदेवो निरञ्जनो ज्ञानरूपः परमात्मा चतुर्धात्मानं विभज्य वासुदेवो व्यूहरूपेण, सङ्कर्षणो व्यूहरूपेण, प्रद्युम्नः व्यूहरूपेण, अनिरुद्ध व्यूहरूपेण च वासुदेवः परमात्मा इत्युच्यते। सङ्कर्षणो जीवः, प्रद्युम्नो मनः अनिरुद्धोऽङ्कारः, तेषां वासुदेवः पराप्रकृतिः, इतरे कार्यभूताः इति प्रतिपाद्यते। अतस्तदनुरोधाज्जीवस्योत्प्रतिपादको वेदभागो बाध्यत इति। वेदागमयोर्विरोधे वेदे दोषरहित्वेन प्रामाण्यावश्यं भावात्तद्विरोधेन पाञ्चरात्रागमो हातव्य एवेति। अतो वेदान्तानुसारेण पाञ्चरात्रागमो बाध्यत इति। अतस्स्व-पक्षस्थापनपरपक्षपराकरणरूपपक्षद्वयात्मकत्वादस्य तर्कपादस्योपयोगः।

तृतीये पादे च सप्तदश अधिकरणानि सन्ति। तत्र द्वाभ्यां पादाभ्यां स्मृतिन्यायविरोधः परिहृतः। सम्प्रति द्वाभ्यां पादाभ्यां श्रुतिविरोधः परिह्रियते। तत्र वियदधिकरणे छान्दोग्यशाखातैत्तिरीयशाखायाश्चाकाशादिसृष्टेरूत्पत्तिविषये विरोधमुद्भाव्य सिद्धान्तरीत्या छान्दोग्यशाखोक्तवाक्यप्रमाणत्वेन तच्छाखायामेव गगनस्योपसंहृतिरुक्ता। मातारिश्वाधिकरणे च छान्दोग्यश्रुतिः प्रथमं वायोरुत्पत्तिं प्रतिपादयति। तैत्तिरीयश्रुतिस्तु वायोरुत्पत्तिन्न प्रतिपादयति। अतः श्रुत्योर्विरोधादप्रामाण्यमिति पूर्वपक्षीकृत्य, प्रधानवाक्यानुसारेणान्यथानेयानीति सिद्धान्तितम्। असम्भवाधिकरणे च 'सर्व एवात्मानो व्युच्चरन्ति' इत्यविशेषेण सर्वेषामात्मनामुत्पत्तिश्रवणेन ब्रह्मणोऽप्युत्पत्तिः प्रतीयते, 'न चास्य कश्चिज्जनिता' (श्वे० उप० ६।९) इति श्रुत्या चोत्पत्त्यभावः प्रतीयते। एवं प्रकारेण परस्परश्रुत्योर्विरोधमुद्भाव्य ब्रह्मणोऽपि-उत्पत्तिमत्त्वे तस्यापि कारणं वक्तव्यं, तच्च न सम्भवति इत्युपपादितम्। तेजोऽधिकरणे-छान्दोग्यतैत्तिरीयश्रुत्योर्वायोस्सकाशात्तेजस उत्पत्तिरिति परस्परविरोधमाशंक्य पञ्चमीश्रुत्या 'तेजः श्रुत्या च द्वयोरपि प्रामाण्यमिति राद्धान्तितम्। अबधिकरणे—'ज्योतिरापः' 'एतस्मात्' इति वाक्येन चापां ब्रह्मणस्सकाशादुत्पत्तिराम्नाता। तत्र त्रिवृत्कृतानामुत्पत्तौ विरोधः, नात्रिवृत्कृतानामिति समाहितम्। पृथिव्याकाराधिकरणे च छान्दोग्यशाखायामपां सकाशादन्नसृष्टिराम्नाता। तैत्तिरीयशाखायान्त्वपांसकाशात्पृथिव्या उत्पत्तिराम्नाता, अत एव परस्परं विरोधः, उत्तरे त्वन्नशब्दस्य पृथिव्यादिबोधकत्वान्न काचिदनुपपत्तिरित्युपपादितम्। तदभिध्यानाधिकरणे भूतानामुत्पत्तिक्रमो निरूपितः। विपर्ययाधिकरणे च भूतानां प्रलयक्रमो निरूपितः। अन्तराविज्ञानाधिकरणे प्राणस्य वायुविकारत्वं प्रसाध्य, तैत्तिरीयशाखायामुपसंहारो न भवतीति प्रख्यापितम्। चराचरव्यपाश्रयाधिकरणे च जीवस्य ब्रह्मैक्यप्रतिपादकश्रुतिविरोधः परिहृतः। आत्माधिकरणे जीवानामुत्पत्तिर्नैव सम्भवतीति समर्थितम्। ज्ञाधिकरणे च जीवो ज्ञानरूप एवाङ्गीकर्तव्य इत्युपपादितम्। उत्क्रान्तिगत्यधिकरणेऽपि जीवस्य कर्तृत्वमुत्क्रान्तिगत्यादिरपि तदायत्तैव जीवस्य, अतो न कोऽपि दोष इति प्रतिपादितम्। कर्त्रधिकरणे च जीवानां कर्तृत्वमेष्टव्यमिति निर्णयः कृतः। तक्षाधिकरणे निर्व्यापारस्यात्मनः कर्तृत्वानुपपत्तेरौपाधिकमेव कर्तृत्वं स्वीकार्यमित्यापादितम्। परायत्ताधिकरणेऽपि जीवस्य ज्योतिष्टोमाद्यनुकूलचिकीर्षादिरूपं कर्तृत्वं परिशोधितम्। अंशाधिकरणे-अभेदश्रुतय एव स्वार्थपरा भेदश्रुतयस्तु बिम्बप्रतिबिम्बभावेन भेदमादायोपपादनीया इति प्रतिपादितम्। एवञ्च सप्तदशभिरधिकरणैर्जीवस्य ब्रह्मैक्यप्रतिपादकः श्रुतिविरोधः परिहृतः।

द्वितीयाध्यायस्य चतुर्थे पादे नवसंख्याकान्यधिकरणानि विलसन्ति। यत्र पूर्वस्मिन्पादे भूतोत्पत्तिविषयश्रुतिविरोधः परिहृतः। प्रवर्तमानेऽस्मिञ्चतुर्थे पादे तु प्राणोत्पत्तिविषयः श्रुतिविरोधः पराकृतः। तत्र प्राणोत्पत्त्यधिकरणे क्वचित् प्राणानामुत्पत्त्याभात्र आम्नातः, क्वचित्प्राणोत्पत्तिः प्रतिपादिता। अतः प्राणोत्पत्तिश्रुत्योर्विरोधः। तथा सति श्रुतीनामप्रामाण्यं प्रसज्यत इति पूर्वपक्षीकृत्य प्राणादीनामुत्पत्तिरहितत्वे ब्रह्मज्ञानात्सर्वज्ञानं कथं भवेत्। तस्मादिन्द्रियाणामुत्पत्तिर्भवतीत्युक्तम्। सप्तगत्यधिकरणे च संख्याविषयश्रुतिविरोधः परिहृतः। तथा हि क्वचित् 'सप्तशीर्षण्याः प्राणाः' क्वचित् 'नव वै पुरुषे प्राणाः' क्वचिच्च 'एकादश' क्वचित् दश 'एव प्राणाः'

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अतोऽत्र श्रुतीनां विरोधादप्रामाण्यमिति । सिद्धान्तरीत्या उत्तरन्त्विन्द्रियाणि हि कार्यानुसारेण कल्प्यन्ते । कार्याणि चक्षुरादीन्येकादशोपलभ्यन्त इति समाहितम् । प्राणाणुत्वाधिकरणे-प्राणानां परिमाणविषये श्रुतिविरोधो निराकृतः । तत्र प्राणानामुत्क्रान्तिश्रुत्या विभुत्वाभावोऽवगम्यते । अतस्तद्विरोधपरिहारः, वृत्तीनामेवेन्द्रियकार्यकारित्वोपपत्तेः वृत्तीन्द्रियाणां विभुत्व-कल्पनमित्युक्तम् । प्राणश्रेष्ठ्याधिकरणे प्राणस्य श्रेष्ठत्वमुपपादितम् । वायुक्रियाधिकरणे च प्राणो वायुविकार एव साधितः । श्रेष्ठाणुत्वाधिकरणे प्राणस्यानेकधा परिमाणप्रतिपादकवाक्यानां विरोधमाशंक्याधिदैविकाभिप्रायं वा महत्त्वमतो न कोऽपि दोष इति साधितम् । ज्योतिराद्यधिकरणे 'अग्निर्वाक् भूत्वा मुखं प्राविशत्' इत्यत्राग्निरित्यादिवाक्यानामुपास्तिपरत्वं नेष्यते । अतो देवतानुगृहीतानामेवेन्द्रियाणां स्व-स्व-कार्ये प्रवृत्तिरिति साधितम् । इन्द्रियाधिकरणे इन्द्रियाणां प्राणस्य चावश्यमेव भेद इति प्रतिपादितम् । सञ्ज्ञामूर्तिक्लृप्त्यधिकरणे छान्दोग्ये श्रुतन्नामरूपव्याकृतित्वं ब्रह्मणि स्वीकार्यमितीत्थञ्चेन्द्रियविषयश्रुतीनां विरोधः पराकृतः ।

तृतीयोऽध्यायः

साधनाध्यायाख्यः

इतः पूर्वं प्रथमेऽध्याये ब्रह्मणि समन्वये निरूपिते, द्वितीये स्मृतिन्यायाविरोधे व्युत्पादिते, तृतीयेऽध्याये चात्मज्ञानं मोक्षसाधनं ससन्न्यासं निरूपितम् । तत्र प्रथमे पादे वैराग्यं निरूपितम् । अत्र प्रथमपादे षडधिकरणानि सन्ति । तत्रापि प्रथमे तदन्तरप्रतिपत्त्यधिकरणे प्रसङ्गागतञ्च किञ्चिदत्र जीवस्य परलोकगमनावसरे भूतपरिष्वङ्गोऽस्ति न वेति चिन्ता प्रवर्तते । जीवो हि परलोकं यियासुरिन्द्रियप्राणादिकं गृहीत्वा हृदयदेशमागत्य ततो निष्क्रामतीति श्रुतिसिद्धमिति पूर्वपक्षीकृत्य जीवा देहारम्भकभूतसूक्ष्मपरिष्वक्ता एव गच्छन्तीत्युक्तम् । कृतात्ययाधिकरणे च चन्द्रमण्डले स्वर्गमनुभूयावतरन्तो जीवाः किं कर्मयुक्ता उत कर्मरहिता इति संशयमुद्भाव्य पुण्यशेषेणैवारोह इत्यभ्युपगतम् । अनिष्टादिकार्यधिकरणेऽपि पापिनां चन्द्रमण्डले गमनं समस्ति न वा इति संशये, पूर्वपक्षे गमनमस्तीत्युक्तम् । सिद्धान्ते तु पापिनाञ्चन्द्रमण्डले गमने पुण्यस्य करणं वृथा स्यादिति प्रतिपादितम् । तस्मान्न पापिनाञ्चन्द्रमण्डलप्राप्तिरिति । साभाव्यापत्त्यधिकरणे च वाय्वादिषु संश्लेषमात्रमनुशयिनामिति समासेन व्युत्पादितम् । नातिचिराधिकरणे किं व्रीह्यादिभावात्प्राचीनेषु चिरमचिरं वा अनुशयो तिष्ठत्युताचिरमेवेति शङ्कामुत्पाद्य नातिचिरता सिद्धान्ततया स्वीकृता । अन्याधिष्ठिताधिकरणेऽपि 'यदि व्रीह्यादिजन्ममुख्यं स्यात्ततो व्रीह्यादिषु लूयमानेषु-अनुशयी प्रवसेत् । ततश्चानुशयिनो रेतस्सिग्यो न भवेत् । अतः संलेषमात्रमनुशयिनः इत्युपपादितम् । तदेवं प्रथमे पादे जीवानां परलोकगमननिरूपणेन निरूपितं षडभिरधिकरणैरिति सुस्पष्टम् ।

अत्र द्वितीयपादे चाष्टसंख्याकान्यधिकरणानि विलसन्ति । तत्राद्यैश्चतुर्भिरधिकरणैस्तत्त्वंपदार्थयोःशोधः कृतः । तत्राद्ये सन्ध्याधिकरणे स्वप्नावस्थां प्रस्तुत्य तदवस्थायां प्रतीयमानाः पदार्थाः प्रातिभासिका एव । स्वाप्निकव्यवहारस्यात्मचैतन्यमात्रापन्नत्वादादित्यादीनां ज्योतिषां तदानीमभावात् । अतस्त्वंपदार्थस्य स्वप्रकाशत्वं सिद्ध्यतीति साधितम् । तदभावाधिकरणे सुषुप्त्यवस्था परीक्षिता । तत्र जीवस्य स्वापः कस्यांचिच्छाखायां नाडीषु श्रूयते । कस्यांचित्पुरीतति, कस्यांचिद्ब्रह्मणि, तत्र किं नाडीपुरीतदब्रह्मणां विकल्प-उत समुच्चय इत्याशङ्कामुद्भाव्य ब्रह्मण एव स्वापाधारत्वं स्वीकृतम् । कर्मानुस्मृतिशब्दविध्यधिकरणेनापि प्रकारान्तरेण पुनस्तदेवाशंक्य ब्रह्मण्येव स्वापः साधितः । मुग्धाधिकरणे मूर्च्छावस्था चिन्तिता । उभयलिङ्गाधिकरणे च 'सत्यकामः' 'अस्थूल' इत्यादि ब्रह्मणि श्रुतयस्सविशेषत्वमौपाधिकन्निर्विशेषत्वञ्च स्वाभाविकमिति प्रतिपादयन्तीति स्वीकार्यम् । प्रकृतैतावत्वाधिकरणे ब्रह्मणो रूपस्य निषेध उत ब्रह्मण एवाहोस्विद्रूपस्यैवेति विकल्पानुद्भाव्य सर्वेषु हि वेदान्तेषु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ब्रह्मव्युत्पादनं प्रपञ्चनिषेधेन क्रियत इति साधितम् । अतस्तदैकरूप्याय प्रकृतेऽपि रूपनिषेध एव स्वीकार्यो न ब्रह्मनिषेध इति राद्धान्तितम् । पराधिकरणेऽपि ब्रह्मणोऽन्यदपि तत्त्वान्तरमस्ति न वेति चिन्तितम् । फलाधिकरणे च यागादिभ्यः फलं जायमानमीश्वरप्रसादमपेक्ष्यते न वेति सान्दिह्य परमेश्वरादेव यागादिफलमिति सिद्धान्त सामञ्जस्यन्निरूपितम् ।

तृतीयः पादः—पूर्वस्मिन् पादे तत्त्वंपदार्थौ निरूपितौ । प्रवर्तमाने पादे वाक्यार्थोपयुक्ततया गुणोपसंहारो निरूपितः । तदर्थतया विद्याभेदाभेदोऽपि निरूपितः । अत्र पादे षड्त्रिंशदधिकरणानि सन्ति । तत्र सर्ववेदान्त-प्रत्ययाधिकरणे विद्यानां शाखाभेदेऽपि न विद्याभेद इत्यापादितम् । उपसंहाराधिकरणे विद्यैक्ये गुणोपसंहारः प्रदर्शितः । अन्यथात्वाधिकरणे श्रुतिवाक्यच्छायासाम्यमात्रेण वेद्यभेदेऽपि विद्यैक्यं साधितम् । व्याप्त्यधिकरणे चौद्गीथाक्षरशब्दयोस्सामानाधिकरण्येन निर्देशे विचारः प्रस्तुतः । सर्वाभेदाधिकरणे काण्वादिशाखागतायाः कौषीतक्यादिशाखागतायाश्च प्राणविद्याया एकत्वाद्वसिष्ठत्व-प्रतिष्ठत्वादिगुणानामुपसंहारो भवतीत्युक्तम् । आनन्दाद्यधिकरणे ब्रह्मण आनन्दादयो गुणाः, निर्विशेषविद्यायामेकत्रोक्तनां गुणानामुपसंहारो भवति । अत आनन्दादीनामुपसंहार इत्युक्तम् । आध्यानाधिकरणे च विद्याभेदाभेदप्रसङ्गाद्वाक्ये भेदाभेदविचारः कृतः । ततश्च सर्वमिदमेकं वाक्यं ब्रह्मपरत्वप्रतिपादनपरमिति संसाधितम् । आत्मागृहीत्यधिकरणे च छान्दोग्यबृहदारण्यकवाक्य-योरेकरूपत्वाद्विद्यैक्यं साधितम् । कार्याख्यानाधिकरणे 'आपो वास' इति श्रुतौ विधानप्रायपाठाद्वासो दृष्टिरेव विधेयेति प्रतिपादितम् । समानाधिकरणे बृहदारण्यकाग्निरहस्ययोर्विद्यैकत्वमुपपादितम् । सम्बन्धाधिकरणे—हिरण्यगर्भादित्ययोः प्रयोगभेदेन नाम्नो व्यवस्थितिरुपपादिता । सम्भृत्यधिकरणे राणायनीय-खिलपाठस्थ शाण्डिल्यविद्यायां नोपसंहार इत्युक्तम् । पुरुषविद्याधिकरणे तण्डिब्राह्मणतैत्तिरीयब्राह्मणयोर्विद्यैकत्वन्न भवती-त्युक्तम् । वेद्याद्यधिकरणे च तैत्तिरीयवाजसनेयकौषीतकिब्राह्मणानां समन्वयत्वेऽपि 'शन्न' इत्यादिमन्त्राणान्न विद्यार्थत्वमिति साधितम् । हान्यधिकरणे छान्दोग्यपठित 'विधूय' तथा कोषीतकिब्राह्मणपठित 'विधुनुते' शब्दस्य च कम्पनं वा हानं वेति विकल्प्य हानमेव सिद्धान्ततया स्वीकृतम् । साम्परायाधिकरणे पर्यङ्कब्रह्मोपासकस्य-उत्क्रान्तेः प्रागेव पुण्यपापक्षयः साधितः । गतेरर्थवत्त्वाधिकरणे निर्गुणविद्यायां गत्युपसंहारो नास्तीत्युक्तम् । अनियमा-धिकरणे ब्रह्मलोक-प्राप्ते अर्चिरादिमार्गं आवश्यक इति निर्दिष्टम् । यावदधिकाराधिकरणे च ब्रह्मविद्याया मोक्ष-हेतुत्वमस्ति न वेति संशयमुद्भाव्य ब्रह्मज्ञानं मोक्षहेतुरिति राद्धान्तितम् । अक्षराद्यधिकरणे—'अस्थूलमनणवादि' निषेधाः ब्रह्मविद्यायामुपसंहर्तव्या न वेति विशंक्य तद्धर्माणामुपसंहार इष्यत इति सिद्धान्तितम् । वियदधिकरणे कठमुण्डकयोर्वेद्यैक्याद्विद्यैक्यं गुणोपसंहारश्च साधितः । अन्तरत्वाधिकरणे-उषस्तिकहोलब्राह्मणयोः प्रत्यगभिन्न-ब्रह्मैव प्रतिपाद्यमिति व्यवस्थापितम् । व्यतिहाराधिकरणे किञ्जीवे ब्रह्मदिष्टिः कर्तव्या उत यथाम्नातञ्जीवब्रह्मदृष्टिः कर्तव्या इति संशय्य दृष्टिद्वयमेत्र कर्तव्यमिति सिद्धान्तितम् । सत्याधिकरणे बृहदारण्यकस्य नामोपासनास्तुति-परवेद्यैकत्वाद्विद्यैक्यञ्चोपपादितम् । कामाधिकरणे च छान्दोग्यपठितसत्यकामत्वादिमन्त्राणामुपसंहारः वाजसनेयक-विद्यायामस्ति न वेति सन्दिह्य सगुणनिर्गुणत्वादिना विद्याभेदेऽपि स्तुत्यर्थं उपसंहारः स्वीकृतः । आदराधिकरणे-वैश्वानरविद्यां प्रस्तुत्य प्राणाग्निहत्रादिकमुपापदितम् । तन्निर्धारणाधिकरणे 'ओमित्येतदक्षरम्' इत्यादिमन्त्रागा-मुपासनाङ्गत्वबाधकत्वे प्रमाणाभाव उपदर्शितः । प्रदानाधिकरणे च छान्दोग्यबृहदारण्यकश्रुत्योः, अध्यात्मादिदैवता-दिभेदेन प्रतिपाद्यभेदं व्युत्पाद्योपसंहारपूर्वकमुपासनाव्युत्पादने भेद एवाङ्गीकृतः । लिङ्गभूयस्त्वाधिकरणे ज्योतिष्टोमादिकर्माङ्गता मनश्चिदादीनामुत केवलं विद्यात्मतेति संशय्य मानसग्रहस्तु वचनबलात् क्रत्वर्थ एवैष्टव्य इति प्रतिपादितम् । ऐक्यात्म्याधिकरणे देहातिरिक्तात्मास्तित्वं साधितम् । अङ्गावबद्धाधिकरणे-उद्गीथादीनि वाक्यानि-उपासनापराणि संशाधितानि । भूमज्यायस्त्वाधिकरणे-व्यस्तोपासनं तिरस्कृत्य समस्तोपासनमुरीकृतम् । शब्दादिभेदाधिकरणे-दहरशाण्डिल्योपकोसलादिविद्यानां प्राणादिविषयविद्यानाञ्च भेदोऽभ्युपेतः । विकल्पाधिकरणे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चाहङ्ग्रहोपासनेषु विकल्प एवाभ्युपगतः काङ्क्षाधिकरणे यथाश्रयाभवाधिकरणे चाङ्गावबद्धानि यान्युद्गीथाद्युपासनानि तेषां किं समुच्चयो यथाकाम्यं वेति विकल्प्य यथाकाम्यमेवाभ्युपेयमिति स्थिरीकृतम्। एवञ्चात्र पाठे निर्गुणे ब्रह्मणि नानाशाखापठितपौनरुक्त्यपदोपसंहारो भूयसायासेन कृतः, प्रसङ्गाच्चागत सगुणविद्यासु शाखान्तरपठितानां प्रमाणानां निरूपञ्च कृतम्।

पूर्वस्मिन्पादे ज्ञानस्य विषयो निरूपितः। अस्मिन्पादे ज्ञानङ्गानि व्युत्पादितानि, अत्र सप्तदशाधिकरणानि सन्ति। तत्र ज्ञानस्य मोक्षफलत्वे सिद्धे सन्न्यासादितदङ्गनिरूपणमुपपाद्य प्रथमेन पुरुषार्थाधिकरणेन मोक्षफलत्वं व्युत्पादितम्। परामर्शाधिकरणे च जाबालश्रुतिप्रमाणेन-ऊर्ध्वरेतसां सन्न्यासग्रहणं साधितम्। स्तुतिमात्राधिकरणे उद्गीथादिवाक्यस्तावकमेवेति स्वीकृतम्। पारिप्लवाधिकरणे श्रुतौ पठित अथ ह' इत्यादीनां ब्रह्मविद्यास्तावकतया तदेकवाक्यता साधिता। अग्नीन्धनाद्यधिकरणे च प्रथमाधिकरणोक्तं ज्ञानस्य मोक्षहेतुत्वमुपजव्याग्नीन्धनादिसापेक्षकर्मानपेक्षत्वं मोक्षस्येति व्युत्पादितम्। अतो न ज्ञानकर्मसमुच्चय इत्युक्तम्। सर्वापेक्षाधिकरणे 'तमेतं वेदानुवचनेन' इति वाक्यं विविदिषायां कर्मणां विनियोजकमिति प्रख्यापितम्। सर्वात्रानुमित्यधिकरणे प्राणविदः सर्वान्निभक्षणनिषेधो विहितः। आश्रमकर्माधिकरणे-अग्निहोत्रादीनामाश्रमकर्मत्वमुपापादितम्। उभयलिङ्गाधिकरणे च पूर्वस्मिन्नधिकरणे प्रतिपादितयोः कर्मणां विविदिषार्थत्व-प्रत्यवायपरिहारार्थत्वयोश्च भेदश्चिन्तितः। विधुराधिकरणे आश्रमिणां विधुरादीनां विद्यायामधिकारश्चिन्तितः। तद्भूताधिकरणे-सन्न्यासिनाँ पुनर्गार्हस्थ्यादिप्रवेश उपपद्यते न वेति विचारितम्। अधिकारिकाधिकरणे च नैष्ठिकस्यापि प्रायश्चित्तं साधितम्। बहिरधिकरणे-कृतप्रायश्चिता नैष्ठिकादयः व्यवहार्य्या न वेति विचारितम्। स्वाम्यधिकरणे-किमङ्गावबद्धान्युपासनान्यगं येनानुष्ठीयते तेनैव कर्तव्यान्युत यजमानेनेति परिचोदनामुद्भाव्य क्रतोः परिक्रमो हि यस्य यस्य भावनासम्बधित्वं तस्य सर्वस्याप्यनुष्ठाय, उपासनमपि तत्सबन्ध्येवेति समाधानमुक्तम्। सहकार्यन्तरविध्यधिकरणे च मौनामौनविचारः प्रवर्तितः। अनाविष्काराधिकाराधिरण-श्रुतौ पठित 'बाल्य' शब्दस्य विचारः प्रवर्तितः। ऐहिकाधिकरणे च ब्रह्मविद्या नैवैहिकी परमामुष्मिकी इत्यपि साधितम्। मुक्तफलाधिकरणे-मुक्तिरेकरूपेनि प्रतिपादितम्। एवमस्मिन्पादे निर्गुणब्रह्मविद्याया बहिरङ्गसाधनव्याजेनाश्रमधर्मयज्ञदानादीनां निरूपणं शमदमादिसमुचितानि निदिध्यासनादीनि चान्तरङ्गसाधनानीति-निरूपितम्।

चतुर्थः फलाध्यायः

तत्र तृतीये ससाधना ब्रह्मविद्या प्रतिपादिता। चतुर्थेऽध्याये च ब्रह्मविद्याफलं प्रतिपादितम्। तत्र प्रस्तुतेऽस्मिन् पादे चतुर्दशसंख्यकान्यधिकरणानि सन्ति। तेष्वावृत्यधिकरणे भामतीविवरणमतनिदर्शनपुरस्सरं श्रवणादिः, अवहननादिवदसम्भावनादिनिवृत्तिपर्यन्तमावर्तनीय इति स्वारस्येनापादितम्। आत्मतत्त्वोपासनाधिकरणे 'तत्त्वमसीति' वाक्यञ्जीवब्रह्मणोरैक्यबोधकमिति प्रतिपादितम्। प्रतीकाधिकरणे प्रतीकोपासनेष्वहङ्ग्रहःकर्तव्यो न वेति विचिन्त्य नाहङ्ग्रहःप्रतीके-इति प्रत्युक्तम्। ब्रह्मदृष्ट्यधिकरणे च मन आदिषु ब्रह्मदृष्टिः कर्तव्येति प्रतिपादितम्। आदित्यादिमत्यधिकरणे-उद्गीथादिष्वादित्यदृष्टिः कर्तव्येति सूपपादितम्। आसीनाधिकरणेआसीनेनैवोपासनं कर्तुं शक्यमित्युपपादितम्। एकाग्रताधिकरणे चैकाग्रता यत्र, तत्र ध्यानक्रिया युक्तेति साधितम्। आप्रायणाधिकरणे यानि सविशेषोपासनानि ब्रह्मप्राप्तिफलानि किमाप्रायणमावर्तनियानि न वेति चिन्तां पुरस्कृत्यआप्रायणं कर्तव्यवेति नियमितम्। तदधिगमाधिकरणे च सविशेषनिर्विशेषविद्ययोः फलं निरूपितम्। इतरासंश्लेषाधिकरणे शास्त्रे प्रयोगदर्शनात्पुण्यनिवृत्तिरपि विदुषोऽपेक्षितेति व्युत्पादितम्। अनारब्धाधिकरणे-ज्ञानेनापि प्रारब्धनाशो न भवतीत्युक्तम्। अग्निहोत्राद्यधिकरणे सगुणविद्यायाः कर्मसमुच्चितताया एव ब्रह्मलोकसाधनत्वं साधितम्। विद्याज्ञानसाधनाधिकरणे-विद्याविहीनेऽपि कर्मविविदिषासमुपयुज्यत इत्युपपादितम्। इतरक्षपणाधिकणे-प्रारब्ध-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कर्मणां भोगानन्तरं नाशेसत्यभिव्यक्तचैतन्यरूपज्ञानेन प्रारब्धहेतुभूताज्ञाननाशः सम्भवतीत्युक्तम् । इत्यञ्च श्रवणाद्यावृत्या निर्गुणं ब्रह्म समश्नुते । जीवतः पापपुण्यलेपलक्षणा जीवन्मुक्तिरभिहिता ।

पूर्वस्मिन्पादे सविशेषनिर्विशेषविधयोः फलभूतः पापक्षयो निरूपितः । अस्मिन्पादे तु सविशेषविदामुत्क्रान्तिर्निरूपिता । अस्मिन्पादे-एकादशाधिकरणानि, सन्ति । तत्र वागधिकरणे-किं मनसि वाच एव लय उत वा वृत्तेरिति सन्देहमुद्भाव्य सिद्धान्ततो वृत्तिलय एव स्वीकृतः । मनोऽधिकरणेऽपि प्राणे मनसो लयो वृत्तिलय एवेति प्रतिपादितम् । अध्यक्षराधिकरणे जीवस्योपसंहारः अस्ति न वेति संशय्य जीवस्योपसंहार आवश्यक इत्यभ्युपगतम् । आसृत्युपक्रमाधिकरणे किमियमुत्क्रान्तिर्विद्वदविदुषोरूताविदुष एवेति, यदा विदुष उत्क्रान्तिः स किमविदुषा तुल्या न वेति परिशंक्य विद्वान् मूर्द्धन्यया नाड्या निष्क्रामति, अविद्वान् इतरया नाड्या, फलवैलक्षण्यमपि मार्गवैलक्षण्यादेवोपपन्नांमति-साधितम् । संसाख्यपदेशाधिकरणे च ब्रह्मसम्पत्तिस्तु स्वापकालवत्सावशेषैव स्वीकृता । प्रतिषेधाधिकरणे-निर्विशेषब्रह्मविदो देहापादानिकोत्क्रान्तिरिति प्रतिषेध-परत्वमेव स्वीकार्यमित्युक्तम् । वागादिलयाधिकरणे-तत्त्वविदः प्राणादयः कलाः ब्रह्मण्येव लीयन्त इत्युपपादितम् । अविभागाधिरणे विदुषां प्राणादिलयः निश्शेषलयः स्वीकृतः । तदोकोऽधिकरणे मूर्द्धन्यनाड्यैव विदुषो निष्क्रमणमप्युपगतम् । रश्म्यधिकरणे किं रात्रौ मृतः ब्रह्मलोकं गच्छति नवेति पूर्वपक्षीकृत्य रात्रौ मृतोऽपि ब्रह्मलोकं प्रतिपद्यत इति सिद्धान्तितम् । दक्षिणायनाधिकरणे च दक्षिणायने मृतस्यापि ब्रह्मलोकप्राप्तिरस्तीति पूर्वोक्तन्यायातिदेशार्थमिदमधिकरणम् । तथा चोत्तरायणप्राशस्त्यप्रतिपादनाद्भीष्मादेरुत्तरायणप्रतीक्षादर्शनाच्च दक्षिणायने मृतानां विदुषान्न ब्रह्मप्राप्तिरिति विशेषशङ्कामुद्भाव्य दक्षिणायने मृतानामपि विदुषां ब्रह्मलोकप्राप्तिरविरुद्धेति साधितम् । तथा च म्रियमाणस्य जीवस्योत्क्रान्तिप्रकारविचारपूर्वकं सगुणोपासकस्य ब्रह्मप्राप्तिरभिहिता ।

पूर्वस्मिन्पाद उत्क्रान्तिर्निरूपिता । अत्र पादेऽर्चिरादिमार्गो निरूपितः । अत्र षडधिकरणानि सन्ति । तत्र प्रथमेऽर्चिराद्यधिकरणे-ब्रह्मलोकगमनाय किन्नाना मार्गा उतैक एव मार्ग इति शङ्काविशेषमुद्भाव्य ब्रह्मलोकस्यमार्गस्त्वेक एवेति निर्णीतम् । वाय्वाधिकरणे च वायुलोकः किमर्चिर्लोकान्तरं निवेशनीय उत संवत्सरान्तरमिति परिचोद्य संवत्सरानन्तरं वायोर्निवेश इति सिद्धान्तितम् । तडिदधिकरणे तत्रैव वाक्ये श्रुतौ वरुणलोकः क निवेशनीय इति परिचोदनामुद्भाव्य विद्युतोऽन्ते निवेश इति विचारितम् । आतिवाहिकाधिरणे-अर्चिरादयो मार्गाः चिह्नभूता उत भोगभूमय उतातिवाहिका इति शङ्कां निरूप्य-आतिवाहिकत्वमर्चिरादीनां स्वीकृतम् । कार्य्याधिकरणे 'तत्पुरुषोऽमानवः' (छा. ४।१५।५) इत्यत्र पठितब्रह्मशब्देन न परं ब्रह्म विवक्षितम्, अपितु कार्यमेव ब्रह्मेत्यवगन्तव्यमित्युक्तम् । अप्रतीकालम्वनाधिकरणे च किं प्रतीकोपासकाः ब्रह्मलोकङ्गच्छन्ति नवेति संशय्य प्रतीकोपासकानान्न ब्रह्मप्राप्तिरिति साधितम् । सगुणब्रह्मविदां चोत्तरायणमार्गो निरूपितः ।

प्रथमे पादे निर्विशेषविदां सविशेषविदाञ्च पापक्षयः प्राधान्येनोक्तः । द्वितीये सविशेषविदामुत्क्रान्तिरुक्ता, निर्विशेषविदामुत्क्रान्त्यभावश्च । तृतीये सविशेषविदामर्चिरादिमार्गेण ब्रह्मलोकप्राप्तिरुक्ता । अत्र चतुर्थे पादे तु निर्विशेषविदां शरीरपातोत्तरं ब्रह्मात्मनावस्थानं, सविशेषविदान्तु जगद्व्यापारं वर्जयित्वा स्वेच्छया अवस्थानमिति प्रतिपादितं सम्पद्याविर्भावाधिकरणे । अत्र सप्तसंख्यकान्यधिकरणानि सन्ति । अविभागेन दृष्टत्वाधिकरणे च किं मोक्षदशायाञ्जीवो ब्रह्मात्मनावतिष्ठते-उताभेदेनेति शङ्कामुद्भाव्य ब्रह्मात्मनावतिष्ठत इति प्रतिपादितम् । ब्राह्माधिकरणेऽपि किं मुक्तौ ब्राह्मं सर्वज्ञत्वादि प्रतिपाद्यत उत शुद्धचिन्मात्रं भवति उतोभयविध इति संशय्य श्रुतिद्वयप्रामाण्याद्ब्रह्मरूपत्वाच्चिन्मात्र इत्यङ्गीकृतम् । सङ्कल्पाधिकरणे च सङ्कल्पमात्रज्ञाः पित्रादय इति साधितम् । अभावाधिकरणे सङ्कल्पद्वयानुसारेण सशरीरत्वमशरीरत्वञ्च विदुषः स्वीकार्यमिति प्रतिपादितम् । प्रदीपाधिकणे यदा विदुषो नानाशरीरपरिग्रहस्तदा किमेकमन्तःकरणमुत नानेति परिशंक्य न नानान्तःकरणानि किन्त्वेकमेवेति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संशाधितम् । जगद्व्यापाराधिकरणे च ब्रह्मलोकङ्गतो जीवः किमीश्वरवज्जगत्सर्जनादिकं करोत्युत नेति परिशङ्कामुद्भाव्य प्राक्सिद्धपरेश एवेह परिदृश्यमानस्य प्रपञ्चस्य स्रष्टेति स्वीकृतम् । एवञ्च निर्गुणब्रह्मविदो विदेहकैवल्यप्राप्तिः पूर्वभागेन प्रतिपादिता । सगुणब्रह्मविदो ब्रह्मलोके स्थितिरुत्तरभागेनाभिहिता । इत्थञ्च समन्वयसाधनाविरोधपरिहारफलचतुर्लक्षणशास्त्रं मोक्षैकत्वविद्याप्रतिपादनपुरस्सरमुपसंहृतमिति ।

मातृकाविवरणं सङ्केतश्च

अत्र सम्पादनकर्मणि वेदान्तनयभूषणग्रन्थस्याधोऽङ्किताः मातृकाः प्रयुक्ताः । तासां सङ्केतो विवरण ञ्चेत्थम् ।

मातृकासङ्केतः सूचीनिर्देशः

(क)

इयं मातृका सरस्तीभवने (वाराणसेयसंस्कृतविश्वविद्यालये)
वाराणसीस्थे सुरक्षिता । तत्रत्य मातृकासूचीनिबन्धे
२८८०३ अनुक्रमेण निर्दिष्टा ।

(ख)

इयं खनाम्नी मातृकापि वाराणसेयसंस्कृतविश्वविद्यालयस्य सरस्वतीभवने सुरक्षिता वर्तते । तत्रत्यमातृकासूची निबन्धे २८५२८ अनुक्रमेण दिर्दिष्टा ।

(ग)

इयमपि मातृका वाराणसेयसरस्वतीभवनस्थैव । इयं मातृका अन्यासां मातृकाणामपेक्षाकृतदुर्लभा प्रतिभाति । एतावत्कालपर्यन्तमस्याः सूचीपत्रमप्यप्रकाशितम् । तत्रत्य मातृकासूचीनिबन्धे ५।१३४ अनुक्रमेण निर्दिष्टा ।

(घ)

मातृकेयं वाराणसेयसंस्कृतविश्वविद्यालयस्य सरस्वतीभवने सुरक्षिता । अस्यां मातृकायां बहुत्र दुर्वाच्यान्यक्षराणि सन्ति । अशुद्धिबहुला च । तत्रत्य मातृकासूची निबन्धे २७८६८ अनुक्रमेण निर्दिष्टा ।

(क) मातृकाया विवरणम्

वेदान्तनयभूषणस्य मातृकाविवरणम्
अनुक्रमाङ्कः नं० २८८३
प्रवेशाङ्कः ९८०८ वर्तते ।
क्रमाङ्कः $\frac{११}{३२}$ निर्दिष्टोऽस्ति ।

विषयः अयं ग्रन्थोऽद्वैतवेदान्तविषयकः ।
ग्रन्थकारः अस्यां मातृकायां ग्रन्थकारस्य नामधेयन्न लिखितम् ।
पत्रसंख्या ३६ गणनया वर्तते ।
श्लोकसंख्या न लिखिता ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पंक्तिसंख्या प्रतिपृष्ठं १२ लिखित।
आकार: १२ '२ ४' ट निर्दिष्टोऽस्ति।
लिपि: देवनागरी वर्तते।
आधार: का इति निदेशित:।
वि० विवरणमपूर्णमस्ति।
क्रमाङ्क: पी० एस० यू० पी० ७७ एस० सी० ई० १९५१—५००००
द्वि० ३५५४
च०
बहिर्विवरणपत्रे विवरणमित्थमुट्टङ्कितमस्ति।

प्रथमं पत्रम्

श्रीगणेशाय नमः।

श्रीगुरोश्चरणाम्भोजद्वन्द्वं द्वन्द्वोपशामकम्।
अलङ्करोतु मे स्वान्तं द्वन्द्वदुर्गन्धशान्तये ॥१॥

वेदान्तवारान्निधिमन्थनेन भाष्यामृतं सम्परिगृह्य मर्त्यान्।
अपाययद्यः करुणार्द्रचित्तस्तस्मै नमो भाष्यकृते शिवाय ॥२॥

भाष्यामृतरसव्यक्त्यै या गुरूणां परिष्कृतिः।
तस्यास्तु संग्रहं कुर्वे वेदान्तनयभूषणम् ॥३॥

अनया दिशा मङ्गलमाकलय्य 'अथातो ब्रह्मजिज्ञासा' अनेन सूत्रेण साधनचतुष्टयसम्पन्नस्य ब्रह्म जिज्ञासितव्यमित्युक्तम्। तेन च जीवाभिन्नस्य ब्रह्मणो ज्ञातत्वादिकं तन्निश्चयस्य च प्रयोजनवत्त्वं सूचितम्। अन्यथा जिज्ञासानुपपत्तेः। नहि निश्चितेऽर्थतत्त्वे जिज्ञासोदेति, न फलरहिते निश्चय इच्छा, तथा च जीवब्रह्मैक्यं, तन्निश्चयश्चानर्थहेत्वज्ञाननिवर्तकत्वात् प्रयोजनमिति विषयप्रयोजनवत्त्वाच्छास्त्रस्यारम्भणीयता सिद्धा'। एवं प्रथमायां पंक्तौ लिखितमस्ति (वे. न. भू. मा. पृ० १)

षट्त्रिंशतत्तमपत्रम्

............'अन्तर उपपत्तेः' छन्दोगशाखायामित्थमुपाख्यायते। उपकोसलो हि सत्यकामस्य गुरोर्निकटे द्वादशसंवत्सरपर्यन्तमग्निपरिचरणपूर्वकं ब्रह्मचर्येणोवास। स च सत्यकामोऽन्यान्ब्रह्मचारिणस्समावर्तयन्नैनं समावर्तयतिस्म। स च सत्यकामो जायया प्रार्थ्यमानोऽप्यग्निपरिचरणतोऽयं ब्रह्मचारी, अत एनं समावर्त्तयान्यथा ह्यग्नयस्त्वां निन्देयुरिति तद्वार्तामगणय्यैव ग्रामान्तरं जगाम। ततो गौतम-उपाध्यभार्यया प्रार्थ्यमानोप्यभियुक्तत्वान्नाशात्ततोऽग्नयः स्वपरिचरणसन्तुष्टास्सन्तो व्यापित्वसुखत्वगुणविशिष्टं परमात्मनं प्राणब्रह्मोपासनं चोक्त्वा स्वोपासनं चोक्त्वा 'आचार्यस्तु ते गतिं वक्ते'ति सूचुः। तत आचार्य आजगाम। ततो मुखप्रसादं शिष्यस्य दृष्ट्वा ब्रह्मवित्त्वमनुमायोपदेष्टारमपृच्छत्। सोऽपि च चिताग्नीनसूसुचत्। तदन्वाचार्यस्तदुपदिष्टमर्थं श्रुत्वाह 'लोकान्वाव किल सौम्य तेऽवोचन्नहन्तु ते तद्वक्ष्यामि यथा पुष्करपलाश आपो न श्लिष्यन्त एवं विदि पापङ्कर्म न श्लिष्यत इति। तदनु शिष्येण प्रार्थितः प्राचार्यः। 'य एषोऽक्षिणी पुरुषो दृश्यते, एष आत्मेति होवाच' ....

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(ख) मातृकाया विवरणम्

अनुक्रमाङ्कः	संख्या २८५२८
विषयः	अद्वैतवेदान्तः
प्रवेश संख्या	१६१३
क्रम संख्या	४ / ११४
नाम	वेदान्तनयभूषणम्
ग्रन्थकारः	स्वयंप्रकाशानन्दः
पत्र संख्या	२–४९
श्लोकसंख्या	नलिखिता।
अक्षरसंख्या	(पंक्तौ) ५४
पंक्तिसंख्या	(पृष्ठे) १३
आकारः	१०.८.८५
लिपिः	देवनागरी वर्तते
आधार	का०
वि० विवरणम्	अपूर्णाङ्क, अशुद्धिबहुला च
आ० प्रा० २३२	

क्रमाङ्कः पी० एस० यू० पी०–७७ एस० सी० ई०—१९५१–५०, ०००

द्वितीयपत्रम्

श्रुतिर्हि लाक्षणिकेऽप्यर्थे सावकाशा। उपजीव्यप्रत्यक्षानुसारेणान्यथा नेया। अत एव 'आदित्यो यूपः' 'यजमानः प्रस्तरः' इत्यादीनां तेजस्वित्वतत्कार्यकरत्वादिगुणमादाय गौणत्वमेव स्वीकृतं तत्सिद्धिपेटिकायम्। अत एव च 'सोमेन यजेत' 'कृष्णलान् श्रपयेत्' इत्यादिश्रु मत्वर्थीकरणादिलक्षणा स्वीक्रियते। अत एव भवद्भिरपि 'तत्त्वमसी' त्यादौ भागत्यागलक्षणा स्वीकृता। न चोपजीव्यप्रत्यक्षमाणत्वं व्यावहारिकं, न तच्छ्रुत्या बाध्यते। अतो नोपजीव्यविरोधः। प्राथम्यं 'त्वपच्छेदन्यायेन' बाध्यत्वे प्रयोजकः, निरवकाशत्त्वं तु असम्भाविताप्रामाण्यकयोर्द्वयोर्विरोधेऽन्यतरस्य प्राबल्ये हेतुः। इह तु सम्भाविताप्रामाण्यकत्वाद्भ्रमत्वेनापि नेतुं शक्यत्वेन तदीयानवकाशत्वस्याप्रयोजकत्वात् (वे. न. भू. भा. पृ० २)।

अत्र पञ्चाशतमं पत्रम्

'द्यावापृथिव्यादिकं ह्यत्र ब्रह्मलोकादिगमनोत्तरमुपभोग्यमेव गृह्यते। तत्क्रतुन्यायादुपभोग्यञ्च मतसैतानि-वामान्यस्य क्रमते य एते ब्रह्मलोकादिगमनोत्तरमुपभोग्यमेव गृह्यते, तत्क्रतुन्यायादुपभोग्यञ्च मनसैता निनामान्यश्च क्रमते य एते ब्रह्मलोक इति वाक्ये मनोग्रहणस्य परिसंख्यार्थत्वेन मनस एवोपभोगसाधनत्वावगमे मानसमेव स्वाप्निकतुल्यमित्यवगम्यते'।

(ग) मातृकायाः विवरणम्

अनुक्रमाङ्कः	५।१३४
विषयः	अद्वैतवेदान्तः
प्रवेशसंख्या	८२११७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्रमसंख्या	५।१३४
ग्रन्थनाम	वेदान्तनयभूषणम्
ग्रन्थकारः	—
पत्रसंख्या	१५५–३४६
आकारः	१७–१२
पंक्तिसंख्या	(पृष्ठे) २७
अक्षरसंख्या	(पंक्तौ) ३३
अपूर्णः	
लिपिः	दे० ना०
आधारः	का० आधुनिकं कर्गलम्
लिपिकालः	अज्ञातस्तथापि-अद्यतनीन इति प्रतोयते ।
वि० विवरणम्	अपूर्णा प्रायः प्रतिपृष्ठम् संख्यानिर्देशन टिप्पणयो नियोजिताः। कर्पादि-प्रकारेण टिप्पणीनां विलोकनेन चानुनीयते यत् ग्रन्थस्यास्य सम्पादनं कुर्वता केनाप्याधुनिकेन विदुषा मातृकेयं लिखिता। तत एव सर्वासु मातृकासु इयं सुस्पष्टा शुद्धा सुवाच्या चास्ति ।

१५५ तमं पत्रम्

ग्रन्थस्य प्रारम्भपृष्ठ एवं प्रारभ्यते—

पञ्चसंख्यानिवेशार्थं धर्मोऽपीहि न दृश्यते ।
अतिरेकप्रसङ्गाच्च तस्मात्प्राणादिगृह्यते ॥
वाक्यशेषबलात्तस्य निस्तात्पर्यकता च ।
ब्रह्मक्षत्रादिवद्यस्माल्लक्षणार्थं भविष्यति ॥

पञ्चशब्दो 'दिक्संख्ये संज्ञाया' मिति समासविधानात् पुरुषेषु रूढः। भाषिकस्वरेण चान्तानुदात्तत्वेन समस्तं पदम्। तत्र यदि रूढ्यर्थग्रहणे निस्तात्पर्यार्थकत्वापत्त्या योगार्थे ग्राह्य सांख्याभिमततत्त्वग्रहणे किमिति शैवाभिमतानां तत्त्वानां ग्रहणन्न भवेत्। तेषामपि हीमानि पञ्चविंशतितत्त्वानि तुल्यानि परन्त्वाकाशचिच्छक्तिरूपाधिकं तदधिष्ठानभूतशिवश्चेति मन्त्रोऽयं तेषां सम्यगेवोपपद्यते। यदि च संख्यानामपि प्रधानं त्रिधा भित्वा पञ्चविंशतितत्त्वमुपपाद्यते शैवतन्त्रेण सह विनिगमनाविरहतुल्य एव ।

३४६ तमं पत्रम्

यतो वेत्यादिवाक्येन-अनन्यायतेश्वरस्य जगत्कारणता प्रतिपाद्यते। तस्यैव प्रकृतत्वात्। अनेकेषाञ्चा जगत्स्रष्टृत्वे कस्यचित्संहारे कस्यचित्स्थितौ कस्यचिदुत्पत्ताविच्छेति जगदनवस्थितं स्यात्। तस्मादेकस्येश्वरस्य कर्तृत्वमनेकेषान्तु तद्भोगसाम्यमात्रम्। आप्नोति स्वाराज्यमिति श्रुतिस्तु परमेश्वरस्य मुक्तप्राप्यतां प्रतिपादयति। अत 'एव अवतिष्ठते मनसस्यति' वाक्यशेष उपपद्यते। भोगमात्रसाम्यञ्च 'आपो वै खलु मीयन्ते' इत्यादिश्रुतिसिद्धम्। ब्रह्मलोके च भोगाननुभूय परमं निर्वाणं प्राप्नुवन्ति। निर्विशेषनिष्ठास्तु इहैव मुक्ता भवन्तीति सर्वमनवद्यम्।

इति श्रीमत्परमहंसपरिव्राजकाचार्यसर्वतन्त्रस्वतन्त्रश्रीमदद्वैतानन्दसरस्वतीचरणारविन्द-भृङ्गायमानस्य स्वयम्प्रकाशानन्दस्य कृतिषु वेदान्तनयनभूषणे चतुर्थाध्यायस्य चर्थः पादः समाप्तः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(घ) मातृकाया विवरणम्

अनुक्रमाङ्कः	२७८७८
विषयः	अद्वैतवेदान्तः
प्रवेशसंख्या	१५४४९
क्रमसंख्या	८ । २०
ग्रन्थनाम	वेदान्तनयभूषणम्
ग्रन्थकारः	स्वयम्प्रकाशानन्दः
पत्रसंख्या	(१ – ६१ + ७२) ६३ – २००
श्लोकसंख्या	न दत्ता ।
अक्षरसंख्या	(पङ्क्तौ) ४३
पङ्क्तिसंख्या	(पृष्ठे) ८
आकारः	९. ६. ४. १
लिपिः	दे० ना० वर्तते ।
आधारः	का०
वि० विवरणम्	पूर्णा । अशुद्धिबहुला नैकत्र दुर्वाच्या कीटभक्षिता च ।
पी० एस० पी०	७७ एस० सी० ई० १९५१—५०,००० वर्तते ।
मातृकासंख्या	२७८६८
क्रमाङ्कः	२६३/६३
वे० नं० ६३	२ संग्रहः ३ संग्रहः १ वेदान्तनयभूषणम, पत्र १–२०० इति ।

प्रथमं पत्रम्

'श्रीगणेशाय नमः' ।

अनन्तरं ग्रन्थारम्भः

अथातो ब्रह्मजिज्ञासा 'अनेन सूत्रेण साधनचतुष्टयसम्पन्नस्य (न्नेन) ब्रह्म जिज्ञासितव्यमित्युक्तम् । तेन च जीवभिन्नस्य ब्रह्मणो ज्ञातत्वादिकं तन्निश्चयस्य च प्रयोजनवत्त्वं सूचितम् । अन्यथा जिज्ञासानुपपत्तेः । नहि निश्चितेऽर्थतत्त्वे जिज्ञासोदेति । न वा फलरहिते निश्चये इच्छा । तथा च जीवब्रह्मैक्यं विषयः । तन्निश्चयश्चानर्थहेत्वज्ञाननिवर्तकत्वात्प्रयोजनमिति विषयप्रयोजनवत्त्वाच्छास्त्रस्यारम्मणीयता सिद्धा । न च जीवब्रह्मणोरेक्यासम्भव । तयोर्विरूद्धकिञ्चिज्ज्ञत्वसर्वज्ञत्वादिमत्त्वात् । तथा च विषयासम्भवतः सत्यत्वादेव कर्तृत्वाद्यनर्थस्य ज्ञानविर्त्यत्वस्यासम्भवात्प्रयोजनस्याप्यसम्भव इति वाच्चम् । विरुद्धधर्माणां मिथ्यात्वस्य सूत्रसूचितज्ञाननिवर्त्यत्वान्यथानुपपत्यैवाभ्युपगमात् । अत एव सूत्रस्य तत्र तात्पर्यं स्वीकृत्य भगवता सूत्रव्याख्यानविशेषभाष्यकर्त्रा विषयप्रयोजनसिद्धचर्थं कर्तृत्वादिरूपबन्धमिथ्यात्वं प्रथमाधिकरणेन वर्णितम् । तदित्थं वेदान्तमीमांसाशास्त्रमारम्भणीयन्न वेति संशयः । तदर्थश्च किं विषयप्रयोजने लभ्येते उत नेति चिन्त्यते । तत्र पूर्वः पक्षः जीवस्य ब्रह्मणा तावदभेदो नैव सम्भवी जगत्क'''''''एतत्प्रथमपङ्क्तौ समुट्टङ्कितम् ।

२०० तमं पत्रम्

निरग्रहमेवैतद्ग्राह्यन्न तु कथञ्चन स्वाराज्यमिति श्रुतिर्हि ऐश्वर्यमस्य बोधयति तच्चासङ्कुचितं ग्राह्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सङ्कुचिते मानाभावादतो जगत्सर्जनादिकं करोतीति । सिद्धान्तस्तु प्राक्सिद्धः । पर ऐवेशः स्रष्टा जगत उच्यते यतो वेत्यादिवाक्येन तस्यैव प्रकृतत्वतः । अनेकेषां कल्पने च जगच्छिथिलचा भवेत् । आप्नोतीत्यादिवाक्यञ्च ब्रह्मप्राप्तेः प्रबोधकम् । वाक्यशेषानुसारेण तथैवार्थप्रतीतितः । भोगस्य साम्यमेवात्र प्रतिपाद्यते । मुक्ता भोगान्ततः पश्चात्कैवल्यं प्रतिपाद्यते । अतो निर्विशेषात्मनिष्ठानां मुक्तिर्देहवतामपि । यतो वेत्यादि वाक्येनान्यायतैश्वर्यस्य जगत्कारणता प्रतिपाद्यते तस्य प्रकृतत्वान्नान्येषामप्रकृतत्वात् । तेषाञ्च जगत्स्रष्टृत्वे कस्यचित्संहारे कस्यचित्स्थितौ कस्यचिदुत्पत्ताविच्छेति जगदनवस्थितं स्यात्तस्मादेकस्येश्वरस्य कर्तृत्वमन्येषान्तु तद्भोगसाम्यमात्रम् 'आप्नोति स्वाराज्य'मिति श्रुतिस्त्वीश्वरस्य मुक्तप्राप्यतां प्रतिपादयति । अत 'एवाप्नोति मनसस्पतिमिति वाक्यशेष उपपद्यते । भोगमात्रसाम्यञ्च 'आपो वै खलु मीयन्त' इत्यादिश्रुतिसिद्धं ब्रह्मलोके च भोगान्मुक्तं परमं निर्वाणं प्राप्नुवन्ति । निर्विशेषनिष्ठास्त्विहैव मुक्ता भवन्तीति सर्वमनवद्यम् । इति श्रीमत्परमहंसपरिव्राजकाचार्यसर्वतन्त्रश्रीमदद्वैतानन्दसरस्वतीचरणारविन्दभृङ्गायमानस्य स्वयम्प्रकाशानन्दस्य कृतिषु वेदान्तनयभूषणे

चतुर्थाध्यायस्य चतुर्थः पादः । समाप्तश्चाध्यायः ।[१]

श्रीमत्स्वयम्प्रकाशानन्दगिरां पादपङ्कजाश्रियता ।
अद्वैतानन्दगिरा लिखिता तत्कृतिरभीष्टमातनुताम् ॥

एतत्खलु तुर्यपादस्यान्तिमपत्रे लिखितम्

१. एतत्खलु तुर्यपादस्यान्तिमपत्रे लिखितम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu



वाराणसेयसंस्कृतविश्वविद्यालयस्य सरस्वतीभवनस्थ-

सौजन्येन समुपलब्ध (घ) मातृकाया आदिमा प्रति



तस्याश्चान्तिमा प्रति

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वितीयो भागः

सर्वतन्त्रस्वतन्त्रश्रीमत्स्वामिस्वयम्प्रकाशानन्दकृतम्

वेदान्तनयभूषणम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वेदान्तनयभूषणम्

प्रथमाध्याये प्रथमः पादः

तत्र जिज्ञासाधिकरणम्

[1]श्रीगुरोश्चरणाम्भोजद्वन्द्वं द्वन्द्वोपशामकम् ।
अलङ्करोतु मे स्वान्तं द्वन्द्वदुर्गन्धशान्तये ॥१॥

वेदान्तवारान्निधिमन्थनेन भाष्यामृतं सम्परिगृह्य मर्त्यान् ।
अपाययद्यः करुणार्द्रचित्तस्तस्मै नमो भाष्यकृते शिवाय ॥२॥

भाष्यामृतरसव्यक्त्यै या गुरूणां परिष्कृतिः ।
तस्यास्तु सङ्ग्रहं कुर्वे वेदान्तनयभूषणम् ॥३॥

अथातो ब्रह्मजिज्ञासा ॥१॥

अनेन सूत्रेण[2] साधनचतुष्टयसम्पन्नस्य (न्नेन) ब्रह्म जिज्ञासितव्यमित्युक्तम्। तेन च जीवाभिन्नस्य ब्रह्मणो ज्ञातत्वादिकं तन्निश्चयस्य [3]प्रयोजनवत्त्वञ्च सूचिते, अन्यथा जिज्ञासानुपपत्तेः। न हि निश्चितेऽर्थवत्त्वे(तत्त्वे) जिज्ञासोदेति, न वा[4] फलरहिते निश्चय इच्छा, तथा च जीवब्रह्मैक्यं विषयः। [5]तन्निश्चयश्चानर्थहेत्वज्ञाननिवर्तकत्वात्प्रयोजनमिति विषयप्रयोजनवत्वाच्छास्त्रस्यारम्भणीयता[6] सिद्धा। न च जीवब्रह्मणोरैक्यासम्भवस्तयो-

१. स्वसम्प्रदायस्य चोदितप्रमाणपूर्वकत्वज्ञापनाय विशिष्टगुणसम्बन्धसङ्कीर्तनपूर्विका गुरोर्नमस्क्रिया (नै० सि० पृ० ६)।

२. अल्पाक्षरमसन्दिग्धं सारवद्विश्वतो मुखम् ।
अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः ॥
(पराशरोपपुराणस्य १८।१४) पुराणमिदमप्रकाशितमस्ति, वा. सं. वि. वि. सरस्वतीभवनस्य हस्तलेखे नं० १५३०८ सुरक्षितम्। तत एव समुद्धृतम्। एतत्सूत्रलक्षणं बहुत्र माध्वभाष्यश्रुतप्रकाशिकादिग्रन्थेषु (स्कान्दे इति आ० ती० भा० पृ० ५) (वि० ध० उ० ३ य खण्डे ५।१) समुट्टङ्कितम्।

३. क० मा० 'च' इति पाठो नास्ति ।

४. घ० मा० 'तदा' इति पाठः ।

५. अर्थः प्रयोजनं तत्तु ब्रह्मज्ञानमेव तद्विपरीतं परिदृश्यमानं सकलप्रपञ्चजातमनर्थस्तस्यानर्थस्यादिकारणमज्ञानं तन्निवर्तकत्वात्प्रयोजनसिद्धिः। तावता शास्त्रारम्भणीयता सिद्धा।

६. शास्त्रन्तु—प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा ।
पुसां येनोपदिश्येत तच्छास्त्रं परिकीर्तितम् ॥
(श्लो० वा० ३५१)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विरुद्धकिञ्चिज्ज्ञत्वसर्वज्ञत्वादिमत्त्वात् । तथा च विषयासम्भवः, सत्यत्वादेव कर्तृत्वाद्यनर्थस्य[१] ज्ञाननिवर्त्यत्वस्यासम्भवात्प्रयोजनस्याप्यसम्भव इति वाच्यम् । मिथ्यात्वस्य[२] सूत्रसूचितज्ञाननिवर्त्यत्वान्यथानुपपत्त्यैवाभ्युपगमात् ।

अत एव सूत्रस्य तत्र तात्पर्यं स्वीकृत्य [३]भगवता [४]सूत्रव्याख्यानविशेषभाष्यकर्त्रा[५] विषयप्रयोजन [६]सिद्धयर्थं [७]कर्तृत्वादिरूपबन्धमिथ्यात्वं [८]प्रथमाधिकरणेन[९] वर्णितम् । तदित्थं[१०] 'वेदान्तमीमांसाशास्त्रमारम्भणीयम्'[११] (शां भा० १।१।१) न वेति संशयः[१२] । तदर्थं किं विषयप्रयोजने लभ्येते उत नेति चिन्त्यते[१३] ।

---

१. अनर्थस्यानाद्यज्ञानस्येत्यर्थः । तथा चानादित्वे सति भावत्वे सति ज्ञाननिवर्त्यत्वमज्ञानलक्षणं पर्यवस्यतीति । अत्र मायाब्रह्मणोरनादित्वाद्द्वैतापत्तिरिति न वाच्यम्, अज्ञानब्रह्मणोरनादिभावत्वेऽप्यज्ञानस्य ज्ञाननिवर्त्यत्वान्न द्वैतापत्तिः ।

२. मिथ्याशब्दो द्व्यर्थः—अपह्नववचनोऽनिर्वचनीयतावचनश्च 'इत्थं द्विधा विभज्य' अत्रायमपह्नववचनो मिथ्येति भवितुं युक्तमभाव एवाध्यासस्येत्यर्थः (पं० पा० अ० भा० व्या० पृ० २३) 'अत्रायमपह्नववचन' इति पञ्चपादिकाव्याख्यानवचनादवगम्यते मिथ्याशब्दोऽपह्नववचनपर इति ।

३. ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः ।
ज्ञानवैराग्ययोश्चैव षण्णां 'भग' इतीरणा ॥ (वि० पु० ६।५।७४)
उत्पत्तिं प्रलयञ्चैव भूतानामागतिं गतिम् ।
वेत्ति विद्यामविद्याञ्च स वाच्यो भगवानिति ॥ (वि० पु० ६।५।७८)

४. पराशरोपपुराणे महर्षिपराशरेण व्याख्यानलक्षणमनया दिशा देशितम् ।
पदच्छेदः पदार्थोक्तिर्विग्रहो वाक्ययोजना ।
आक्षेपश्च समाधानं व्याख्यानं पञ्चलक्षणम् ॥ (प० श० उ० पु० १८।१७)
क्वचित्पञ्चलक्षणमित्यत्र 'षड्विधः' इत्यपि पाठो दृश्यते ।

५. 'सूत्रं बुद्धिस्थीकृत्य तत्पाठनियमं विनापि तद्व्याख्यानं भाष्यम्' इति न्यायनिबन्धप्रकाशे भाष्यलक्षणं कृतं, तन्महर्षिपराशरोक्तभाष्यलक्षणाद्विपरीतं प्रतिभाति तथा च सूत्रलक्षणम् ।
सूत्रार्थो वर्ण्यते यत्र वाक्यैस्सूत्रानुसारिभिः ।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः । (प. उ. पु. १८।१५)
अत्रापि 'वाक्यैः' इति स्थाने 'वर्णैः' इति पाठोऽन्यत्रोपलभ्यते ।

६. तत्तदुपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वं कर्तृत्वम्' (वे. प. वि. प. ३४१)
परं मनोबुध्यहङ्कारचित्तरूपान्तःकरणावच्छिन्नचैतन्यस्याहं कर्तेत्यादिकर्तृत्वरूपबन्धस्य मिथ्यात्वं प्रस्तुताधिकरणे प्रतिपादितमिति ।

७. क० मा० 'य' इति पाठो नास्ति ।

८. अधिकरणन्नाम
विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम् ।
निर्णयश्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं मतम् ॥
क्वचिच्च 'प्रयोजनं सङ्गतिश्च प्राञ्चोऽधिकरणं विदुः' (शां भा० टी० पृ० १९) दृश्यते । वस्तुतो विशयः, सन्देहः, सङ्गतिः, पूर्वपक्षः, सिद्धान्त इति पञ्चावयववाक्यावच्छिन्नमेकैकमधिकरणमवधेलिमम् । तद्यथा ब्रह्मविचारो विषयः, ब्रह्मविचारः कर्तव्यो न वेति विशयः सन्देहः, सन्देहः कस्माज्जात इति सङ्गतिः ब्रह्मविचारो न कर्तव्य इति पूर्वपक्षः, ब्रह्मविचारः कर्तव्य इत्युत्तरपक्षः । तदेवन्निर्णय इत्येवं पञ्चाङ्गमधिकरणम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

९. क० मा० 'न' पाठो नास्ति ।

१०. इष्टानिष्टप्राप्तिपरिहारयोरलौकिकोपायबोधकत्वे सति शब्दराशित्वं वेदत्वम्' वेदानामन्तो निर्णयो ज्ञानकाण्डत्वेन विवक्षित उपनिषद्भाग एव वेदान्तः । अत एव 'वेदान्तो नामोपनिषत्प्रमाणं तदुपकारीणि शारीरिकसूत्रादीनि' इति (वे. सा. पृ० २)

११. 'आम्नायप्रतिपाद्यार्थप्रतिपादकत्वं साधारणम्' तथापि द्वौ भागावाम्नायस्य विभक्तौ पूर्वोत्तरकाण्डत्वेन । पूर्वकाण्डे प्राधान्येन कर्मैव प्रतिपिपादयिषितम् । उत्तरकाण्डे तु परं ब्रह्मैवेति तत्तत्काण्डविवरणाय पार्थक्यं शास्त्रयोरवश्यमभ्युपगन्तव्यम् । फलजिज्ञास्यचोदनाप्रवृत्तीनां भेदादैक्यं शास्त्रयोर्न सञ्जाघटीति । यथा चैतत्तथा सुस्पष्टं विशदीकृतं शारीरकमीमांसायां भगवत्पादैः । यच्चोक्तं लौकिकश्रेयसस्साधनत्वमुभयोरपि तुल्यमिति, नैतन्मनोज्ञम्, द्विविधं किल श्रेयः श्रूयते सापेक्षं निरपेक्ष्यञ्चेति । अभ्युदयापरपर्यायस्य सापेक्षश्रेयसः साधनतामापद्यते धर्मजिज्ञासा । ब्रह्मजिज्ञासा पुनर्निरतिशयस्य कैवल्यापरपर्यायस्य निरपेक्षश्रेयसः साधनमिति निश्चप्रचोऽयमर्थः' । यथा 'विप्रतिपत्तौ हविषा नियम्येत कर्मणस्तदुपाख्यत्वात्' इत्याष्टमिकाधिकरणे देवतायाः शब्देनोद्देश्यमात्ररूपत्वेन गुणत्वमिति युक्तमिति जैमिनिः । व्यासस्तु देवताधिकरणे देवतानां यागदेशे सन्निधानं हविर्भोक्तृत्वेन प्राधान्यञ्च रोचयते । (मी० शा० भू० पृ० ३) एवञ्च पूर्वोत्तरकाण्डविभागपूर्वकं मीमांसाद्वयविभागः । प्रकृतग्रन्थे 'वेदान्तमीमांसाशास्त्रमारम्भणीयम्' इत्यत्र प्रयुक्तो 'मीमांसा' शब्दः पूजितविचारपर एवेति 'वेदान्तमीमांसाशास्त्रस्य व्याचिख्यासितस्येदमादिमंसूत्रम्' (शां० भा० जि० अ० पृ० १९) प्रमाणेनावगम्यते । अत एव 'पूजितविचारवचनो मीमांसाशब्दः, परमपुरुषार्थहेतुभूतसूक्ष्मतमार्थनिर्णयफलता विचारस्य पूजितता' (भाम. १।१।१।) भामतीवचनं सङ्गच्छते । कर्ममीमांसा हि बहुजन्मसमर्जितान्तःकरणस्य मलविक्षेपावरणादिदुरितदूरीकरणसाधनयागप्रधानशास्त्रम् । तदनुष्ठानद्वारा नितान्तनिर्मलस्वान्त एव ब्रह्मविविदिषासाधनत्वेन विवक्षितवेदान्तशास्त्राधिकारी प्रभवति । तस्मादपि पूर्वोत्तरमीमांसयोस्सामञ्जस्यमिति । प्रकृते 'मीमांसा' शब्दो भाष्यवचनाद्विचारपर इति । 'कर्ममीमांसा' इत्यत्र कर्मकाण्डसम्बधिमीमांसा = विचारः इत्यर्थकत्वात् । ब्रह्ममीमांसा इत्यत्र तूपनिषत्प्रतिपाद्यब्रह्मविचारः । अत एव 'वेदान्त मीमांसाशास्त्रमारम्भणीन्न वेति' वाक्यं सङ्गच्छते ।

१२. एकस्मिन् धर्मिणि विरुद्धनानाधर्मवैशिष्ट्यावगाहिज्ञानं संशयः । (त. सं. पृ० १५६)

१३. (क) 'तदित्थं मोक्षशास्त्रं चिकित्साशास्त्रवच्चतुर्व्यूहम् । यथा हि रोगः, आरोग्यम्, रोगनिदानम्, भैषज्यमिति चत्वारो व्यूहास्सभूहाश्चिकित्साशास्त्रस्य प्रतिपाद्याः, तथैव हेयं, हानं, हेयहेतुः, हानोपायश्चेति चत्वारो व्यूहा मोक्षशास्त्रस्य प्रतिपाद्या भवन्ति । मुमुक्षुभिर्जिज्ञासितत्त्वात् । तत्र त्रिविधदुःखं हेयं, तदत्यन्तनिवृत्तिर्हानं, प्रकृतिपुरुषसंयोगद्वारा चाविवेको हेयहेतुः, विवेकख्यातिः (ब्रह्मज्ञानं) हानोपायः, इति (सां० प्र० भा० पृ० ७) तस्याः लाभाय ब्रह्मजिज्ञासोदेति ।

(ख) 'त्रिविधा चास्य शास्त्रस्य प्रवृत्तिः, उद्देशः, लक्षणं, परीक्षा, चेति । तत्र नामधेयेन पदार्थमात्रस्याभिधानमुद्देशः । तत्रोद्दिष्टस्य तत्त्वव्यवच्छेदको धर्मो लक्षणम् । लक्षितस्य यथा—लक्षणमुपपद्यते न वेति विचारः परीक्षा (न्या० द० वा० भा० २१) आभिरेव विधाभिरत्रापि शास्त्रं प्रवर्तमानमस्ति ।

(ग) 'संक्षेपतो हि शास्त्रार्थस्य चतस्रो विधाः, कश्चिदर्थः प्रकृतिरेव, कश्चिदर्थो विकृतिरेव, कश्चित्प्रकृतिविकृतिः, कश्चिदनुभयरूपः' (सां० त० कौ० पृ० ६४)

(घ) 'यथा चिकित्साशास्त्रञ्चतुर्व्यूहम् रोगः, रोगहेतुः आरोग्यम्, भैषज्यमिति । एवमिदमपि शास्त्रञ्चतुर्व्यूहमेव । तद्यथा संसारः, संसारहेतुः, मोक्षः, मोक्षोपायः, इति (यो० द० व्या० भा० पृ० १८५)

(च) 'हेयं, तस्य निवर्तनं, हानमात्यन्तिकं, तस्योपायोऽधिगन्तव्य इत्येतानि चत्वार्यर्थपदानि (न्या० द० वा० भा० पृ० ३) इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्र पूर्वपक्षः

जीवस्य ब्रह्मणा तावदभेदो नैव सम्भवी[1]।
जगत्कर्तृत्वभोगादिधर्माणामिह दर्शनात् ॥
ननु मिथ्यात्वतस्तेषां विरोधो नैव विद्यते।
इति चेन्नैतदेवं स्यात्प्रत्यक्षादिविरोधतः ॥
अनारभ्यमतः शास्त्रं विषयासम्भवित्वतः।
निष्फलत्वाच्च बन्धस्य निवृत्तिर्ज्ञानितो नहि ॥

शास्त्रं तावन्नारम्भणीयम्। विषयप्रयोजनयोरभावात्। न च ब्रह्मैक्यं विषयस्सम्भवति, ब्रह्मणो जगत्कर्तृत्वादिधर्मवत्त्वाज्जीवस्य च भोगकृत्यादिधर्मवत्त्वात्, विरुद्धधर्मवतोरैक्यानुपपत्तेः। न चेश्वरस्य जगत्कर्तृत्वञ्जीवस्य भोक्तृत्वं कर्तृत्वञ्च मिथ्या[2], अतो न विरोध इति वाच्यम्। करोमि, भुञ्ज, इत्यादिप्रत्यक्षेण तस्य सत्य[3]त्वावगमेन तद्विरोधेन तस्य मिथ्यात्वस्य वक्तुमशक्यत्वात्। न च 'नेह नाना' (बृ० उ० ४।४) इत्यादिश्रुत्या 'असङ्गो ह्ययम् (बृ० उ० ४।३) इत्यादिश्रुत्या च प्रत्यक्षस्य बाध्यत्वेन मिथ्यात्वसिद्धिरिति वाच्यम्। श्रुतिप्रत्यक्षयोर्विरोधे-उपजीव्यत्वेन प्राथम्येनानवकाशत्वेन च प्रत्यक्षस्य श्रुत्यपेक्षया प्राबल्यात्। श्रुतिर्हि लाक्षणिकेप्यर्थे* सावकाशा, उपजीव्यप्रत्यक्षानुसारेणान्यथा नेया। अत एव 'आदित्यो यूपः' (तै० ब्रा० ४) 'यजमानः प्रस्तरः' (पू० मी० ७।४) इत्यादीनां तेजस्वित्वतत्कार्यकरत्वादिगुणमादाय [4]गौणत्वमेव स्वीकृतं तत्सिद्धिपेटिकायाम्[5]। अत एव 'सोमेन यजेत' (तै० ब्रा० १।४।१) 'कृष्णलान् श्रपयेत' (मै० सं० इ० का) इत्यादिषु मत्वर्थोष्णीकरणादिलक्षणा स्वीक्रियते। अत एव भवद्भिरपि 'तत्त्वमसि' (छा० उ० ६।१५।३) इत्यादौ [6]भागत्यागलक्षणा स्वीकृता।

---

१. क० मा० 'नोपपद्यते' इति पाठः।
२. क० मा० 'मिथ्यातः' इति पाठः।
३. घ० मा० 'सत्यत्वा' इति पाठः।
* इतः परं 'ख' मातृका जीर्णा शीर्णा त्रुटिता च लब्धा।
४. यत्र प्रयोक्तृप्रतिपत्त्रोः सम्प्रतिपत्तिः स गौणः, स च भेदप्रत्ययपुरस्सरः (भामती पृ० ५)
५. जैमिनिमीमांसादर्शनस्य तत्सिद्धचधिकरणस्य 'तत्सिद्धिः' १।४।२३ सूत्रप्रकरणमेव तन्नाम्ना व्यवह्रियते।
६. वाच्यैकदेशपरित्यागेनैकदेशवृत्तित्वं भागत्यागस्य लक्षणम्। अस्यैवापरसङ्केतो जहदजहल्लक्षणेति। यथा सोऽयं देवदत्तः' इत्यत्र स तच्छब्दस्यार्थः तत्कालविशिष्टदेवदत्तः, अयमिति शब्दः (इदम्) एतत्कालविशिष्टदेवदत्तः। अत्र देवदत्तांशे न कोऽपि विरोधः, प्रत्युत तत्कालावच्छिन्नांशे-एतत्कालावच्छिन्नांशे च विरोधः। अतोऽत्र तदेतत्कालावच्छिन्नत्वविरूद्धांशं परित्यज्याविरुद्धांशदेवदत्तपिण्डमात्रस्य बोधार्थं भागत्यागलक्षणोरीक्रियते। तद्वदेव 'तत्त्वमसि' इति महावाक्येऽपि तत्पदार्थः परोक्षत्वादिविशिष्टचैतन्यं (ब्रह्म) 'त्वं' पदार्थश्चापरोक्षत्वादिविशिष्टचैतन्यं, मनोबुद्धिचित्ताहङ्कारान्तःकरणचतुष्टयावच्छिन्नो जीवः। अत्रापि चैतन्यांशे न विरोधः। परं परोक्षकालावच्छिन्नांशेऽपरोक्षकालावच्छिन्नांशे च परस्परविरोधः। अतः परोक्षापरोक्षयोर्विरुद्धांशयोः, तत्पदत्वंपदस्य च परित्यागात् 'असि' इति सत्तामात्रबोधनाद्भागत्यागलक्षणाभ्युपगम्यते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न चोपजीव्यप्रत्यक्षप्रामाण्यं व्यावहारिकन्न तच्छ्रुत्या बाध्यते। अतो नोपजीव्यविरोधो व्यावहारिकपारमार्थिकयोर्विरोधाभावात्। [1]प्राथम्यन्तु-अपच्छेदन्यायेन[2] बाध्यत्वे[3] प्रयोजकं, निरवकाशत्वं तु-असम्भाविताप्रामाण्यकयोर्द्वयोर्विरोधेऽन्यतरस्य प्राबल्ये हेतुः, इह तु प्रत्यक्षस्य सम्भाविताप्रामाण्यकत्वाद्भ्रमत्वेनापि नेतुं शक्यत्वेन तदीयानवकाशत्वस्याप्रयोजकत्वात्। अन्यथा स्थूलोऽहमित्यादिप्रत्यक्षानुसारेण देहात्मवादस्यापि स्वीकारापत्तेरिति वाच्यम्, व्यावहारिकत्वपारमार्थिकत्वयोरद्वैतिपरिभाषासिद्धत्वेन जगन्मिथ्यात्वसिद्धेः प्राक् तदसिद्धेः। अत उपजीव्यस्य निरवकाशत्वेन[4] तदनुसारेण श्रुतेरन्यथा नेयत्वात्। स्थूलोऽहमित्यादिप्रत्यक्षस्यापि मम शरीरमित्यादिभेदग्रहेण देहेन्द्रियादीनाञ्च परस्परं भेदग्रहेण बहूनाञ्चैकस्मिन्नैक्याध्यासानुपपत्त्या स्थूलादिदेहसम्बन्धविषयकत्वोपपत्तेः। अतो विषयाभावान्नारम्भणीयं शास्त्रम्। प्रयोजनरहितत्वाच्च। नहि कर्तृत्वाद्यनर्थः सत्यो ज्ञानान्निवर्तयितुमर्हतीति।

सिद्धान्तस्तु

जीवस्य[5] ब्रह्मणा तावदभेदः श्रुतिबोधितः।
न चासावन्यथा कर्तुं शक्यतेऽन्येन केनचित्॥
जगतः कर्तृकत्वादिधर्माणान्न विरुद्धता।
तेषां काल्पनिकत्वस्य श्रुतिषु प्रतिपादनात्॥
[6]श्रुत्यध्यक्षविरोधे[7] हि श्रुतेः प्राबल्यमीरितम्।
'प्राबल्यमागमस्यैव जात्या तेषु त्रिषु स्मृतम्'॥
इत्यादिस्मृतिवाक्येन तथा तात्पर्ययोगतः।
उपदेशात्मकत्वाच्च श्रुतेः प्राबल्यनिर्णयः॥

---

१. ख मातृकायां नास्ति।

२. संयुक्तस्य हि पृथक्भावोऽपच्छेदः (शा० भा० ६।५।४९) तथा चापच्छेदे पूर्वापरशास्त्रयोः पौर्वापर्यं परमित्युत्पत्तिक्रमान्न पाठक्रमात्। पञ्चर्त्विजस्समन्वारब्धाः प्रसर्पन्ति, अध्वर्युं प्रस्तोताऽन्वारभते, प्रस्तोतारं प्रतिहर्ता, प्रतिहर्तारमुद्गाता, उद्गातारं ब्रह्म, ब्रह्माणं यजमानः, इति विहितस्यान्वारम्भणस्य विच्छेदे प्रायश्चित्तमुच्यते। बहिष्पवमानं प्रसर्पतां यद्युद्गाताऽपच्छिद्येत, अदक्षिणः स यज्ञः संस्थाप्यस्तेन पुनर्यजेत, तत्र यद् दद्यात् यत्पूर्वस्मिन् दास्यं स्यात्। अथ प्रतिहर्तापच्छिद्येत सर्ववेदसं दद्यादिति, तदिदं शास्त्रद्वयं विषयः। अत्रोद्गातृप्रतिहोत्रोः प्रयोगभेदेनापच्छेदे स्वं स्वं प्रायश्चितशास्त्रं प्रवर्तते। एकस्मिन् प्रयोगे यौगपद्येनापच्छेदे सति, उद्गातुः प्रायश्चितं प्रवर्तते। तस्य वर्गप्रधानत्वात्। प्रधानापच्छेदस्यैव समाधेयत्वात्, विकल्पेनानुष्ठानं वा। एकस्मिन्नेव पौर्वापर्येणापच्छेदे पूर्वस्य प्रायश्चित्तशास्त्रस्य दौर्बल्यं परस्य प्राबल्यञ्च भवति। एषो विषयः 'पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवत्' इति सूत्रभाष्ये शबरस्वामिना सूपापादीति।

३. 'श्रुतिलिङ्गादिविरोधे प्रमाणानुपपत्तिलक्षणो बाधः' (तं० बा० ६।५।५४)

४. क० मा० 'कत्वेन' इति पाठः।

५. अन्तःकरणावच्छिन्नञ्चैतन्यञ्जीवः।

६. अध्यक्षन्नाम परीक्षितप्रत्यक्षम्।

७. परस्परानात्मतालक्षणो विरोधः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कर्तृत्वादिकबन्धस्य [१]निवृत्तिर्ज्ञानतो नहि ।
अतः [२]फलस्य सद्भावादारभ्यं शास्त्रमादरात् ।।

शास्त्रं तावदारम्भणीयं विषयप्रयोजनयोर्लाभात् ।

तस्मात्परापरात्मैक्यसिद्धेर्विषयलाभतः ।
आत्मातिरिक्तदृश्यस्य मिथ्यात्वस्य प्रसाधनात् ।।

न च ब्रह्मात्मैक्यासम्भवः शंक्यः 'तत्त्वमसि' (छा० उ० ६।१५।३) इत्यादिशास्त्रेण तदैक्यस्य बोधितत्वात् । न च जीवस्य भोगादिमत्त्वेने[३]श्वरस्य च तद्विपरीतत्वेनैक्यासम्भवः शंक्यः, विरुद्धधर्माणां मिथ्यात्वस्य श्रुत्यैव प्रतिपादितत्वात् । न च करोमि भुञ्ज इत्यादिप्रत्यक्षविरोधेन श्रुतिप्रतिपाद्याभेदो न तात्पर्यविषयः, 'सन् घटः सन् पटः' इत्यादिप्रत्यक्षविरोधेन 'नेह नाना' (बृ० उ० ४।४।१९) इत्यादिश्रुतिभिर्मिथ्यात्वञ्च न प्रतिपाद्यमिति वाच्यम्, श्रुतिप्रत्यक्षयोर्विरोधे श्रुतेः प्राबल्यात् । 'प्राबल्यमागमस्यैव जात्या तेषु त्रिषु स्मृतम्' इति वचनेन तत्प्राबल्यस्य प्रतिपादनात् । किञ्च 'उपदेशानुपदेशात्मकयोरुपदेशात्मकस्यैव प्राबल्यस्य 'विप्रतिषेधे करणं समवायः' (पू० मी० ३।८।२१) इत्यस्मिन्नधिकरणे 'यो होता सोऽध्वर्युः' (पू० मी० ३।८।२१) इत्यध्वर्युकार्यविधायकशास्त्रानुरोधेन होतुरतिदेशः प्राप्तः 'युवा सुवासा' (ऋ० सं० ३।८।४) इति मन्त्रबाधस्य व्यवस्थापितत्वात् । प्रकृतेऽपि श्रुतेरुपदेशात्मकत्वेनानुपदेशात्मकप्रत्यक्षस्योपजीव्यस्यापि बाध एवोचितः । न चैवं 'यजमानः प्रस्तरः' (तै० सं० १।६।५।३) इत्यादेरपि प्रत्यक्षविरोधेन [४]गौणी

---

१. उपादानसत्त्वेऽपि कार्यविनाशो निवृत्तिः । यथा मुद्गरपातानान्तरं 'घट' नाशः न तु मृदादिकारणस्य, अतो घटविनाशेऽप्युपादानभूतं मृदादिकारणन्तु तिष्ठत्येव । तस्माद्घटस्य निवृत्तिमात्रमुच्यते ।

२. जीवब्रह्मणोरैक्यमेव फलम् । तत्फलबलसाधनाच्छास्त्रारम्भस्य सार्थक्यम् । आत्मातिरिक्तस्य परिदृश्यमानप्रपञ्चजातस्य मिथ्यात्वप्रसाधनमपि प्रयोजनमित्यञ्जस्येनोपपादितम् ।

३. 'क्लेशकर्मविपाकाशयैरपरामृष्टपुरुषविशेष ईश्वरः' (पा० यो० सू० पा० १।२४) इति पातञ्जलसूत्रम् । अविद्यादयः क्लेशाः, कुशलाकुशलानि कर्माणि, तत्फलं विपाकः, तदनुगुणा वासना आशयाः, ते च मनसि वर्तमानाः पुरुषे व्यपदिश्यन्ते, स हि तत्फलस्य भोक्तेति । यथा जयःपराजयो वा योद्धृषु वर्तमानः स्वामिनि व्यपदिश्यते । यो ह्यनेन भोगेनापरामृष्टः स पुरुषविशेष ईश्वरः (व्या० भा० १।६६) प्रकृते त्वनाद्यविद्यावच्छिन्नचैतन्यमेव-ईश्वरः । तत्र मायोपाध्यवच्छिन्नत्वादीश्वरः, अन्तः करणोपाध्यवच्छिन्नत्वाच्च जीवः । मायान्तःकरणयोर्भेदाज्जीवेश्वरभेदः । द्वयोर्व्यपगते चैतन्यमात्रमवशिष्यते । तच्च चैतन्यस्वरूपं ब्रह्मैव ।

४. गुणेभ्य आगतो व्यवहारः गौणव्यवहारः । गुणेभ्यश्चागता कल्पना गौणी कल्पना । तद्यथा 'सिंहो माणवक' इत्यत्र माणवके सिंहसादृश्यधर्मारोपाद्गौणीकल्पनोपपद्यते । उक्तञ्च 'साध्यसादृश्येन गौणमाणवके चानुभवसिद्धभेदे सिंहात् सिंहशब्दः (भामती पृ० ५) यतो हि माणवको मनुष्यत्वधर्मावच्छिन्नः, सिंहस्तु पशुत्वावच्छेदकधर्मावच्छिन्नः, अतो द्वयोर्धर्मयोर्न सामानाधिकरण्यम् । तर्हि कुतस्तरां 'सिंहो माणवकः' इति वाक्यं सङ्गच्छते । इमां विचिकित्सां समाधातुमिदमुच्यते । मनुष्यत्वधर्मावच्छिन्ने माणवके विद्यमानशौर्यक्रौर्यादिगुणानां प्रत्यक्षत्वात्तादृशगुणानां सिंहेऽपि सत्त्वात्सिंहे विद्यमानाः गुणा माणवके आरोप्यन्ते । तदेवं माणवके सिंहसादृश्यगुणानां विद्यमानत्वात् 'सिंहो माणवकः' इति गौणो व्यवहारः । वस्तुतस्तु न माणवकः सिंहो भवितुमर्हति । तद्वदेव प्रकृतेऽपि 'यजमानः प्रस्तरः' इत्यत्र प्रत्यक्षविरोधेन गौणीकल्पना न स्यादिति विचारानुगतेनोपक्रमादितात्पर्यलिङ्गोपेतत्वेन गौणमुख्यत्वयोः कल्पना ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कल्पना न [1]स्यादितिवाच्यम्, तात्पर्यरहितत्वेन तत्र श्रुतेर्दौर्बल्येऽपीहोपक्रमादितात्पर्यलिङ्गोपेतत्वेन प्राबल्योपपत्तेः। अत एव 'सोमेन यजेत, (तै. ब्रा. १४।१) इत्यादौ लक्षणा न दोषाय, 'कृष्णलान् श्रपयेत्' इत्यत्र त्वगत्या लक्षणाश्रयणम्। न चैवमुपजीव्यविरोधे तात्पर्यलिङ्गानामपि तात्पर्यग्राहकत्वमनुपपन्नमिति वाच्यम्, 'हिरण्यगर्भे पूर्वस्य मन्त्रलिङ्गात्' (पू. मी. १०।३।१४) इति दाशमिकाधिकरणे वायव्यपशौ श्रुतं 'हिरण्यगर्भःसमवर्त्तताग्रे' (ऋ. सं. १०।१२१।१) इत्याद्याघारमाघारयति' (तै. सं २।५।११।६) इति वाक्यस्य 'हिरण्यगर्भः समवर्त्तताग्रे' (ऋ. सं. १०।१२१।१) इति मन्त्रस्वरूपमुपजीव्यप्रवृत्तस्य मन्त्रप्रतिपाद्यप्रजापतिभिन्नेन्द्रदेवताकद्वितीयाधारपरत्वस्यादृष्टकल्पनामात्रलाघवरूपतात्पर्यलिङ्गेन कल्पनेन प्रकृतेऽपि तात्पर्यकल्पने विरोधाभावात्।

न चैवं 'तत्त्वमसि' (छा० उ० ६।१५।३) इत्यादिवाक्येषु भागत्यागलक्षणाङ्गीकरणं न स्यादिति वाच्यम्, तात्पर्यानुसारेणैव तत्रापि लक्षणायाः कल्पनात्। यथा चैतत्तथा व्युत्पादयिष्यते। किञ्च प्रत्यक्षस्वरूपमेवोपजीव्यते न तत्प्रामाण्यमप्यतो नैव प्रामाण्यविरोधशङ्का, ज्येष्ठत्वस्याप्रयोजकत्वं त्वपच्छेदन्यायात्सिद्धम्। अनवकाशत्वं प्रत्यक्षस्य न श्रुतिबाधनक्षमम्। सम्भाविताप्रामाण्ययोर्हि द्वयोरेकानुसारेणापरस्यानयनेऽनवकाशत्वन्नियामकम्। अन्यतरस्याप्रामाण्यसम्भावने त्वनवकाशमपि बाध्यमेव। अत एव चन्द्रस्य प्रादेशिकत्वस्य प्रत्यक्षतोऽवगमेऽपि तद्बाधनपूर्वकमागमेन महापरिमाणग्रहणम्। अत एव च द्वैपायनेनाप्युक्तम्

उपलभ्याप्सु[2] चेद्गन्धं केचिद्ब्रूयुरनैपुणाः।
पृथिव्यामेतं विद्यादप्सु[3] वायौ च संश्रितम्॥

स्थूलोऽहमित्यादिप्रत्यक्षस्य भ्रमत्वेन तत्सजातीयस्य करोमि भुञ्ज इत्यादिप्रत्यक्षस्यापि भ्रमत्वसम्भवेन श्रुतिबाधनाक्षमत्वात्। न च स्थूलोऽहमित्यादिप्रत्ययानामपि न भ्रमत्वं, किन्तु 'अर्श आदिभ्योऽच् (पा. सू. ५।२।१२७) इति स्थूलादिशब्दाना (मा) श्रित्य स्थूलादिदेहसम्बन्धित्वमात्मनो बोध्यते। मम शरीरमिति भेदग्रहेणात्मनि तद्भ्रमानुपपत्तेरिति वाच्यम्, मम शरीरमिति भेदग्रहेऽपि स्थूलत्वादिप्रकारेण भेदाग्रहेण स्थूलोऽहमिति भ्रमे बाधकाभावेन 'अर्श आद्यजन्तत्व' (पा. सू. ५।२।१२७) इति कल्पने मानाभावात्। अन्यथा गच्छामि, तिष्ठामि, काणः कुणिरहमित्यादौ का गतिः। एतेनान्धोऽहमित्यादयोऽपि प्रत्यया भ्रमत्वेन व्याख्याताः। चेष्टादिना[4] भिन्नत्वेनावधृतानामन्यथात्वादीनां भ्रमे बाधकाभावात्। तस्मात्कर्तृत्वादीनां मिथ्यात्वेन जीवब्रह्मैक्यविषयलाभात् कर्तृत्वादिनिखिलबन्धस्य ज्ञाननिवर्त्यत्वसम्भवेन प्रयोजनलाभाच्चारम्भणीयं शास्त्रमिति सिद्धम्।

ननु जीवब्रह्मैक्यस्य कर्तृत्वादिबन्धस्य मिथ्यात्वं विनैवोपपादयितुं शक्यत्वेन तेन मिथ्यात्वव्युत्पादनमफलम्। न च विरोधस्संयोगतदभावयोरिवावच्छेदकभेदेन भोगतदभावादीनामप्युपपादयितुं शक्यत्वादिति चेन्न, जीवत्वावच्छेदेनाप्यसङ्गभावस्य 'असङ्गो ह्ययं पुरुषः' (बृ. ४।३।१५) इत्यादिश्रुतिसिद्धत्वात्। न चैवं करोमीत्यादि प्रतीतेः का गतिरिति वाच्यम्, अन्तः करणादीनाञ्चैतन्येऽध्यासेन तद्धर्माणामपि 'कामः संकल्प' (बृ० १।५।३) इत्यादिश्रुतिसिद्धानां तदध्यासोपपत्तेः। एवञ्चैतन्यधर्माध्यासः ज्ञानादीनामप्यन्तःकरणेऽध्यासेनाहञ्चेतन इत्यादिप्रतीत्युपपत्तिः। अन्योन्याध्यासाभ्युपगमादेतावांस्तु विशेषश्चैतन्येऽन्तःकरणादीनां स्वरूपं तत्तादात्म्यञ्चेत्युभयमप्युपपद्यते। अन्तःकरणादिषु तु प्राक्सिद्धचैतन्यस्य तादात्म्यमात्रमुपपद्यत इति। न चान्योऽन्याध्यास एव किं मानमिति वाच्यम्,

१. घ० मा० 'न स्यादित्युक्तम्' इत्यधिकः पाठः।
२. आनन्दज्ञानकृततर्कसङ्ग्रहादुद्धृतम् (पृ० २२)
३. घ० मा० 'अपो वायुश्च' इति पाठः
४. क० मा० 'चक्षुष्ट्वादिनाभिन्नत्वेन' इत्यधिकः पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'इदं रजतं' रजतमिदं सन् घटः, घटःसन्, इत्यादिप्रतीतेरेव मानत्वात्प्रथमप्रतीत्यादिरजतप्रतियोगिकं[१] घटप्रतियोगिकञ्च तादात्म्यमिदमि सति च विषयीक्रियते । द्वितीयया चेदंप्रतियोगिकं सत्प्रतियोगिकञ्च तादात्म्यं रजते घटे च विषयीक्रियत इत्यन्योऽन्याध्यास-सिद्धिरिति । एतेन स्थूलोऽहमन्धोऽहमित्यादिप्रत्यया अपि व्याख्याताः ।

अध्यासश्च तदभाववति तद्वत्ताज्ञानमेव,[२] शुक्तिकायामिदं[३] रजतमिति ज्ञानं, तत्र हि शुक्तिकायान्न रजतमस्ति । अथच प्रतीयते, प्रतीयमानं [४]तद्रजतं दोषादिसहकृतशुक्त्यवच्छिन्नचैतन्याज्ञापरिणामोऽनिर्वाच्यः, न तु देशान्तरस्थं [५]तथात्वम् चक्षुरादिसंयोगाभावेनानावृतच्चित्तादात्म्याभावेन चापरोक्षत्वानुपपत्तेः । न चैवं तदत्यन्ताभावस्य तेन सह विरोधात्कथं तत्र रजतमिति वाच्यम् । अविरोधस्याग्रे-उपपादयिष्यमाणत्वादपरोक्षत्वादेवासदेव रजतं दोषबलाद्भासत इति निरस्तम् ।

ननु[६] शुक्तिकायां[७] पञ्चीकरणप्रक्रियया रजतस्य सद्भावेन तस्यैव भानोपपत्तावनिर्वचनीयरजतकल्पनं मुधा, शुक्तित्वज्ञानस्य तत्रत्य रजतज्ञानप्रतिबन्धकत्वकल्पनेन दोषवशेन शुक्तित्वाज्ञाने सति रजतभानोपपत्तेरिति चेन्न, भौतिकानां पञ्चीकरणानभ्युपगमाच्छुक्तिकायाः भस्मीभावे रजतोपलब्धिप्रसङ्गाच्च । तस्मात्सद्रजतं भासत इत्यनुपपन्नम् ।[८] एतेन ज्ञानगतमेव रजतं बहिष्ट्वेन भासते नेदं रजनमिति बाधस्येदन्त्वसंसर्गविषयत्वमात्रोपपत्तौ रजतविषयत्वकल्पने गौरवादिति परास्तम् । इदन्त्वं हि सन्निहितत्वं, तत्संबन्धनिषेधे हि दूरस्थत्वमेव स्यान्न त्वतिसन्निहितात्मरूपत्वं तथाचापरोक्षानुपपत्तिः ।[९] नन्विदं रजतमिति ज्ञानन्नैकं, किंत्विदमित्यनुभवरूपं, रजतमिति स्मरणरूपञ्चेति ज्ञानद्वयं दोषवशाच्चेदंरजतयोः ज्ञानयोश्च भेदाग्रहः । भेदाग्रह एव प्रवृत्तौ कारणम्, न तु विशिष्टज्ञानं गौरवाद्बाधश्च भेदग्रहः । एवं सर्वोपपत्तौ किं रजतोत्पत्तिकल्पनया ज्ञानान्तरकल्पनया वेति चेन्न, पुरोवर्त्तिनि रजतत्वज्ञानाभावे-इष्टसाधनत्वव्याप्यरजतत्ववत्ताज्ञानाभावेनेष्टसाधनत्वानुमित्यभावेन रजतार्थिनस्तत्र प्रवृत्त्यनु-

---

१. रजतत्वाभाववति शुक्तिशकले रजतत्वप्रकारकज्ञानमेव तत्त्वम् । शुक्तौ कालत्रयेऽपि रजताभाव एव । परमिदन्त्वावच्छिन्नचैतन्यनिष्ठशुक्तिशकले तूलाज्ञानवशादागन्तुकदोषजन्यप्रातिभासिकमेव रजतं प्रतिभातीति ।

२. अध्यासस्तु बाधितार्थविषयकं ज्ञानमित्यभियुक्ताः । यथा घटवति 'नेहनानेति' श्रुत्या वस्तुतो घटाभावसत्त्वात्, घटवति घटज्ञानस्य भ्रमत्वापत्तिः ।

३. क० मा० 'यथा' इति पाठः ।

४. 'दोषो हीष्टं कार्य्यं निरुन्धन् विपरीतञ्च कुर्वन् दृश्यते (इष्टसि पृ० २०४) अत्र च पुरोवर्तिनि परिदृश्यमाने शुक्तिशकले चाकचिक्यादिदोषसमवलनादिदं रजतमिति व्यवहारः ।

५. क० मा० 'तथात्वे' इति पाठः ।

६. रामानुजाचार्यमतमुत्थापयति नन्विति ।

७. पृथिव्यप्तेजोवाय्वाकाशानां पञ्चभूतानामेकैकं विभज्य द्विधा द्विधा विधाय, पुनरपि प्रथमं प्रथमं भागं चतुर्धा विधाय स्वस्वेतरद्वितीयांशे-इतरेषाञ्चतुर्णाश्चतुर्णां भूतानां यो यो द्वितीयः स्थूलो भागस्तेन तेन सह प्रथम-प्रथम भागांशानाञ्चतुर्णाञ्चतुर्णां मध्य एकैकस्य योजनात्ते वियदादयः प्रत्येकं पञ्चपञ्चात्मका भवन्ति । इदमेव पञ्चीकरणशब्देनोच्यते ।

तथा चोक्तम्

द्विधा विधाय चैकैकञ्चतुर्धा प्रथमं पुनः ।
स्वस्वेतरद्वितीयांशैर्योजनात्पञ्च पञ्च ते (पं. द. तत्व. पृ० २७)

८. योगाचारमतं निराकरोति एतेनेति ।

९. प्रभाकरः शङ्कते नन्विति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पपत्तेः। यदि चेष्टसाधनताव्याप्यरजतत्ववत्त्वभेदाग्रहे-इष्टसाधनभेदाग्रहात्प्रवृत्तिरिति[१] भेदाग्रहस्य प्रवृत्तौ हेतुत्वं लाघवादिति मन्यसे तदा तुल्यन्यायतयाऽनुमितावपि व्याप्यवद्भेदाग्रहस्य[२] कारणत्वकल्पनापत्त्या ह्रदे वह्निव्याप्यवद्भेदाग्रहाद्वह्न्यनुमितिरयथार्था स्यादिति दोषापत्तिः। यदि चानुमितिं प्रति भावत्वलाघवेन व्याप्यवदभेदज्ञानस्य कारणत्वं कल्प्यते, तदा तेनैव लाघवेन प्रवृत्तिं प्रत्यपीष्टसाधनाभेदज्ञानस्य कारणत्वमस्तु। तथाच भ्रमसिद्धिरनिवार्या।

किञ्च पुरोवर्तीष्टभेदाग्रहस्य प्रवृत्तिं प्रति कारणत्वे सत्यस्थले पुरोवर्तीष्टभेदग्रहस्याप्रसिद्ध्या[३] तदभावस्याप्यप्रसिद्धेः प्रवर्तकत्वानुपपत्तिः, यदि तु [४]पुरोवर्तिनीष्टाभिन्नत्वप्रकारकज्ञानविषयत्वाभाव इष्टपुरोवर्तिज्ञानसह[५]कृत प्रवर्तक इत्युच्यते, तदान्यद्रजतमेव 'नेदं रजतमिति भ्रमदशायामन्यथाख्यातिभीत्या उक्ताभावस्य पुरोवर्तिनि स्वीकर्तव्यत्वेन तत्रापि प्रवृत्त्यापत्तेः। न च स्वातन्त्र्यस्याऽप्यभावप्रतियोगित्वेनानुपस्थितत्वरूपस्य प्रवृत्तिप्रयोजकत्वात्तदभावादेव न प्रवृत्तिरिति वाच्यम्, स्वातन्त्र्यस्य यद्युक्ताभावप्रतियोगिविशेषणत्वं तदोक्तदोषानतिवृत्ते नेदं रजतमिति प्रमास्थले प्रवृत्तिप्रसङ्गाच्च, वस्तुतः प्रतियोग्यप्रसिद्ध्याऽभावाप्रसिद्धेश्च।

अथ स्वतन्त्रं कारणमिदमपि, तदा-इदं रजतं घटनिष्ठभेदप्रतियोगीति ज्ञानादप्रवृत्त्यापत्तिः। यदि तु पुरोवर्तिनिष्ठभेदप्रतियोगित्वेनानुपस्थितत्वं स्वातन्त्र्यं, तदा नेदं रजतमितिभ्रमस्थलेऽन्यथाख्यातिभयेनोक्तानुपस्थितत्वसत्त्वात्प्रवृत्त्यापत्तिः। यदि च पुरोवर्त्यगृहीतासंसर्गकभेदप्रतियोगित्वेनानुपस्थित्वं, न तत्तदा रजत एवेदन्त्वेनैवं (इदमित्येवं) रजतमिति च ग्रहणस्मरणात्मकज्ञानादपि प्रवृत्त्यापत्तेः। यदि तु पुरोवर्त्यगृहीतासंसर्गकभेदप्रतियोगित्वासंसर्गाग्रहाभाव इति तन्निरुच्यते, तदा इदं रजतमिति भ्रमस्थलेऽपि प्रवृत्तिर्न स्यादित्यादिदोषापत्तिरतो विशिष्टज्ञानमेव प्रवर्तकमिति वक्तव्यम्। तथा च ज्ञानद्वयरूपत्वानुपपत्तिः। न च क्वचिज्ज्ञानेऽप्रमात्वाभ्युपगमे सर्वत्रानाश्वासः, प्रामाण्यस्य स्वतो ग्राह्यत्वेनोक्तदोषानवकाशाद्यथा चैतत्तथा व्यक्तमाकरे। तस्मिंश्च भ्रमे सामग्रीश्चाग्रे उपपादयिष्यामः। नन्वेमप्यात्मन्यन्तःकरणाद्यध्यासोऽनुपपन्नः। अध्यासे हि सामान्यांशे-ज्ञानं, विशेषांशेऽज्ञानं प्रमाजनितसंस्कारादिकं हेतु रजतादिभ्रमे दृष्टः, न चेह तत्सम्भवति निरंशत्वाद्ब्रह्मणः, अन्तःकरणादेश्च प्रमाभावेन तज्जन्यसंस्कारस्याभावात्। तथाहि भवतां मते आत्मा[६] ज्ञानरूपः 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै० २।१) इति श्रुतिबलाज्ज्ञानस्य च ज्ञेयेन तादात्म्याति-

---

१. घ० मा० नास्ति।

२. अज्ञानस्य।

३. नार्थप्रत्ययविषयोऽभावः (लक्षणावली पृ० ७०)

४. 'ये हि यस्मिन्ननुवर्तमाने व्यावर्तन्ते ते ततो भिन्ना एव, सूत्राद् कुसुमभेदाः' (भाम. स. अ. पृ० ६३)

५. सहशब्दस्तु साकल्ययौगपद्यसमृद्धिषु।
सादृश्ये विद्यमाने च सम्बन्धे च सह स्मृतम्। (इति श्रीधरः तत्त्व सं. वैद्य भू० पृ० ९)

६. आत्मनस्स्वरूपमिदमाह
यदाप्नोति यदादत्ते यच्चास्ति विषयं प्रति।
यच्चास्य सन्ततो भावस्तस्मादात्मा निरुच्यते॥
(लिं०पु० १।७०।९६) (वा.पु. सृष्टि ६२) (वा. सा. १।४।५७८)

वेदान्तसिद्धान्तमुक्तावलीटीकायामेवं व्याख्यातम्। उक्तमर्थं वेदव्यासोक्त्या द्रढयति यदाहुरिति। यस्मादर्थे यच्छब्दः, च समुच्चये, कृत्स्नादनात्मनो निश्शेषतया व्याप्नोतीत्यात्मा। यस्मात्सुषुप्त्यादावज्ञानकार्यादनात्मनो ज्ञानवशादेवात्मनि न्युपसंहरतोति वा तस्मादात्मा इत्याह यदादत्त इति। यस्माच्च विषयान् विषयाभिमुखी वृत्तिरपि प्रकाशयति।

तस्माच्चात्मा यच्चास्तीति। यस्माच्चास्य निरूपणीयत्वेन प्रकृतस्य सन्ततो नैरन्तर्येण भावोऽवस्थितिः स्वस्मिन्नेव, नान्यत्र, अन्यस्यानात्मनोऽभावात्, तस्मात्सातत्येनातततीत्यात्मगमनफलं हि तत्तद्देशावस्थितिः। न चात्मव्यतिरिक्तं वस्त्विति, तस्मादात्मनि स्वरूपे पूर्णतया-अवस्थितिरेव सन्ततो भाव इत्याह-'यच्चास्य' इति। तथा च, परिच्छिन्नत्वं स्वरूपासिद्धम्, ततश्चात्मा नित्यः; अपरिच्छिन्नत्वात्, व्यतिरेके घटादिवदिति स्थितम्। (वे. सि. मु. टी. पृ० १२५)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रिक्तसम्बन्धानिरूपणात्तादात्म्यसम्बन्धस्य[१] च चजडाजडयोः पारमार्थिकस्यासम्भवात्काल्पनिक इष्यते। न चानृतोपाधिक.सत्यो भेदः सम्भवति। अत आत्मभेंदे प्रामाण्याभावेन स एकः, न च ज्ञानरूपत्वे घटज्ञानं नष्टं, घटज्ञानमुत्पन्नमिति ज्ञानस्योत्पत्तिविनाशप्रतीत्यनुपपत्तिः। तदुपाधिवृत्तीनामेवोत्पत्तिविनाशाभ्युपगमेन ज्ञानभेदे प्रामाण्याभावेन घटमनुभवामि, घटमनुभवामीत्यनुगताकारप्रतीतिबलेन च ज्ञानैक्येनात्मैक्ये बाधकाभावात्। घटमिच्छामि, पटमिच्छामीत्यादिप्रतीतीनाञ्च नित्येच्छाया मानाभावेन तत्र जातेरेव विषयत्वाङ्गीकारेऽपि श्रुतिबलेनैतावन्तं कालमिदमिदमनुभवन्नेवासमित्यनुसन्धानबलेन च नित्यज्ञानसाक्षिरूपात्मविषयत्वेनानुभवामीति प्रतीत्युपपत्तावतिरिक्तजातिकल्पने मानाभावः। तथा च निरंशे सामान्यांशविशेषांशयोरभावेन तद्ग्रहणाग्रहणाभ्यामध्यासानुपपत्तिः। अन्तःकरणादीनाञ्च भवन्मते मिथ्यात्वेन प्रमाया असम्भवादध्यासानुपपत्तिः।

किञ्चात्मनः स्वप्रकाशत्वेन तद्ग्राहकप्रमाणाभावे तद्गतदोषादिभ्रमकारणाभावादध्यासानुपपत्तिरिति चेन्न, ज्ञानबशेन[२] कल्पितांशसत्त्वेनान्तः करणाद्यभाववस्त्वंशस्याग्रहणाऽविद्यारूपदोषबशेन चाध्यासोपपत्तेः संस्कारस्य संस्कारत्वेनैव कारणता, न तु प्रमाजनितत्वेनापि गौरवान्मानाभावाच्च।[३] सादृश्यस्य च न भ्रमसामान्येऽपेक्षा, अति [४]स्वच्छसिकतिलप्रबहदत्यच्छनदीजले[५] नैल्याध्यासे तदभावात्। तस्मादात्मानात्मनोरितरेतराध्यासे न काप्यनुपत्तिरिति। किञ्चाध्यासाभावे प्रमाणादिव्यवहारोऽपि न सम्भवति, जडस्य चेतनप्रेरणामन्तरा स्वविषयेषु प्रवृत्त्यनुपपत्त्या शास्त्रसिद्धासङ्गभावस्यान्तः करणाद्यध्यासमन्तरा[६] प्रेरकत्वानुपपत्त्या वृत्तिप्रतिबिम्बितचैतन्याश्रयत्वरूपप्रमाश्रयत्वस्य शुद्धचैतन्ये शुद्धजडे चासम्भवेनाध्यासस्यावश्यकत्वात्। विदुषामपि व्यवहारस्य प्रारब्धदोषबशेनाध्यासस्य सम्भवेन तन्मूलकत्वानपायात्। कर्माद्यनुष्ठानेऽपि 'ब्राह्मणो यजेत' इत्यादिशास्त्रपर्यालोचनया-अध्यासमूलकत्वस्यावजर्नीयत्वात्, 'विद्वान्यजेत' इत्यादिशास्त्राद्यवगतविद्वत्ता हि कर्मपेक्षितदेहातिरि-[७]क्तात्मज्ञानरूपा, न तु नाहं मनुष्यः कर्ता भोक्ता चेत्येवमादिज्ञानरूपा, तस्याः कर्मविरोधित्वात्। तथा चेतादृशाध्यासस्य सकलानर्थनिदानत्वेन तन्निवर्तकज्ञानजनकवेदान्तवाक्यविचारशास्त्रमारम्भणीयमिति[८]।

सूत्रे चाथशब्द आनन्तर्यार्थकः, अर्थान्तरस्य प्रकृतेऽसम्भवात्, न ह्यारम्भार्थकत्वमथशब्दस्य सम्भवति, ब्रह्मजिज्ञासाया आरभ्यमाणत्वाभावात्। नहि प्रत्यधिकरणं ब्रह्मजिज्ञासा प्रतिपाद्यते। न च प्रधानजिज्ञासान्वयमपहाय ब्रह्मतज्ज्ञानाभ्यामथशब्दोपात्तारम्भस्यान्वय उपपद्यते, येन तयोरग्रे प्रतिपाद्यमानतया आरम्भार्थकता घटेत, न च जिज्ञासाशब्दस्य विचारलक्षकत्वपक्षे–आरम्भार्थकत्वमथशब्दस्योपपद्यत इति वाच्यम्, तदानीमप्यारम्भ-

१. विशिष्टप्रतीतिनियामकत्वं सम्बन्धत्वम् (न्या. बो. पृ० ८०)
विशिष्टप्रतीतिस्तु-रूपी घटो, दण्डीपुरुषः इति प्रतीतिः।

२. स्वाभाववति प्रतीयमानत्वं कल्पितत्वम् वा स्वरूपज्ञाननिवर्त्यत्वम्' (अ.सि. पृ० ८०)

३. तद्भिन्नत्वे सति सद्गतभूयोधर्मवत्त्वं सादृश्यम्। यथा गोभिन्नत्वे सति गोगतभूयो धर्मवत्त्वं नीलगवि वर्तते। प्रकृते भ्रमसामान्यविशेषभावमादाय व्यवहारिकप्रातिभासिकरजतसादृश्यं धटते।

४. क० मा० 'सिकता' इति पाठः।

५. क० मा० 'प्रवहदच्छ' इति पाठः।

६. क० मा० 'प्रेरणमन्ररा' इति पाठः।

७. क० मा० 'कथमयिक्षित' इति पाठः।

८. कोऽयं कथमयं दोषस्संसाराख्य उपागतः।
न्यायेनेति परामर्शो विचारस्स उच्यते ॥ यो॰ मुमु. स॰ १४।५०
न्यायेन पञ्चावयववाक्येन परामर्श एव विचारः प्रतिपद्यते, न तु पामरपरामर्शविचारेण, स्वरूपावगतेर्दुरापत्वात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रतिपादनस्य नैष्फल्यात्। एवं मङ्गलाद्यर्थान्तरस्यासम्भवादानन्तर्यार्थकत्वमेव स्वीकार्यम्। न चानन्तर्यप्रतिपादनमपि ववोपयुज्यत इति वाच्यम्। अधिकारिलाभप्रयोजकत्वस्य वक्ष्यमाणत्वात्, तस्य च निरूपकन्न स्वाध्यायाध्ययनमानन्तर्ये कर्मनिरूपकं[1] तद्वतव्यं यद्ब्रह्मजिज्ञासायां पुष्कलकारणम् स्यात्। न च [2]स्वाध्यायाध्ययनं तादृशं तस्य [3]कर्मधर्मब्रह्मजिज्ञासासाधारणत्वात्। यद्यपि कर्मानुरोधः ब्रह्मसाक्षात्कारे कर्मानुष्ठानद्वारा[4] प्रयोजकः 'तमेतं वेदानुवचनेन' (बृ० ४।४।२२) इति वचनेन कर्मणां ब्रह्मसाक्षात्कारे[5] विनियोगबलेन भावनया साक्षात्कारे जननीयेऽपेक्षितत्वाद्। अतो विचारितकर्मत्वस्याधिकारिविशेषणत्वेन[6] तस्यैवानन्तर्यार्थनिरूपकत्वं स्यात्। तथापि कर्मणां भावनाफले[7] शक्यमनुष्ठानं शाब्दज्ञानेन विचारसहकृतेन 'तत्त्वमसि' इति वाक्यजनितेन कर्तृत्वादिबुद्धेर्भ्रमत्वनिश्चयेनाश्रद्धाया उत्पन्नत्वेन तस्य कर्माधिकारात्[8]। 'तमेतं वेदानुवचनेन (बृ० ४।४।२२) इति वाक्यस्य च विविदिषायां कर्मविनियोजकत्वमित्यस्यार्थस्य वक्ष्यमाणत्वात्। तथा च [9]ज्ञानकर्मसमुच्चयाभावाद्भावनाकाले कर्मणामननुष्ठेयत्वेन कर्मावबोधस्य ब्रह्मज्ञानेऽनुपयोगान्न तदानन्तर्यं 'ब्रह्मचर्यं समाप्य गृही भवेत्' (जा. उ. ४।४) इति वचनानामप्यविरक्तविषयत्वेन गार्हस्थ्यानन्तरमेव ब्रह्मज्ञानं सम्पादनीयमिति, नियमाभावादपेक्षितानाञ्च वेदप्रामाण्यादिव्युत्पादकन्यायानामिह शास्त्रे सत्त्वेन कर्मब्रह्मकाण्डविचारयोश्चैकशेषिणं प्रति शेषत्वाभावेन परस्परं शेषशेषिभावाद्यभावेन चैकपुरुषाननुष्ठेयत्वेन च क्रमाकांक्षाया अभावेन क्रमप्रमाणानामप्रवृत्तेः। कर्मावबोधानन्तर्यं सर्वथा नास्त्येव। यदि च कर्मब्रह्ममीमांसयोरेकवाक्यतत्वरूपमेकशास्त्रत्वमभ्युपगम्यैकस्मिन्वाक्ये च प्रथमवाक्यार्थवगमपूर्वकचरमवाक्यार्थज्ञानमिति नियमाद्विचारितकर्मण एव ब्रह्मावबोधेऽधिकार इति।

कर्मावबोधानन्तर्यार्थकत्वन्नाथशब्दस्य[10] कल्प्येत, तदाप्येकस्मिञ्छास्त्रे-आदिमवाक्यार्थज्ञानपूर्वकमेवान्त्यवाक्यार्थज्ञानमिति नियमाभावेनापेक्षितान्त्यवाक्यार्थमात्रज्ञानेऽपि[11] प्रवृत्त्युपपत्तेः। ऐक्यशास्त्रे प्रमाणाभावश्च,

१. ख० मा० 'निरूपकम्' इति पाठो नास्ति।

२. तत्तद्वेदशाखाध्ययनम्

३. यतोऽभ्युदयनिश्रेयससिद्धिः स धर्मः (वै. द. १।२)

४. तस्मान्मुमुक्षुभिः कार्य्यमात्मज्ञानाभिलाषिभिः।
नित्यन्नैमित्तिकं कर्म सदैवात्मविशुद्धये ॥ (नै. सि. पृ० ५०)

५. बृहत्वाद्बृंहणत्वाच्चात्मैव ब्रह्मेति गीयते इति (भामती १।१।१)
अत एव—बृहत्वाद् बृंहणत्वाच्च भावानां सलिलाश्रयात्।
यस्माद्बृंह्यते भावान् ब्रह्म तेन निरुच्यते। (वा. पु. हि. २९)

६. कार्यान्वयित्वे सति वर्तमानत्वे सति व्यावर्तकत्वं विशेषणत्वन् (वे. प. पृ० ६९)

७. मा० क० 'भावनाकाले' इति पाठः।

८. मा० ख० 'कर्मानधिकारात्' इति पाठ:

९. 'कर्माण्यारादुपकारकत्वेन यथा मोक्षहेतुतां प्रतिपद्यन्ते (नै. सि. पृ० ३१)
एवमारान्मोक्षहेतुतामुपपाद्य न वयं ज्ञानकर्मणोः सर्वत्रैव समुच्चयं प्रत्याचक्ष्महे। यत्र प्रयोज्यप्रयोजकभावो ज्ञानकर्मणोस्तत्र नास्मत्पित्रापि शक्यते निवारयितुम् (नै. सि० ३७) अपि च 'अज्ञानकार्यत्वाच्च न समकालं नापि क्रमेण ज्ञानकर्मणोर्वस्त्ववस्तुतन्त्रत्वात्सङ्गतिरस्तीत्येवं निराकृतोऽपि काशं कुशं वावलम्ब्याह (नै.सि. पृ० ४५) एतेन ज्ञानकर्मसमुच्चयवादपराकरणम् तदर्थकारित्वेऽपि प्रकृते समञ्जसम्।

१०. (क) आनन्तर्यार्थकताथशब्दस्य।

११. नित्यवस्तु-केवलं ब्रह्म 'अनित्यवस्तु-सकलप्रपञ्चजातमस्ति। विवेकस्तु रज्जुसर्पवत्परिदृश्यमानप्रपञ्चानित्यज्ञानपूर्वकं केवलाद्वैतब्रह्मैव नित्यमित्याकारकज्ञानम्। भामतीपतिस्तु 'नित्यानित्ययोर्वसतीति नित्यानित्यवस्तु' इति व्याख्यातवान्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अर्थैकत्वात् ह्येकवाक्यत्वम् । न चात्र प्रयोजनरूपार्थैक्यमस्ति, कर्ममीमांसाया अनुष्ठानद्वारा स्वर्गादिफलकत्वाद् ब्रह्मजिज्ञासायाश्च मोक्षफलकत्वात्फलैक्याभावात् । न च प्रतिपाद्यैक्यमस्ति, धर्मजिज्ञासाया उत्पाद्यधर्मप्रतिपादकत्वादस्य च शास्त्रस्य ब्रह्मप्रतिपादकत्वादतो नैकवाक्यत्वसम्भवः । अतो न कर्मावबोधानन्तर्यमथशब्दार्थः । किन्तु नित्यानित्यवस्तुविवेक[१]ऐहिकामुष्मिकफलवैराग्यं[२]शमादिसम्पन्मुमुक्षुत्व[३]ञ्चेत्येतत्साधनचतुष्टयमानन्तर्यनिरूपकम् । तत्र च ब्रह्मलोकान्तसुखानित्यत्वे तदतिरिक्तनित्यसद्भावनिश्चयो नित्यानित्यवस्तुविवेकः । अयञ्च विवेकः परमेश्वरार्पणबुद्धचा बहुषु[४] जन्मसु[५] कृतैःसुकृतैराराधितपरमेश्वरप्रसादलभ्यः । एतेन नित्यानित्यवस्तुविवेकस्य विचारप्रवृत्तेः प्रागेव जातत्वे–आत्मनित्यत्वप्रतिपादकन्यायवैयर्थ्यप्रसङ्ग इति निरस्तम् । श्रुतिविरोधादिशङ्कानिवृत्त्यर्थं तदधिकरणप्रवृत्तेः ।

भामत्यान्तु सत्यासत्यविवेक एव प्रथमसाधनत्वेन स्वीकृतः । ततोऽनित्यात्कर्मफलाद्वैराग्यञ्जायते, रंहतिपादव्युत्पादन्यायैस्तु तस्य दृढीकरणम्, ततः शमादि इत्येवं क्रमेण जिज्ञासाहेतुत्वमेषां द्रष्टव्यम् । अत एव सर्वासु श्रुतिषु विचारविधायकवाक्यनिकरे साधनचतुष्टयसम्पत्त्यादिकं कीर्त्यते । अत्र च काम्ये कर्मणि कामनाया एवाधिकारिविशेषणत्वान्मुमुक्षैवाधिकारिविशेषण-मितराणि तु मुमुक्षार्थानीत्याश्रमश्रीचरणाः । न तूक्तनित्यानित्यविवेकस्यैवासम्भवः । कर्मफलानामपि 'अपाम सोमममृता अभूम' (ऋ० ८।४८।३) 'अक्षय्यं ह वै चातुर्मास्ययाजिनस्सुकृतं भवति(आ० श्रौ० २।१।१) इत्यादि वचनैर्नित्यत्वावगमात् । न च[६] यत्कृतकं[७] तदनित्यमिति[८] न्यायविरोधः 'ज्योतिष्टोमो' न स्वर्गसाधनम् क्रियात्वात् लौकिकक्रियादिवदित्यनुमानस्य 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इत्यागमबाधितत्ववत्प्रकृतन्यायस्याप्यागमबाधितत्वादिति चेन्न 'तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयत' (छा० ८।१।६) इति श्रुत्या यत्कृतकं तदनित्यमिति [९]न्यायप्रतिपादनपूर्वकं कर्मफलस्यानित्यत्वप्रतिपादनेन तद्विरुद्धस्य तात्पर्यग्राहकलिङ्गरहितस्य मन्त्रार्थ[१०]वादरूपस्य दुर्बलत्वेन कर्मफलनित्यत्वासिद्धेः; तथाच साधनचतुष्टयस्य सम्भवादधिकारिलाभोऽमुमेवार्थं साधनचतुष्टयस्य सम्भवादित्यर्थंकोऽतः शब्द आहृतो न पौनरुक्त्यम् ।

---

१. इह लौकिके तथा पारलौकिकसुखभोगे विरागो विरतिः वैरारयम्' लोकद्वयस्यापि पुण्यातिशयक्षीणत्वात् 'क्षीणे पुण्ये मृत्युलोकं विशन्ति' वचनात् ।

२. शमदमोपरतितितिक्षाश्रद्धासमाधानानीति षट्सम्पत्तयः ।

३. मुमुक्षुत्वन्नाम-मोक्षे-इच्छावत्वम् ।

४. क० मा० 'बहुषु जन्मसुकृतसुकृताराधित' इति पाठः ।

५. घ० मा० 'प्राकृत' इति पाठः ।

६. क० मा० 'वाक्यनिकटे' इति पाठः ।

७. कृतकम्-कार्यम् ।

८. अनित्यत्वम्-ध्वंसप्रतियोगित्वम्-विनाशित्वमित्यर्थः ।

९. (क) न्यायो नाम 'प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः (न्या.सू. १।१।३२)

(ख) भूयसां विदुषामवयवविषये मतभेदो दृश्यते । तत्र माठरः—'अनुमानं त्रिसाधनं त्र्यवयवं पक्षहेतुदृष्टान्ता इति । पञ्चावयवमित्यपरे, तदाह-अवयवाः पुनः प्रतिज्ञापदेशनिदर्शनानुसन्धानप्रत्याम्नायाः (मा.वृ.का.५) 'दशावयवानेके नैयायिका वाक्ये सञ्चक्षते-जिज्ञासा, संशयः, शक्यप्राप्तिः, प्रयोजनं, संशयव्युदासः, (न्या. वा. भा. १।१।३) युक्तिदीपिकायान्तु 'तस्य पुनरवयवाः जिज्ञासासंशयप्रयोजनशक्यप्राप्तिसंशयव्युदासलक्षणाश्च व्याख्याङ्गम्, प्रतिज्ञाहेतुदृष्टान्तोपसंहारनिगमनानि परप्रतिपादनाङ्गम्' (युक्ति. दी. १।२।६) ।

१०. स्तुतिनिन्दापरकवाक्यमर्थवादः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ब्रह्मजिज्ञासापदे च षष्ठीतत्पुरुषो न चतुर्थीतत्पुरुषः। ब्रह्मजिज्ञासापदार्थयोर्यूपदारुवत्प्रकृतिविकारभावाभावेन चतुर्थीसमासानुपपत्तेस्सा च षष्ठी कर्मणि। कारकविभक्तित्वस्याभ्यर्हितत्वात्तस्याश्च 'कर्मणि च' (अ. २।२।१४) इति न प्रतिषेधः 'उभय प्राप्तौ' (अ. २।३।६६) इति सूत्रनियमितषष्ठ्या एव 'कर्मणि च' इति सूत्रेण निषेधाज्जिज्ञासापदस्य चाप्रत्ययान्तत्वेन स्त्रीप्रत्ययोरकाराकारयोर्नायन्नियम इत्युभयप्राप्ताविप्यस्याप्रवृत्त्या 'कर्तृकर्मणोः, इति षष्ठी। अतः समास[1] उपपन्नस्तस्माद्ब्रह्मो जिज्ञासा ब्रह्मजिज्ञासेति विग्रहः,[2] जिज्ञासापदञ्च मोक्षसाधनीभूतज्ञानेच्छां ब्रूते। तथा च[3] साधनचतुष्टयसम्पत्त्यनन्तरं साधनचतुष्टयस्य सम्भवाद्ब्रह्मजिज्ञासेति सूत्राक्षरात्प्रतीयमानोऽर्थः सम्पन्नः। तथा च साधनचतुष्टयसम्पन्नेन ब्रह्मज्ञानाय वेदान्तविचारः कर्तव्य इत्यर्थो लभ्यत इति।

विवरणानुयायिनस्तु विचारकर्तव्यतैव लक्षणया सूत्रेण प्रतिपाद्यत इत्याहुः। नन्वेवमपि ब्रह्मणो जिज्ञासानुपपन्ना अधीतसाङ्गस्वाध्यायस्य 'तत्त्वमसि' इति वाक्यश्रवणमात्रेण ब्रह्मात्मैक्यस्यावगतत्वेन जिज्ञासानुपपत्तेः। नहि निश्चितेऽप्यर्थे जिज्ञासोदेति। अथ वेदान्तवाक्यैर्न ज्ञायेत, तदा धर्मिणोऽत्यन्ताज्ञानत्वेन जिज्ञासैव न स्यात्, न वा विचारानन्तरं वेदान्तवाक्यानां तज्ज्ञानजनकत्वमसमर्थत्वादिति चेन्न, वेदान्तवाक्येन ज्ञाते (ने) ऽपि बहुवचनव्यक्तिसम्भवेन संशयेन जातेऽपि ज्ञाने विचारं विना प्रामाण्यानवधारणात्।

कैश्चिच्चतुर्थ्यां 'सुपां सुलुग्' (अ० ७।१।३९) इत्यादिना लुकमङ्गीकृत्य तस्मै त्वमर्पणीय[4] इत्युच्यते। एवं पञ्चम्याः षष्ठ्याः सप्तम्या वा लुकमङ्गीकृत्य तस्माज्जातस्तस्य स्व(त्व)मिति तस्मिन्[5] त्वं प्रतिष्ठित इति वचनव्यक्तीः कल्पयन्ति। केचित्तु 'आत्मा तत्त्व सि' इत्यत्रातत्त्वमसीतिच्छेदं कुर्वन्ति। अन्ये तु जीवः परमेश्वरस्य शरीरमित्यभ्युपगम्य शरीरवाचकानां शरीरपर्यन्तत्वमभ्युपगम्य 'तत्त्वमसि' इति सामानाधिकरण्यमुपपादयन्ति। केचित्तु[6] 'वेदाः प्रमाणमेव न भवन्ति। अतः शरीरमेवात्मेन्द्रियाणि वा, मन एव वा क्षणिक[7] विज्ञानमेव वात्मेत्याहुः।

---

१. अनेकपदानामेकपदीकरणं समासः।

२. वृत्त्यर्थावबोधकवाक्यं विग्रहः।

३. इहामुत्रफलभोगविरागो नित्यानित्यवस्तुविवेकः शमादिषट्कसम्पत्तिः, मुमुक्षुत्वञ्च साधनचतुष्टयम्।

४. क० मा० 'समर्पणीय' इति पाठः।

५. क० मा० 'स्वम्' इति पाठः।

६. (क) 'वेदाः प्रमाण' मित्यत्र वेदशब्दात्परं बहुवचनं 'प्रमाण' मित्यत्रैकवचनस्यैव प्रयोगः, समानवचनकत्वनियमात् 'वेदाः प्रमाणानि' इति वक्तव्यम्। अत्रोत्तरम् 'यत्र विशेष्यवाचकपदोत्तरविभक्तितात्पर्यविषयसंख्याविरुद्धसंख्याया अविवक्षितत्वं तत्र विशेष्यविशेषणपदयोस्समानवचनकत्वनियमः'।

(व्युत्प. वा. पृ० ६)

(ख) 'वेदाः प्रमाण' मित्यत्र विशेष्यवाचकवेदपदोत्तरवर्ति जस्विभक्तितात्पर्यविषयीभूतबहुत्वसंख्यातो विरुद्धाया एकत्वसंख्याया विवक्षितत्वेन समानवचनकत्वनियामकमुक्ताऽविवक्षितत्वं नास्तीति न समानवचनकत्वम्। किन्त्वेकत्वसंख्याया विवक्षितत्वेन तद्बोधकमेकवचनमेव प्रमाणपदोत्तरं प्रयुक्तं, तदेव युक्तञ्चेत्याह 'वेदाः प्रमाणम्' इत्यत्रेति। ननु चत्वारो वेदास्तेषु कथमेकत्वान्वयः, स्यादित्याशंक्याह तच्चेति तदेकत्वम्, प्रकृतिपदेन च प्रमाण-पदं ग्राह्यम्, प्रमितिकरणञ्च प्रमाणमिति प्रकृत्यर्थतावच्छेदकं प्रमितिकरणत्वं, तच्च चतुर्ष्वपि वेदेष्वेकमेव विवक्षितमिति तादृशप्रमितिकरणत्वे-एकत्वस्यात्रान्वयो भवति, न तु प्रमितिकरणभूतेषु वेदेष्वित्यर्थः। यथाऽनेकेषु घतेष्वेकमेव घटत्वं तथाऽनेकेष्वपि प्रमितिकरणेषु वेदेष्वेकमेव प्रमितिकरणत्वं युक्तम्। (व्यु. वा. आ. व्या. पृ. पृ. ६)

७. योगाचारबौद्धानां मतम्। तस्माद्विपक्षे क्रमयौगपद्यव्यावृत्त्या, व्यापकानुपलम्भेन, अधिगतव्यतिरेकव्याप्तिकं प्रसङ्गतद्विपर्ययबलात्, गृहीतान्वयव्याप्तिकञ्च सत्त्वं क्षणिकत्वपक्ष एव व्यवस्थास्यतीति। (स. द. सं. पृ० ५५)।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अन्ये तु[1] शून्यमेव तत्त्वमित्याहुः, [2]अन्ये (इतरे) तु वेदप्रामाण्यमभ्युपगम्य जीवस्य देहाद्यतिरिक्तत्वं कर्तृत्वादिकञ्च स्वीकुर्वन्त ईश्वरप्रतिपादकवाक्यानाञ्जीवासङ्गत्वप्रतिपादकवाक्यानाञ्चाविवक्षितार्थत्वं मन्यन्ते। अपरे[3] त्वीश्वरमनिच्छन्त एव जीवस्य कर्तृत्वाभावं स्वीकृत्यासङ्गश्रुतिमुपपादयन्ति। अन्ये[4] त्वीश्वरमभ्युपगच्छन्तस्तस्य सर्वज्ञत्वं स्वाभाविकमुपगम्य तद्गतधर्मराहित्यप्रतिपादकश्रुतीनामविवक्षितार्थत्वमाहुः।[5] औपनिषदास्तु जीवब्रह्मणोरैक्यमभ्युपगम्य सर्वाः श्रुतयो विवक्षितार्था एवेत्याहुः। अतो बहुमतदर्शनसंक्षुब्धहृदयस्य विचारमन्तरा निर्णयायोगेन तज्जिज्ञासापूर्वकं विचारः कर्तव्य एवेति प्रथमसूत्रेण विचारकर्तव्यता बोध्यत इति सिद्धम्।

जन्माद्यधिकरणम्

जन्माद्यस्य यतः ॥२॥

पूर्वस्मिन् सूत्रे [6]ब्रह्मणस्सप्रमाणकस्य जिज्ञास्यत्वं प्रतिज्ञातम्। तत्र ब्रह्मणोऽभ्यर्हितत्वेन प्रथमं स्वरूपलक्षणमुखेन प्रतिपाद्यते। ब्रह्मणो ह्यज्ञाने क्व वेदान्तवाक्यानां प्रामाण्यं निरूप्येत[7]। अतः प्रथमतो ब्रह्मणो लक्षणमुच्यते 'यतो वा इमानि भूतानि जायन्त' (तै. उ. ३।१) इत्यादीनि 'सत्यं ज्ञानं' (तै. उ. २।१) इत्यादि च ब्रह्मणो लक्षणं प्रतिपादयितुं समर्थान्युत नेति संशयः। तत्र पूर्वपक्षः। न [8]स्वलक्षणप्रतिपादकमिति कुतः

ब्रह्मावृत्तेर्जगन्नैव ब्रह्मणो लक्षणं भवेत्।
कारणत्वन्न सम्बन्धो नापि तल्लक्षणं भवेत् ॥
विरोधादत एवास्य सत्यतापि न लक्षणम्।
सत्यानन्दस्वरूपञ्च प्रसिद्धिविरहाद्भवेत् ॥
ब्रह्मणो लक्षणन्नैव विचारोऽतो न युज्यते।

---

१. शून्यमेव तत्त्वमिति माध्यमिकसमयः। 'एवं शून्यं शून्यमित्यपि भावनीयम्। स्वप्ने जागरणे च न मया दृष्टमिदं रजतादीनि विशिष्टनिषेधस्योपलम्भात्। दृष्टं सत्तदा तद्विशिष्टस्य दर्शनस्येदन्ताया अधिष्ठानस्य च तस्मिन्नध्यस्तस्य रजतत्वादेस्तत्सम्बन्धस्य च समवायादेस्सत्त्वं स्यात्। न चैतदिष्टं कस्यचिद्वादिनः। न चार्धजरतीयमुचितम्। न हि कुक्कुट्या एको भागः पाकायापरो भागः प्रसवाय कल्प्यतामिति कल्प्यते। तस्मादध्यस्ताधिष्ठानतत्सम्बन्धदर्शनद्रष्टॄणां मध्य एकस्यानेकस्य वा-असत्त्वे निषेधविषयत्वेन सर्वस्यासत्त्वं बलादापतेदिति भगवतोपदिष्टे 'माध्यमिकाः' तावदुत्तमप्रज्ञा इत्थमचीकथन्—भिक्षुपादप्रसारणन्यायेन, क्षणभङ्गाद्यभिमानमुखेन, स्थायित्वानुकूलवेदनीयत्वानुगतसर्वसत्यत्वभ्रमव्यावर्तनेन सर्वशून्यतायामेव पर्यवसानम्। अतस्तत्त्वं सदसदुभयानुभयात्मकचतुष्कोटिविनिर्मुक्तं शून्यमेव' (स. द. स. पृ० ६३)।
उक्तञ्च माध्यमिककारिकायाम्—
न सन्नासन्न सदसन्न चाप्यनुभयात्मकम्।
चतुष्कोटिविनिर्मुक्तं तत्त्व माध्यमिका विदुः (जगुः) ॥ (१।७)
(स. द. स पृ० ३६)

२. मीमांसकाः ३. सांख्याः ४. नैयायिकाः ५. वेदान्तिनः।

६. दोषासहकृतज्ञानकरणत्वं प्रमाणत्वम्। (अ. सि. पृ० ९)

७. क० मा० 'प्रतिपाद्यते' इति पाठः।

८. ख० मा० 'लक्ष्यम्' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ब्रह्मणो विचार्यत्वं तावन्नोपपद्यते लक्षणाभावात्। न च जगदेव ब्रह्मणो लक्षणमस्त्विति वाच्यम्। जगतो ब्रह्मावृत्तित्वान्न च कारणतासम्बन्धेन तस्य ब्रह्मलक्षणत्वम्, कारणताया वृत्तिनियामकसम्बन्धत्वाभावात्। न च जगत्कारणत्वमेव लक्षणमस्त्विति वाच्यम्, त्वन्मते निर्विशेषस्यैव ब्रह्मणो लक्षणत्वाभ्युपगमेन तस्मिंश्च जगत्कारणत्वादिधर्माणामभावेन लक्ष्यप्रतीतिविरुद्धस्य लक्षणत्वायोगात्। न च[1] सत्यज्ञानादिवाक्येनैव लक्षणं[2] प्रतिपादितमिति वाच्यम्, तत्प्रतिपाद्यसत्यत्वादीनामपि पूर्वोक्तविरोधेनैव लक्षणत्वानुपपत्तेः। न च जगज्जन्मादिकारणत्वस्य 'यतो वा' (तै॰ उ. ३।१) इत्यादिवाक्यप्रतिपाद्यस्य ब्रह्मवृत्तेरपि तटस्थतया चन्द्रस्य शाखाग्रस्येव लक्षणत्वोपपत्तेः। सत्यज्ञानादिवाक्यप्रदिपाद्यस्य सत्यज्ञानादिस्वरूपस्याखण्डस्य ब्रह्मणः प्रकृष्टप्रकाशश्चन्द्र इति वाक्यप्रतिपाद्यस्याखण्डचन्द्रस्येवाखण्डतया लक्षणत्वापपत्तेश्च नानुपपत्तिरिति वाच्यम्, असम्बद्धस्य तटस्थतया लक्षणत्वे मानाभावाच्छाखाग्रस्याप्यत एव चन्द्रं प्रति न लक्षणत्वम्, आवश्यकस्वरूपलक्षणेनैवोपपत्तौ तटस्थलक्षणस्य निष्प्रयोजनत्वाच्च। कथञ्चिल्लक्ष्यस्य[3] लक्षणत्वस्वीकारेऽपि त्वदभिमतलक्ष्यब्रह्मभिन्ने जीवेऽपि तस्य विद्यमानत्वेन लक्षणत्वायोगाच्च। प्रश्नोपनिषदि हि षोडशकलं पुरुषं प्रस्तुत 'स ईक्षाञ्चक्रे कस्मिन्नहमुत्क्रान्त उत्क्रान्तो भविष्यामि कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामिति स प्राणमसृजत (प्र. उ. ६।३) इत्यादिना प्राणोत्क्रान्त्यधीनोत्क्रान्ति-प्राणप्रतिष्ठाधीनप्रतिष्ठापकस्य जीवस्य जगत्स्रष्टृत्वोक्त्या जीवेऽपि तस्य सिद्धेः। सत्यज्ञानादिवाक्यञ्च[4] नाखण्डार्थबोधकम्, वाक्यस्य सर्वस्यापि स्वघटकपदार्थसंसर्गबोधकत्वेनैकप्रातिपदिकार्थमात्रबोधकत्वस्य समभिव्याहृतपदार्थसंसर्गागोचरप्रमितिजनकत्वरूपस्य चाखण्डार्थत्वस्यानुपपत्तेः। एकेनैव पदेन प्रातिपादिकार्थलाभसम्भवे पदान्तरवैयर्थ्यापत्तेः पर्यायतापत्तेश्च। अत एव प्रकृष्टप्रकाशवाक्यमपि नाखण्डचन्द्रप्रतिपादकं, किन्तु प्रकर्षविशिष्टप्रकाशसम्बन्धमेव बोधयति। अतो लक्षणाभावादनारम्भणीयमिति प्राप्तेऽभिधीयते।

जगज्जन्मादिहेतुत्वं ब्रह्मणो लक्षणं भवेत्।
तटस्थत्वाद्विरोधोऽत्र न कश्चिदपि विद्यते॥
सत्यज्ञानस्वरूपञ्च सत्यज्ञानादिवाक्यतः।
अखण्डार्थतया लाभाद्ब्रह्मणो लक्षणं तथा॥
विचार्यत्वमतस्सिद्धं ब्रह्मणः स्वप्रमादिभिः।

ब्रह्म तावद्विचार्यञ्जगज्जन्मादिकारणत्वस्य तटस्थतया चन्द्रस्य शाखाग्रस्येव[5] लक्षणत्वसम्भवात्। न च तटस्थस्य लक्षणत्वासम्भव इति शंक्यम्, तटस्थस्यापि शाखाग्रस्या[6]न्यदेशवृत्तिताव्यावर्तकत्वेन लक्षणत्ववत्कारणत्वेनासम्भाव्यमानकार्यव्यावर्तकत्वेनास्यापि लक्षणत्वसम्भवात्। अत एव वैयर्थ्यशङ्कापि परास्ता। न चास्य जीवसाधारण्यं प्रश्नोपनिषद्वाक्यानुसारेण शङ्क्यम्, तस्य 'परं ब्रह्मान्वेषमाण' (प्र. उ. १।१) इत्युपक्रमात् 'त्वं हि नः पिता योऽस्माकमविद्यायाः परं पारं तारयति' (प्र. उ. ६।८) इत्युपसंहारात्। 'एतावदेवाहमेतत्परं ब्रह्म

१. त्रिकालाबाध्यत्वमेव सत्यत्वम्।
२. असाधारणधर्मो लक्षणम्।
३. क॰ मा॰ 'तस्य लक्षणत्वस्वीकारेऽपि' इति पाठः।
४. पदार्थान्तरसंसर्गागोचरप्रमितिपरवाक्यत्वमखण्डार्थत्वम् (ब्र. वि. भ. पृ॰ १०९)।
५. घ॰ मा॰ 'शाखाग्रेष्येव' इति पाठः।
६. क॰ मा॰ 'स्वान्यदेशवृत्तिनक्षत्रव्यावर्तकत्वेन' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वेद' (प्र. उ. ६।६ इत्युक्तेः 'स एषोऽकलोऽमृतो भवति (प्र. उ. ६।५) इति मोक्षफलोक्तेश्च परंब्रह्मत्वे निर्णीते 'कस्मिन्वाहमुत्क्रान्त' (प्र. उ. ६।३) इत्यादिजीव[1]लिङ्गमभेदविवक्षया ब्रह्मपरमित्यभ्युपगन्तव्यत्वाज्जीवस्य विचित्रप्रपञ्चं प्रति स्रष्टृत्वानुपपत्तेश्च। नहि जीवेनैकमपि शरीरमित्थं रचितमिति ज्ञातुमपि शक्नोति, किमुत रचयितुमत एव रचयितुस्सार्वज्ञ्यं सर्वशक्तित्वञ्चामुमेवार्थं सूचयितुं सूत्रकृता 'इमानि' इति मूलभूतश्रुतौ बहुवचननिर्दिष्टस्यापि जगत एकवचनेन निर्देशः कृतः। एकवचननिर्देशेन हीदञ्जगदेक कार्यवादप्रलयेन[2] जन्यत[3] इति सूचनेन सर्वशक्तित्वमस्य सूचितं भवति। अत एव[4] प्रधानादीनामप्यचेतनानां कारणत्वशङ्का परास्ता, सर्वजगत्कर्तृत्वरूपस्य कारणत्वस्य प्रधानादीनामनुपपत्तेस्सर्वज्ञस्यैव तदुपपत्तेः। तस्माज्जगज्जन्मादिकारणत्वं [5]तटस्थलक्षणं [6]ब्रह्मणोऽनुपपन्म्। एवं सत्यज्ञानादिरूपमपि [7]स्वरूपलक्षणं सत्यज्ञानमित्यादिवाक्यस्याखण्डार्थबोधकत्वेन तादृशलक्षणप्रसिद्धेस्सम्भवात्। न च 'ज्योतिष्टोमेन' इत्यादिवाक्यानां संसर्गबोधकत्वस्य दृष्टत्वेन सत्यादिवाक्यानामपि संसर्गबोधकत्वस्य वक्तव्यत्वादिदमप्रयुक्तमिति वाच्यम्, तात्पर्यविषये हि शब्दस्य प्रामाण्यं 'यत् परः शब्दः स शब्दार्थः' इति प्रसिद्धेः। वेदान्तवाक्यानाञ्च शुद्धे सच्चिदानन्दरूपे ब्रह्मण्युपक्रमादिभिस्तात्पर्यन्निर्णीयत इति समन्वयसूत्रादिषु निरूपयिष्यते। तथाच 'सत्यं ज्ञानमनन्तम्' (तै. उ. २।१) इति वाक्यस्थपदे सत्यत्वादिधर्मं परित्यज्य शुद्धं धर्मिणं लक्षणयोपस्थापयन्ति। तेषाञ्चैक्यं वाक्येन बोध्यते। न चैवं पदान्तरानर्थक्यं स्यादिति वाच्यम्, एकेन पदेनार्थे बोध्यमानेऽन्वयानुपपत्तिप्रतिसन्धानरूपलक्षणावीजस्याभावेन लक्षणानुपपत्तेः। पदान्तरे हि सति द्वयोरपि पदयोः स्व शक्यतावच्छेदक[8]विशिष्टाभेदबोधकतया विशेषणेनापि सहाभेदे बोध्यमाने बाधज्ञानबशेन धर्म[9]परित्यागपूर्वकं धर्मिलक्षणोदेति। न चैवमपि तृतीयादिपदवैयर्थ्यं दुष्परिहारमिति वाच्यम्, ब्रह्म ह्यसत्यमज्ञानमनानन्दरूपमिति भेदभ्रमनिवर्तकत्वाद्भेदभ्रमनिवृत्तौ च तद्धेतुभूतैक्याज्ञाननिवृत्त्या पुरुषार्थसिद्धिप्रसङ्गात्। न च सत्स्वप्येतेषु कथं भेदभ्रमनिवृत्तिरेतैः पदैर्वाच्यानामभेदो बोध्यते, स च नोपलक्षितभेदभ्रमविरोधी, लक्षणया च शुद्धं स्वरूपं बोध्यते, स चाभेदविषयकत्वान्न विरोधीति वाच्यम्, विशिष्टस्य ह्यभेदे बोध्यमाने विशेष्ययोरप्यभेदस्य बोधने भ्रमनिवर्तकत्वस्योपपत्तेः। उपलक्षितयोरप्यभेदबोधकस्यास्य वाक्यस्य भ्रमनिवर्तकत्वान्याथनुपपत्त्या कल्पनाञ्च। प्रकृष्टप्रकाशवाक्यमपि चन्द्रप्रातिपदिकार्थमात्रबोधकम्, तद्वाक्यं हि येन पुरुषेणास्ति चन्द्रत्वन्नाम जातिविशेषस्तं[10] प्रवृत्तिनिमितीकृत्य चन्द्रपदं प्रवृत्तमिति ज्ञातम्, चन्द्रश्चाचन्द्राद् व्यावृत्त इत्यपि चन्द्रस्वरूपत्वन्न ज्ञातं, तं प्रति प्रयुक्तं चन्द्रस्वरूपमेव बोधयति तत्रैव तात्पर्यात्। अत[11] इदमपि वाक्यं शुद्धचन्द्रस्वरूपपरमेव वात एव लक्षणवाक्यानां लक्ष्यस्वरूपप्रतिपादनपरत्वं स्वीकृत्याखण्डार्थपरत्वं युक्तं, ततश्च सत्यज्ञानादिरूपं लक्षणं कारणत्वेन

---

१. व्याप्तिबलेन लीनं प्रच्छन्नमर्थं प्रयोजनङ्गमयति बोधयति लिङ्गम्।
२. क० मा० 'कार्यवदप्रयत्नेन जयन्त' इति पाठः।
३. ख० मा० 'जन्यते' इति पाठः।
४. क० ख० मा० 'प्रधानादिष्वनुपपत्तेः' इति पाठः।
५. तटस्थं सद् व्यावर्तयतीति तटस्थलक्षणम्।
६. यावल्लक्ष्यकालमनवस्थितत्वे सति तद् व्यावर्तकत्वम् स्वरूपलक्षणम् (वे. प. वि. दृ० ३३९)
७. क० मा० 'उपपन्नम्' इति पाठः।
८. अन्यूनानतिरिक्तवृत्तिधर्मोऽवच्छेदकः। यथा गोत्वपृथ्वीत्वादिकम्।
९. क० मा० 'धर्मपरिज्ञानपूर्वकम्' इति पाठः।
१०. वाच्यत्वे सति वाच्यवृत्तित्वे सति वाच्योपस्थितिकारकत्वं प्रवृत्तिनिमित्तत्वम्।
११. क० मा० 'तत्र तात्पर्यादत एवमपि वाच्यम्' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रतीयमानप्रधानादिव्यावर्तकत्वेनोपपन्नम्। सूत्रे च 'यत' इति हेतुः पञ्चम्यन्तात्तसिः हेतुत्वं कर्तृत्वोपादानत्वरूपमीक्षणश्रुतेर्बहुभवनश्रुतेश्च यथा चैतत्तथा प्रकृत्यधिकरणे व्यक्तं भविष्यति। 'यत' इत्यनेन प्रकृतिभूतेन 'आनन्दादेव खल्विमानि' इति वाक्यप्रतिपाद्यानन्दरूपस्य लाभः। अनेनानन्दरूपं ब्रह्माद्वितीयमिति सूत्रेण प्रतिपादितं भवति। एतदर्थमेव सूत्रे तद्गुणसंविज्ञानबहुव्रीणा जन्मस्थितिभङ्गानां त्रयाणामुपादानम्। इतरथा हि स्थितावन्यत्कारणमुत्पत्तावन्यदिति शङ्कया द्वितीयत्वानिश्चयप्रसङ्गात्। ततश्च स्वरूपतटस्थलणयोरनेन सूत्रेण लाभाद्विचार्यत्वसिद्धिरिति।

शास्त्रयोनित्वाधिकरणम्

शास्त्रयोनित्वात् ॥३॥

पूर्वसूत्रे जगज्जन्मादिकारणत्वस्य प्रतिपादनबलात्सर्वज्ञत्वं सर्वशक्तित्वञ्चाक्षिप्तं, ब्रह्मणस्तदेव वेदकर्तृत्वेन साध्यते। अत्र च 'अस्य महतो भूतस्य निःश्वसितमेवैतत् य[1]दृग्वेद (बृ. उ. ४।५।११) इत्यादिर्विषयस्स किमीश्वरस्य वेदकारणत्वप्रतिपादनपर उत नेति संशयः। तदर्थञ्च किं वेदस्येश्वरकर्तृकत्वेन प्रामाण्यमुत नेति संशयः। तत्र पूर्वपक्षः

वेदस्य नेश्वरः कर्ता श्रुत्यनित्यत्वबोधनात्।
वाचा विरुपेत्यनया भक्त्या[2] निश्श्वसितश्रुतिः॥
नेतव्या[3] पौरूषेयत्वे ह्यप्रामाण्यं प्रसज्यते।
अतो न सर्वकर्तृत्वं पूर्वोक्तमुपपद्यते॥

ईश्वरो वेदकारणमिति वदतः कोऽभिप्रायः।

कि[4]मुपादानत्वमुत[5]कर्तृत्वमुतोभयम्। नाद्य उपादानत्वेऽपि ब्रह्मणस्सार्वज्ञ्यासिद्धेः। नहि घटोपादानस्य मृदो ज्ञानं दृष्टम्। नामि द्वितीयो, वेदस्य नित्यत्वेनेश्वरकर्तृकत्वासिद्धेः। नच 'अस्य महतो भूतस्य (बृ. उ. ४।५।११)

१. 'मेतघदृग्वेन' क० मा० पाठः।

२. भक्त्या लक्षणया इत्यर्थः।

३. छ० घ० मातृकायाम् 'तेनव्या' इति पाठः।

४. 'किं शब्दोऽयमाक्षेपार्थो, वा कुत्सितार्थो, वा वितर्कार्थो, वा प्रश्नार्थो वा स्यात्' (खं. प. ३ पृ० ५५३)
कुत्सिते चाप्यथाक्षेपे तथा प्रश्नवितर्कयोः।
किं शब्दप्रवृत्तिस्स्यादेवमर्थचतुष्टये ॥
इति पद्ये किमोऽर्थचतुष्टयवाचकत्वदर्शनात्कीदृशार्थकोऽयं भवत्प्रश्ननिक्षिप्तः किंशब्द इति पृच्छन्प्रश्ननिरासाय विकल्पते किं शब्दोऽयमिति। यद्यपि पाणिनीये किंशब्दस्सर्वनाम्नामन्त्यस्तथापि विलोमगणनाक्रममनुसृत्य तस्याद्यत्वोपवर्णनं, व्याकरणान्तरमनुसृत्य वेति ध्येयम्' (मोहनलालोदासीन टिप्पणम् खं. प. ३ पृ० ५५३) किं शब्द आक्षेपे निषेषस्तदर्थः यथा तत्र किं गमनेन, मा याहीत्यर्थः। कुत्सितार्थो निन्दार्थः-यथा 'स किं सखा साधु न शास्ति यो नृपं, हितान्न यः संश्रृणुते स किं प्रभुः' इत्यादौ वितर्कार्थं इति। यथा वितर्के 'किं किमुत' चेत्यमरः, यथा 'किमिन्दुः किं पद्मं किमु मुकुरविम्बं किमु मुखम्, किमब्जे किं मीनौ किमु वदनबाणौ किमु दृशावित्यादि। प्रश्नार्थं इति यथा 'का त्वं शुभे कस्य परिग्रहो वा किं वा मदम्यागमकारणं ते' इत्यादि (शांकरी पृ० ५५४) प्रकृते किं शब्दस्यार्थचतुष्टयेऽपि वितर्कार्थः किमर्थः।

५. उपादानत्वन्नाम येन विना यन्न भवति, यथा मृदैव घटोत्पत्तिः कपालद्वयं वा, मृदभावे च घटोपत्तिर्न स्यादतो घटस्य मृदुपादानकारणं प्रकृतेऽपीश्वरो वेदकारणं किमिति पदेन विचिकित्सते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति श्रुत्या वेदस्येश्वर[१]जन्यत्वप्रतिपादनत्वा(ना)न्नित्यत्वासिद्धिरिति वाच्यम् 'वाचा विरूपनित्यया' (ऋ. ८।७५।६) इत्यनया श्रुत्या नित्यत्वप्रतिपादने 'अस्य महतो भूतस्य' (बृ. उ. ४।५।११) इति श्रुतिरन्यथा नेयत्वात्। न च विनिगम[२]नाविरहः, पौरुषेयत्वाभ्युपगमेऽप्रामाण्यप्रसङ्गेन स्वस्याप्यप्रामाण्यप्रशक्त्या स्वव्याघातकत्वेन[३] तस्या-लक्षणया नेयत्वात्। अत एव न तृतीयोऽपि, तस्मात्पूर्वाधिकरणे यत्सर्वजगत्कारणत्वमुक्तमीश्वरस्य तदनुपपन्न-मिति सिद्धान्तस्तु

स्वरक्रमविशिष्टा हि वर्णा वेद इतीर्यते।
न चास्य नित्यता युक्ता कौमारिलनयेऽपि हि॥
वर्णानामप्यनित्यत्वं व्यासीये दर्शने भवेत्।
स्वरादीनामनित्यत्वाद्विशिष्टस्याप्यनित्यता॥
अतो वाचा विरूपेति वाक्यन्नेयं कथञ्चन।
अस्येति श्रुतिरेवातो वेदस्येशानकर्तृताम्॥
प्रब्रवीति ततश्चास्य पौरुषेयत्वहेतुना।
अप्रामाण्यप्रसक्तिश्च योक्ता[४] सा नोपपद्यते॥
अध्यापकेन तुल्यो हि भगवानीश्वरो मम।
वेदस्येश्वरजन्यत्वात्सर्वकारणता स्थिता॥

ईश्वरस्तावद्वेदस्योपादानं कर्ता च, न चोपादानत्वेऽपि सार्वज्ञ्यासिद्धिरिति वाच्यम्, वेदगता हि सर्वज्ञान-जननानुकूला शक्तिरीश्वररूपोपादानशक्त्यापन्नेति तस्य सार्वज्ञ्यसिद्धेः[५], वेदकर्तृत्वे त्वीश्वरो वेदानधीनवेदतदर्थ-ज्ञानवानुपाध्यायनैरपेक्ष्येण कृत्स्नवेदरचयितृत्वादित्यनुमानेन सार्वज्ञ्यसिद्धिः। न चैवमप्याधुनिकहस्तगतवराटक-संख्याज्ञानं कथं स्यादिति वाच्यम्, वेदं विना वेदार्थज्ञानस्यानावृतचैतन्यत्वादेव वक्तव्यमिति वेदार्थज्ञानवद्वराटक-संख्याज्ञानोपपत्तेः[६]। न च वेदकर्तृत्वमसिद्धमिति वाच्यम्, 'अस्य महतो भूतस्य' (बृ. उ. ४।५।११) इति श्रुतेरेव मातनत्वात्। न च वेदस्य नित्यत्वप्रतिपादकश्रुतिविरोधस्तस्यास्स्वरूपनित्यत्वबोधकतानुपपत्त्या प्रवाहनित्यता-बोधकत्वात्।

मीमांसकानां सृष्टिप्रलयावनभ्युपगच्छतां मतेऽपि स्वरक्रमविशेष-विशिष्टवर्णात्मकवेदस्य स्वरूपेण-नित्यत्वमुपपद्यते, नित्यानां विभूनां वर्णानां स्वरूपेण क्रमासम्भवात्। स्वरस्य चैकस्मिन्विरुद्धत्वादभि-

१. 'कर्तृत्व' इति क० पुस्तके पाठः।
२. एकतरपक्षपातिनी युक्तिर्विनिगमना।
३. यथा—यावज्जीवमहं मौनिः ब्रह्मचारी च मे पिता
माता तु मम बन्ध्यैव पुत्रहीनः पितामहः॥ (पं. द. पृ० ५२ टिप्पणः)
इत्येवं व्याघातदोषः मम मुखे जिह्वा नास्तीतिवत्।
४. घ० 'योक्ता' इति पुस्तके पाठः।
५. क० मा० 'सिद्धिः' इति पाठः।
६. क० मा० 'संख्या' पाठो नास्ति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्यञ्जकध्वनिप्रयुक्तत्वं[1] तयोर्वाच्यम्, तथा च तयोरनित्यत्वाद्वेदानित्यत्वम्। सिद्धान्ते तु सृष्टिप्रलययोरभ्युपगमात्स्वरूपेणाप्यनित्यत्वमिति विशेषः। न च निःश्वसितश्रुतिबलाद्वेदस्येश्वरकतृत्वे पौरुषेयत्त्वापत्त्याऽप्रामाण्यं स्यादित्युक्तमिति वाच्यम्। न वयं नैयायिकवत्पूर्वामानुपूर्वीमनपेक्ष्य रचयितृत्वमीश्वरस्य वदामः। अपि तु पूर्वपूर्वानुपुर्वीमपेक्ष्याध्यापकवद्रचयितृत्वं ब्रूमस्तथा चाप्रमात्वप्रयोजकदोषाभावेन तद्ग्राहकबाधबुद्धेरभावेन च नाप्रामाण्यप्रसङ्गः। अतश्च पूर्वसूत्रे यत्सकलजगत्कर्तृत्वमुक्तं तदुपपन्नम्।

एवं वा पूर्वलक्षणमुक्तमधुना तत्र वेदान्तानां प्रामाण्यमुच्यते 'तत्त्वौपनिषदं[2] पुरुषं' इति वाक्यं ब्रह्मण उपनिषदेकगम्यत्वं प्रतिपादयति। उत नेति संशयः। किं प्राप्तम्। न प्रतिपादयतीति। कुतः

जीवः प्रत्यक्षगम्यो हि परं ब्रह्मानुमापदम्।
[3]द्वैतवैतथ्यमप्येवमिहात्मानमतः[4] श्रुतिः॥

अत्र हि प्रत्यगभिन्नं[5] ब्रह्म श्रुत्येकसमधिगम्यमिति सिद्धांन्तिनो मतम्। तन्नोपपद्यते, प्रतीचो जीवस्याहमस्मि भामोति प्रत्यक्षेण परमप्रेमास्पदत्वेन च सच्चिदानन्दरूपत्वमनुभवसिद्धमतो[6] तत्तच्छ्रुतेरुपयोगः[7], नापि ब्रह्मणो ज्ञाने-उपयोगस्तस्याप्यनुमानसिद्धत्वात्। 'क्षित्यादिकं कर्तृजन्यं[8] कार्यत्वाद्घटवत्' इत्यनुमानस्येश्वरसाधकत्वाभ्युपगमान्नापि तयोरैक्यज्ञाने, 'प्रपञ्चो मिथ्या दृश्यत्वात्' इत्यनुमानेन प्रपञ्चान्तर्गतभेदस्य मिथ्यात्वेन तदैक्यसिद्धेः। 'तत्त्वौपनिषदम्' इत्यादिश्रुतिस्तु घटश्चाक्षुष इत्यादिवाक्यवन्नेतव्या। अतो नास्मिन्नर्थे श्रुतिः प्रमाणमिति प्राप्तेऽभिधीयते

सर्वज्ञसच्चिदानन्दब्रह्मसिद्धिः श्रुतिं विना।
न भवेद्द्वैतमिथ्यात्वसिद्धिश्चापि न तां विना॥
अनुमा च श्रुतेरङ्गन्न तु स्वातन्त्र्यभागिति[9]।
तमित्यादिश्रुतेश्चैवमिह मानमतः श्रुतिः॥

'तत्त्वौपनिषदं पुरुषम्' इति श्रुतौ पुरुषस्यौपनिषदत्वविशेषणं मानान्तरागम्यत्वप्रतिपादनाय, तद्धि शाकल्यं प्रति याज्ञवल्क्येन पृच्छ्यमानस्य पुरुषस्य मानान्तरागम्यत्वप्रतिपादनपूर्वकं त्वया तज्ज्ञानाभावाद्वक्तुमशक्यः स' इति प्रतिपादयितुम्, अन्यथा तद्विशेषणवैयर्थ्याद्। अत एव 'नावेदविन्मनुते तं बृहन्तम्' इत्यवेदविज्ज्ञानाविषयत्वमप्युच्यसानं वेदैकसमधि गम्यत्व एव पर्यवस्यति। अतः श्रुतिरेव तत्र प्रमाणम्।

---

१. घ० मा० 'अभिव्यक्तिः' इति पाठः।
२. ख० मा० 'तत्वौपनिषदम्' इति।
३. क० मा० 'मैतथ्य' इति पाठः।
४. क० मा० 'म' पाठो नास्ति पाठः।
५. प्रतिकूलमञ्चतीति प्रत्येक् जीवस्तदभिन्नं ब्रह्म।
६. घ० मा० 'अनुभव' इति पाठः।
७. क० मा० 'न तत्र श्रुतेरूपयोगः' इति पाठः।
८. क० मा० 'स' इत्यधिक पाठः।
९. क० मा० 'भागिनी' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ननु 'क्षित्यादिकं कर्तृजन्यं[१] कार्यत्वाद्घटवत्' इत्यनुमानस्यापीश्वरसाधकत्वात्कथमौपनिषदत्वम्। न [२]चानुगतपदार्थतावच्छेदकानिरुक्तिस्स्वोपादानगोचरजन्यकृतिजन्यान्यत्वे सति समवेतत्वस्य पक्षाविच्छेदकत्वात्। न च हविराद्युपादानगोचरकृतिमज्जन्यत्वेनार्थान्तरत्वमिति वाच्यम्, विषयतासम्बन्धावच्छिन्नकृतिनिष्ठकारणतानिरूपितसमवायसम्बन्धावच्छिन्नकार्यताशालित्वस्य साध्यत्वेनार्थान्तरानवकाशात्[४]। नहि जैवी कृतिः [५]समवायसम्बन्धेन द्वणुकादिकार्य्यम्प्रति विषयतासम्बन्धेन कारणम्[६], न च ध्वंशे व्यभिचारः, प्रागभावप्रतियोगित्वे सति सत्त्वस्य हेतुत्वात्। अतो न श्रुत्यैकसमधिगम्यत्वं तस्येति चेन्न, दृष्टान्ते चेष्टयान्यथासिद्धत्वेन कृतेरहेतुत्वेन साध्यवैकल्याद्व्यभिचाराच्च। ईश्वरे कृत्यभ्युपगमे ज्ञानजन्यतावच्छेदककृतित्वाश्रयत्वेन तदीयकृतेरप्यनित्यत्वेन [७]तज्जनकशरीरादिमत्वेनेश्वरस्य [८]दुःखादिमत्त्वं प्रसज्ज्येत। किञ्चोक्तानुमानेन जगतः कारणमात्रसिद्धावपि तस्य सर्वज्ञसच्चिदानन्दरूपासिद्धेः। न चेकत्वात्सार्वज्ञ्यमन्यथा विलक्षणेतादृशजगद्रचनानुपपत्तेरिति वाच्यम्, तदेकत्वसाधकप्रमाणाभावात्। लाघवेन चोपनीतमेकत्वं भासमानं नानात्वाविरोधित्वान्न संख्यारूपं, किन्तु सजातीयद्वितीयरहितत्वरूपम्, तच्च न लाघवोपनेयम्। स्वानुग्राह्यप्रमाणस्य विषयलाघवमापादयत एव प्रमाणसहकारित्वात्। अन्यथा तवाप्यन्यथाख्यात्याद्यसिद्धिप्रसङ्गात्। विविधविचित्रप्रपञ्चत्वेन विचित्रप्रासादादियुक्तनगरवद्धिश्वामित्रादिनानाकर्तृत्वसिद्ध्यापत्तेश्च। तस्मादनुमानान्न स्वातन्त्र्येणेश्वरसाधकम्, किन्तु श्रुत्या ईश्वरे बोध्यमाने सम्भावकतया तु ग्राहकमिथ्यात्वानुमानमप्येवमेव। तस्मात्प्रत्यगभिन्नं ब्रह्म श्रुत्येकसमधिगम्यमिति सिद्धम्।

समन्वयाधिकरणम्

तत्तु समन्वयात्॥ ४॥

'सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयम्' (छा. ६।२।१)

इत्यादि वेदान्ता ब्रह्मप्रतिपादनपरा उत नेति [९]संशयस्तदर्थमिदं विचारणीयं, किं तत्प्रतिपादनेन प्रयोजनं लभ्येत उत नेति तत्र पूर्व पक्षः

आम्नायस्य क्रियार्थत्वाद्विधिनेत्यादिसूत्रतः।
सर्वस्य वेदवाक्यस्य क्रियार्थत्वसमीरणात्॥

---

१. क० मा० 'स' इति पाठः।
२. क० ख० मा० 'पक्षतावच्छेदकानिरुक्तिः' इति पाठः।
३. ख० मा० 'पक्षतापच्छेकानिरूक्तिः' इति पाठः।
४. अनभिप्रेतार्थसिद्धिरर्थान्तरम्।
५. नित्यसम्बन्धः समवायः।
६. अन्यथासिद्धिशून्यत्वे सति नियतपूर्ववृत्तित्वं कारणत्वम्।
७. (क) चेष्टेन्द्रियाश्रयः शरीरम्। न्यायसूत्र १-१-११
(ख) आत्मनो भोक्षायतनं शरीरम्। न्यायमंजरी, पृ० ४५
८. दैहिकदैविकभौतिकतापत्रयफलं दुःखम्। इह जन्मनि जन्मान्तरे वा दुष्कृतमिहैव जन्मनि खादतीतिम् दुःखम्।
९. 'परस्परविरुद्धार्थविमर्शः संशयः' (न्याय ली० पृ० ५१)।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सिद्धस्य ब्रह्मणो नैव वेदान्ताः प्रतिपादकाः ।
यदि स्युस्तर्हि सापेक्षा निष्फला अपि लोकवत् ।।
अतः कर्तृस्तुतिद्वारा कर्मणस्तावका मताः ।
उपाया[1] विध्यपेक्षस्य विषयस्याथवार्पकाः ।।

तस्माद्ब्रह्मणि वेदान्ता न मानमिति निश्चयो, वेदान्ता न ब्रह्मप्रतिपादनपराः 'आम्नायस्य क्रियार्थत्वाद्विधिनात्वेकवाक्यत्वात्' (जै. सू. १।२।१–१।२।७) 'उक्त समाम्नायैतदमर्थ्यम् १।४।१' इति जैमिनिसूत्रपर्यालोचनया क्रियातात्पर्यस्य निश्चयेन शुद्धब्रह्मपरत्वानुपपत्तेः । शुद्धे ब्रह्मणि च यदि वेदान्ताः प्रमाणं स्युर्नद्यास्तीरे पञ्च[2] फलानि सन्तीति लौकिकवाक्ये[3] च मूलभूतप्रमाणान्तरापेक्षत्वेनाप्रमाणानि स्युः, फलञ्चैषान्न स्यात्सिद्धार्थबोधनेन प्रवृत्तिनिवृत्त्योरभावात् । अतस्सदेवेत्यादिवाक्यानां सर्वजगत्कारणत्वेन कर्मणा कर्तृभूतजीवस्तुतिद्वारा कर्मस्तावकत्वमुपासनानामपेक्षितविषयसमर्पकत्वं वा स्वीकार्यम् । उपासनाश्रवणस्थले चोपासनाविधिः कल्पनीयः । उपासनस्य च वाक्धेन्वादिवदविद्यमानस्यापि (?) विषयत्वसम्भवेन प्रत्यक्षविरोधेन 'देवताविग्रहन्यायस्य' [4]असम्भवेनान्यतरतत्वमस्यादिवाक्यान्न जीवाभिन्नब्रह्मसिद्धिरतो न वेदान्ता मानमिति । अत्राभिधीयते

न कर्तृनिष्ठा वेदान्ता नाप्युपास्तिपरा मताः ।
किन्तु प्रत्यगभिन्नस्य ब्रह्मणो बोधका मताः ।।
[5]उपक्रमादिलिङ्गेभ्यस्तात्पर्यस्यावधारणात् ।
आम्नायेत्यादिसूत्राणि कर्मकाण्डपराणि हि ।।
अन्यथा श्रुतहानिस्स्यादश्रुतस्य च कल्पना ।
सिद्धार्थकोधकत्वेऽपि मूलापेक्षा न विद्यते ।।
पौरुषेयस्य वाक्यस्य सापेक्षत्वं हि युज्यते ।
सिद्धार्थबोधिवाक्यानामानन्दावाप्तिहेतुता ।।
'दृष्टा दशम' इत्यादिवाक्येषु बहुशः खलु ।
तथा वेदान्तवाक्यानामतो ब्रह्मणि मानता ।।

'सदेव सौम्येदम् (छा. ६।२।१) इत्यादिवेदान्ता ब्रह्मप्रतीत्युद्देशेन प्रवृत्ता उपक्रमादिलिङ्गत्वात्तथा हि 'उत्तमादेशमप्राक्ष्य' इत्युपदेशैकसमधिगम्यं ब्रह्म प्रस्तुत्य तद्विज्ञानेन सर्वविज्ञानं प्रपञ्चमिथ्यात्वेनोपपाद्य पुनरेकमेवा-

१. घ० मा० उपासा इति पाठः ।
२. घ० मा० 'षञ्च' इति पाठः ।
३. क० मा० 'वाक्यवत्' इति पाठः ।
४. च० मा० 'अन्यतरात्' इति पाठः ।
५. उपक्रमोपसंहारावभ्यासोऽपूर्वताफलम् ।
अर्थवादोपपती च लिङ्गं तात्पर्यनिर्णये ।
माध्वभाष्यश्रुतप्रकाशिकादौ बृहत्संहितात उद्धृतमिति प्रतिज्ञातम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वितीयाभेदेऽद्वितीयत्वं कण्ठत उक्तमुपक्रमे। तथा 'ऐतदात्म्यैदं सर्वम्' (छा. ६।८।७) इति तदेवाद्वितीयत्वमुपसंहारेऽपि कीर्तितमित्युपक्रमोपसंहारैकरूप्यं तात्पर्यलिङ्गमिदं स्वशब्दगतं तदस्य [1]प्रकरणस्यान्यप्रतीतिपरतां वारयति 'ऐतदात्म्यमिदं सर्वम्' (छा. ६।८।७) इति नवकृत्वोऽभ्यासोऽपि शब्दधर्म एव संलक्षणादिनान्यपरत्वशङ्कावारकः। एवं 'येनाश्रुतं भवति' इत्यर्थवादोऽपि प्राशस्त्यबोधनद्वारा प्रकरणप्रतिपाद्यस्य विवक्षितत्वं दर्शयति। अवशिष्टमपूर्वत्वफलवत्त्वोपपन्नत्वरूपं त्रितयमर्थनिष्ठं सत्प्रामाण्यनिर्वाहकम्। अज्ञाते फलवत्यबाधिते वेदवाक्यानां प्रामाण्यात्। ब्रह्म च मानान्तरागम्यत्वादपूर्वमेव 'तस्य तावदेव चिरं' श्रुत्या मोक्षजनकज्ञानविषयत्वेन प्रतिपादनात्फलवत्।[2] यथा 'सौम्यैवयेन' इत्यादिवाक्येनाबाधितत्वस्य[3] प्रतिप्रादितवेदवाधितम्। अत एवं रूपैर्लिङ्गैर्ब्रह्मपरत्वमवधार्य्यते, तत्र श्रुतिलिङ्गावान्तर-वाक्यान्युपक्रमोपसंहारैकरूप्यादिलिङ्गज्ञान उपयुज्यन्ते। एवमन्यान्यपि वेदान्तवाक्यानि योज्यानि। अतः सिद्धं वेदान्ता अनन्यशेषब्रह्मपरा इत्यत एव न कर्तृस्तुतिद्वारा कर्मस्तावकाः, विध्येकवाक्यत्वाभावाच्चातत्परत्वादेव नोपास्यसमर्पकास्तत्त्वमस्यादिवाक्यानां यदवगतं प्रत्यगभिन्नब्रह्मपरत्वं (ब्र)वैतस्य[4] बाधप्रसङ्गादश्रुतविधिकल्पनाप्रसङ्गाच्च। येषान्तूपासनाप्रकरणे पाठस्सत्यकाम इत्यादीनां तेषामुपास्यसमर्पकत्वं स्वीक्रियत एव। 'आम्नायस्य' (पू. मी. १।१।१) इत्यादि सूत्राणि तु 'अथातो धर्मजिज्ञासा' (वै. १।१।१) इत्यधिकारात्कर्मकाण्डविषयाणि, एतत्सूत्रन्यायविरोधादुपेक्षणीयानि वा, पूर्वत्र देवताधिकरणसूत्रवत्।

यत्तु सिद्धार्थबोधकत्वेन नद्यास्तीरे पञ्चफलानीति वाक्यवन्मूलमानान्तरापेक्षत्वं स्यादिति, तन्न तत्र हि मूलसापेक्षत्वे पौरुषेयत्वं प्रयोजकन्न तु सिद्धार्थबोधकत्वम्। अन्यथौदनकामः पचेतेत्यादिक्रियाबोधक[5]वाक्यमपि मूलमानानन्तरसापेक्षत्वेन 'यजेत स्वर्गकामः' (ता० म० ब्रा० १६।३।३) इत्यादीनामपि मूलसापेक्षत्वप्रसङ्गात्। न च सिद्धार्थबोधकत्वे फलाभावः शंक्यः, दशमस्त्वमसि नायं सर्पोऽपि, तर्हि रज्जुरित्यादिवाक्यानां दुःखनिवृत्त्यादिप्रयोज(न)कानां बहुलमुपलम्भेन[6] 'तत्त्वमसि' (छा. ६।८।७) इत्यादि वाक्यानामपि सकलानर्थहेतुभूताविद्यानिवृत्तिनिरवच्छिन्नानन्दावाप्तिप्रयोजकत्वसम्भवात्। अतो वेदान्ता निष्प्रपञ्चे प्रत्यगभिन्ने ब्रह्मणि विधिनैरपेक्ष्येण प्रमाणम्। ननु वेदान्ताः प्रमाणमित्यङ्गीक्रियते, विधिनैरपेक्ष्यन्तु न मृष्यते 'आत्मा वारे द्रष्टव्य' (बृ. ४।५।६) इत्यादि विधिशेषतयैव ब्रह्मसिद्धेरङ्गीकारात्। अयं हि विधिप्रत्ययो ज्ञानविषयं नियोगं बोधयति। ज्ञानं तु विषयमन्तरानुपपद्यमानं विषयमपेक्षते। तथा च ग्राहकेण[8] संगृहीतवेदान्तबोध्यप्रत्यगभिन्नब्रह्मोपादानिक[9] प्रमाणविषयत्वेन सम्बध्यते। न च वेदान्तानां विधिपरत्वे ब्रह्मासिद्धिप्रसङ्गो[10]ऽन्यपरत्वादिति वाच्यम्, अन्यपरादपि 'देवताविग्रहन्यायेन' सिद्धिसम्भवात्। प्रत्यक्षस्य च विशिष्टभेदग्राहित्वेन शुद्धाभेदग्राहिश्रुत्यविरोधित्वात्। अतो विधिपरादेव-

१. शास्त्रैकदेशसम्बद्धं शास्त्रकार्यान्तिरे स्थितम्।
आहुः प्रकरणन्नाम ग्रन्थभेदं विपश्चितः॥ (प.उ.पु. १९।२१) (पृ० १।२ सप्तपदार्थ्यामपि)

२. 'फलवद्' इति क० मा० नास्ति।

३. 'प्रतिपादनादवाधितम्' इति क० मा० पाठः।

४. क० मा० 'तस्य' नास्ति।

५. क० मा० 'वाक्यानामपि' इति पाठः।

६. क० मा० 'तत्वमसीत्यादि' इति पाठः।

७. घ० मा० 'त्वविषयान्तरा' इति पाठः।

८. क० मा० संगृहीत'इति नास्ति पाठः।

९. क० मा० 'मानेन' इति पाठः।

१०. घ० मा० 'अन्येतरत्वात्' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वाक्याद्ब्रह्मसिद्धिरेषितव्या। विधेरभावे हि[१] प्रवृत्तिनिवृत्तिशासकत्वरूपशास्त्रत्वानुपपत्तेः [२]फलालाभप्रसङ्गाच्च। न च सिद्धबोधकादपि वाक्याद् दुःखादिनिवृत्तिः फलं दृश्यत इति वाच्यम्, लौकिकवाक्ये दुःखादिनिवृत्तेरनुभूयमानत्वेन तस्य तन्निवृत्तिफलकत्वेऽपि वेदान्तवाक्यैरसकृदवगत[३] ब्रह्मण्याप्तेऽपि दुःखनिवृत्तेरदर्शनात्। विधिपक्षे तु नियोगस्य नियोज्याकांक्षायां 'फलमात्र[४] यो निर्देशादिति न्यायेन' 'एतावदरे खल्वमृतत्वम्' इति वाक्योपात्तामृतत्वकामस्य नियोज्यत्वेन तद्विशेषणीभूतस्यामृतत्वस्य फलत्वसम्भवात्। न च नियोगजन्यत्वे मोक्षस्यानित्यत्वापत्त्याऽमृतत्वश्रुतिविरोध इति वाच्यम्। शास्त्रप्रामाण्यादेव जन्यस्याप्यविनाशित्वं हीत्थम्प्रयोजकवृद्धेन गामानयेतिवत्। प्रयोज्यत्वोपपत्तेः[५]।

न च सिद्धार्थबोधकत्वमपि वाक्यस्य सम्भवति। आद्यव्युत्पत्त्यनुसारेण कार्य्यबोधकत्वस्यैव स्वीकार्य्यत्वात् आद्यव्युत्पत्तिर्हीत्थम्प्रयोजकवृद्धेन गामानयेति प्रयोज्यवृद्धम्प्रति प्रयुक्ते प्रयोज्यप्रयोजक[६] वृद्धस्य च गवानयनादिप्रवृत्तिमुपलभमानेन बालेन गवानयनकार्यताज्ञानमस्य[७] (विवक्षित) हानमिति कल्पयित्वा तस्य च हेत्वाकांक्षायामुत्तमवृद्धवाक्यस्यैव तत्र हेतुत्वं प्रकल्प्य तादृशानुभवजननानुकूला शक्तिरवधार्यते। तदनन्तरं 'घटमानय गां बधान' इति वाक्यश्रवणे सति प्रथमगृहीतकार्यव्युत्पत्त्यनुसारेण गवानयनादेः परित्यागेऽपि कार्य्यान्वयबोधानुकूला शक्तिस्स्वीक्रियते। यत्र च 'नायं सर्प' इत्यादौ विधिर्न श्रूयते, तत्रापि माभैरित्यादिकं कल्प्पते। अतो वेदान्तवाक्यानां शुद्धब्रह्मबोधजनकत्वे[८] प्रामाण्यन्नोपपद्यते। ब्रह्मज्ञानमात्रादेवानर्थनिवृत्तौ श्रवणानन्तरं मननविधिवैयर्थ्यप्रसङ्गः, श्रवणेनानर्थनिवृत्तेस्सम्पन्नत्वात्। न च भवन्मते पूर्वतन्त्रेणैव धर्मस्य सर्वस्य विचारितत्वेनैतच्छास्त्रारम्भवैयर्थ्यमिति वाच्यम्, तत्राव्युत्पादितानां बहूनां व्युत्पादनार्थमस्य शास्त्रस्यारब्धव्यत्वात्। तस्माद्विधिशेषतयैव वेदान्ता ब्रह्म बोधयन्तीति चेद्।

अत्रोच्यते-ज्ञाने विधिरिति वदतः कोऽभिप्रायः? किम्प्रमाणज्ञाने विधिरिति-उतोपासनायामिति, नाद्यः प्रमाणज्ञानस्य विधेयत्वानुपपत्तेः। तथा हि 'द्रष्टव्यम्' इत्यत्र ज्ञानविषयककार्य्यता प्रतीयते, ज्ञानस्य विषयत्वं हि कृत्यवच्छेदद्वारा कार्य्याविच्छेदकत्वं कृत्यवच्छेदकत्वञ्च कृतिजन्यत्वमेव। तथा च नियोगस्य कार्य्यत्वं कृतिजन्यज्ञानजन्यत्वम्पर्यवसितम्। यथाहुः[९] 'कृतितत्साध्यमध्यस्थो यागादिर्विषयो मत' (वा० २।२।३८७) इति। न च यागवज्ज्ञानस्य कृतिसाध्यत्वं सम्भवति, प्रमाणस्य वस्तुपरतन्त्रत्वात्। तथा च तद्विषयकनियोगबोधनमनुपपन्नमेव[१०]। नहि द्वितीयः, उपासनासाध्यो हि मोक्षस्तस्मिन्पक्षेऽभ्युपगन्तव्यः। उपासनया चापूर्वद्वारेण मोक्षो जननीयः, अपूर्वञ्च

---

१. इष्टकर्मणि मनस्संयोगानुकूलव्यापारः प्रवृत्तिस्ततः परावर्तनं निवृत्तिः।
लोके हि काम्यकर्मणि प्रवृत्तिर्दृश्यते, अनिष्टेभ्यश्च निवृत्तिः।

२. घ० मा० 'लामा' इति पाठः।

३. क० मा० 'ब्रह्माणामपि' इति पाठः।

४. क० मा० 'मात्र' इति पाठः।

५. घ० मा० अधिकः पाठः।

६. क० मा० 'प्रयोज्य' इति पाठः।

७. ख० मा० 'वृत्तमिति' इति पाठः।

८. क० मा० 'बोधकत्वे' इति पाठः।

९. कारिकेयम् (चि० पृ० १७२) उद्धृता। चित्सुखीटीकाकारेण-प्रत्येक्स्वरूपेण (तदेव भवनाथवचनेन द्रढयति कुर्वोतिउक्तम्। अनेन मानेनानुगम्यते भवनाथस्य कारिकेति, परन्तु भवनाथकालः सन्दिग्धः।

१०. क० मा० 'अनुपपन्नमेव' इति पाठो नास्ति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शरीरं जनयित्वैव जनयति, शरीरवत्त्वे च दुःखादिमत्त्वं स्यात्। 'न ह वै सशरीरस्य, इति श्रुतेस्तथा चामोक्षत्वमेव प्रसज्येत्। किञ्चोपासनायाः पक्षमासादिकालनिर्वर्तनीयत्वेतरतमभावग्रस्ततया मोक्षेऽपि तारतम्यं प्रसज्ज्येत्। न चैतदिष्टम्[1]। किञ्च 'ब्रह्म वेद ब्रह्मैव भवति' इत्यादिशास्त्रपर्यालोचनाज्ज्ञानसमकालत्वप्रतीत्या पूर्वसाध्यत्वानुपपत्तेः। किञ्च ज्ञानस्याज्ञाननिवृत्तिरेव द्वारत्वेन श्राव्यते 'तरति शोकमात्मवित्' (छां० ७।३।१) इत्यादिश्रुत्या नापूर्वसाध्यत्वम्. अतो नोपासनाया [2]मोक्षहेतुत्वेन विधानोपपत्तिः। किञ्चोपासनाजन्यत्वे मोक्षस्यानित्यत्वं प्रसज्येत। ततश्च श्रुतिविरोधः। न च श्रुतार्थापत्तिरेव तस्य नित्यत्वं कल्पयतीति वाच्यम्। श्रुतेरस्मदीयमोक्षमादायाप्युपपत्त्या-न्यायविरुद्धार्थस्य कल्पयितुमशक्यत्वान्न च त्वन्मतेऽपि ज्ञानसाध्यत्वे मोक्षस्यानित्यत्वदोषस्य तादवस्थ्यमिति वाच्यम्।

अस्मन्मते-आत्मरूपस्य मोक्षस्य ज्ञानासाध्यत्वात्। न चैवं ज्ञानवैयर्थ्यं शङ्क्यम्, ज्ञानस्याविद्यानिवर्तकत्वा-भ्युपगमात्। ज्ञानस्याविद्यानिवर्तकत्वञ्चाज्ञानतत्प्रयुक्तदृश्यपूर्वत्वाभावव्याप्यत्वमेव। व्याप्यत्वञ्च कालिकविशेषणतया तेनाज्ञानादेर्ध्वंसाभ्युपगमे तस्य नित्यत्वेऽद्वैतहानिः। अनित्यत्वे तन्नाशकाभाव इत्यादिदोषाणामनवकाशः। ननु नाशाभावेऽज्ञानदिकं[3] क्व गतमिति प्रश्नस्य किमुत्तरमिति चेदधिकरणमेव ध्वंसमिति मते मुद्गरप्रहारादिष्वति-रिक्तध्वंसवादिनां मते ध्वंसकाले वा घटः क गत इति प्रश्नस्य[4] यादृशमुत्तरन्तादृशमिति गृहाण।

ननु द्वितीयमते ध्वंसकालत्वस्य प्रतियोग्यनधिकरणत्वव्याप्यत्वबलात् ध्वंसकाले न प्रतियोगिसत्ता। प्रथम-मतेऽपि मुद्गरप्रहारादिकालत्वस्य घटपूर्वत्वाभावव्याप्तिवलान्नोत्तरक्षणे घटसत्वमित्युत्तरमिति चेत्तर्हि ममापि पूर्वोक्तव्याप्तिबलाज्ज्ञानाव्यवहितोत्तरक्षणेऽज्ञानतत्प्रयुक्तदृश्याभाव इति तुल्यम्। वृत्तेरेव वा स्वस्वेतरसर्वदृश्यनाश[5]-कत्वोपपत्तेः, अस्माकं मते न कापि क्षतिः। न चैकस्यैव प्रतियोगित्वतदभावयोर्विरोधः। रूपभेदेन तदुपपत्तेः, प्रतियोगिध्वंसयोरेकक्षणावस्थायित्वञ्च ज्ञानात्सर्वं[6] दृश्यन्नष्टमिति प्रतीतिबले[7]नाङ्गीकरणीयत्वा[8]दिति दिक्।

अत उपासनासाध्यत्वे मोक्षस्यानित्यत्वदोषः स्थित एव। अतश्च स्वर्गादिफलवैराग्यपूर्वकं मोक्षशास्त्रे प्रवृत्ति-वैफल्यम्। अतो विधिनैरपेक्ष्येण वेदान्ता ब्रह्म प्रतिपादका इति सिद्धम्[9]। एतेनान्यैः कैश्चिद्विध्यासक्तैस्सम्पदुपासना-नुरूपत्वं कर्माङ्गत्विग्भूतब्रह्ममनसि महाफलसम्पादनाय विश्वदेवज्ञानवदध्यासरूपत्वमादित्ये ब्रह्मदृष्टिवज्जीवे बृंहण क्रियाजनकत्वेन ब्रह्मदृष्टित्वं वायौ संवर्गदृष्टिवत्कर्माङ्गभूतकर्तृसंस्कारकत्वमाज्यस्य पर्यवेक्षणवत्तत्त्वमस्यादिवाक्य-जन्यज्ञानस्य स्वीकृतमप्यपास्तम्। तत्त्वमस्यादिसमभिव्याहारस्य ब्रह्मैक्यबोधनस्वरसतयोपासनापरत्वायोगात्। आत्मज्ञानस्य कर्माङ्गत्वबोधकप्रमाणाभावात्। किञ्चोपासनाविधिशेषतया ब्रह्मसिद्धिरित्यनुपपन्नमुपासनाकर्मणो ब्रह्मत्वनिषेधात् 'तदेव ब्रह्मत्वं विद्धि नेदं यदिदमुपासत' (के. उ. १।४) इति श्रुतेः। यच्चोक्तं विधिपरत्वाभावे शास्त्रत्वन्न स्यात्फलञ्च न स्यादिति, (तन्न) तत्र हि पुरुषस्य हितबोधकत्वेन शास्त्रत्वोपपत्तेः। फलस्य चानर्थ-

१. क० मा० 'न चैतदिष्टम्' इति पाठो नास्ति।
२. क० मा० 'अविद्यास्तमयो मोक्षः' (ब्र० सि० ३।१०।६)
ख० मा० 'अविद्योच्छेदोपलक्षितपूर्णानन्दात्मा मोक्षः' (ल. च. पृ० २)।
३. क० मा० 'ज्ञानादिकं' नास्ति पाठः।
४. क० मा 'प्रकृतस्य' इति पाठः।
५. क० मा 'नाशकत्व' इति नास्ति पाठः।
६. क० मा 'दृश्यम' इति पाठः नास्ति।
७. क० मा 'अनुसारेण' इति पाठः।
८. क० मा 'मिति' इति पाठः।
९. क० मा 'सिद्धम' इति पाट।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF.

निवृत्तिरूपस्य[1] प्रागुपपादितत्वेन फलत्वासिद्धेः। श्रवणमनननिदिध्यासनानन्तरमसम्भावनादिविरहसहकृतसाक्षात्कारोत्पत्त्यनन्तरं यथा पूर्वं दुःखानुवृत्तेर्जीवन्मुक्तेरदर्शनात्। तथा हि 'निर्ल्वयनी वल्मीके मृत प्रत्यस्ता' (बृ० ४।४।८) इत्यादि श्रुतिस्मृत्यादिभिर्जीवन्मुक्तस्य प्रतिपादनाच्च। एतेन श्रवणानन्तरं मननादिविधिवैयर्थ्यशङ्का परास्ता। असम्भावनाविपरीतभावनानिवर्तकत्वेन सार्थकत्वान्मनननिदिध्यासनयोः। यदपि कार्य्यान्विते पदानां व्युत्पत्त्यवधारणेन सिद्धब्रह्मबोधकतत्त्वमस्यादिवाक्यानामबोधकत्वेनाप्रामाण्यमिति, तन्न सिद्धार्थबोधकानां बहुलं शाब्दबोधजनकत्वोपलम्भात्। न च पदार्थोपस्थित्यनन्तरमसंसर्गग्रहस्यैव स्वीकारान्न शाब्दबोधस्तत्रेति वाच्यम्, संसर्गस्याप्यनुभूयमानत्वात्। न च मानस एवायम्प्रत्यय इति वाच्यम्, तर्हि शाब्दबोधोच्छेदापत्तेः, कार्य्यान्वयस्थलेऽपि मानसिकसंसर्गबोधोपपत्तेः।

यदि च तत्र शब्दात्प्रत्येमीति बलाच्छाब्दमिष्यते, तर्हि प्रकृतेऽपि कार्य्यान्वयं परित्यज्य सिद्धेप्यर्थे बोधकत्त्व स्वीक्रियतां, शब्दात्प्रत्येमीति प्रतीतेरविशेषात्। किञ्च कार्यान्वयं विनापि प्राथमिकव्युत्पत्तिर्दृश्यते, यत्र हि बाला नुद्दिश्याङ्गुलिनिर्देशपूर्वकमयं घट इति शब्दमुच्चारयति मात्रादिस्तत्राङ्गुलिनिर्देशपूर्वकं शब्दोच्चारणं शक्तिग्रहपरमित्यनुभवजनितजन्मान्तरसंस्कारसहकृतेन तादृशशब्दोच्चारणेनापि सङ्गतिग्रहणात्।

किञ्च 'चैत्र ? पुत्रस्ते जात' इत्यादिव्यवहारादपि सङ्गतिग्रहणात्। अत्र हि चैत्रपुत्रजन्मज्ञानवता बालेन 'चैत्र ? पुत्रस्ते जात' इति वार्ताहारकवाक्यश्रवणानन्तरश्चैत्रस्य मुखप्रसादमुपलभ्य तद्धेतुभूतहर्षे (कारणं)-गवेषमाणेन हर्षस्य च कारणान्तरमनुपलभ्य पुत्रजन्मज्ञानमेव तत्कारणमित्यवगच्छता तस्य च कारणं गवेषमाणेन पुत्रजन्मवार्ताहारशब्देनैव वदन्तीति जन्मान्तरानुभवजनितादृष्टोद्बुद्धेन संस्कारेणैव पुत्रस्ते जात इति वाक्यमेव कारणमिति कल्पयताऽसमर्थस्य जनकत्वानुपपत्तेः सामर्थ्याख्या शक्तिरवधार्यते। तथा च सिद्धार्थानामपि बोधकत्वादुपपन्नं वेदान्तानां विधिनिरपेक्षाणां ब्रह्मणि प्रामाण्यम्। किञ्च निषेधवाक्यानां 'ब्राह्मणो न हन्तव्य' इत्येवंमादीन्न कार्य्यनिष्ठत्वं, हननाभावस्य कृत्यसाध्यत्वेन कार्य्यतावच्छेदकत्वानुपपत्त्या हननविरोधिसङ्कल्पपरत्वस्य 'नेच्छेतेत्यस्य'? तस्य व्रतमित्यादिवत्कल्पकस्याभावेन नियोगानुपपत्तेः। अतो बलवदनिष्टाननुबन्धीष्टसाधनत्वस्य विध्यर्थस्याभाव एव नावबोध्यते। तत्र चेष्टसाधनत्ववति विशिष्टनिषेधो विशेषणाभावमादायैव पर्य्यवस्यतीति वक्तव्यत्वेन कार्य्यनिष्ठत्वेन प्रामाण्यस्य वक्तुमशक्यतया सिद्धार्थबोधकत्वं स्वीकार्य्यम्। तथैव वेदान्तवाक्यानामस्तु किं विधिनेति, तस्मात्सिद्धं वेदान्तानां विधिनैरपेक्ष्येण प्रामाण्यम्।

ईक्षत्यधिकरणम्

ईक्षतेर्नाशब्दम् ॥ ५ ॥

सर्वज्ञं सर्वशक्तिजगदुत्पत्तिस्थितिलयकारणं ब्रह्म, तत्रैव च विधिनैरपेक्ष्येण प्रामाण्यं व्यवस्थापितं पूर्वत्र ग्रन्थे। तदिहाक्षिप्य समाधीयते। 'सदेव सौम्येदमग्र आसीत्' (छा० उ० ६।२।१) इत्यादिसन्दर्भोऽनुमानसिद्ध प्रधानानुवादक उत ब्रह्मपर इति।

तत्र पूर्वः पक्ष :—

सदेवेत्यादिसन्दर्भः प्रधानस्यानुवादकः।
सत्त्वादिगुणरूपत्वात्प्रकृतित्वस्य सम्भवात्॥

१, इत परं क० पुस्तकन्नोपलब्धम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सार्वज्ञ्याद्युपपत्तेश्च गौणत्वादीक्षणस्य च ।
अनुमानप्रसिद्धत्वाद्ब्रह्मणो नैव बोधकः ॥
अप्रसिद्धत्वतस्तस्य सङ्गत्यग्रहणात्तथा ।
एकत्वाज्ज्ञानरूपत्वात्प्रकृतित्वान्न युज्यते ॥
नापि सर्वज्ञता तस्मात्प्रधानस्यैव बोधकः ।
जगज्जन्मादिहेतुत्वमतो न ब्रह्मलक्षणम् ॥

'सदेव सौम्य' (छा० ६।२।१) इत्यादिपदसन्द[1]र्भस्तावज्जगत्स्वसजातीयप्रकृतिकं कार्य्यत्वादित्यनुमानसिद्धः प्रधानस्यानुवादकस्तस्यैव जगत्कारणत्वोपपत्तेः। न तु ब्रह्म प्रतिपादयति, तस्यैकत्वेन 'सदेव सौम्य' (छा० ६।२।१) इत्यादिवाक्यप्रतिपाद्यजगदुपादानत्वस्यानुपपत्तेः, प्रधानस्य तु सत्त्वरजस्तमोगुणरूपत्वेनानेकात्मकत्वेनोपादानत्वं सम्भवति। सार्वज्ञ्यमपि तस्य सम्भवति, सत्त्ववृत्तिविशेषस्यैव ज्ञानपदप्रतिपाद्यत्वेन सत्त्वस्य च[2] निरतिशयोत्कर्षे सार्वज्ञ्यप्रसिध्या च सर्वज्ञानजननानुकूलशक्तिमत्त्वरूपसार्वज्ञ्यस्य प्रधान उपपादयितु[3]मशक्यत्वात्सर्वविषयकाज्ञानजनकत्वरूपं सर्गप्राक्काल ईश्वरेऽपि न सम्भवति। तदानीं शरीराभावेन ज्ञानजननानुपत्तेः, ब्रह्मणो ज्ञानरूपत्वेन[4] सर्वविषयकज्ञानाश्रयत्वरूपसार्वज्ञ्यानुपपत्तेश्च। तदैक्षतेतीक्षणमुच्यमानं 'तत्तेज ऐक्षत ता आप ऐक्षन्त' (छा० ६।२।३) इति गौणेक्षणप्रायपाठादीक्षणवान्पुरुषो यथा कार्यं करोति एवं प्रधानमपीति गौणमेव। ब्रह्मपक्षे ब्रह्मणो मानान्तरायोग्यत्वेन[5] तन्त्रसङ्गतिग्रहणानुपपत्त्या वेदान्तानां तद्बोधकत्वानुपपत्तेश्च। तस्मादनुमानसिद्धप्रधानानुवादकत्वमेव 'सदेव' इत्यादिसन्दर्भः स्यात्। तसमाज्जगज्जन्मादिकारणत्वं ब्रह्मलक्षणमसम्भवातिव्याप्तिग्रस्तत्वादनुपपन्नमिति। अत्राभिधीयते—

सांख्यस्मृतिप्रसिद्धस्य प्रधानस्य न युज्यते ।
प्रकृतित्वं यतस्तत्र ज्ञानं सर्वत्र गद्यते (गम्यते) ॥
[6]सर्वत ऐक्षतेत्यादिश्रुतिवाक्यशतेन हि ।
संशये प्रायः पा (ठा ?) ताद्धि निर्णयो[7] न तु निश्चयः ॥

एतावत् पर्यन्तं 'ख' मातृका विच्छिन्ना

१. गूढार्थस्य प्रकाशश्च सारोक्तिः श्रेष्ठता तथा ।
नानार्थवत्त्वं वेद्यत्वं 'सन्दर्भः' कथ्यते बुधैः ॥
(तत्त्व सं० वैद्याभूषण्याम् पृ० ५)

२. क० मा० 'च' इति पाठो नास्ति ।

३. क० मा० 'तुं श' इति पाठः ।

४. क० मा० 'स्वरूप' इति पाठः ।

५. इतरेतरासम्बद्धस्यार्थसमूहस्योपदेशशास्त्रं तन्त्रम् (वात्स्या. भा. १।१।२६)
तन्त्रशब्दस्यानेकार्थत्वान्नियामकप्रमाणशास्त्रवाचकत्वं लभ्यते ।

६. क० मा० 'सर्वज्ञः' इति पाठः ।

७. विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः (न्या. सू. १।१।४१)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मुख्यार्थसम्भवेनेह विशयो[1] नोपपद्यते ।
ब्रह्मणो वृत्तिरूपस्य ज्ञानस्योत्पत्तिसम्भवात् ॥
उपाधिना प्रभिन्नस्य ज्ञानस्याप्याश्रयत्वतः ।
ईक्षितृत्वस्य मुख्यस्य सार्वज्ञ्यस्यापि सम्भवात् ॥
सदेवेत्यादिसन्दर्भो ब्रह्मणोऽतः प्रबोधकः ।
एकत्वाद्ब्रह्मणो नैवं जगत्प्रकृतिता भवेत् ॥
इत्यवादि त्वया यच्च तन्न शोभावहं[2] कुतः ।
विवर्तवाद एवाग्रे यतः स्थाप्यो न चात्र हि ॥
सङ्गतिग्रहणाभावो यतो यूपादिवद्भवेत् ।
सङ्गतिग्रहणं[3] तस्माद्युक्तमुक्तन्तु लक्षणम् ॥

१. घ० मा० 'विषयः' इति पाठः ।

२. क-घ० म० 'व' इति पाठः ।

३. सङ्गतित्वन्नाम अनन्तराभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयत्वम्' तथा हि भारतीतीर्थ :—

ऊहित्वा संङ्गतीस्तिस्रस्तथावान्तरसङ्गतीः ।
ऊहेदाक्षेपदृष्टान्तप्रत्युदाहरणादिकाः ॥९॥

शास्त्रादिप्रतिपाद्यार्थसम्बन्धितयाऽधिकरणे योजिते सति तस्याधिकरणस्य सङ्गतय ऊहिता भवन्ति । तद्यथा— ईक्षत्यधिकरणे 'तदैक्षत' इति वाक्यं प्रधानपरं ब्रह्मपरं वा इति विचार्यते । तस्य विचारस्य ब्रह्मसम्बन्धित्वाद्ब्रह्मविचारशास्त्रसङ्गतिः । 'वाक्यं ब्रह्मणि तात्पर्यवत्' इति निर्णयात्समन्वयाध्यायसङ्गतिः । ईक्षणस्य चेतने ब्रह्मण्यसाधारणत्वेन स्पस्टब्रह्मलिङ्गत्वात्प्रथमपादसङ्गतिः । एवं सर्वेष्वप्यधिकरणेषु यथायथं सङ्गतित्रयमूहनीयम् । अवान्तरसङ्गतिस्त्वनेकधा भिद्यते आक्षेपसङ्गतिर्दृष्टान्तसङ्गतिः, प्रत्युदाहरणसङ्गतिः, प्रासङ्गिकसङ्गतिरित्येवमादिः । सेयमवान्तरसङ्गतिर्व्युत्पन्नेनोहितुं शक्यते । अतस्तां व्युत्पादयति

पूर्वन्यायस्य सिद्धान्तयुक्तिं वीक्ष्य परे नये ।
पूर्वपक्षस्य युक्तिञ्च तत्राक्षेपादि योजयेत् ॥१०॥

तद्यथा प्रथमाधिकरणे 'ब्रह्मविचारशास्त्रमारम्भणीयम्' इति सिद्धान्तः । तत्र युक्तिः 'ब्रह्मणः संदिग्धत्वात्' इति । द्वितीयाधिकरणस्य 'जगज्जन्मादिर्ब्रह्मलक्षणन्न भवति' इति पूर्वपक्षः । तत्र युक्तिः 'जन्मादेर्जगन्निष्ठत्वात् इति । तदुभयमवलोक्य तयोराक्षेपसङ्गतिं योजयेत् । 'संदिग्धत्वाद् ब्रह्म विचार्यम्' इत्येतदयुक्तम् । जन्मादेरन्यनिष्ठत्वेन ब्रह्मणो लक्षणाभावे सति ब्रह्मैव नास्ति कुतस्तस्य संदिग्धत्वं विचार्यत्वञ्चेत्याक्षेपसङ्गतिः । दृष्टान्तप्रत्युदाहरणसङ्गती चात्र योजयितुं शक्यते । यथा संदिग्धत्वेन हेतुना ब्रह्मणो विचार्यत्वम्' तथा जन्माद्यन्यनिष्ठत्वेन हेतुना ब्रह्मणो लक्षणं नास्तीति दृष्टान्तसङ्गतिः । यथा विचार्यत्वे हेतुरस्ति, न तथा लक्षणसद्भावे हेतुं पश्यामः' इति प्रत्युदाहरणसङ्गतिः । प्रासङ्गिकसङ्गतिस्तु देवताधिकरणे यागाधिकारविचाररूपत्वात्समन्वयाध्याये ज्ञेयब्रह्मवाक्यविषये तृतीयपादे च सङ्गत्यभावेऽपि बुद्धिस्थावान्तरसङ्गतिरस्ति । तथा हि पूर्वाधिकरणे 'अङ्गुष्ठमात्रवाक्यस्य ब्रह्मपरत्वादङ्गुष्ठमात्रत्वं ब्रह्मणो मनुष्यहृदयापेक्षम्' मनुष्याधिकारत्वाच्छास्त्रस्य इत्युक्तम् । तत्प्रसङ्गेन देवताधिकारो बुद्धिस्थः । सेयं प्रासङ्गिकसङ्गतिस्तदेव न्यायसङ्गतिर्निरूपिता । (वै. सि. न्या. पृ० ५)

एवं सङ्गतित्रितयानन्तरं पूर्वोत्तराधिकरणयोः परस्परमवान्तरसङ्गतय अनेकरूपा भवन्ति । यथा आक्षेपसङ्गतिः, दृष्टान्तसङ्गतिः, प्रत्युदाहरणसङ्गतिः, प्रासङ्गिकसङ्गतिः, उपोद्घातसङ्गतिः, अपवादसङ्गतिश्चेति' (जै. न्या. पृ० १०)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'सदेव' इत्यादिपदसन्दर्भो ब्रह्मणो बोधकः न तु[१] प्रधानस्य 'सदेव सौम्ये'त्यादिवाक्यसन्दर्भे कारणे क्वचिदैक्षतेतीक्षणं प्रतिपाद्यते, क्वचिद्यस्सर्वज्ञस्सर्वविदिति सार्वज्ञ्यम्। न चेदं प्रधानेऽचेतन उपपद्यते, न च तेज आदीक्षणप्रायपाठेन सदीक्षणमपि गौणमित्युक्तमिति वाच्यं, सन्देहे हि प्रायपाठो नियामकः, न चात्र सन्देहस्समस्ति, मुख्यार्थग्रहणस्यौत्सर्गिकत्वेन निर्णीतत्वेन गौणोऽर्थो वा ग्राह्यो मुख्यार्थं वेति विषयाभावात्।[२]

न च भवतां मते ऽपोक्षणकर्तृत्वं बाधितमेव ब्रह्मणश्चेतनत्वेऽपि नित्यज्ञानरूपत्वेन ज्ञानकर्तृत्वानुपपत्तेर्भेदाभावेनाश्रयत्वानुपत्तेश्च। अतः प्रकृतिप्रत्यययोरन्यतरस्य गौणत्वे कल्पनीये कस्य गौणत्वमिति विषये[३] प्रायपाठात्[४] प्रकृते गौणत्वं स्वीक्रियत इति वाच्यम्। ईक्षत्यादिधातूनां हि न केवलचिन्मात्रमर्थः, किन्तु वृत्याद्युपहितचित्तञ्च[५], वृत्तेर्जन्यत्वेन तद्विशिष्टस्यापि जन्यत्वोपपत्त्या कर्तृत्वस्य ब्रह्मण्युपपत्तेः शुद्धविशिष्टयोस्तादात्म्याभ्युपगमेनाश्रयत्वस्याप्युपपत्तेश्च। तथा चेक्षणं[६] (मुख्यमेव) ब्रह्मणि प्रत्ययार्थोऽपि मुख्य एवेति विषयाभावात्प्राय[७] पाठो[८] न नियामकः। अत एव ब्रह्मणः सार्वज्ञ्यमुपपन्नं प्रधानस्य तु सत्वांशेन वृत्तिपरिणामत्वेऽपि[९] चैतन्याभावेन सार्वज्ञ्यानुपपत्तिः। न च ब्रह्मणः शरीराभावेन ज्ञानाद्यनुत्पत्तिः शंक्या, ऐश्वर्यस्य सृष्ट्यनुकूलज्ञानस्य प्राण्यदृष्टमात्रापेक्ष्यस्य शरीरानपेक्षणात्। न चैकस्य निरवयवस्य ब्रह्मणः कथमुपादानत्वमिति वाच्यं, विवर्तवादस्य[१०] व्यवस्थापयिष्यमाणत्वात्। अप्रसिद्धस्यापि ब्रह्मणो यूपाहवनीयादेरिव पदशक्यत्वग्रहसम्भवान्न प्रतिपादनानुपपत्तिः। तस्मादुपपन्नं ब्रह्मणो जगज्जन्मादिकारणत्वं लक्षणम्।

किञ्च यदीह प्रकरणे प्रधानमेव प्रतिपाद्येत, तदा सच्छब्दवाच्यस्य 'अनेन जीवेनात्मनानुप्रविश्य' (छा० ६।३।२) इति श्रुतिर्जीवात्मत्वेन[११] प्रतिपादनन्न स्यात्। न ह्यचेतनस्य प्रधानस्य चेतनजीवात्मत्वमुपपद्यते, तथा 'तत्त्वमसि' (छा० ६।१३।३) इति जीवात्मानं तच्छब्दप्रतिपाद्यसदात्मत्वेन ग्राहयच्छास्त्रं पीड्येत। न च

---

१. क—घ—मातृ 'न' इति पाठः।
२. क० मा० 'विशयः' इति पाठः।
३. घ० मा० 'विषयः' इति पाठः।
४. घ० मा० 'यागात्' इति पाठः।
५. घ० मा० 'चित्ततश्च' इति पाठः।
६. घ० मा० 'ईक्षणम्' इति पाठः।
७. घ० मा० 'विषयः' इति पाठः।
८. घ० मा० 'यागेव' इति पाठः।
९. क० मा० 'पारिणामित्वे' इति पाठः।
१०. अधिष्ठानविपरीतरूपेण वर्तत इति विवर्तः। वस्तुतस्सच्चिदानन्दस्वरूपब्रह्माधिष्ठानाद्विपरीतमसज्जडदुःखरूपत्वाद्ब्रह्मणो विवर्तं जगदिति। अतात्विकोऽन्यथाभावो विवर्त्तः इत्यपि विवरीतुं शक्यते। तथाहि शुक्तिशकले यद्रजतन्नयनगोचरीभूतम्, अथवा सङ्गरे निर्लुठितरज्जौ सर्पभानं विवर्तः। तद्वदेव जीवो नयनपथमवतरति। सकलप्रपञ्चजातं ब्रह्मणो विवर्त एव, न तु परिणामः, शुक्तिकायां परिदृश्यमानकलधौतज्ञानापगमे शुक्तिशकलमेवावतिष्ठते, तथा चानाद्यविद्यायाः तत्कार्यस्य च बाधे प्रपञ्चबाधः। तस्माज्जगदिदं ब्रह्मणो विवर्त्तभूतमिति वेदान्तविदः।
११. क० मा० श्रुतौ इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्रोभयत्राप्यात्मत्वं [1]प्रधानोपकार्यत्वाज्जीवोप[2]कारकत्वाद्वा[3] गौणं 'ममात्मा भद्रसेन' इतिवदिति वाच्यम्, एवमपि आचार्यवान्पुरुषो वेद तस्य तावदेव चिरम्' (छा० ६।१४।२) इत्यादिना मोक्षोपदेशो न स्यात् । नहि प्रधानज्ञानान्मोक्ष उपपद्यते, आत्मज्ञानन्तु मोक्षसाधनमिति सर्वश्रुतिप्रसिद्धम् ।

न च 'स्थूलारुन्धती'[4] न्यायेन प्रधानव्युत्पादनमिहेति वाच्यम्, तथात्वे मुख्यारुन्धतीव्युत्पादनायेतरेषां नक्षत्राणां त्यागवदिहापि प्रधानस्य त्यागोक्त्यापत्तेः 'उत्तमादेश प्राक्ष्यो येनाश्रुतं श्रुतं भवति' (छा० ६।१।३) इति 'एकविज्ञानेन सर्वविज्ञानं' प्रतिज्ञापूर्वकं यद्व्युत्पादितं तदनुपपत्तेश्च । नहि प्रधाने ज्ञाते जीवा ज्ञाता भवन्ति । अतद्विकारत्वाज्जीवानां, ब्रह्मणि तु ज्ञाते जीवानां प्रपञ्चस्य च ज्ञानमुपपद्यते, तदात्मकत्वाद्विकारत्वाच्च, किञ्च जीवस्य स्वापकालिकस्वपितिनाम निर्वचनं प्रस्तुत्य 'सता सौम्य तदा सम्पन्नो भवति स्वमपीतो भवति तस्मादेनं स्वपितीत्याचक्ष्यते;[5] 'स्वं ह्यपीतो भवति' (छा० ६।८।१) इति श्रुतम् । तत्र 'सता सौम्य' इति वाक्यं (स्वस्मिन्नप्य) यो हि सत्सम्पत्तिरिति शक्यं वक्तुमन्यथा तद्वाक्यवैयर्थ्यापत्तेः । नहि प्रधाने जीवस्य सम्पत्तिरुपपद्यते, ब्रह्मणि तु स्वाभिन्नत्वाद्विकारान्प्रति तूपादानत्वाच्च । अथ यत्पुनरुच्यते । अतः सच्छब्दवाच्यं ब्रह्मैव, सर्वेषां वेदान्तानामैकरूप्येण चेतनं प्रति[6] कारणत्वप्रतिपादकत्वावगमात् । श्वेताश्वतराणां मन्त्रोपनिषदि 'ज्ञः कालकालो गुणी सर्वविद्य' (श्वे० उ० ६।२) इति सर्वज्ञं प्रस्तुत्य 'सकारणं कारणाधिपाधिप' (श्वे० उ० ६।९) इति स्वशब्देनैव सर्वज्ञस्य जगत्कारणत्वप्रतिपादनाच्चेह चेतनमेव ब्रह्मसच्छब्दप्रतिपाद्यमिति सिद्धम् ।

आनन्दमयाधिकरणम्

आनन्दमयोऽभ्यासात् ।। ६ ।।

पूर्वाधिकरणे गुणसूत्रावगतगतिसामान्यस्य व्युत्पादनाय सगुणे श्रूयमाणेऽपि क्वचिद्गुणा विवक्षिताः क्वचिन्नेति प्रतिपादनाय ब्रह्मणो निष्प्रपञ्चत्वे [7]प्राक्व्युत्पादिते प्रपञ्चस्य[8] सत्यत्वप्रतिपादकसांख्यादिस्मृतिन्यायादिविरोधपरिहाराय सप्रपञ्चनिष्प्रपञ्चश्रुत्योर्विरोधे सप्रपञ्चश्रुतीनामाविद्यकविषयत्वम्,[9] अन्यासान्तु पारमार्थिकत्वमिति प्रतिपादनाय साधनफलाद्व्युत्पादनाय च परःसन्दर्भः प्रवर्तते । अत्र भाष्यकारेण प्रथमं वृत्तिकारमतेनाधिकरणमारचय्य तद्विषयत्वात्स्वयं[10] प्रकारान्तरेणाधिकरणमारचितम् । तत्र वृत्तिकारमतमाश्रित्य प्रथममारभ्यते ।

---

१. क० मा० 'स्प' इति पाठः ।
२. क० मा० 'स्प' इति पाठः ।
३. क० मा० 'वा' इति पाठो नास्ति ।
४. यथारुन्धतीतारिकानिर्देशनायान्येषां स्थूलानां नक्षत्राणां निर्देशः, अनन्तरं स्थूलदृष्टिपथमवतरितनक्षत्रेषु मध्ये सूक्ष्मतमा तारिकारुन्धतीति
प्रतिबोधनीयो भवति, तद्वदत्रापि प्रापञ्चिकस्थूलपदार्थनिर्देशनपूर्वकं सूक्ष्मातिसूक्ष्मात्मतत्त्वसम्बोधनमेवारुन्धतीन्यायप्रयोगः ।
५. घ० मा० 'स्वपीतो' इति पाठः ।
६. ख० मा० 'प्रति' इति पाठो नास्ति ।
७. क० मा० 'प्राक्' इषः पाठो नास्ति ।
८. ख० मा० 'प्रपञ्चस्य' इति पाठः ।
९. क० मा० 'कत्वम्' इति पाठः ।
१०. ख० मा० 'दूषयित्वा' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तैत्तिरीयशाखायामन्नरसमयं प्राणमयमनोमयं विज्ञानमयञ्च प्रस्तुत्य 'तस्माद्वा एतस्माद्विज्ञानमयादन्योऽन्यतरात्मानन्दमय' (तै० उ० २।५) इति श्रूयते। तत्रानन्दमयशब्दो जीवस्य प्रतिपादक उत ब्रह्मण इति संशये तत्र पूर्वपक्षः—

आनन्दमयशब्दोऽयञ्जीवस्यैवाभिधायकः ।
विकारप्रायः पाठेन विषयोऽत्र विद्यते ॥
प्राचुर्ये च विकारे च मयटस्तुल्यवत्स्मृतेः[1] ।
न च सर्वान्तरत्वेन लिङ्गेन ब्रह्मनिर्णयः ॥
शक्योऽत्र जीवलिङ्गस्य प्रियादेरुपलम्भनात् ।
सर्वान्तरत्वश्रवणाच्छारीरत्वश्रुतेरपि[2] ॥
आनन्दमयशब्दार्थो जीव एवेति निर्णयः ।
अतो जीव उपास्योऽत्र प्रियादिगुणयोगतः ॥

अत्रानन्दमयशब्दो जीवस्य बोधकोऽन्नरसमयादिविकारार्थमयडन्तप्रायपाठात्। अत्र च विकारार्थेऽपि मयट् स्मर्यते 'मयड्वैतयो' (अ० ४।१।१४२) इत्यादिना। ननु 'मयड्वैतयोर्भाषायामभक्षाच्छादनयो'[3] (अ० ४।३।१४३) इति सूत्रेण भाषायामेव मयट् विहितो नतु छन्दसि, अतः कथमन्नरसादिशब्देभ्यो विकारार्थे मयट्, न च 'द्व्यचश्छन्दसि' (अ० ४।४।१५०) इति सूत्रेण मयडिति वाच्यम्, प्राणमनश्शब्दाभ्याम्मयटः सिद्धावप्यन्नरसविज्ञानानन्दशब्देभ्यो मयटोऽनुपपत्तेः तेषां[4] द्व्यच्कत्वाभावात्। अतो विकारार्थत्वमानन्दमयादिशब्दानाम[5]नुपपन्नमिति चेन्न, भाषाग्रहणस्य प्रयोजनाभावेन 'मयड्वैतयोरभक्षाच्छादनयोः' (अ० ४।३।१४३) इत्येतावत एव सूत्रस्याङ्गीकारेण छन्दस्यपि मयटोऽङ्गीकारे बाधकाभावात्। भाषाग्रहणस्य हि खदिरस्य 'विकारः खादिरम्, इत्यादौ मयडभावः प्रयोजनमिति वक्तव्यम्, तच्च न सम्भवति। मयटो वैकल्पिकत्वेन मयडभावपक्षे खादिरमिति रूपस्य सिद्धत्वेन छन्दसि सर्वेषां विकल्पानां व्यवस्थितविकल्पत्वेन च भाषाग्रहणस्याकर्तव्यत्वात्। एवञ्च शरमयमित्यादिसिध्यर्थं 'द्व्यचश्छन्दसि' (अ० ४।४।१५०) इति सूत्रमपि न कर्तव्यमिति लाघवमतोऽन्नरसादिशब्देभ्यो विकारार्थे मयट्सिद्धिः।

अथवा 'नित्यं वृद्धशरादिभ्य' (अ० ४।३।१४४) इति सूत्रे नित्यग्रहणं भाषायान्नित्यं मयटम्बोधयद्व्यर्थं सद्योगविभागेनान्यतोऽपि मयड्विधानार्थम्, अन्यथारम्भसामर्थ्यादेव नित्यत्वे सिद्धे नित्यग्रहणवैयर्थ्यात्। नच व्याकरणान्तरे 'नित्यमेकाच'[6] इत्येकाचाम्मयड्विधायकं वाङ्मयमित्यादिसिध्यर्थं[7] सूत्रान्तरं पठितं, तदेकदेशग्रहणेन

१. घ० मा० 'स जः' इति पाठः।
२. घ० मा० 'शरीरत्व' इति पाठः।
३. घ० मा० 'मच्छादनयोः इति पाठः।
४. घ० मातृ 'द्व्यक' इति पाठः।
५. क० मातृ 'मु' इति पाठः।
६. घ० मातृ 'प्रयोजन' इति पाठः।
७. घ० मातृ 'नित्यमे' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्मर्यंत (स्मार्यंत) इति वाच्यम्, तथात्वे शरादिषु मृच्छब्दपाठवैयर्थ्यापत्तेः। अतस्तत्रत्य मृत्पदमेव सर्वेषामुपलक्षणं भविष्यतीति विकारार्थे मयट्सिद्धिः।

अथवा 'तत आगत' (अ० ४।३।७४) इत्यधिकारे 'हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः' (अ० ४।३।८१) मयड् वेति सूत्रेणान्नरसादागत इत्यर्थे विकारेऽपि-आगतत्वोपचारेण[1] विकारे मयटः सम्भवात्। एवं 'तत्प्रकृतवचने मयड्' (अ० ५।४।२१) इति सूत्रेण प्राचुर्येऽपि मयटः स्वीकारात्। प्राचुर्यं वा ग्राह्यं विकारो वेति विशये विकारार्थ-प्रायपाठेन विकारार्थत्वस्यैव स्वीकर्तव्यत्वात्। ननु 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै० उ० १।१) 'यो निहितं गुहायाम्' (तै० उ० १।१) इति सर्वान्तरत्वं[2] यद्ब्रह्मण्युक्तं तदानन्दमय एव पर्यवसितमतो ब्रह्मत्वमानन्दमयस्य विनियोजकस्यापि लिङ्गस्य तादृशात्प्रायपाठरूपात्सन्निधेस्तुल्यन्यायतया[3] प्राबल्यादिति चेन्न, लिङ्गान्तरस्य विद्यमानत्वात्, 'तस्य प्रियमेव शिरो मोदो दक्षिण पक्षः प्रमोद उत्तरः पक्षः' (तै० उ० ५।५) इत्यादिश्रुतिवाक्येन जीवधर्माणां प्रियादीनां प्रतिपादनात्। 'तस्यैष एव शारीर आत्मा यः पूर्वस्य (तै० उ० ३।३) इति वाक्येन शारीरत्वप्रतिपादनेन च जीवत्वावगमात्। सर्वान्तरत्वस्याश्रवणेन ब्रह्मलिङ्गानुपपत्तेश्च। अत आनन्दमयशब्दो जीवप्रतिपादकस्तस्य[4] प्रियादिधर्मे-उपासनमिह विवक्षितमिति। सिद्धान्तस्तु—

आनन्दमयशब्दोऽयं ब्रह्मणः प्रतिपादकः।
'रस' इत्यादि वाक्यानि ह्यानन्दाभ्यासपूर्वकम्॥
आनन्दमयशब्दार्थे स्त्र (ष्दृ) ष्टतां प्रवदन्त्यतः।
परब्रह्मत्वमेवास्य, स्वीकार्यन्न तु जीवता॥
प्रायः पाठेन मयटो विकारार्थोऽपि नेष्यते।
किन्तु प्राचुर्यमेवार्थस्तत्र दोषो न कश्चन॥
सत्यमित्यादिवाक्येन सर्वान्तर्यं यदीरितम्।
ब्रह्मणस्तद्धि (वि) श्रान्तमानन्दमयशब्दिते॥
एतस्य पूर्वं (व) न्नेह ह्यन्तरात्मात्र भाव्यते।
प्रियमोदादिधर्माश्च ह्युपासार्थमिहेरिता॥
मनोमयत्वादिरिव शारीरत्वं हि तादृशम्।
ब्रह्मोपासनमेवातो वाक्येन प्रतिपाद्यते॥

आनन्दमयशब्दो हि परं ब्रह्म प्रतिपादयति[5] 'रसो वै स' (तै० उ० ३।९) इतिवच्छब्देनानन्दमयमनुसृत्य 'रसं ह्येवायं लब्ध्वानन्दीभवति यदेष आकाश आनन्दो न स्यात् (तै० उ० ३।९) इति तस्यैवानन्दरूपत्वं प्रतिपाद्य सर्वानन्दस्रष्टृत्वरूपं कर्मफलप्रदातृत्वं प्रतिपादयति। न च परमेश्वरादन्यस्य तदुपपद्यते, तथानन्दमयमेव प्रस्तुत्य,

१. उपचारो लक्षणा
२. घ० मा० 'ब्रह्य मुक्त' इति पाठः।
३. घ० मा० ,तुल्य व्रतयतया' इति पाठः।
४. क० मा० 'च' इति पाठः।
५. घ० मा० 'व्रवति' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[1]'सोऽकामयत बहुस्यां प्रजाये'; (तै० उ० ३।६) इति तच्छब्देन तमेवानन्दमयं परामृश्य जगत्स्रष्टृताप्रतिपादनात्। जगत्स्रष्टृत्वस्य[2] ब्रह्मान्यस्मिन्नसम्भवादन्यथासिद्धब्रह्मलिङ्गानुसारेणानन्दमयस्य[3] ब्रह्मत्वनिर्णयः। अत एव विकारार्थत्वं मयटः परित्यज्य प्राचुर्यार्थत्वमपि मयटः स्वीक्रियते, अन्यथा ब्रह्मलिङ्गानुपपत्तेः। न च प्राचुर्येऽपि मयटः स्वीकारे प्राचुर्यस्याधिक्यविशेषरूपस्य निरूपकाकांक्षायां स्वाश्रयसमानाधिकरणविजातीयस्यैव निरूपकत्वेन दुःखापेक्षया सुखमधिकमिति प्रतीतेर्दुःखाल्पत्वमपि-अर्थात्प्रतीयत इति नेश्वरत्वं युक्तमिति वाच्यम्। एतयोर्ग्रामयोरयं ब्राह्मणः प्रचुर इत्युक्ते ग्रामान्तरे ब्राह्मणाल्पत्वस्यापि प्रतीयमानत्वेन प्राचुर्याश्रयब्राह्मणाधिकरणीभूतग्रामादन्यस्मिन्विद्यमानब्राह्मणापेक्षयाधिक्यस्यापि प्रतीतेः। तथाच स्वाश्रयव्यधिकरणसजातीयाल्पत्वमादाय प्राचुर्यस्य पर्यवसानसम्भवे 'सैषानन्दस्य मीमांसा भवति' (तै० उ० २-८) इति व्युत्पादितस्य जीवानन्दमपेक्ष्य ब्रह्मानन्दस्य प्राचुर्यस्य मयटा बोधनसम्भवेन दुःखप्रसक्तेरभावात्। जगत्कारणत्वानुसारेणेश्वरत्वसिद्धौ प्राचुर्यस्यैवमेव नेतव्यत्वात्।

किञ्च 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै० उ० १) 'यो वेद निहितं गुहायां परमे व्योमन्' (तै० उ० १।१) इति मन्त्रेण 'ब्रह्मविदाप्नोति परम्' (तै० उ० १।१) इत्युपक्रान्तस्य ब्रह्मणस्सर्वान्तरत्वमुपक्षिप्य 'तदेव सर्वान्तरत्वमन्योन्यत्तर आत्मा' इति व्युत्पादनपूर्वकमानन्दमये व्युत्पादयति। अस्य चान्योन्यत्तर आत्मेत्यनुक्तेरयमेव सर्वान्तर इत्यवगमेनानन्दमयस्य ब्रह्मत्वं निश्चीयते। तस्मिंश्च विज्ञानमयकोशधर्मणां प्रियादीनामुपासनार्थं[4] कीर्तनं मनोमयत्वादीनां शाण्डिल्यविद्यायां ब्रह्मणि कीर्तनमिवेत्यनवद्यम्। शारीरत्वमपि तस्मिन्सर्वान्तर्यामित्वेन नियम्यशरीरवत्वेनोपपादनीयम्।[5] यदा[6] ब्रह्मैवेत्यादिना मोक्षव्युत्पादनं क्रममुक्ताभिप्रायेणेति सिद्धमानन्दमयस्य ब्रह्मत्वम्।

वृत्तिकारमताधिकरणं[7] यद्भाष्यकृता दर्शितं तदुच्यते। आनन्दमयो जीव एवेति स्वीकार्यम्, अन्नमयादिविकारार्थमयडन्तप्रायपाठेनानन्दमयशब्दस्यापि विकारार्थत्वस्यैव न्याय्यत्वात्। ननु जगत्कारणत्वलिङ्गेन प्रायपाठस्य सन्निधिरूपस्य बो (बा)धनमेव न्याय्यं, लिङ्गापेक्षया सन्निधेदुर्बलत्वात्। न चानन्दमस्य जगत्कारणत्वप्रतिपादकशब्दाभावः, 'सोऽकामयत बहु स्याम्' (तै० उ० २।६) इति वाक्यस्य सर्वनाम्नानन्दमयपरामर्शपूर्वकञ्जगत्कारणत्वप्रतिपादनेन प्रमाणत्वसम्भवात्। न च तत्रत्यस्तच्छब्दो नानन्दमयपरामर्शकः, व्यवहितत्वात्, अपि तु 'ब्रह्मपुच्छं प्रतिष्ठा' (तै० उ० २।५) इति वाक्योपात्तब्रह्मपरामर्शकस्सन्निहितत्वादिति वाच्यम्, तस्य नपुंसकलिङ्गशब्दनिर्दिष्टत्वेन पुल्लिङ्गतच्छब्दपरामर्शनीयत्वानुपपत्तेः।

न च 'तस्यैष एव शारीर आत्मा यः पूर्वस्य, इति वाक्ये-आत्मशब्देन पुल्लिङ्गेन ब्रह्मणो निर्दिष्टत्वात् 'सोऽकामयत' (तै० उ० २।६) इत्यनेन परामर्श उपपद्यत इति वाच्यम्, तस्यापि वाक्यस्यानन्दमयपरत्वात्। पूर्वस्य 'विज्ञानमयस्यैष एव शारीर आत्मा य आनन्दमय' इति तद्वाक्यार्थः। न च 'तस्यानन्दमयस्यैष एव शारीर आत्मा यः पूर्वस्य विज्ञानयस्य' (तै० उ० २।३) इति स्पष्टार्थपरित्यागे किम्वीजमिति वाच्यम्। प्राणमयपर्याये, 'तस्यैष एव शारीर आत्मा यः पूर्वस्य इति, पाठेनान्नमयकोशे[8] चापाठेन तत्रत्य वाक्यस्योक्तर्ज्वर्थासम्भवेन पूर्वस्यान्नरसमयस्य

१. घ० मा० 'स्वो' इति पाठः।
२. क० मा० 'च' इति पाठः।
३. कु० मा० 'अनन्यथा' इत्यधिक पाठः।
४. घ० मा० 'प्रिदीनाम्' इति पाठः।
५. ख० मा० 'वा' इति पाठः।
६. ख० मा० 'ह्येषेष' इति पाठः।
७. ख० मा० 'मतम्' इति पाठः।
८. क० मा० 'रस' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'एष एव शारीर आत्मा यः प्राणमयः' (तै० उ० २।३) इत्यर्थस्य स्वीकार्य्यत्वेनोत्तरपर्यायेष्वपि तथैवार्थस्य वर्णनीयत्वात् । अतः 'सोऽकामयत' (तै० उ० २।६) इति वाक्यस्यानन्दमयपरत्वेन स्रष्टृत्वं ब्रह्मलिङ्गमवगम्यते । सर्वान्तिराच्च लिङ्गादप्यानन्दमयो ब्रह्मैवेत्युक्तमिति चेन्न, 'सोऽकामयत' (तै० उ० २।६) इति वाक्यस्यानन्दमयपरत्वाभावात्तद्धि वाक्यं तस्य 'ह्येष एव शारीर आत्मेति' (तै० उ० २।६) वाक्योपात्तपरामर्शकम् । न च तद्वाक्यमानन्दमयस्योक्तयोजनया बोधकमिति वाच्यम् । तस्य पूर्वोक्ताक्लिष्टयोजनासम्भवे क्लिष्टयोजनाकल्पनस्यान्याय्यत्वात् । न चान्नरसमयपर्य्यायेऽनुक्तिरेव बाधिकेति वाच्यम्, [1]तत्राप्यन्नरसस्योक्तेस्तथा हि 'ब्रह्मविदाप्नोति परम्' (तै० उ० २।१) इत्युपक्रम्य 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै० उ० २।१) 'यो वेद निहितं गुहायां परमे व्योमन्सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चित' (तै० उ० २।१) इत्यनया ऋचा-उपक्रान्तब्रह्मस्वरूपं सत्यज्ञानत्वादिना, तद्वेदनञ्च जीवाभिन्नब्रह्मज्ञानत्वरूपेण, परावासिञ्च सर्वे सुखरूपब्रह्मभवनत्वरूपेण व्याख्याय ब्रह्मणो मन्त्रोक्तानन्तत्वव्युत्पादनाय जगत्सृष्टिः प्रस्तुता ।

आनन्त्यं हि त्रिविधपरिच्छेदशून्यत्वम् । तत्र वस्तुतः परिच्छेदराहित्यव्युत्पादनाय सृज्यमानप्रपञ्चस्य ब्रह्मव्यतिरेकेणाभावं बोधयितुं 'तस्माद्वा एतस्मात्' (तै० उ० २।५) इति पञ्चमोनिर्देशः कृतः । तदुपादानकयस्तत्तादात्म्यापन्नत्वात् 'स वा एष पुरुषोऽन्नरसमय' (तै० उ० २।१) इति ब्रह्मणोऽन्नरसमयत्वव्युत्पादनेन च ब्रह्म तस्यान्तरमुक्तं भवति । अतः प्राणमयपर्य्याये तस्य प्राणमयस्य 'एष एव शारीर आत्मा 'यः पूर्वस्यान्नरसमयस्य (तै० उ० २।३) इति योजनोपपन्ना । अतस्सर्वेषु पर्यायेषु सर्वजगत्कारणस्यान्तरस्योक्तेरानन्दमयपर्य्यायेऽपि तस्यैव सर्वान्तरत्वं 'तस्यैष एव शारीर आत्मा यः पूर्वस्य' (तै० उ० २।३) इति वाक्येन 'विज्ञानमयस्य य आत्मा स एवास्याप्यान्तर' इत्युक्तापुच्छीभूतं ब्रह्मैव सर्वान्तरमिति तस्यैव सर्वजगत्स्रष्टृत्वं सर्वान्तरत्वञ्चेति नानन्दमयशब्दस्य विकारप्रायः पाठलब्धविकारार्थपरित्यागे प्रमाणमस्ति

किञ्च गुहानिहितत्वमेव मन्त्रे प्रतिपादितन्न तु सर्वान्तरत्वमत एव पञ्चकोशावतरणं [2]कृतम् । अत एव 'परमे [3]व्योम्नि' (तै० उ० २।१) इति परमव्योमशब्दार्थे ब्रह्मणि निहितत्वं जीवस्योक्तं, तदेव च 'ब्रह्मपुच्छं प्रतिष्ठा' (तै० उ० २।५) इति वाक्ये व्युत्पाद्यत इति, मन्त्रब्राह्मणोरेकार्थताप्युपपन्ना भवति । मन्त्रे 'परमे व्योम्नि' शब्दश्च परमात्मा परः 'सैषा भार्गवी वारूणी विद्या परमव्योमन् प्रतिष्ठिता' (तै० उ० ६।६) इति भृगुवल्यां परमव्योमशब्दस्य ब्रह्मपरत्वदर्शनात् । तस्माद्विकारार्थकमयडन्तानन्दमयशब्दो जीवपरो न ब्रह्मपर इति । यदि च विज्ञानमयशब्दस्य न विकारार्थत्वं 'मयड्वैतयोः' (अ० ४।३।१४३) इति सूत्रे भाषाग्रहणस्य स्पष्टत्वेन तत्प्रत्याख्यानस्य वृत्तिकारप्रभृतिभिः कैश्चिदपि प्राचीनैरकृतत्वेन तेन सूत्रेण मयटो दुर्लभत्वात् । योगविभागाश्रयणस्यागतिकगतित्वाद्विकारे-आगतत्वोपचारस्य क्लिष्टत्वाच्च विज्ञानमयशब्दात्प्रचुरतायामेव मयड्स्वीक्रियते, तथा च विकारप्रायः पाठः सिद्धः । ततश्चानन्दमयशब्दोऽपि प्राचुर्यार्थकमयडन्त एव । ततश्च पूर्वोक्तरीत्या दुःखाप्रसङ्गेनेश्वरत्वे न काचिदनुपपत्तिरिति विभाव्यते । [4]तदपि नानन्दमयस्य ब्रह्मताप्राचुर्यं हि स्वाश्रयव्यधिकरणसजातीयाल्पत्वमादायापि पर्यवस्यति स्वाश्रयसमानाधिकरणविजातीयाल्पत्वमादायापि । अत इह विष(श)ये सति विज्ञानमयशब्देऽवगम्यमानं प्राचुर्यंन्न, स्वाश्रयव्यधिकरणसजातीयाल्पत्वमादाय पर्यवस्यति ।

१. क० मा० 'प्यन्तर' इति पाठः ।
२. घ० मा० 'सङ्क' इति पाठः ।
३. ख० मा० 'परमे व्योमन्निति' इति पाठः ।
४. क० मा० 'तदापि' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नहि घटपटादीनां ब्रह्मणो वा जीवापेक्षया ज्ञानमल्पमिति सम्भवति, घटादीनाञ्जडत्वाद्ब्रह्मणश्च सर्वज्ञत्वात् । अपि तु स्वाश्रयसामानाधिकरणविजातीयाल्पत्वमादायैव, ज्ञानवृत्त्यपेक्षयेच्छादिवृत्तीनामल्पत्वात् । अतो विज्ञानमयप्रायः पाठे(ठो) न, विजातीयस्य दुःखाल्पत्वस्य प्रतीतेः । अतस्सर्वथाप्यानन्दमयो जीव एव, न च विज्ञानमयपर्याय एव जीवस्योक्तेः पुनरानन्दमयपर्य्याये जीवोक्तिर्व्यर्थेति वाच्यम्, तत्र विज्ञानोपाधिकस्य[1] जीवस्योक्तावपीहाज्ञानोपाधिकस्य जीवस्य व्युत्पादनात् । अत एव सौषुप्तजीवं प्रस्तुत्य माण्डूक्यश्रुतावपि 'आनन्दमयो ह्यानन्दभुग्' (मा० उ० ५) इत्यानन्दमयशब्देनाज्ञानोपाधिको जीवो निर्दिष्टः । अत एव विरजाहोममन्त्रेऽन्नमयप्राणमयमनोमयविज्ञानमयानन्दमया मे शुध्यन्ताम्,[2] ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहेत्यस्मिन्विज्ञानमयभेदेनानन्दमयो निर्दिष्टः । नहि तत्र वाक्ये-आनन्दमयशब्देनेश्वर उच्यत इति वक्तुं शक्यते । तत्राशुद्धेरप्रसङ्गेन शुध्यन्तामित्यनुपपत्तेः । किञ्च भृगुवल्युक्तान्नप्राणमनोविज्ञानानन्दानां प्रकृतित्वं प्रतीयत इति विज्ञानमयस्याधिदैविकविज्ञानविकारत्वमाध्यात्मिकस्य स्वीक्रियते । ततश्च विज्ञानमयपर्य्यायोऽन्तःकरणपर एव न जीवपरः । तस्मिन्कर्तृत्वादिकञ्च जीवस्यासङ्गत्वविवक्षया प्रक्षिप्तमिति न काप्यनुपपत्तिः । अत आनन्दमयो जीवो न तु ब्रह्म ।

किञ्च 'यतो वाचो निवर्तन्त' (तै० उ० २।६) इति श्रुत्या हि सर्वप्रपञ्चनिषेधेन निर्विशेष-ब्रह्मप्रतिपादनमत्र प्रकरणे क्रियत इति स्वीकार्य्यम् । न चानन्दमयस्य ब्रह्मण उपासनापक्षे तदुपपद्यते । तथात्वे शाण्डिल्यविद्याप्रकरणवत्स[1]विशेषपरमेव स्यान्न तु निर्विशेषपरम् । न च तथात्वमुदाहृतमन्त्रे 'सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चित' (तै० उ० २।१) इति वाक्येन कामभोगे ब्रह्मसाहित्यावगम्यमानं बाध्येत । नहि मुक्तिकाले ब्रह्मभिन्नतयावस्थानमुपपत्तिमदतः सविशेषपरमेवेति वाच्यम्, 'यतो वाच[3], इति वाक्यस्य द्विरभ्यासेन 'यदा ह्येष एतस्मिन्, इति वाक्येन च सर्वप्रपञ्चनिषेधेन निर्विशेषपरत्वेऽवगते सहेत्यस्य यौगपद्यार्थकत्वं ब्रह्मणेति तृतीयायाश्चेत्थंभूतार्थकत्वं तथा च ब्रह्मात्मकस्सर्वान्कामान्युगपत्समश्नुत इति वाक्यार्थः । अत एवाध्याप(कै)कानां सहेत्यत्र विच्छेद उपपद्यते । अत एव—

सोऽश्नुते सकलान्कामान्प्रक्रमेण सुरर्षभाः ।
विदितं ब्रह्मरूपेण जीवन्मुक्तौ न संशयः ।।

(ब्र० गी० ३।३२)

इति ब्रह्मगीतावचनमुपपद्यते । अतश्च निर्विशेषपरत्वादस्य पदसन्दर्भस्य न विशेषब्रह्मपरत्वोपपत्तिस्तस्मादानन्दमयो जीव इत्यन्ये च दोषा भाष्ये व्यक्ताः । विस्तरभयान्नेह लिख्यन्ते ।

'न चानन्दमयस्य जीवत्वे 'असन्नेव स भवति-असद्ब्रह्मेति वेद च' (तै० उ० २।६) इदित्याद्यान्दमयनिगमश्लोके ब्रह्मणो व्युत्पादनेनानन्दमयो ब्रह्मेति निश्चीयते, सर्वत्र पूर्वं प्रतिपादितस्यैव निगमश्लोकेनापि प्रतिपाद्यमानत्वादिति वाच्यम् । निगमश्लोके जीवस्यापि स इत्यनेनैव[4] (त) मित्यनेन च परामर्शात् । नचैवमपि प्राधान्येन ब्रह्मण एव परामृश्यमानत्वादानन्दमयोऽपि ब्रह्मैवेति वाच्यम् । निगमश्लोके प्राधान्येन प्रतिपाद्यमानस्यापि ब्रह्मणो मनोमयरूपत्वाभावात् । तस्मादन्यथाधिकरणं वर्णितं भगवता भाष्यकारेण तदित्थं 'ब्रह्मपुच्छं प्रतिष्ठा' (तै०उ०२।५) इति वाक्यं प्राधान्येन ब्रह्म प्रतिपादयति उत जीवस्या (म) यवतयेति संशयः । तत्र पूर्वपक्ष :—

---

१. कार्यानन्वयित्वे सति वर्तमानत्वे सति व्यावतर्कत्वमुपाधित्वम् । (वै० प० पृ० ९९) ।

२. घ० मा० 'शुद्धान्ना' इति पाठः ।

३. घ० मा० 'वन्न' इति पाठः ।

४. घ० मा 'एतम्' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जीवस्यावयवत्वेन ब्रह्मोपास्यं प्रतीयते ।
ब्रह्मपुच्छं प्रतिष्ठेति वाक्ये पुच्छत्वबोधनात् ।।
पृथिव्यादिरिवातोऽत्र न प्राधान्यं प्रतीयते[१] ।
विशये प्रायपाठो हि नियामकतयेष्यते ।।

'ब्रह्म पुच्छं प्रतिष्ठा' (तै० उ० २।५) इति वाक्यञ्जोवावयवत्वेन ब्रह्मोपास्यं प्रतिपादयति पुच्छशब्दात् । न च पुच्छशब्द आधारत्वलक्षक[२] इति वाच्यम्, प्रायः पाठानुसारेण पुच्छशब्दस्यावयवपरत्वस्यैव न्याय्यत्वात्, विशयस्य च प्रकृते सद्भावात् । किं पुच्छपदमवयवसमर्थ(प)कमुत ब्रह्मप्रकरणेनाधारसमर्थ(प)कमिति, तस्मात्पृथिवी पुच्छं प्रतिष्ठेत्यादिवदवयवतयोपास्यमिति ।

सिद्धान्तस्तु--

असन्नेवेति निगमश्लोकेऽभ्यासस्य[३] दर्शनात् ।
ब्रह्मणस्स्वप्रधानत्वन्न तु जीवस्य शेषता ।।
पुच्छशब्दोऽपि चाधारं ब्रवीति न तु शेषताम् ।
अतो ज्ञेयमिह ब्रह्म नोपास्यमिति निर्णयः ।।
ब्रह्मपुच्छमित्यत्र ब्रह्म (स्व) प्राधान्ये (मेव च) नैव ज्ञेयम् ।
असन्नेव स भसत्यसद्ब्रह्मेति वेद चेद् अस्मि ।
ब्रह्मेति चेद्वेद सन्तमेनं ततो विदुरिति ।।

निगमश्लोकेऽभ्यस्यमानत्वान्न ह्यप्रधानेऽयमभ्यास उपपद्यते । न च पुच्छशब्दबाधस्तस्याधारलक्षणार्थत्वात् । न च सैव दोष इति वाच्यम्, पूर्वप्रायः पाठनिर्वाहार्थत्वात्तथा हि पुच्छशब्दो लाङ्गुलमाह । न च मुख्यं लाङ्गुलमानन्दमयस्य[४] ब्रह्मणः सम्भवति । न वा पक्षिणां लाङ्गुलमस्ति, येन पक्षित्वेन कल्पितस्य लाङ्गुलत्वेन कल्पनोपपद्येत । तस्मात्पश्चाल्लम्ब[५]मानत्वसाम्येन पक्षिणामवयवविशेषे पुच्छशब्दस्य गौणीवृत्तिं स्वीकृत्य तदात्मनोपासनं वक्तव्यम् । एवञ्च पुच्छशब्दस्य स्वार्थपरित्यागस्तुल्यः । परन्तु 'यो वेद निहितं गुहायाम्' (तै. उ. २।१) इति ब्रह्मणो जीवरूपेण यद्गुहानिहितत्वमुक्तं [६]तद्व्युत्पादयितुं पञ्चकोशावतरणं कृतम् । तत्र प्रसङ्गात्पक्षित्वेन पूर्वेषु कोशेषूपासनमुक्तम् । तत्र च पुच्छोपासनमुक्तं (तत्प्रायापत्येहापि) तत्प्रामापत्तेरिहापि पुच्छशब्दः प्रयुक्तो नैतावता प्रकरणावगतं प्राधान्यं हातव्यम् । शब्दमात्रेण च प्रायः-पाठनिर्वाहस्तत्र तत्र दृश्यते । अतः प्रकृतेराधारपरमेव पुच्छपदम् । एवञ्च

---

१. क० मा 'एषः' पाठो नास्ति ।
२. घ० मा 'आधारत्वलक्षणा' इति पाठः ।
३. घ० मा 'अभ्यासस्य' इति पाठो नास्ति ।
४. क० मा 'मस्य' इति पाठः ।
५. घ० मा 'लब्ध' इति पाठः ।
६. घ० मा 'तदप्युदयितुम्' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सति यन्मन्त्रे 'परमे व्योमनि' (तै० उ० २।१) इति जीवस्य निहितत्वमुक्तं तदुपपन्नम्। न च परं ब्रह्म पुच्छमित्यत्र पुच्छपदेनाधारत्वे लब्धे प्रतिष्ठापदवैयर्थ्यमिति वाच्यम्, तदधीनस्थितिकत्वलाभाय तत्पदप्रयोगात्। अनाधारस्यापि प्राणस्य स्थितिहेतुत्वाद्ब्रह्मणोऽप्यनाधारत्वशङ्काव्यावृत्त्यर्थं पुच्छपदमिति विवेकः।

अधिकञ्चेह वक्तव्यं सूत्राणां योजनापि च।
अस्मद्गुरुकृते भाष्यव्याख्याने दृश्यतां बुधैः॥

अन्तरधिकरणम्

अन्तस्तद्धर्मोपदेशात्॥ ७॥

छन्दोगास्समामनन्ति 'अथ य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रु हिरण्यकेश आप्रणखात्सर्वं एव सुवर्णः (छा० १।६।६) तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी तस्योदिति नाम स एष सर्वेभ्यः पाप्मभ्य उदित उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेद। तस्यर्च[3] साम च गेष्णौ[4] तस्मादुद्गीथस्तस्मात्त्वेवोद्गातैतस्य हि गाता स एष ये चामुष्मात्पराञ्चो लोकास्तेषाञ्चेष्टे देवकामानाञ्चेत्यधिदैवतम्' (छा० १।६।८।) अथाध्यात्ममित्युपक्रम्य 'अथ य एषोऽन्तरक्षिणि पुरुषो दृश्यते सैव ऋक्[5] तत्साम तदुक्थं तद्यजुस्तद्ब्रह्म तस्यैतस्य तदेव रूपं यदमुष्य रूपं यावमुष्य गेष्णौ तौ गेष्णौ यन्नाम तन्नाम' 'य एष ये चैतस्मादर्वाञ्चो लोकास्तेषाञ्चेष्टे मनुष्यकामानाञ्चेति तद्य इमे वीणायां गायन्त्येतं ते गायन्ति तस्मात्ते धनसमय' (छा० १।७।६) इति, तत्र संशयः किमन्तरादित्यवाक्यमन्तराक्षिवाक्यञ्च जीवं प्रतिपादयत्युत ब्रह्मेति। तत्र पूर्वः पक्षः—

'य एष' इति वाक्यन्न ब्रह्मणः प्रतिपादकम्।
आधारैश्वर्य्यमर्य्यादाशरीराणामसम्भवात्॥
अशरीरमनाधारं सर्वेशं ब्रह्म[6] गम्यते।
यतो न जीव एवात्र प्रतिपाद्यस्तथा सति॥
सर्वपापोदयादीनां कथञ्चिदुपपादनम्।
कर्तव्यं मुक्तजीवत्वादादित्यस्येति निर्णयः॥

'य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यत' इति[7] वाक्ये प्रतिपाद्यमानो जीव एव 'य एषोऽन्तरादित्य' इत्यादित्यस्याधिकरणत्वोक्तेः। न च परमेश्वरस्याधारस्सम्भवति 'स भगवः कस्मिन् प्रतिष्ठित' (छा० ७।२४।१) इति प्रश्नानन्तरं 'स्वे महिम्नि' (छा० ७।२४।१) इत्युत्तरेणाधारान्तरप्रतिषेधस्याभ्युपगमात्। तद्धि वाक्यन्न

१. क० मा० नास्त्येष पाठः।
२. क० मा 'प्र' कति पाठः।
३. क० मा० 'तस्य' इति पाठः।
४. घ० मा० 'गेहपो' इति पाठः।
५. घ० मा० 'तस्मात्' इति पाठः।
६. गम्यते ज्ञायत इत्यर्थः, गम् धातोर्बहुविधार्थनिर्देशनाज्ज्ञानगमनप्राप्तिरूपार्थत्वात्।
७. क० मा० 'इति' पदं नास्ति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वस्याधारत्वप्रतिपादकमभेदे तदनुपपत्तेः। अपि च तर्हि-आधारनिषेधकमेवायमेवाशयोऽग्रेस्पष्टीकृतः श्रुत्या 'यदि[1] वा न महिम्नि' इत्यनया, किञ्च पराञ्चो लोकास्तेषाञ्चेष्टे देवकामानाञ्चेत्यादित्यपुरुषस्यार्वाञ्चो लोकास्तेषाञ्चेष्टे मनुष्यकामानाञ्चेत्यक्षिपुरुषस्य चैश्वर्यमर्यादा श्रूयते। न च परमेश्वरस्य मर्यादायुक्तमैश्वर्यं सम्भवति 'एष सर्वेश्वर' इति श्रुतेः। किञ्च 'हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रु'[2] (छा० १।६।६) इत्यादिना ज्योतिर्मयं शरीरमुपदिश्यते[3]। न च परमेश्वरस्याशरीरस्य तत्सम्भवति। जीवस्य तु सर्वसम्भवात्स एवोपास्य इति निर्णयः। न च 'तस्योदिति नाम स एष सर्वेभ्यः पाप्मभ्य उदित' (छा० १।६।८) सर्वपापोदयाल्लिङ्गात्परमेव ब्रह्म ग्राह्यम्। [4]असङ्कुचित्सर्वपाप्मोदयस्य जीवेऽसम्भवादिति वाच्यम्, 'उदेति ह वै सर्वेभ्यः पाप्मभ्य' (छा० १।६।८) इति फलवाक्ये सङ्कुचितस्यैव सर्वपाप्मोदयस्य स्वीकार्य्यत्वेन तत्क्रतुन्यायानुसारेण सङ्कुचितस्यैव स्वीकार्यत्वेन जीवे तस्योपपत्तेः। न चाक्षिपर्यायै 'सैव [5]ऋक् तत्साम तदुक्थं तद्यजुः[6]' इति ऋक्सामाद्यात्मकत्वमुच्यमानमीश्वरस्यैव सम्भवति न जीवस्येति वाच्यम्। सर्वात्मके ब्रह्मणि वेदात्मकत्वमात्रस्य कीर्तनमुपासनार्थमिति वक्तव्यम्। तच्चादित्येऽपि कथञ्चिद्योजयितुं शक्यम्।

तैत्तिरीयशाखायाम् 'आदित्यो वा एष तन्मण्डलं तपति' इत्यस्मिन्ननुवाके मण्डलार्चिःपुरुषाणामृक्सामयजुरात्मकत्वेन निरूपणं कृत्वा 'सैषा त्रय्येव विद्या तपति 'य एषोऽन्तरादित्ये हिरण्मयः पुरुषः' (छा० १।६।६) इति सर्ववेदात्मकत्वस्य प्रतिपादनात्। न च वैणिकगीयमानराजात्मकत्वं 'नद्य इमा' इति वाक्यसिद्धम्। '[7]तस्यैवक्-सामा च गेष्णौ' (छा १।६।८) इति वाक्यसिद्ध-ऋक्सामगीयमानेन्द्राद्यात्मकत्वमनुपपन्नञ्जीवस्येति वाच्यम्।

ईश्वरेऽपि व्यावहारिकभेदवत्त्वेन मुख्यस्यैकत्वस्यानुपपत्त्या चैतन्यरूपेणैक्यस्योपपादनीयत्वेन जीवानामपि तत्सम्भवात्। तस्माज्जीवन्मुक्त आदित्य एव पापादिनिवृत्तिसम्भवात्। स एवोपास्य इति। अत्राभिधीयते—

'य एष' इति वाक्येन ब्रह्मोपासा विधीयते।
सर्वपापोदयस्येहं सर्वात्म(नः)स्यः च कीर्तनात्॥

---

१. क० मा० 'यदि वा महिम्नी·····' इत्यन्तः पाठो नास्ति।
२. घ० मा० 'मश्रु' इति पाठः।
३. घ० मा० 'उपहिश्यते' इति पाठः।
४. क० मा० 'संकुचित' इति पाठः।
५. 'तेषामृग्यत्रार्थवशेन पादव्यवस्था' (मी. २।१।३५) यत्र पादकृता व्यवस्था स मन्त्र ऋङ्नामा इति शबरस्वामी। पादेनार्थेन चोपेता वृत्तबद्धा मन्त्रा ऋचः, इति जैमिनिन्यायमालायां माधवाचार्यः। (ऋग्वेद भा. भू. पृ० १.)
६. 'शेषे यजुः शब्दः' (मी. २।१।३७) या न गीतिर्न च पादबद्धं, तत्प्रश्लिष्टपठितं यजुः 'इति शबरस्वामी। वृत्तिगीतिवर्जितत्वेन प्रश्लिष्टपठिता मन्त्रा यजूंषि' इति जैमिनीयन्यायविस्तरे माधवाचार्यः। (ऋ.भा.भू. पृ० १)
७. क० मा० 'तस्यक्कं' इत्यन्तः पाठो नास्ति।
८. 'गीतिषु सामाख्या' (मी· २।१।३६) विशिष्टा काचिद्गीतिः सामेत्युच्यते। प्रगीते हि मन्त्रवाक्ये सामशब्दमभियुक्ता उपदिशन्ति। इति शबरस्वामी (ऋ.भा.भू. पृ० १)
९. क० मा० 'पाप्मो' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जीवस्य नहि सार्वात्म्यमुपपन्नं कथञ्चन ।
सर्वपापनिवृत्तिश्च कथञ्चन युज्यते ॥
कर्मजन्यशरीरत्वाद्यो[1] नित्वविरहादपि ।
यच्चोक्तं मुक्तजीवस्य सर्वपापनिवर्तनम् ॥
जीवन्मुक्तस्य तन्नैव देहित्वादुपपद्यते ।
देहहीनस्य मुक्तस्य सर्वपापोदयो भवेत् ॥
इति चेत्तर्हि सिद्धन्तो यदभीष्ट तदेव हि ।
शरीरमीश्वरस्यापि ह्युपासासिद्धये भवेत् ॥
आधारैश्वर्ययोगोऽस्याप्युपास्त्यर्थो न तु स्वतः ।
तस्मादनन्यथासिद्ध[2]लिङ्गाद्ब्रह्मेति निर्णयः ॥

'अन्तरादित्य' वाक्यं ब्रह्मण एव प्रतिपादकं, सर्वपाप्मोदयस्य कीर्तनात् । न च तदापेक्षिकमिति वाक्यम्, सर्वशब्दसङ्कोचापत्तेः । न च फलवाक्यानुसारेण सङ्कोचः स्वीकार्य्य इति वाच्यम्[3] । [4]पूर्ववाक्येऽप्यशङ्कोचेनैवोपपत्तेः । क्रममुक्ताभिप्रायेणोपासकेऽपि सर्वपापनिवृत्तिकीर्तनसम्भवात् । मुक्तजीवमादाय सर्वपापनिवृत्तिकीर्तनमुपपन्नमिति यदुक्तं तन्न, जीवन्मुक्ते [5]स्वकर्म्मोपार्जितदेहसत्त्वेन 'न ह वा' इति शास्त्रपर्य्यालोचनया दुःखादिमत्त्वस्यावश्यकत्वेन पापावश्यकत्वात् । विदेहकैवल्यदशायां ब्रह्मात्मकत्वेन सर्वपापनिवृत्तिसम्भव इति चेत्तर्हि तस्योपास्यत्वमिष्टमेव । किञ्च 'सैव-ऋक्तत्साम' इत्यादिना सर्ववेदात्मकत्वमुच्यते । तच्च ब्रह्मणि मुख्यं सर्वोपादानत्वात् । नत्वादित्ये जीवे मण्डलार्चिरादिद्वारा तस्य गौणत्वात् । किञ्च 'ऋक्सासगीयमानेन्द्राद्यात्मकत्वं' वैणिकगीयमानराजाद्यात्मकत्वञ्च [6]बिम्बरूपत्वादीश्वरस्योपपद्यते । न तु जीवस्य, प्रतिबिम्बस्य [7]प्रतिबिम्बान्तरेणैक्यायोगात् । अतः परमात्मैवोपास्यः । तस्य चाधारकीर्तनमुपासनार्थम् । शरीरञ्च तस्योपासकानुग्रहाय सिद्धम् । मर्यादैश्वर्य्यकल्पनमप्युपासनार्थम् । तत्र चोदाहृतश्रुतौ 'कप्यासं पुण्डरीकम्' (छा० १।६।८) इति वाक्यस्य [8]प्रतिवाद्युक्तार्थान्तरव्युत्पादनं तन्निराकरणञ्चास्मद्गुरुकृतभाष्यव्याख्याने ब्रह्मविद्याभरणे द्रष्टव्यम् ।

---

१. कारणत्वाभावात् ।
२. उपक्रमादितात्पर्यलिङ्गद्वारा समर्थितानन्यथासिद्धलिङ्गात्प्रमाणाद्ब्रह्म इति निर्णयः ।
३. क० मा० 'फलम्' इति पाठः ।
४. ख० मा० 'फलवाक्य' इति पाठः ।
५. आगामिसञ्चितप्रारब्धभेदेन त्रिविधकर्माणि सञ्चितानि, तैरेव सञ्चितकर्मभिर्जीवनमुक्ते (क्तस्या) पि देहसत्त्वमापादितम् । तच्च 'नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि' (ब्रह्म वै० पृ० ३०४।८१।५५) इति
६. घ० मा० 'विश्व' इति पाठः ।
७. औपाधिकपरिच्छेदशून्यत्वे सत्युपाध्यन्तर्गतत्वरूपेणारोपितधर्मेण विशिष्टत्वं प्रतिबिम्बत्वम् । तादृशधर्मशून्यत्वे सत्युपाधिसन्निहितत्वं बिम्बत्वम् । यथा दर्पणे मुखं प्रतिबिम्बते ।
८. क० मा० 'प्रबा' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आकाशाधिकरणम्

आकाशस्तल्लिङ्गात् ॥८॥

छन्दोगशाखायां 'त्रयो होद्गीथे कुशला बभूवुः' (छा० १।८।१) इत्युपक्रम्य शालावत्य-दालभ्य-जैवलीनां संवादं प्रस्तुत्य दालभ्यः शालावत्येन पृष्टः 'का साम्नो गतिः' (छा० १।८।४) इत्यादिना । तत्र चान्तिमे पर्य्याये[१] 'अमुष्यलोकस्य का गतिः' (छा० १।८।५) इति प्रश्ने 'स्वर्गलोकमतिनयेदिति[२] होवाच' (छा० १।८।५) इति दालभ्येनोत्तरिते '[३]शालावत्येनामप्रतिष्ठितं वै किल ते[४] दालभ्य सामेत्यप्रतिष्ठितत्त्वदोषेण तत्पक्षे दूषिते पुनर्दालभ्येन शालावत्यविषयकप्रश्नः 'अमुष्यलोकस्य का गतिः' (छा० १।८।५). इत्ययं[५] लोक इति होवाचे-त्युत्तरे पुनर्दालभ्यस्य प्रश्नः 'अस्य लोकस्य का गतिः' (छा० १।८।५) इति, ततः (लो) शालावत्यस्योत्तरं 'न प्रतिष्ठाल्लोकमतिनयेत्' (छा० १।८।७) इति । [६]तस्योत्तरे दत्ते जैवलिना क्षत्रिय[७] '[८]तद्वै[९] किल ते शालावत्य साम, इति तस्य पक्षे दूषिते शालावत्येन जैवलिविषयः प्रश्नः कृतः 'अस्य लोकस्य का गतिरिति' तस्योत्तरं जैवलिना 'आकाश' इत्युक्तं[१०] 'सर्वाणि ह वा-इमानि भूतान्याकाशादेव समुत्पद्यन्ते आकाशम्प्रत्यस्तं यन्त्याकाशो ह्येवैभ्यो ज्यायानाकाशः परायणं स, एष परोवरीयानुद्गीथः स एषोऽनन्तः' (छा० १।९।१) इति श्रूयते । तत्र संशयः । किमाकाशशब्देन परम्ब्रह्म गृह्यते-उत भूताकाशमिति किम्प्राप्तम्भूताकाशमिति । कुतः

आकाशशब्दः श्रुत्यैव भूतस्य, प्रतिपादकः ।
गौण्या तु ब्रह्मणस्सा तु दुर्बला श्रुतितो भवेत् ॥
अभ्यस्तः प्रक्रमस्थश्च प्रधानस्थानगस्तथा ।
अतो भूतविशेषस्य ग्रहो न ब्रह्मणो भवेत् ॥
आनन्त्यादीनि लिङ्गानि सन्ति ब्रह्मत्वसाधने ।
इति चेन्नैतदेवं स्यात्प्रधानस्यानुरोधतः ॥
नेयानि तानि लिङ्गानि न प्रधानस्य बाधने ।
समर्थानि यतस्तस्माद्भूताकाशपरिग्रहः ॥

---

१. घ० मा० 'येऽव्येऽमुष्य' इत्यधिकः पाठः ।
२. क० मा० 'लोकैकमिति' पाठो नास्ति ।
३. घ० मा० 'शालावत्येन प्रतिष्ठितम्' इति पाठः ।
४. घ० मा० 'ते' इति पाठो नास्ति ।
५. क० मा० 'कृतः' इत्यधिकः पाठः ।
६. क० मा० 'ततो' इति पाठः ।
७. क० मा० 'अन्तः' इति पाठः ।
८. ख० मा० 'अन्तवत्' इति पाठः ।
९. घ० मा० 'तवद्धे' इति पाठः ।
१०. क० मा० 'दत्ते' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आकाशशब्दो हि भूताकाशे रूढः[१], लौकिकानां तत्र प्रचुरप्रयोगात्। ब्रह्मणि तु गौणः। न च सम्भवति मुख्यार्थे गौणग्रहणं न्याय्यम्। आकाशशब्दश्चाभ्यस्तेऽभ्यासश्च[२] तात्पर्य्यलिङ्गमिति ह्युक्तम्। किञ्चोपक्रमस्थोऽयमाकाशशब्दोऽतस्तदनुसारेण निर्णयो न्याय्यः। प्रश्नस्योत्तरार्थत्वात्[३]। प्रधानस्थानपतितोऽयमिति तदनुसारेणापि भूताकाशग्रहणं न्याय्यम्। नन्वनन्तत्वजगदुत्पत्तिलयकारणत्वजगत्परायणत्वज्यायस्त्वादीनां ब्रह्मलिङ्गानामिह दर्शनादाकाशशब्देन ब्रह्मैव प्रतिपाद्यत इति चेन्नानन्त्यादीनां बहुनामपि लिङ्गानां प्रधानानुसारेण बाध(न)स्यैव न्याय्यत्वात्। अत एव अवदानद्वयं[४] "[५]पुरोडाशमात्रपर्याप्तव्रीहिलाभेस्विष्टकृदादीनां[६] बाधमभ्युपगम्य प्रधानमात्रमनुरुध्य[७] व्रीहिभिरेव पुरोडाशः कर्तव्यो न तु नीवारैः प्रतिनिहितैरिति पूर्वतन्त्रे[८] प्रतिनिधिपेटिकायां व्यवस्थापितम्। तस्मादिह भूताकाशमेव ग्राह्यमिति प्राप्ते ब्रूमः-

आकाशादिति पञ्चम्या जगत्कारणतोच्यते।
एवकारेण तस्यैव नैरपेक्ष्यं प्रतीयते॥
प्रत्ययार्थः प्रधानं हि प्रकृत्यर्थादिति स्मृतम्।
गौण्या त्वाकाशशब्देन ब्रह्मैव प्रतिपाद्यते॥
प्रत्ययार्थस्य पूर्णत्वान्नत्वाकाशे कथञ्चन।
किन्त्वान्तवत्त्वदोषेण शालावत्योऽयमूचिवान्॥
तस्य पक्षस्य दुष्टत्वं प्राह क्षत्रियपुङ्गवः।
सोऽपि चेदन्तवद्वस्तु ब्रूयात्प्राज्ञः कथं भवेत्॥
तस्मात्प्रक्रम एवेह ज्ञातमानन्त्यमस्य च।
कीर्तनादुपसंहारे ह्यनन्तपरतास्थिता॥
अनन्यथा सिद्धलिङ्गैः (तु) श्रौतत्वादिकथञ्चन।
नेयमाकाशशब्देन ग्राह्यं ब्रह्मेत्यतः स्थितम्॥

---

१. समुदायार्थप्रतिपादकत्वं रूढत्वम्। तच्च समुदायार्थघटकत्वमेव प्रतिपादयति। अतोऽप्याकाशशब्दो भूताकाशे नियोजितः।
२. घ० मा० 'चाभ्यत्वो' इति पाठः।
३. क० मा० 'रस्य' इति पाठः।
४. ख० मा० 'ह्यवन्त' इति पाठः।
क० मा० 'द्यवस्त' इति पाठः।
५. घ० मा० 'ड्र' इति पाठः।
६. घ० मा० 'भेष्ट्कृटा' इति पाठः।
७. घ० मा० 'अनुरुह्य' इति पाठः।
८. घ० मा० 'पूर्वतत्प्रति' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आकाशशब्दो ब्रह्मण एव गौण्या वृत्त्या प्रतिपादकः। 'आकाशादेव समुत्पद्यन्त' (छा० १।९।१) इति पञ्चमीश्रुत्या सर्वभूतकारणत्वस्य प्रतिपादनात्। न च तत्साप्येक्षमेव सर्वशब्दार्थं स्वीकृत्य वाय्वादिकारणत्वमेव पञ्चम्या प्रतिपाद्यते, न तु सर्वकारणत्वमिति वाच्यम्। सर्वपदस्य सङ्कोचापत्तेः। एवकारानुपपत्तेश्च। न च ब्रह्मकारणपक्षेऽपि ब्रह्माति रिक्ताविद्यापेक्षत्वेनान्यानपेक्षत्वानुपपत्तिरिति वाच्यम्। अन्येषामविद्यादीनां कल्पितत्वेन ब्रह्मसजातीयस्यान्यस्यानपेक्षत्वप्रतिपादकत्वेनैवकारान्वयसम्भवात्। भूताकाशस्य त्वन्यापेक्षत्वेनैवकारान्वयानुपपत्तेः[१]। किञ्च पञ्चम्यैवापादाने विधीयमानोपादानत्वं निरपेक्षं ब्रवीति। 'व्रीहिभिर्यजेत' इत्यत्र तृतीयेव निरपेक्ष्यकारणत्वम्। 'समर्थः पदविधिः' इति सामर्थ्यस्य विभक्तिविधावुपस्थानाभ्युपगमात्। अत एव तत्रैव सूत्रे भाष्यम् 'किं पुनर्विधीयते समासो विभक्तिविधानं पराङ्गवद्भावश्च' इति। तत्र कैयटोपाध्यायरेवं व्याख्यातम्, विभक्तिविधानशब्देन स्वौजसमौडित्यादिना सामान्येन विहितानां विभक्तीनां कर्मणि द्वितीयेत्यादिना यो नियमः स उच्यते। एवं हि पदविधिर्भवतीति। एवञ्च प्रकृतेऽपि पञ्चम्या निरपेक्षोपादानत्वबोधनात्। ब्रह्मणोऽन्यस्मिंश्च तदसम्भवात्।

प्रकृतिप्रत्ययार्थयोश्च विरोधे प्रत्ययार्थस्य प्रधानत्वेन[२] तदनुरोधेन प्रकृत्यर्थस्य लाक्षणिकस्यैव स्वीकार्य्यत्वात्। 'प्रधानं प्रत्ययार्थवचनम्' इति स्मरणात्। किञ्च[३] 'अन्तवद्वै किल ते शालावत्य साम' (छा० १।८।८) इति शालावत्यपक्षमन्तवत्त्वदोषेण[४] निन्दितवतो जैवलेः क्षत्रियस्यानन्तमेव वस्तु विवक्षितमन्यथा तत्पक्षमन्तवत्त्वेन[५] कथं दूषयेत्। तत उपक्रमेऽनन्तं वस्तु व्यतिरेकमुखेनोपक्षिप्तं भवति। उपसंहारे च 'स एषोऽनन्त' (छा० १।९।२) इत्यानन्त्यमुच्यते। अत[६] उपक्रमोपसंहारपर्य्यालोचनयानन्ते वस्तुनि तात्पर्य्यावगमाद्ब्रह्मपरमेवेदं वाक्यमत एव 'अस्य लोकस्य का गतिः' (छा० १।८।५) इति सर्वलोककारणविषयप्रश्नोऽप्युपपद्यते[७]। न चायं पृथिवीमात्रकारणप्रश्नः। तस्य 'आपः कारणम्' इति विज्ञातत्वेन तत्प्रश्नानुपपत्तेः। न [८]चेदेष्ठ्य (चेष्ट) शब्दसमभिव्याहृतेरंशशब्दस्य पृथिवीपरत्वस्य व्युत्पत्तेः दालभ्यप्रश्नवदस्यापि पृथिवीपरत्वमुपपद्यते। पृथिव्याः प्रतिष्ठितत्ववदानन्त्यमप्यापेक्षिकमेव नेतव्यमिति वाच्यम्। 'अस्य लोकस्य का गतिः' (छा० १।८।५) इति दालभ्यप्रश्नस्य पृथिवीलोकविषयत्वस्य 'न प्रतिष्ठां लोकमिति[९] नयेत्' (छा० १।८।७) इत्याद्युत्तरानुसारेण स्वीकारेऽपि शालावत्यप्रश्नस्य सर्वलोकविषयत्वस्योत्तरानुसारेणावश्यं स्वीकार्यत्वात्। अन्यथा प्रश्नोत्तरयोर्वैयधिकरण्यप्रसङ्गात्। तथाचेदं शब्दस्यादस्शब्दसमभिव्याहृतस्य पृथिवीलोकबोधकत्वेऽपीह[१०] जहल्लक्षणायाः सर्वलोकपरत्वस्यावश्यकत्वात्। पृथिव्याः

१. किचेत्यारम्य तदसम्भवादित्यन्तो पाठः घ० पुस्तके नास्ति।
२. क० मा० 'प्राधान्यात्' इति पाठः।
३. घ० मा० 'चादव' इति पाठः।
४. क० मा० 'मन्त्रवत्व' पाठोनास्ति।
५. घ० मा० 'तभ्रमत' इति पाठः।
६. घ० मा० 'उत' इति पाठः।
७. घ० मा० 'अप्युयु' इति पाठः।
८. क० मा० 'चाद' इति पाठः।
ख० मा० 'न चाद' इति पाठः।
९. क० मा० 'मति' इति पाठः।
१०. घ० मा० 'सदशन्द' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रतिष्ठितत्वं तु तात्पर्य्याविषयत्वादिन्द्रियादिपरत्ववद्यथाव[1]त्यस्मिन्नयनेप्यानन्त्यस्योक्तरीत्या तात्पर्यविषयत्वेन 'आकाशादेव समुत्पद्यन्त आकाशं प्रत्यस्तं यन्ति' (छा० १।९।१) इत्येवकारघटितवाक्यैः[2] सृष्ट्यादिषु कारणत्व-व्युत्पादनपूर्वकमानन्त्यस्य वस्तुपरिच्छेदराहित्यरूपस्य व्युत्पादनेनानन्तस्य मुख्यस्यैव स्वीकार्यत्वात्। किञ्च पृथिव्याः प्रतिष्ठितत्वं मुख्यमेव सम्भवति पृथिव्या अचलत्वाभ्युपगमात्। स्वर्गादीनां[3] ज्योतिश्चक्रारूढत्वेन [4]चलाभ्युपग-मात्। आर्यभट्टोक्तभूभ्रमणवादस्य यवनोक्तभूप्लवनवादस्य दिगम्बरोक्ताधपतनवादस्य च श्रुतिविरोधेन[5] त्याज्य-त्वात्। एवञ्च श्रौतत्वादीनि यानि तान्यन्यथासिद्धब्रह्मलिङ्गानुसारेण बाध्यानि। तस्मादाकाशशब्देन परमात्मैव गृह्यत इति सिद्धम्[6]।

प्राणाधिकरम्

अत एव प्राणः ॥ ६ ॥

चाक्रायणः किल ऋषिः कुरूदेशे क्षुत्क्षामेन पीडि(तो)तेषु भार्यया सह निर्गत्योच्छिष्टपर्युषितकुल्मायान् भक्षयित्वा कस्यचिद्राज्ञो यज्ञमध्ये बहिः पवमानस्तोत्रार्थमुपविष्टान् प्रस्तोतोद्गाताप्रतिहर्तॄन् स्व-भक्तिदेवता अपृच्छत्। ते च वयं ता न जानीम इत्यसुसूचन्, ततो यजमानस्तमप्रार्थयत। ऋत्विग्देयधनसमसंख्याकधनं दास्यसि चेत्त्वदीयं यज्ञं समीकरोमीति राजानं प्रति चाक्रायणोऽवोचत्[7]। ततो राजा तथेति प्रतिजग्राह। ततः प्रस्तोता[8] तमपृच्छत्। कतमा सा देवतेति। तत उत्तरमुक्तवांश्चाक्रायणः 'प्राण' इति। तत उत्तरं 'सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिहते सैषा देवता (छा० १।११।५) इत्यवोचत्। एवमुद्गीथदेवताप्रश्ने 'आदित्य इति होवाच सर्वाणि ह वा इमानि भूतान्यादित्यमुच्चै सन्तं गायत्री[9] (छा० १।११।७) इति प्रतिहारदेवताप्रश्ने चान्नमिति होवाच,[10] 'सर्वाणि ह वा[11] इमानि भूतान्यन्नमेव प्रतिहरमाणानि[12] जीवन्ति' (छा० १।११।९) इति चोत्तरमवोचत्[13]। तत्र प्रस्ताववाक्यं विषयः। तत्र विद्यमानः प्राणशब्दः [14]पञ्चवृत्त्यात्मकप्राणपरो ब्रह्मपरो वेति संशयः।

---

१. जहच्छब्दस्य किञ्चिद्भागपरित्यागार्थः। नजहदजहत्, अर्थाद्विशिष्टस्य ग्रहणं भवति। यथा 'शोणो धावति' इति वाक्ये शोणशब्दस्य रक्तगुणविशिष्टार्थः। धावतीति क्रियापदेनान्वीयमाने मुख्यार्थे विरोधः। तथा च तात्पर्याथो न सङ्गच्छते। अतः शोणशब्दस्य शोणगुणविशिष्टाश्वादिषु लक्षणा क्रियते। तथाच शोणगुणत्वावच्छिन्नाश्वस्य बोधः।

२. क० मा० कथंचिन्नीतं इति पाठः।

३. क० मा० 'च' इत्यधिकः पाठः।

४. ख० मा० 'चलना' इति पाठः।

५. क० मा० 'लना' इति पाठः।

६. क० मा० 'सिद्धम्' इति पाठो नास्ति।

७. तुलनीयम् छान्दोग्योपनिषद् (१।१०।१।११ एवं १०।१।९)

८. क० मा० 'प्रस्तोतारम्' इति पाठः।

९. क० मा० 'गायन्तीति' इति पाठः।

१०. घ० मा० 'होवाच' इति पाठः।

११. घ० मा० 'सर्वाइमात्व' इत्यधिकः पाठः।

१२. घ० मा० 'प्रतिहरमाक्षानि' इति पाठः।

१३. घ० मा० 'नरमवोचाद' इति पाठः।

१४. घ० मा० 'पंचवृत्या' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूर्वाधिकरणवदेव पूर्वोत्तरपक्षौ, शङ्काविशेषनिराकरणार्थन्त्विदमधिकरणम् । शङ्काविशेषतश्चेयम्—

प्रस्तावववाक्यगः प्राणः पञ्चवृत्तिरचेतनः ।
अचेतनप्रायपाठसहकारी श्रुतेर्भवेत् ॥
संवेशोद्गमने चैव भूतानां य इहोदिते ।
भूतसारेन्द्रियाणां ते स्वापे प्राणे भविष्यतः ॥
अचेतने पृथिव्यादौ देवताशब्ददर्शनात् ।
देवताशब्दनिर्देशात्प्राणो ब्रह्मेति नेष्यते ॥

प्रस्तावववाक्यस्थ[1]प्राणशब्दप्रतिपाद्यः पञ्चवृत्त्यात्मकोऽचेतन एव ग्राह्यो न तु ब्रह्म 'सर्वाणि ह वा-इमानि भूतान्यादित्यमुच्चैः सन्तं[2] (छा० १।१।७) गायत्रीति कतिभिः पुरुषैरेव गीयमानस्यादित्य (णुल) स्यैव[3] वाक्यशेषदर्शनेन आदित्य इति होवाच' इति वाक्यस्थादित्यपदस्याचेतनपरत्वेन 'सर्वाणि ह वा-इमानि भूतान्यन्नमेव प्रतिहरमाणानि जीवन्ति' (छा० १.११।६ इति कैश्चिदुच्यमाने[4] त्वस्य वाक्यशेषे कीर्तनेन 'अन्नमिति[5] होवाच' (छा० १।११।९) इति वाक्यस्थान्नपदस्याचेतनपरत्वेन चैतदुभयप्रायपाठसहकृतप्राणश्रुतिमुख्यार्थत्वस्य स्वीकार्य्यत्वात् । सर्वभूतसंवेशनोद्गमनहेतुत्वञ्च स्वापकाले संवर्गविद्यायां प्राणे प्राणान्तर्हितवागप्येतीत्यादिनाप्ययस्य[6] कीर्त्तने तदुभयस्य[7] तत्र तत्रोक्त्या प्राणेऽपि[8] सम्भवात् । भूतशब्दस्य[9] भूतसारेन्द्रियपरत्वादीक्षति[10] गौणत्वापादकप्रायपाठस्येक्षत्यधिकरणे निरासेऽपि प्राणश्रुतिमुख्यत्वापादक[11] (स्यैव) त्वस्य स्वीकार्य्यत्वात् । सर्वशब्दसङ्कोचस्य चादित्यान्नवाक्यगतसर्वशब्दवदेव (स्यैव) स्वीकार्य्यत्वात् । प्राणमेवाभिसंविसन्तीत्येवकारस्याभिसंविसन्त्यवेत्यन्वयस्यान्नमेव प्रतिहरमाणानि जीवन्तीत्यत्रैवकारस्य 'भिस्सास्त्रिभक्तमन्धोन्नम् (?)' इति [12]निघंट्वनुसारेणान्नपदस्योदनवाचकत्वेनान्नातिरिक्तापूपादेर्भक्ष्यमाणत्वेनान्नमेव प्रतिहरमाणानीति यथाश्रुतानुपपत्त्या जीवन्त्येवेत्यन्वयस्यैव स्वीकार्य्यत्वात् ! देवतापदस्य 'सोऽयं देवत्त ऐक्ष' 'हन्ताऽहमिमा तिस्रो देवता' इति तेजोऽबन्नेष्वन्येष्वपि[13] प्रयोगदर्शनेन चेतनवाचकत्वाभावेन ब्रह्मनिर्णायकप्रमाणाभावादिति । तस्य परिहारः—

---

१. घ० मा० 'वाक्यस्थ' इति पाठः ।
२. क० घ० मा० 'सताम्' इति पाठः ।
३. क० मा० 'आकाशे इति पाठः ।
४. क० घ० मा० 'अथमान' इति पाठः ।
५. क० मा० 'कीर्तनादन्नम्' इति पाठः ।
६. क० मा० 'अन्नातिरिक्तापूपादेर्भक्ष्यमाणत्वेन' इत्यधिकः पाठः ।
७. ख० मा० 'तत उद्भवस्य' इति पाठः ।
८. क० घ० मा० 'प्राणोऽस्मि' इति पाठः ।
९. क० मा० 'भूतशब्दस्य' नास्ति पाठः ।
१०. घ० मा० 'परत्वादीति' इति पाठः ।
११. घ० मा० 'तोत्रत्वस्य' इति पाठः ।
१२. क० घ० मा० च 'निखण्डनुसारेण' इति पाठः ।
१३. क० घ० मा० 'अन्नेष्वपि' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चेतनत्वविशिष्टस्य वाचकं देवतापदम् ।
उपक्रमश्रुतौ यस्मात्ततः प्राणस्तु चेतनः ।।
क्वचिल्लक्षणया दृष्टः प्रयोग इति तावता ।
मुख्यार्थसम्भवे तावन्न युक्ता तत्र लक्षणा ।।
सर्वस्य भूतजातस्य संवेशोद्गमनं प्रति ।
हेतुत्वं ब्रह्मणोऽन्यत्र न कथञ्चन युज्यते ।।
अतो ब्रह्मण एवात्र प्राणशब्दार्थता भवेत् ।
सन्निधेः प्रायपाठस्य लिङ्गाद्बाधश्च युज्यते ।।
एवञ्चेदेवकारश्च सर्वशब्दश्च युज्यते ।
तस्मात्प्रस्तावबाक्यस्य प्राणो ब्रह्मेति निर्णयः ।।

'कतमा सा देवता' इति देवताशब्द उपक्रमे श्रुतः, स च चेतनस्य वाचकः । चेतनेष्वेव बहुलं प्रयोगात् । न च क्वचित्तेजोऽबन्नादिष्वचेतनेषु[1] लक्षणया प्रयोगो दृष्ट इति सम्भवति, मुख्यार्थे लक्षणया प्रयोगोऽन्याय्यः । ततश्चोपक्रमगतदेवताशब्दानुसारेण प्रणशब्दोऽपि चेतनपर इति निर्णीयते । सर्वभूतसंवेशनोद्गमनहेतुत्वेन[2] ब्रह्मैव तच्चेतनमिति निर्धायते । न चाचेतनप्रायपाठादचेतनस्य ग्रहणमित्युक्तं, तद्युक्तम्[3], प्रायपाठो हि सन्निधिः, तदपेक्षया देवतात्वलिङ्गस्य प्रबलत्वेन प्रायपाठस्य बाधनीयत्वात् । न च संवेशनोद्गमनादिकं स्वापादिकमादाय प्राणे योजयितुं शक्यमित्युक्तमिति वाच्यम् । अत्र भूतशब्दस्य प्राणिपरत्वेन कृत्स्नप्राणिनां तत्र [4]संवेशनोद्गमनाभावेनावयवकार्त्स्न्यं[5]स्यैव वक्तव्यत्वेन चेतनमारभ्य शरीरपर्यन्तस्य प्राणिशब्दार्थत्वेन तत्रेन्द्रियाणां वृत्तिलयसम्भवेऽपि शरीरस्य वृत्तिलयस्याप्यभावेन सर्वभूतलयाधारत्वासम्भवात् । तत्र च प्राणिरूढ्युन्मेषकस्य[6] 'सर्वाणि ह वा-इमानि भूतानि गायन्ति' (छा० १।११।७) इति 'सर्वभूतानि जीवन्ति' इति च प्राणिप्रायपाठस्य[7] सत्त्वेन बालाक्यधिकरणन्यायानवतारेण[8] भूतशब्दस्य प्राणिपरत्वमवसेयम् । प्राणशब्दो यद्यपि महाभूते रूढेरून्मेषक इति बालाक्यधिकरणन्यायावतारः शंक्यः । तथापि स प्राणिरूढेरून्मेषकः, प्राणस्य प्राणिभिस्सम्बन्धस्य शीघ्रोपस्थितिकत्वात् । यदि च प्राणिनो ब्रह्मण्यपि लयो न सम्भवति चैतन्यांशस्य लयासम्भवादिति मतं, तदा महाभूतरूढेरून्मेषेण[9] महाभूतानां ग्रहणे सति तत्संवेशनोद्गमनयोर्ब्रह्मण्येव सम्भवात् । प्राणशब्देन ब्रह्मग्रह इति मन्तव्यम् । एवञ्च प्राणा-

१. क० घ० मा० 'अन्नादिचेतनेषु' इति पाठः ।
२. घ० मा० 'सवेनमनोद्गमन' इति पाठः ।
३. घ० मा० 'तद्' इति पाठो नास्ति ।
४. घ० मा० 'सन्तेशन' इति पाठः ।
५. घ० मा० 'कार्यस्यैव' इति पाठः ।
६. घ० मा० 'रूढ्यन्मेष' इति पाठः ।
७. घ० मा० 'प्राणिप्रय' इति पाठः ।
८. घ० मा० 'न्यायो नवतारे' इति पाठः ।
९. क० मा० 'महाभूत्' इति पाठो नास्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

देवेत्येवकारोऽपि यथाश्रुत एव । तस्मात्प्रस्तावबाक्यं ब्रह्मपरमिति सिद्धम् । अत्राकाशप्राणशब्दयोर्ब्रह्मणि गौणत्वं निरूढमेव[१], प्रचुरप्रयोगस्य तत्र विद्यमानत्वादिति भाष्ये व्यक्तमेकदेश्युदाहरणखण्डनञ्च विस्तरभयान्न लिख्यते ।

ज्योतिश्चरणाधिकरणम्

ज्योतिश्चरणाभिधानात् ।। १० ।।

छन्दोगशाखायां समाम्नातं 'अथ यदतः परो दिवो ज्योतिर्दीप्यते विश्वतः पृष्ठेषु सर्वतः पृष्ठेष्वनुत्तमेषूत्तमेषु लोकेस्विदं वाव तद्यदिदमस्मिन्नन्तः पुरुषे ज्योतिः (छा०३।१३।७) इत्यादि तत्र[२] संशयः किञ्ज्योतिश्शब्देन भौतिकञ्ज्योतिः गृह्यत उत ब्रह्मेति । तत्र पूर्वः पक्षः—

[३]ज्योतिश्शब्दस्तृतीयस्य भूतस्यैवाभिधायकः ।
न ब्रह्मणस्तथा चात्र ग्रहो नास्योपपद्यते ।।
न चात्र पूर्ववल्लिङ्गं किञ्चित्स्याद्ब्रह्मसाधकम् ।
किञ्च तेजस एवेह साधकानि बहूनि हि ।।
मर्यादादीनि दृश्यन्ते तस्मात्तेजो ग्रहो भवेत् ।
पूर्ववाक्ये च न ब्रह्म प्रस्तुतं येन तद्बलात् ।।
एतद्वाक्यस्थ यच्छब्दो ब्रह्मणः प्रतिपादकः ।
गायत्र्याश्छन्दसः पूर्वं वाक्यं हि प्रतिपादकम् ।।
किञ्च तत्र द्युलोकस्य सप्तम्याधारतोच्यते ।
पञ्चम्या चात्र मर्यादा तस्मादन्यत्वनिर्णयः ।।

अस्मिन्वाक्ये ज्योतिश्शब्दस्तेजस एव प्रतिपादको न तु ब्रह्मणस्तस्य तत्राशक्तत्वात् । आकाशप्राणशब्दयोर्ब्रह्मबोधकत्व एव लिङ्गदर्शनात् । प्रत्युत तेजोलिङ्गानामेव बहूनामुपलम्भान्न ब्रह्मबोधकत्वम्[५] । तथा हि दिव परमिति द्युमर्यादित्वं श्रुतन्न च ब्रह्मणो द्युमर्यादा, सर्वव्यापित्वात् । ज्योतिषस्तु सावयवत्वेन द्युमर्यादत्वमुपपद्यते । तथाधारबहुत्वं विश्वतः पृष्ठे विश्वादिनोच्यते[६] । एवं कौक्षेये ज्योतिषि प्रतीके-उपासनमुच्यमानं तेजोरूपत्वं गमयति । [७]अधिष्ठानाध्यस्यमानयोस्साजात्यस्योत्सर्गतः प्राप्तत्वात् । अत एवादि-तेजोलिङ्गैस्तेज एव ग्राह्यन्न तु ब्रह्म । ननु

---

१. क० मा० 'सिद्धम्' इति पाठो नास्ति ।

२. प्रयोगप्राचुर्यान्मुख्यवद्भानत्वं निरूढत्वम् (क० त० पृ० ९)

३. घ० मा० 'तन्न' इति पाठः ।

४. सूत्रे निर्दिष्टज्योतिशशब्दो न ब्रह्मणो वाचकः, इति पूर्वपक्षाशयः । तदाशयानुगुण्येन प्रमाणग्राहकतायामेव निर्णाकत्वन्न तु निषेधमात्रेण । उपक्रमगतवाक्यतात्पर्यमनुसन्धाय ज्योतिश्शब्द-तेजोवाचक इति ।

५. क० मा० 'साधकत्वम्' इति पाठः ।

६. ख० मा० 'ष्वित्यादिन' इति पाठः ।

७. भ्रमोपादानाज्ञानविषयत्वमधिष्ठानत्वम् (अ० सि० पृ० ३५) अभिप्रायार्थस्तु भ्रमस्योपादानकारणं यदज्ञानं तस्याज्ञानस्य विषय एवाधिष्ठानशब्दव्यवहारः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'यदत' इति यच्छब्दो ब्रह्मणो बोधकः, सर्वनाम्नो यच्छब्दस्य पूर्वप्रस्तुतपरामर्शकत्वेन गायत्रीवाक्यस्य ब्रह्मबोधकत्वस्य स्वीकार्यत्वात्। न च गायत्रीवाक्यस्य ब्रह्मपरत्वे मानाभावः। सर्वात्मकत्वलिङ्गेन गायत्रीशब्दस्य ब्रह्मपरत्वात्। तथा हि 'गायत्री वा इदं सर्वं भूतं यदिदङ्किञ्च' (छा० ३।१२।१) इत्युपक्रम्य तस्या[1] एव पृथिवी शरीरहृदयादिरूपेण व्युत्पादनङ्कृत्वा 'सैषा चतुष्पदा षड्विधा' (छा० ३।१२।५) गायत्रीत्युक्त्वा तस्यामेव गायत्र्यामुक्तायां पुरुषसूक्तपठिता ऋगुदाहृता 'एतावानस्य महिमा ततो ज्यायांश्च पुरुषः। पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि' (छा० ३।१२।६) इति। अत्र गायत्रीशब्देन गायत्र्युपाधिकब्रह्म ग्राह्यन्न तुच्छन्दः। अक्षरविन्यासात्मिकायां तस्यां (त्मके तस्मिन्) सर्वभूतात्मकत्वस्यानुपपत्तेः[2]। ब्रह्मणि तु जगदुपादानत्वात्सर्वभूतात्मकत्वमुपपद्यते। ब्रह्मपरत्वेन निर्णीतपुरुषसूक्तस्य मन्त्रस्यात्र सम्मतित्वेनोदाहरणाच्च ब्रह्मत्वमेव स्वीकार्य्यम्। अत एव सर्वभूतस्य पादत्वेन निर्देशोऽप्युपपद्यते। ब्रह्मणस्सर्वोपादानत्वेन तदेकदेशत्व(ऊ)रूपादत्वस्य सम्भवात्। अत एव 'यद्वै तद्ब्रह्मेव' इत्यत्र ब्रह्मकीर्तनम्। तथा च द्युसम्बन्धित्वेनेह वाक्ये ब्रह्मणः प्रतिपादनात्प्रकृते द्युसम्बन्धित्वेनैव ज्योतिषः कीर्तनेन प्रत्यभिज्ञानात्[3]। यच्छब्देन तस्यैव परामर्शो न्याय्य इति चेन्न, गायत्रीशब्दस्य छन्दोऽभिधायकत्वेन ब्रह्मपरत्वासिद्धेः। नहि गायत्रीशब्दो ब्रह्मणि रूढः, निरूढो[4] वाकाशे प्राणशब्दवद्गायत्रीशब्दस्य ब्रह्मणि प्रचुरप्रयोगाभावात्। न च साम्प्रतिकलक्षणया गायत्रीशब्देन ब्रह्म प्रतिपाद्यत इति युक्तम्। तथा सति ब्रह्मशब्देनैव ब्रह्म व्युत्पादनीयं स्यान्न[5] तु गायत्रीशब्दलक्षणयेति[6]। न च निरूपाधिके ब्रह्मणि चित्तसमाधानाभावेन सोपाधिकमेव ब्रह्म ग्राह्यम्। तत्र चेतरोपाध्यपेक्षया गायत्र्या ब्राह्मण्यादिहेतुत्वेनाभ्यर्हितत्वात्तदुपाधिकमेव ब्रह्म गृह्यत इति वाच्यम्। एवमपि लक्षणातात्पर्य्यग्राहकप्रमाणाभावेन लक्षणानुपपत्तेः। न च सर्वभूतात्मकत्वमेव तात्पर्य्यग्राहकं, तस्य गायत्र्युपाधिकब्रह्मण्यनुपपत्तेः। अतस्तद्गौणमेव वक्तव्यम्। तच्च गायत्र्या एव वक्तुं शक्यमत एव 'गायत्री वा इदं सर्वभूतानांम्' (छा० ३।१२।१) इति गायत्र्याः सर्वभूतात्मकत्वमुपक्षिप्य तच्च तस्या मुख्यन्न सम्भवतीति मनसि निधाय वागात्मकत्वेन सर्वभूतात्मकत्वमुपपादयितुं 'वाग्वै गायत्री' (छा० ३।१२।१) इति वागात्मकत्वमुपक्षिप्य वाचस्सर्वभूतात्मकत्वं गौणं ग्रामरक्षकेऽयमेव सर्वोग्राम इतिवद्वाचो हिंसां मा कुरु हिंसकस्य नरको भवतीति गानत्राणाभ्यां रक्षकत्वेन गायति च (त्रायति) त्रायते चेत्युपपादितमतो गायत्रीवाक्यन्न ब्रह्मप्रतिपादकं 'तावानस्य महिमा' इति ऋगपि गायत्रीविषयैव, मन्त्राणां विनियोगवशेन नानार्थत्वस्यैतेऽसृगविन्दव[7] इत्यादीनां स्वीकृतत्वेन पुरुषसूक्ते[8] निर्णीतस्यापीह गायत्रीपरत्वे बाधकाभावात्। सर्वभूता (त्मत्वा) पादकत्वञ्च[9] पूर्ववदेव गौण्या[10] वृत्त्या नेयमत एव च[11] 'सैषा चतुष्पदा' (छा० ३।१२।५) इति। 'टाबृचि' (अ० ४।१) इति सूत्रविहितटाबन्तनिर्देश उपपद्यते,

१. घ० मा० 'प्रस्या' इति पाठः।
२. घ० मा० 'भूतात्माकत्वस्य' इति पाठः।
३. सन्निहितविषयत्वं प्रत्यभिज्ञात्वम् (भाम० अ० प० पृ० ८) सोऽयमश्व इत्यत्र, इतः पञ्चवर्षपूर्वं क्वापि देशविशेष दृग्गोचरीभूतोऽश्व, सम्प्रत्यत्र दृश्यते चेत्तदा प्रत्यभिज्ञा जायते। विषयसन्निहितत्वन्न स्यात्तदा स्मृतिमात्रम्।
४. अनादिकालिकतात्पर्यवती लक्षणा निरूढलक्षणा।
५. क० मा० प्रतिपादनीयम्' इति पाठः।
६. क० मा० 'शब्देन' इति पाठः।
७. क० ख० घ० मा० 'एते सृग्मिन्दवः' इति पाठः।
८. क० ख० मा० 'प्रकृते ब्रह्मपरत्वेन' इत्यधिक पाठः।
९. क० ख० घ० मा० 'सर्वभूतपादकत्वंच' इति पाठः।
१०. क० घ० मा० 'गाण्याद्य' इति पाठः।
११. ख० मा० 'च' इति पाठो नास्ति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'यद्वै तद्ब्रह्म' (छा० ३।१२।७) इति च ब्रह्मशब्दो ब्रह्मवेद्यमित्यत्रैव[1] वेदपरः सन्तदेकदेशभूतां गायत्रीं बोधयति। तस्मात्पूर्ववाक्ये छन्दस एव प्रस्तावो न तु ब्रह्मणो, येन तच्छब्दो बोधयेत्। तस्माद[2] (य) पच्छब्दः 'अथैष ज्योतिः' इत्यत्र तच्छब्द इव प्रस्तोष्यमाणबोधकः।

किञ्च गायत्रीवाक्ये ब्रह्मप्रतिपादनस्वीकारेऽपीह तस्य ग्रहणन्नोपपद्यते। तत्र 'त्रिपादस्यामृतं दिवि' (छा० ३।१२।६) इति सप्तम्या द्यौरधिकरणत्वेन निर्दिश्यते। तेन च द्युलोकाधिकरणकं ब्रह्म प्रतिपाद्यते। इह तु 'दिवः परम्' (छा० ३।१३।७) इति पञ्चम्या द्युलोकादुपरि विद्यमानं प्रतीयते। अत इदं तदपेक्षयाऽन्यदित्येव प्रतीयते। न च प्रत्ययार्थभेदेऽपि प्रकृत्यर्थस्यै (क्ये) केन प्रत्यभिज्ञाया न विच्छेद इति वाच्यम्। [3]प्रकृतिप्रत्ययार्थयोर्मध्ये प्रत्ययार्थस्य प्रधानत्वेन तदनुरोधेन प्रत्यभिज्ञाविच्छेदस्य स्वीकारात्। न च प्रत्ययार्थप्राधान्याभ्युपगमे पाशाधिकरणविरोधः शंक्यः। प्रत्ययस्यापि वचनत्वेन रूपेण दौर्बल्याभ्युपगमात्। अतस्तृतीयभूतस्य ज्योतिश्शब्देन ग्रहणमिति। सिद्धान्तस्तु

ज्योतिशब्दः परस्यैव ब्रह्मणः प्रतिपादकः।
त्रिपाद्वाक्यप्रस्तुतस्य ब्रह्मणो बोधकेन वै॥

१. ख० मा० 'ब्रह्मोमित्यत्रैव' इति पाठः।

२. घ० मा० 'तस्मादप्पच्छशब्दो' इति पाठः।

३. (क) प्रकृतिः—धातुः 'प्रकृतिजन्यबोधे प्रकारीभूतो भावपदार्थः। तद्रीत्या धातौ परिकल्पितप्रत्ययस्वरूपेणैव पदपदार्थरूपस्य सिद्धत्वात्। नहि प्रकृतिमात्रेणार्थावगमः शब्दप्रयोगो वा लोके कल्पयितुं शक्यते। नापि प्रत्ययमात्रेणैवार्थावगमः, प्रकृतिं प्रत्ययते गच्छतीति प्रत्ययः। तथा च प्रकृतिप्रत्ययार्थगमकत्वेन न प्रत्यभिज्ञाविच्छेदः।

अपि च जैमिनि शाबर भाष्ये ३. ४. १२

व्या. महाभाष्यवार्तिके २, सूत्र ३. १. ६७

(ख) अत्र विषये शबरस्वामिनः 'भावार्थः कर्मशब्दास्तेभ्यः क्रिया प्रतीयते, यजेतेत्येवमादिभ्यः। कुतो भावार्थत्वादेवा य' आहुः किमपि भावयेदिति, ते स्वर्गकामपदसम्बन्धात्स्वर्गं भावयेदिति ब्रूयुः। तस्मात्तेभ्यः क्रिया प्रतीयते। फलस्य क्रिया करणं निष्पत्तिरिति........तेन भावशब्दा अपूर्वस्य चोदका इति ब्रूमः,........तस्माद्भावार्थाः कर्मशब्दा अपूर्वं चोदयन्ति। (शा० भा० २।१।१)

(ग) कुमारिलपादास्तु—

भावार्थाः कर्मशब्दा ये तेभ्योऽपूर्वक्रियागतिः।
तैः कुर्याद्यजिना स्वर्गमेष ह्यर्थो विधीयते।

'फलसम्बन्धो हेतुरपूर्वप्रतिपत्तेः। सम्बन्धश्चाकांक्षापूर्वकः। सा च भावशब्देभ्यः प्रसर्पन्ती दृश्यते न द्रव्यगुणशब्देभ्यः। तस्मादाख्यातेभ्योऽपूर्वभावना गम्यते। तत्र च धात्वर्थस्य करणत्वप्रतिपत्तिः प्रत्यासत्तेः। अतस्तेनैव फलकरणभूतेनान्यथानुपपत्त्याऽपूर्वं भाव्यत इत्यवधार्यते, कथं पुनर्यज्यादीन् पृथक्कृत्य केवलप्रत्ययवाच्य एव भावनार्थो लभ्यते भावयेदिति' (तन्त्र वा० २।१।१)।

सर्वत्र हि भावप्रत्ययः सम्बन्धमभिधत्ते (तं० वा० ३।१।१२)

तत्र प्रकृतिप्रत्ययार्थयोर्यद्यपि प्रत्ययार्थस्य प्राधान्यात्प्रतिपादकम् (तं० वा० ३।७।१०)

अन्यत्र (प्रत्ययेन कर्ता तयोः प्रधानभूतः, उपसर्जनीभूता क्रिया, प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः। अनुप्रयोगश्च कर्तृप्राधान्य एव भवति, पचति देवदत्त इति' (शा० भा० ११।१ २२)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सामानाधिकरण्यस्य यच्छब्देनेह दर्शनात् ।
सर्वं खल्विति वाक्याच्च ब्रह्मप्राधान्यबोधनात् ॥
इतरस्मादिह[1] ब्रह्म ज्योतिश्शब्दं प्रतीयताम् ।
पूर्ववाक्यस्थगायत्रीपदञ्च ब्रह्मबोधकम् ॥
सर्वात्मतादिहेतुभ्यस्तेषां छन्दस्यसम्भवात् ।
सप्तमीपञ्चमीभ्याञ्च प्रत्यभिज्ञानबाधनम् ॥
न युज्यते तयोर्यस्माद् व्याख्याव्याख्येयरूपता ।
तस्माज्ज्योतिःपदेनेह गौण्या ब्रह्मैव गृह्यते ॥
साधने व्यवहारस्य[2] शक्यं वा तत्परम्भवेत्[3] ।
अतश्च भूतलिङ्गानि नेयानीह कथञ्चन ॥

अतः 'परो दिवो ज्योतिः' (छा० ३।१३।७) इत्यत्र ज्योतिःपदं ब्रह्मण एव प्रतिपादकम् 'त्रिपादस्यामृतं दिवि' (छा० ३।१२।६) इति वाक्ये त्रिपादमृतत्वे निर्दिष्टं ब्रह्मप्रतिपादकयच्छब्दसामानाधिकरण्यात् । सर्वनाम्नश्च पूर्वप्रस्तुतपरामर्शकत्वस्य व्युत्पन्नत्वेन यच्छब्दस्य च सर्वनामत्वेन पूर्वप्रस्तुतब्रह्मबोधकत्वस्यावश्यकत्वात् 'सर्वं खल्विदं ब्रह्म' (छा० ३।१४।१) इति शाण्डिल्यविद्यायामिदंशब्दस्य ब्रह्मप्राधान्यबोधकत्वं व्यवस्थापयिष्यते । तच्चास्य वाक्यस्य ब्रह्मपरत्वं विना नोपपद्यत इत्यतोऽपि हेतोर्ब्रह्मपरञ्ज्योतिः पदस्य । न च गायत्रीवाक्यस्य छन्दःपरत्वेन तस्मिन्नर्थे-उदाहृतस्यापि त्रिपादवाक्यस्य छन्दःपरत्वेन ब्रह्मपरत्वाभावात् । कथं तद्वाक्यस्थं[4] ब्रह्मपरामर्शकत्वं-यच्छब्दस्येति वाच्यम्, 'गायत्री वा-इदं सर्वभूतम्' (छा० ३।१२।१) इति गायत्र्याः सर्वात्मकत्वमुच्यमानं मुख्यसम्भवे गौणग्रहणस्यान्याय्यत्वेन मुख्यस्य च सार्वात्म्यस्य च ब्रह्मणोऽन्यस्मिन्नसम्भवेन गायत्रीशब्दस्य गायत्र्युपलक्षितब्रह्मपरतां कल्पयति । उपहिते सार्वात्म्यानुपपत्तावुपलक्षिते तदुपपत्तेः 'सैषा चतुः पदा षड्विध' (छा० ३।१२।५) इति गायत्र्या अपरित्यागेन 'टाबृची'[5] ति विहितटाबन्तत्वमप्युपपन्नम् । गायत्र्याश्चतुःपादत्वं षष्ठिस्त्रिष्टुभो माध्यन्दिनं सवनमितिवत् षड्भिरक्षरैः पादकल्पनयैष्टव्यम् । अत एवास्मिन्नर्थ उदाहृता ऋगपि ब्रह्मपरैव चतुष्पात्परिमितवस्तुन एकपाद एक देशो 'यथेमानि सर्वाणि भूतानि' (तै० उ० ३।१) ब्रह्मण एकदेशवदिति सत्यलोके हिरण्यगर्भावच्छेदेन ब्रह्मविष्णुशिवात्मकममृतं ब्रह्म वर्तत इति मन्त्रार्थः ।

एवञ्च पुरुषसूक्ते ब्रह्मपरत्वेन निर्णीतस्यार्थो नारायणपरत्वकल्पनाक्लेशोऽपि न भविष्यति । एवञ्च[6] 'यद्वै तद्ब्रह्म (छा० ३।१२।२) इत्यादिनोच्यमानं ब्रह्मतत्त्वमपि परमात्मपरमेव ब्रह्मशब्दार्थस्य तत्रैव पूर्णत्वात् ।

१. क० मा० 'उत्तरस्मात्' इति पाठः ।
२. क० मा० 'शक्तम्' इति पाठः ।
३. क० ख० मा० च 'पदम्' इति पाठः ।
४. क० घ० मा० 'न ब्रह्म' इति पाठः ।
५. क० घ० मा० 'पाबृवीति' इति पाठः ।
६. क० मा० 'आत्मंच' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तस्माद्गायत्रीवाक्यम्[१] ब्रह्मणो बुध्युपारोहाय गायत्र्युपलक्षितब्रह्मबोधकमिति सिद्धम्। केचित्तु गायत्रीपदं गौण्या वृत्त्या ब्रह्म बोधयति गुणश्चात्र पादचतुष्टयवत्त्वम्। ब्रह्मणश्च तत् 'पादोऽस्य' (छा० ३।१२।६) इति मन्त्र-प्रसिद्धम्।[२] गायत्र्यास्तु षड्भिरक्षरैः पादकल्पनया तदिति वदन्ति, तन्न गौणवृत्तौ हि प्रसिद्धमेव सादृश्यं ग्राह्यम्। गायत्र्यस्तु त्रिपदात्वं प्रसिद्धम्। न चतुः पदात्वमत एव 'वराहो गावोऽनुधावति' इति यत्र वराहस्य च गोश्च सादृश्यञ्चतुःपात्वं प्रसिद्धमिति वराहशब्दःसूकरवाचक इति निर्णीतम्[३] सप्रमाणलक्षणे। न च गायत्र्या अपि वाचि चतुः पदात्वं दृश्यते 'इन्द्रशचीपतिर्बलेन पीडितः दुश्च्यवनो वृषासमत्सुसासहि' रित्यस्याश्चतुः पदात्वादिति वाच्यम्। अस्याः प्रसिद्धतरत्वाभावात्। नह्युत्पातवशात्द्विपाद्गौरुत्पन्नेति तत्सादृश्यं वायसेऽपि सम्भवतीति वराहशब्दो वायसपरश्शक्यो वक्तुम्। तस्मादस्मदुक्तरीत्या लक्षणैव ग्राह्येति दिक्।

न नु गायत्रीवाक्यस्य ब्रह्मपरत्वेऽपि न तत्र ज्योतिर्वाक्ये प्रतिपाद्यते प्रमाणाभावात्। न च यच्छब्दस्य प्रस्तुतपरामर्शकत्वमेव प्रामाण्यमुक्तमिति वाच्यम् 'दिवि दिव' इति सप्तमीपञ्चमीभ्यां प्रत्यभिज्ञाविच्छेदस्य[४] सञ्ज्ञाधिकरणमुक्तमिति[५] वाच्यम्। 'दिवि दिव' इति सप्तमीपञ्चमीभ्यां प्रत्यभिज्ञाविच्छेदोक्तत्वात्।[६] सञ्ज्ञाधिकरण-न्यायेन' प्रस्तुतपरामर्शकत्वासम्भवे प्रस्तोष्यमाणपरामर्शकत्वस्यैव युक्तत्वात्। तत्र ह्यधिकरणे 'अथैष ज्योतिः' (छ० ३।१३।७) 'तेन सहस्रदक्षिणेन यजेत' इति वाक्यमुदाहृत्यात्र विधीयमानस्य यागस्य ज्योतिष्टोमात्कर्मान्तर-त्वमथशब्दस्य प्रकृतादर्थादर्थान्तरपरत्वाज्ज्योतिरिति शब्दान्तरप्रयोगाद्वाक्यवैयर्थ्यभयाच्चोक्तम्। तथेहापि-अपि शब्दस्य विद्यमानत्वादमृतशब्दाच्छब्दान्तरस्य [७]ज्योतिश्शब्दस्य दर्शनात्, 'इदं वाच तत्' (छा० ३।१२।७) इत्ये-तावत कौक्षेयब्रह्मोपासनाविधायकत्वोपपत्तावथ यदित्यादिवैयर्थ्यभयाच्च। प्रकृते ब्रह्मणोऽर्थान्तरबोधकत्वस्य स्वीकार्यत्वेन यच्छब्दस्य प्रस्तोष्यमाणपरामर्शकत्वस्य स्वीकार्यत्वादिति चेद्।

उच्यते-अथशब्दस्य पूर्वोक्तमुपजीव्योपासनान्तरविधायकत्वेनानन्तर्य्यार्थत्वोपपत्त्य प्रकृतादर्थादर्थान्तरपर-त्वाभावात् 'अथ यदतः परम्' (छा० ३।१३।७) इति वाक्यन्न व्यर्थं स्यात् 'दिवि' इति पूर्ववाक्यानुवादत्वात्। अनुवादबलादपि पुरोवादस्यार्थनिर्णयस्य 'त्रिच्छन्द आवापो मध्यन्दिनः पवमानः पञ्च सोम[८]' इति वाक्यस्यानु-वादके 'गायत्र्या महीमा वेद[९] यत्र चेभवतोराखेयौधाजवे वार्हतेत्रिचे भवत औसनसम्मन्र्य त्रिष्टुमीत्यादौ' (१) दर्शनेन प्रकृतेऽपि 'दिवीति' सप्तम्या[१०] द्युलोकस्याधारत्वावगतौ कोऽसौ[११] द्युलोक इति कस्मिन्वा प्रदेशे तत्र तिष्ठतीति जिज्ञासायां त्रिलोकीपक्षमाश्रित्यान्तरिक्षलोकादुपरि[१२] सत्यलोकान्तस्य द्युशब्दार्थत्वम्। तत्र चोपरिभागापच्छेदेन

---

१. क० मा० 'वोब्रिय' इति पाठः।
२. क० मा० 'मन्त्रसिद्धम्' इति पाठः।
३. क० मा० 'वर्णितम्' इति पाठः।
४. क० मा० 'विच्खेदस्य' एषः पाठो नास्ति।
५. ख० मा० 'उक्तत्वात्' इति पाठः।
६. क० मा० 'दस्योक्त' इति पाठः।
७. क० मा० 'ज्योतिषि' इति पाठः।
८. घ० मा० 'सामोति' इति पाठः।
९. क० मा० 'वेगायत्रे त्रिचे' इति पाठः।
१०. घ० मा० 'दुपरि' इति पाठः।
११. घ० मा० 'कौसोद्धि' इति पाठः
१२. घ० मा० 'आश्रित्यन्तरिक्ष' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विद्यमानत्वञ्चार्थं इति वादतः 'परो दिवो ज्योतिः दीप्यते विश्वतः पृष्ठेषु सर्वतः पृष्ठेषु' (छा० ३।१३।७) इत्यादिना प्रतिपादितमिति न[1] वैयर्थ्यम्। वृक्षाग्रे श्येन इत्युक्ते हि वृक्षाग्रपल्लवान्तर्गतत्वेप्युपपत्त्या वृक्षाग्रात्परः श्येन इति पञ्चम्या विवरणाद्वृक्षाग्रान्त्यप्रदेशे विद्यमानता लभ्यते। तद्वदिहापीति न सप्तमीपञ्चमीनिर्देशश्च प्रत्युक्ता प्रत्यभिज्ञाविच्छेदशङ्केति सिद्धञ्ज्योतिः पदं परम्ब्रह्मेति।

अत्र च ज्योतिष्पदं तेजस्त्वावच्छिन्ने शक्तम्। गौण्या च ब्रह्म बोधयति। व्यवहारसाधने शक्तं शक्त्या च ब्रह्म बोधयतीति पक्षद्वयमाकरे व्यक्तम्। मर्यादाधारादिकीर्तनञ्च ब्रह्मण्येवोपासनार्थमुक्तम्। साजात्यं विनाप्यध्यास्ते 'नाम ब्रह्म' (छा० ७।१।५) इत्यादिषु दृष्ट इति न कोऽपि दोष इति।

प्रातर्दनाधिकरणम्

प्राणस्तथानुगमात् ।।११।।

कौषीतकिन आमनन्ति 'प्रतर्दनो ह वै दैवोदासिरिन्द्रस्य प्रियं [2]धामोपजगाम युद्धेन च पौरुषेण च (कौ० ब्रा० उ० ३।१) इत्युपक्रम्य 'प्राणोऽस्मि प्रज्ञात्मा तं मामायुरमृतम् (कौ० ब्रा० उ० ३।१) इत्युपास्वेति। तत्र संशयः। किमयं सन्दर्भः प्राणपर उत इन्द्रपर उत प्राणजीवात्मपरः[3] किं वा परमात्मापर एवेति। किम्प्राप्तं प्राणपर एवेति। पूर्वः पक्ष :—

प्राणोऽस्मीत्यादिसन्दर्भो मुख्यप्राणस्य बोधकः।
प्रक्रमे संहृतौ चैव प्राणशब्दस्य दर्शनात् ।।
तदानुगुण्येनान्यानि व्याख्येयानि कथञ्चन।
प्रज्ञात्मत्वञ्च तस्यैव प्रज्ञाहेतुत्वतो भवेत् ।।

'प्राणोऽस्मि' (कौ० ब्रा० उ० ३।१) इत्ययं सन्दर्भः प्राणपरः, उपक्रमे प्राणोऽस्मीत्युपसंहारे चाथ खलु 'प्राणश्चेत्प्रज्ञात्मा'[4] इति प्राणशब्देनैव प्राणस्य प्रतिपादनात्। उपक्रमोपसंहारयोरैकरूप्यस्य तात्पर्यलिङ्गस्य विद्यमानत्वेन प्राणपरत्वे निर्णीते तदनुसारेणानन्दत्वादिकं प्राणस्यैवानन्दजनकत्वेन प्रज्ञात्मत्वञ्च प्रज्ञाहेतुत्वेनोपपादनीयमिति।

सिद्धान्तस्तु—

परमोपक्रमे तावद्धितहेतुत्वकीर्तनात्।
आनन्दत्वादिधर्माणां संहृतौ चैव कीर्तनात् ।।
प्राणोऽस्मीत्यादिसन्दर्भः परब्रह्मपरो भवेत्।
ब्रह्मणोऽनुगतत्वेन प्राणधर्मस्य योजनम् ।।
भवेद्ब्रह्मणि न प्राणे तद्धर्माणां कथञ्च।
व्यावृतत्त्वात्तु तस्यातस्सन्दर्भो ब्रह्मणो भवेत् ।।

---

१. क० मा० 'न' इति पाठो नास्ति।
२. घ० मा० 'वायो' इति पाठः।
३. क० मा० 'परमात्मपरः' इत्येव पाठः।
४. क० मा० 'एव' इत्यपि पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'प्राणोऽस्मि' (कौ० ब्रा० उ० ३।१) इत्यादिसन्दर्भो ब्रह्मपरो न प्राणपरो नियामकाभावात्। न चोपक्रमोसंहारैकरूप्यं नियायकमिति वाच्यम्। तथा सति जीवपरत्वस्याप्युपपत्तेः।

तस्यापि[1] ह्युपक्रमोपसंहारे च प्रज्ञात्मशब्देन निर्देशात्। न चैकस्मिन्वाक्येऽर्थद्वयस्य प्राधान्येन प्रतिपादनायोगादेक एवार्थः प्रतिपाद्यः स्वीकार्य्यः। तत्र च प्रथमश्रुतप्राणशब्दानुसारेण चरमश्रुतप्रज्ञात्मशब्दस्यान्यथानयनं स्वीकृत्य प्राणप्रतिपादनमेव स्वीक्रियत इति वाच्यम्। तथा सति ततोऽपि प्रागेव यत्त्वं मनुष्याय हिततममिति[2] हिततमत्वेन मोक्षजनकत्वेन प्रस्तुतपरमात्मपर[3] एव व्युत्पाद्यत्वस्वीकारात्। अत एव 'आनन्दऽजरोऽमृत' इति पारमेश्वरधर्माणामानन्दत्वादीनां कीर्तनं दृश्यते, मध्येऽपि च 'नो एतन्नाना तद्यथा रथस्यारेषु नेमिरर्पिता नाभे (व)[4] अर्पिता एवमेवैता भूतमात्रा प्रज्ञामात्रा स्वर्पिता प्रज्ञामात्रा प्राणे अर्पिता' इति मिथ्यात्वव्युत्पादनमपि दृश्यते। तथा चोपक्रमोपसंहारमध्ये परामर्शैर्ब्रह्म प्रतिपादकत्वरूपमेकार्थत्वं स्वोकार्य्यमिति स्थितेः प्राणप्रज्ञात्मशब्दा अध्यस्तवाचकानां शब्दानामधिष्ठानपर्यन्तत्वस्येदं रजतमित्यादिस्थले दर्शनेन ब्रह्मणश्च सर्वाधिष्ठानत्वात्सर्वशब्दैर्ब्रह्मबोधनं संभवतीति ब्रह्मपराः। अध्यस्तस्य[5] तु व्यावृत्तित्वान्नाधिष्ठानासाधरणधर्मा आनन्दत्वायो[6] योजयितुं शक्या इति सिद्धोऽयं सन्दर्भो ब्रह्मपर इति।

द्वितीयपूर्वपक्षवादी त्वाह। गृह्णीम तदेतत्प्राणजीवयोर्ग्रहणन्नेति। ब्रह्मणो ग्रहणन्तु नमृष्यामहे।

तथाहि—

बोधयत्येषः[7] सन्दर्भो देवतामिन्द्ररूपिणीम्।
इन्द्रो हि वक्ता मामेव जानीहीति यतो ब्रवीत्॥
त्वाष्ट्रादिबधपापेन सम्बन्धाभावकोर्तनात्।
आत्मनो हितहेतुत्वमानन्दत्वादि च स्वतः॥
प्राणप्रज्ञात्मतादीनि ह्युपपन्नानि चेतने।
देवतात्मेन्द्र एवातस्सन्दर्भोऽत्र प्रतीयते॥

'प्रतर्दनो ह वै देवोदासि' (कौ० ब्रा० उ० ३।१) इत्ययमीन्द्रात्मिकां देवतां बोधयति, न तु ब्रह्म प्राणजोवो वा, 'दिवो दैवदासिना' यं[8] त्वं मनुष्याय' (कौ० ब्रा० उ० ३·१) इत्यादिना प्रार्थित 'इन्द्रो मामेव विजानीहि' (कौ० ब्रा० उ० ३।१) इति स्वात्मज्ञानस्यैव हिततमत्वमुवाच। अत इन्द्र एवात्रोपास्य इत्यवगमात्

१. क० मा० 'हि' इति पाठो नास्ति।
२. क० मा० 'मन्यसे' इति पाठः।
३. क० मा० 'नः' इति पाठः।
४. क० मा० 'यरा' इति पाठः।
५. घ० मा० 'अध्यदव' इति पाठः।
६. घ० मा० 'वन्दयो' इति पाठः।
७. क० मा० 'एव' इति पाठः।
८. क० मा० 'य' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'त्वाष्ट्र त्वाष्ट्रं[1] त्रिशीर्षाण महनरुन्मुखान्यतीसालावृकेभ्यः प्रायच्छन्न मैलोमचमोयन' (कौ० ब्रा० उ० ३।१) इत्युक्त्वा 'स यो मां वेद' (कौ०ब्रा०उ० ३.१) इत्यादिनेन्द्रोपासकस्यापि सर्वपापनिवृत्तेरवगमनेनेन्द्रोपासनस्य स्पष्टं प्रतीयमानत्वाच्च। न चोपक्रमावगतहिततमत्वस्योपसंहारावगतानन्दत्वादेः प्राणप्रज्ञात्मशब्दानाञ्च कथमुपपत्तिरिति वाच्यम्। उपक्रमावगतहिततमत्वसंहारानन्दत्वादेः सर्वपापनिर्वर्तकत्वेनाप्युपपत्तेः। आनन्दत्वज्ञात्मत्वयोरिन्द्रस्य चेतनत्वेनोपपत्तेः। प्राणात्मत्वञ्च बलाभिमानित्वादुपपन्नमिति।

सिद्धान्तस्तु—

इन्द्रियस्थितिहेतुत्वमायुषो दानमेव च[2]।
स्वान्तमागम्यते प्राणे द्वयं तद्ब्रह्मणीष्यते ॥
तेवतायाः पराग्भावात्तद्वयन्नैव युज्यते।
ब्रह्मवित्त्वेन चेन्द्रस्य[3] वामदेवादिवद्भवेत् ॥
मामेवेत्यादिनिर्देशस्तस्माद्ब्रह्मपरो ह्ययम्।
एवञ्च हितहेतुत्वमुक्तमाञ्जस्यमश्नुते[4] ॥
नो एतदित्युपक्रम्य जगन्मिथ्यात्वकीर्तनम्।
उपपन्नतरन्तच्च बधादेः कीर्तनस्तुतिः ॥

अस्तित्वे च प्राणानां[5] निश्शेषसमितीन्द्रियस्थितिहेतुत्वं प्राणस्योच्यते। यावद्ध्यस्मिञ्छरीरे प्राणो वसति तावदायुरित्यायुः प्रदत्वञ्च प्राणस्योच्यते। न च पराग्भूतायाः देवतायास्तद्वयमुपपद्यते। एतच्छरीरासम्बन्धित्वात्। ब्रह्मणि तु सर्वजगत्कारणत्वादुपपद्यते।[6] न चोपक्रमे 'मामेव विजानीहि' (कौ० ब्रा० उ० ३।१) इत्येवकारयुक्तवाक्येनेन्द्रस्यैवोपास्यत्वप्रतिपादनात्प्राणधर्माणां प्राणकार्य्यबलाभिमानित्वाज्जीवधर्माणां वक्तृत्वादीनाञ्जीववत्त्वाद्ब्रह्मधर्माणाममृतत्वसर्वाधारत्वसर्वेश्वरत्वादीनां स्तुत्यर्थत्वादिन्द्रे–उपपत्तिरिति वाच्यम्। उपक्रमावगतहिततमत्वस्य पापनिवृत्तिमात्रपरत्वकल्पनस्यान्यायतयोपसंहार उच्यमानानां बहूनां ब्रह्मधर्माणां स्तुत्यर्थत्वकल्पनस्य सुतरां तथात्वेनोपक्रमोपसंहारैक्यावगतब्रह्मपरत्वेऽस्मिन्सन्दर्भे 'मामेव विजानाहि' (कौ० ब्रा० उ० ३।१) इत्यस्य प्रजापतिपरिचरणलब्धब्रह्मज्ञानेन्द्रस्य ब्रह्मणि स्वात्मैक्यनिश्चयदार्ढ्येन[7] मामेवेति निर्देशो वामदेवस्य 'अहं[8] मनुरभवम्' (ऋ० ४।२६।१) इत्यादि निर्देश इहोपपन्नः। अत एवोपसंहारे 'स म[9] आत्मेति विद्याद्' (कौ० ब्रा०

१. क० मा० 'त्वाष्ट्रंत्रिशीर्षा' इति मन्त्रे मूले त्रिशीर्षाणंत्वाष्ट्रमहनमरुन्मुख्यन्यतीन्सालावृकेभ्यः प्रायच्छन्' इति पाठः।
२. क० मा० 'च' इति पाठो नास्ति।
३. क० ख० मा० 'स्वातन्त्र्यम्' इति पाठः।
४. आञ्जस्यम् अभिधेयत्वमिति। इन्द्रपदप्रयोगसामर्थ्यान्निहि भाक्तं विवक्षितम्। स्वयमेवाभिधावृत्त्या प्रतिपादितत्वात्। क्वचिद्रूढ्यर्थस्वरूपम्। क्वचिच्चाञ्जस्यम्। अत्र केवलाञ्जस्यार्थे, इन्द्रशब्दप्रयोगेऽपि सिद्धान्तः सुस्थिरः।
५. क० मा० 'निःश्रेयसः' इति पाठः।
६. क० मा० 'ह्युप' इति पाठः।
७. घ० मा० 'दार्थ्येन' इति पाठः।
८. घ० मा० 'स्यामनुरभवामि' इति पाठः।
९. घ० मा० 'सम' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उ० ३८) इति भेदनिर्देश उपपद्यते। त्वष्ट्रवधादिपापसंश्लेष[1] कीर्तनं ब्रह्मज्ञानस्तुत्यर्थमेव। अतो ब्रह्मपरमेवेदं प्रकरणमिति। पुनः पूर्वपक्षवादी प्रकारान्तरेण प्रत्यवतिष्ठते 'गृह्णीम एतदिन्द्रो न ग्राह्य' इति ब्रह्ममात्रपरत्येनैकवाक्यत्वन्तु न मृष्यामहे। तथाहि—

प्रतर्दनोऽयं सन्दर्भः प्राणजीवपरात्मनाम्।
उपासनां विधत्तेऽतो न परस्यैव बोधकः॥
वाक्यप्रकरणाभ्याञ्च श्रुतेःप्राबल्यमिष्यते।
सहवासादिलिङ्गेन युक्ता प्राणश्रुतिस्त्विह॥
प्रज्ञात्मशब्दसामर्थ्याज्जीवो ग्राह्य इति स्थितिः।
आनन्दत्वादिधर्माणाङ्कीर्तनाद्ब्रह्मणो ग्रहः॥

अयं सन्दर्भः प्राणजीवपरमात्मनां प्रतिपादको न तु परमात्मन एव, त्रयाणामपि श्रुतिलिङ्गादीनां विद्यमानत्वात्। तत्र 'मामेव विजानीहि' (कौ० ब्रा० उ० ३।१) इति ब्रह्मोपासनविधिः। 'यत्त्वं मनुष्याय हिततमम्' (कौ० ब्रा० उ० ३।१) इति पूर्ववाक्ये हिततमत्वस्य कीर्तनात्। अत एव 'स म आत्मेति विद्यात् (कौ० ब्रा० उ० ३।८) इत्यात्मत्वेनोपासनं तस्य विधीयते 'प्राणोऽस्मि प्रज्ञात्मा तन्मामायुरमृतमित्युपास्व' (कौ० ब्रा० उ० ३।२) इति वाक्यं प्राणजीवयोरुपासनाविधायकम् 'आयुः प्रावः प्राणो वा आयुः प्राण उ वा-अमृतम्' (कौ० ब्रा० उ० ३।२) इत्यादिना प्राणस्यायुः प्रदत्वं सङ्कीर्त्य 'प्राणेन वा-अमुष्मिंल्लोकेऽमृतत्वमवाप्नोति प्रज्ञया सत्य[2] सङ्कल्पमिति' (कौ० ब्रा० उ० ३।२) व्यवस्थितं फलञ्च[3] सङ्कीर्त्यायुः प्रदत्वञ्च प्राणस्य पूर्वोक्तमुपपाद्य-अथ खल्वित्यादिना प्राणप्रकरणमुपसंहृत्य 'अथ यथास्मै प्रज्ञाय' इत्यादिना प्रज्ञाव्युत्पादनं प्रक्रम्य 'न वाचं विजिज्ञासोत वक्तारं तु विद्या' इत्यादिना जीवस्य व्युत्पादितत्वात्।

नन्वेकस्मिन्वाक्ये कथं-प्रणानां प्राधान्येन प्रतिपादनं, न च वाक्यभेदोऽस्त्विति वाच्यम्। तथा सति सहश्रुतानां सम्भूयैकार्थप्रतिपादकत्वस्य व्युत्पत्तिसिद्धस्य भङ्गापत्तेः। एक वाक्यत्वं ह्येकार्थबोधकत्वम्। एकश्चार्थः। प्रधानभूत एव ग्राह्योऽन्यथा सर्वत्रानेकार्थकत्वेनासम्भवापत्तेः। सह श्रुतानामेकार्थबोधकत्वानुरोधेनोपक्रमोपसंनारयोर्ब्रह्मधर्माणां कीर्तनेन ब्रह्मण एव प्राधान्यावगमात्। ब्रह्मबोधकत्वेनैकवाक्यत्वाङ्गीकारात्कथं प्राणजीवब्रह्मणां प्रतिपादनम्। न च प्राणादिश्रुत्यनुसारेणैकवाक्यता भङ्ग स्वीक्रियते, वाक्यापेक्षया श्रुतेः प्रबलत्वादिति वाच्यम्। श्रुतिर्नाम शक्तिः, सा च पदार्थमात्रोपस्थितिजनिका। नच पदार्थज्ञानं वाक्यस्य प्रयोजनं, किन्तु वाक्यार्थबोधः। तथा च वाक्यार्थबोधानुकूलवाक्यानुसारेणैव पदार्थनयनम्। ततश्च श्रुत्यपेक्षया वाक्यस्य प्राबल्यात्तदनुसारेणास्य सन्दर्भस्य ब्रह्मपरत्वमेव स्वोक्रियत इति चेदुच्यते। श्रुत्यपेक्षया वाक्यप्रकरणयोर्दुबलत्वेन श्रुत्यनुसारेण वाक्यप्रकरणयोर्बाधनस्यैव युक्तत्वेन वाक्यं भङ्त्वा प्राणजीवपरमात्मनां त्रयाणामुपासनं स्वीक्रियते।

न च पदार्थज्ञानस्य वाक्यार्थप्रतीत्युद्देश्यकत्वेन तदनुसारेण पदानामेवार्थान्तरकल्पनं युक्तमिति वाच्यम्। श्रुतेः प्राबल्यानुसारेण वाक्यभञ्जनस्य श्रुतिलिङ्गाधिकरण 'देताधिकरण न्याय' सिद्धत्वेन श्रुतेरेवाधीनयावतोंऽशस्यैकवाक्यता सिध्यति तावज्जन्यप्रतीत्युद्देश्यकत्वेन पदार्थप्रतोतेरुपपन्नत्वाच्च।

१. घ० मा० 'संक्षेपः' इति पाठः।
२. घ० मा० 'मत्य' इति पाठः।
३. घ० मा० 'फलत्वम्' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत एव—

[1]साक्षाद्यद्यपि कुर्वन्ति पदार्थप्रतिपादनम् ।
वर्णास्तथापि नैतस्मिन्पर्यवस्यन्ति निष्फले ।।
वाक्यार्थमितये तेषां प्रवृतौ नान्तरीयकम् ।
पाके ज्वालेव काष्ठानां वाक्यार्थप्रतिपादनम्[2] ।।

इति भट्टपादोक्तमपि वाक्यार्थत्रयपक्षेऽपि सङ्गच्छते ।

प्रकृते च 'सह ह्येतावस्मिञ्छरीरे वसतस्सहोत्क्रामत' इति द्विवचनसहवासोक्तिभ्यां भेदावगमेन तत्सहकृतप्राणश्रुत्या प्रज्ञात्मशब्देनानन्दत्वादिलिङ्गैश्च त्रयाणां ग्रहणमिति । सिद्धान्तस्तु—

दुर्बलस्य प्रमाणस्य तात्पर्यसहितस्य हि ।
तद्धीनात्प्रबलान्मानात्प्राबल्यं सर्वसम्मतम् ।।
उपक्रमादितात्पर्यलिङ्गोपेतात्प्रमाणतः ।
श्रुतेर्दौर्बल्यमेवेह वाक्यात्प्रकरणादपि ।।
अतस्सर्वोऽपि सन्दर्भः परमात्मपरो भवेत् ।
पूर्वञ्च[3] सति वाक्यैक्यमुपपन्नं भविष्यति ।।
सहवासादिलिङ्गञ्च भेदेनोपाधिकेन वै ।
नेतव्यमत एव प्रागभेदञ्चैव बोधितः ।।

दुर्बलमपि हि प्रमाणं तात्पर्योपेतमाबलत्तात्पर्यहीना[4] द्बलवदत एव जामि वा[5] एतद्यज्ञस्य क्रियत 'इत्युपक्रमो जामित्वाये[6] त्युपसंहाराच्चैकवाक्यत्वं प्रतीयत इति । तदनुसारेरण विष्ण्वादिवाक्यानामर्थवादत्वं स्वीकृतम् । [7]जामित्वोपक्रमादजामित्वोपसंहृतेः[8] । वाक्यं तन्मध्यपाताच्च विष्णादेरर्थवादतेति वदरध्वरमीमांसकैरिहापि ब्रह्मणि प्रकृतसन्दर्भस्योपक्रमोपसंहारमध्ये परामर्शैस्तात्पर्य्यावगमेन प्राणश्रुतिभञ्जनपूर्वकं ब्रह्मबोधकतयैक-

१. भामतीसमन्वयाधिकरणे (पृ० ७४ मिश्रपादेनोक्तं 'यथाहुः शास्त्रविदः' पूर्वं 'तस्मात्पदानां स्वार्थमभिदधतामेकप्रयोजनवत्पदार्थपरतयैकवाक्यता । तथा च तत्तदर्थान्तरविशिष्टैकवाक्यार्थप्रत्यय उपपन्नो भवति' इति । तदनन्तरं 'साक्षाद्यद्यपि' पदमुद्धृत्य' तथा चार्थान्तरसंसर्गपरतामात्रेण वाक्यार्थप्रत्ययोपपत्तौ न कार्यसंसर्गपरत्वनियमः पदानाम् । एवञ्च सति कूटस्थनित्यब्रह्मरूपपरत्वेऽप्यदोष इति' ।

२. वाक्यार्थ मातृकावृत्ती पृ० ५ उद्धृतम् ।

३. क० मा० 'एवंच' इति पाठः ।

४. घ० मा० 'प्रबलम्' ति पाठः ।

५. घ० मा० 'आप्ति' इति पाठः ।

६. घ० मा० 'दत्वाये' इति पाठः ।

७. घ० मा० 'आमित्व' इति पाठः ।

८. घ० मा० 'एकत्वोपसंहृते' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वाक्यत्वमेव स्वीकार्य्यम्, नतु वाक्यत्रैविध्यम् 'स ह ह्येतावस्मिञ्छरीरे वसत' इति प्राणान्तः[१] करणरूपोपाधिभेदमादाय द्रष्टव्यम्। अत एव 'यो वै प्राणः सात्मज्ञ' इत्यादिनां[२] व्यतिहारमुखेन पूर्ववाक्याभेद एव दृढोक्तः। अतो ब्रह्मपर एवायं सन्दर्भ इति सिद्धम्।

इति श्रीमत्परमहंसपरिव्रजकाचार्य्यसर्वतन्त्रस्वतन्त्र
श्रीमदद्वैतानन्दसरस्वतीश्रीचरणारविन्दभृङ्गायमानस्य
श्रीस्वम्प्रकाशानन्दस्य कृतिषु वेदान्तनयभूषणे
प्रथमाध्यायस्य प्रथमपादः

अथ प्रथमाध्याये द्वितीयपादः

सर्वत्र प्रसिध्यधिकरणम्

सर्वत्र प्रसिद्धोपदेशात् ॥१॥

पूर्वस्मिन्पादे स्पष्टब्रह्मलिङ्गानि वाक्यानि तानि विचारितानि। इह तु पूर्वपादप्रतिपादितसर्वज्ञत्वाद्युपजीव्यसविशेषविषयान्यस्पष्टब्रह्मलिङ्गानि[३] प्रायसो निरूप्यन्ते। छन्दोगास्समामनन्ति 'सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत' (छा० ३।१४।१) इत्युपक्रम्य 'स क्रतुं कुर्वीत' (छा० ३।१४।१) 'मनोमयप्राणशरीरो भारूपः सत्यसङ्कल्प आकाशात्मा सर्वकर्मा' (छा० ३।१४।२) इत्यादि।

तत्र संशयः। किम्मनोमयत्वादिधर्मे जीव उपास्य उत ब्रह्मेति तत्र पूर्व पक्षः—

जीव एव ह्युपास्योऽत्र[४] मनः प्राणादियोगतः।
विवक्षितो न तु ब्रह्म मन आदेरभावतः॥
सर्वमित्यादिवाक्ये हि ब्रह्मोपास्तिर्न बोध्यते।
किन्तु तच्छेषभूतस्य समादेस्तु विधिर्भवेत्॥
तत्रोपास्तिविधाने हि वाक्यभेदः प्रसज्ज्यते।
प्राप्तोपास्त्यनुवादेन गुणानां बोधने सति॥
तस्मान्मनोमयत्वादिगुणैर्जीवोऽत्र बोध्यते।
तस्मिश्चेत्सर्व कर्मत्वाद्युपपन्नङ्कथञ्चन॥

'मनोमयः प्राणशरीर' (छा० ३।१४।२) इत्यादिवाक्ये जीव एवोपास्यत्वेन विवक्षितः मनः प्राणसम्बन्धस्य तस्मिन् सम्भवात्।

१. क० मा० 'च' इत्यधिक पाठः।
२ घ० मा० 'सा प्रज्ञेस्यादि' इति पाठः।
३. क० मा० 'मयानि' इति पाठः।
४. घ० मा० 'जीव एवोपास्यो त्र' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न तु 'ब्रह्म तस्मिन्नप्राणो ह्यमना' इति श्रुत्या मनःप्राणनिषेधेन मनोमयत्वाद्यनुपपत्तेः। ननु[१] प्राणशरीरपदस्य बहुव्रीहित्वेन सर्वनामतुल्ययोगक्षेमतया[२] पूर्वप्रस्तुतपरामर्शकतया पूर्वं[३] ब्रह्मणः 'सर्वं खल्विदं ब्रह्म' (छा० ३।१४।१) इति वाक्ये प्रस्तुततया तस्यैव प्रतिपादकं तत्पदमिति वक्तव्यम्। तस्तिश्च मन आदि सम्बन्धोऽपि[४] सर्वजगदुपादानत्वादुपपन्नः। एवञ्च सर्वकर्मत्वादयोऽप्युपपन्नाः। [५]तेषाञ्जीवेऽनुपपन्नत्वादिति चेन्नात्र ह्यु पासा(सना)दुपादानत्वादुपपन्नविधिर्न 'सर्वं खल्वि' (छा० ३।१४।१) इति वाक्ये तथा सति तद्वाक्ये विहितोपासनानुवादेन मनोमयत्वादीनां बहूनां गुणानां विधाने वाक्यभेदापत्तेः। किन्त्वेकगुणश्रवणात् 'सर्वं खल्विदं ब्रह्म' (छा० ३।१४।१) इति वाक्यं 'स क्रतुं कुर्वीत' (छा० ३।१४।१) इति वाक्यविहितोपासनानुवादेन शमरूपाङ्गविधिपरं 'स क्रतुं कुर्वीत' (छा० ३।१४।१) इति वाक्येन ध्याने विधीयमाने तत्र विषयाकांङ्क्षां 'मनोमय प्राणशरीर' (छा० ३।१४।२) आदिपदं विषयसमर्पकम्[६] स्यात्। तत्र च चित्रगुरित्यादिशब्दे प्रसिद्धतरत्वेन स्वामित्वमेव[७] प्रतीयते। तद्वदिहापि प्राणमनसो जीवभोगसाधनत्वमेव मनोमयप्राणशरीरपदाभ्यां[८] प्रतीयते, ततश्च जीव एवोपास्य इति निर्णीयते। बहुव्रीहिरूपञ्च प्राणशरीरपदं पूर्वोपस्थितं 'स क्रतुम्' (छा० ३।१४।१) इति वाक्योपात्तञ्जीवं परामृशति 'सर्वं खल्विति' (छा० ३।१४।१) वाक्यन्तु नास्य विषयसमर्पकमुत्पत्तिविशिष्टगुणावरोधात्। एवञ्चाणीयान्[९] ब्रीहेर्वेति प्रतिपाद्यमानमणीयस्त्वमप्युपपनन्नतरं भवति 'एतद्ब्रह्म' (छा० ३।१४।४) इति च ब्रह्मशब्द इदं ब्रह्म यातीत्यत्रैव[१०] जीव एव नेयः 'सर्वकर्मसर्वकामत्वादिकम्' (छा० ३।१४।२) जीव एव कर्मत्वस्य क्रमेण सम्भवात्। तस्मिन्नेवोपपन्नं च 'बालाक्यधिकरण न्यायेन' कर्मशब्दस्य क्रियमाणजगत्परत्वेन जीवे च सर्वजगत्कर्तृत्वस्य बाधाद्ब्रह्मैव ग्राह्यमिति वाच्यम्। तत्र हि रूढ्योः परस्परं कलहेन योगार्थ एवाश्रितः। इह तु धर्माधर्मरूढेरुन्मेषकस्य[११] 'मनोमयप्राणशरीर' शब्दस्य[१२] जीवप्रतिपादकस्य सत्वेन धर्माधर्मयोरेव कर्मशब्दार्थत्वेन तयोश्च ब्रह्मण्यसम्भवेन[१३] जीव एव स्वरसत्वाज्ज्यायस्त्वादिकश्चाविद्योपाधिकस्य तस्योपपन्नमिति।

सिद्धान्ततस्तु

सर्वमित्यादिवाक्येन ब्रह्मैव प्रतिपाद्यते।
प्राधान्येनान्यथा तु स्यादिदं प्रदमनर्थकम्॥

---

१. क० मा० 'ननु' इति पाठो नास्ति।
२. घ० मा० 'च्छेम' इति पाठः।
३. क० मा० 'चेत्यधिकः पाठः।
४. घ० मा० 'मन्व पि' इति पाठः।
५. घ० मा० 'जीबे नुपपन्न' इति पाठः।
६. घ० मा० 'स्वाविषय' इति पाठः।
७. घ० मा० 'स्वात्व' इति पाठः।
८. घ० मा० 'शरीयम्याम्' इति पाठः।
९. घ० मा० चापि' इति पाठः।
१०. घ० मा० 'ब्रह्मयाजी' इति पाठः।
११. क० ख० घ० मा० 'रूढेः' इति पाठः।
१२. घ० मा० 'शरीरकस्य' इति पाठः।
१३. घ० मा० ,ब्रह्मन्य' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

किञ्च प्राणशरीरादिपदानां सर्वनामवत् ।
प्रस्तुतार्थावबोधित्वाद्ब्रह्म बोधकता मता ॥
अतो ब्रह्मण एवास्मिन्नुपासनविधित्सया ।
क्रतुमित्यादिवाक्यस्य प्रवृत्तिरिति निर्णयः ॥
एवञ्चोत्तरसन्दर्भस्सर्वदैवोपपद्यते[1] ।
सत्यसङ्कल्प इत्यादिर्न तु जीवे कथञ्चन ॥
प्राणस्य मनसो [2]योगाद्ब्रह्मण्यप्युपपद्येत ।
तत्क्रतुन्यायतस्ते हि ग्राह्ये दैवे निभाविके (?) ॥

'स क्रतुं कुर्वीत मनोमयः प्राणशरीर' (छा० ३।१४।१) इति वाक्ये ब्रह्मैवोपास्यत्वेन विवक्ष्यते ।

'सर्वं खल्विदं ब्रह्म' (छा० ३।१४।१) इति वाक्ये ब्रह्मणः प्राधान्येन विवक्षितत्वात् । तत्र हि वाक्ये 'इदं सर्वम्' इत्युद्दिश्य ब्रह्मत्वन्न विधीयते तथात्वे-इदम्पदवैयर्थ्यापत्तेः । किन्त्विदं[3] ब्रह्मेत्युद्दिश्य सर्वत्वं विधीयते । तत्र चेदम्पदेन गायत्रीवाक्यस्थमनुकृष्यते । तथा च ब्रह्माधिकारबलादिह ब्रह्मोपास्यमिति निर्णीयतोऽन्यथा तदाधिकारवैयर्थ्यात् । न चास्मिन्पक्षे ब्रह्मण एव सर्वात्मकत्वमायाति[4] । न तु सर्वस्य ब्रह्मात्मकत्वं, तथा च शान्तिविधौ हेत्वर्थवादतयान्वयो न स्यात् । सर्वस्य ब्रह्मत्वे तु ब्रह्मातिरेकेण वस्तुनोऽभावत्वाद्रागद्वेषादि स्यादिति'[5] समविधिनिषेधत्वमुपापद्यत इति वाच्यम् । ब्रह्मणस्सर्वात्मकत्व उक्तेऽर्थात्सर्वस्य ब्रह्मात्मकत्वमायाति 'तज्जलानिति' (छा० ३।४।१) तत्र हेतुर्जायत इति जो लीयत इति लः अनितीत्यन् त्रयणां कर्मधारयः[6] । तस्य जलान् तज्जलानिति षष्ठीतत्पुरुष इति छान्दस्या प्रक्रियया विभक्तेर्लुक् । ततश्च तज्जत्वात्तल्लत्वात्तदनत्वाच्च[7] ब्रह्मातिरेकेण[8] तत्रास्तीति लभ्यते, ततश्च शमविधिसिद्धिः । किञ्च सर्वानुवादेन ब्रह्मत्वविधाने प्रकृतविरोधः, ब्रह्मानुवादेन सर्वत्व विधाने तु प्रकृतसर्वकर्मत्वाद्युपपत्तिः । तस्माद्ब्रह्म प्रधानमेव वाक्यम् । किञ्च 'सर्वं सल्विति' (छा० ३।४।१) वाक्यस्य [9]शमविधिशेषत्वेऽपि प्राणशरीरपदस्य बहुव्रीहिरूपस्य सर्वनामतुल्यार्थतया सर्वनाम्नश्च पूर्वप्रस्तुतार्थतया पूर्वप्रस्तुतब्रह्म बोधकत्वम् ।

१- क० मा० 'थे' इति पाठः ।

२. क० मा० 'गो' इति पाठः ।

३. बृंहणत्वादिधर्मावच्छिन्नप्रपञ्चाधिठानं ब्रह्मेत्युद्देश्यपदम् । तत्र सकलप्रपञ्चमिथ्यात्वं विधीयते । तथा च ब्रह्मण्यतिरिक्तं सर्वञ्जगदनित्यमिति । यत्र यत्साध्यते तद्विधेयं, यस्मिन् साध्यते ततुद्देश्यम् । प्रकृते ब्रह्मणि दृश्यमानं प्रपञ्चमिष्षात्वं साध्यते । अतो ब्रह्मनिष्ठोद्देश्यतानिरूपित यत्किञ्चिद्दृश्यमानप्रपञ्चनिष्ठविधेयता तादृशविधेयताशालिशाब्दबोधः ।

४. घ० मा० 'माति' इति पाठः ।

५. घ० मा० 'ति' इति पाठो नास्ति ।

६. घ० मा० 'ङर्मधारय' इति पाठः ।

७. घ० मा० 'तजनत्वात् इति पाठः ।

८. घ० मा० 'ब्रह्मातिरेकेत्र' इति पाठः ।

९. घ० मा० 'सम' इति पाठ :

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न च 'स क्रतुं कुर्वीत' (छा० ३।४।१) इति वाक्ये तत्पदेन जीवस्य प्रस्तुतत्वात्तत्परामर्श एव न्याय्यः। अन्यथाक्षेपादेव तल्लाभेन तत्पदवैयर्थ्यप्रसङ्गादिति वाच्यम्। जीवे सत्यसङ्कल्पात्वादीनामसम्भवेन तत्पदस्य च यत्पदानुसन्धानविचिकित्सास्तीति[1] वाक्यस्थयत्पदेनापेक्षितत्वेन सार्थक्योपपत्त्या जीवपरामर्शस्य न्याय्यत्वेन-ब्रह्मबोधकत्वोपपत्तेः। न च जीवेऽपि 'सत्यसङ्कल्पत्वादयो[2] 'धर्मा ब्राह्मलौकिकपित्रादिविषयसङ्कल्पसत्यतादिकमादाय योजयितुं शक्या इति वाच्यम्। एवमपि 'ज्यायान् पृथिव्या' इत्यादिसर्वापेक्षया ज्यायस्त्वस्य व्युत्पाद्यमानस्या-विद्योपाधिके जीवेऽनुपपत्तेः।

न चाधिष्ठानचैतन्याभेदविवक्षया तदुपपद्यत इति वाच्यम्, तथात्वे हि जीवत्वस्यैव बाधितत्वेन जीवे ज्यायस्त्वानुपपत्तेः। अणीयस्त्वन्तु जीवगतं ब्रह्मणि योजयितुं शक्यम्। अधिष्ठानज्ञानेनाध्यस्येवाध्यस्तस्य ज्ञानेनाधि-ष्ठानज्ञानस्याभावत्। तदुक्तम् मिश्रैः

[3]समारोप्यस्वरूपेण विषयो रूपवान् भवेत्।
विषयस्य तु रूपेण समारोप्यन्नरूपवत्॥

एवञ्च सर्वकर्मत्वमपि 'बालाक्यधिकरणन्यायेन' सर्वकार्य्यपरं, तच्च ब्रह्मणोऽन्यस्य नोपपद्यत इति ब्रह्मैवोपास्यम्। न च मनः प्राणयोस्सबन्धो ब्रह्मण्युपपन्न इति वाच्यम् 'तत्क्रतु न्याय' व्युत्पादनपूर्वकमिहोपासनाप्रस्तावेनोपास्यानां गुणानां फलत्वनियमेन दुःखसाधनीभूतप्राणमनसोः प्रार्थनीयत्वाभावेन 'तद्वै दैवं मनो येनानन्येव भवति सदैवप्राणो यस्सञ्चरञ्चासञ्चरञ्च[4] न व्यथत'इति श्रुत्युक्तदैवप्राणमनसोर्ग्रहणात्। एवञ्च सत्युपास्योपासकभावोऽपि [5]पञ्चाग्नि-विद्यायामिव[6] कथञ्चिन्नेयः। मुख्यतयैवोपपत्तेरिति सिद्धं मनोमयादिवाक्यं ब्रह्मपरमिति।

अत्रधिकरणम्

अत्ता चराचरग्रहणात्॥ २॥

कठवल्लीषु पठ्यते 'यस्य ब्रह्म च क्षत्रञ्चोभे भवत ओदनः मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः' (क० १।२।२५) इति। तत्र संशयः। किमत्रोदनप्रतिसम्बन्धि[7] त्वेन प्रतीयमानोऽत्ता जीव उताग्निरथवा परमात्मेति।

---

१. घ० मा० 'यस्य स्माद्धान' इति पाठः।

२. छा० ८।२ स यदि पितृलोककामो भवति सङ्कल्पादेवास्य पितर समुत्तिष्ठन्ति' श्रुतिवाक्यमुद्दिश्य सत्यकल्पत्वादयो धर्मा निर्दिष्टा, न तु तात्पर्यविषयीभूतधर्मा इति।

३. समारोप्यस्य इति मूलग्रन्थे पाठः समारोपितस्य हि रूपेणभुजङ्गस्य भीषणत्वादिना रज्जू रूपवती, न तु रज्जुरूपेणाभिग-म्यत्वादिना भुजङ्गो रूपवान्। तदा भुजङ्गस्यैवाभावात्कि रूपवत्। भुजङ्गदशायान्तु नास्ति वास्तवी रज्जुः। तदिह समारोपितजीवरूपेण वस्तुसद्ब्रह्म रूपवद्युज्यते, न तु ब्रह्मरूपैर्नित्यत्वादिभिर्जीवस्तद्वान् भवितुमर्हति, तस्य तदानीम-सम्भवात्। तस्माद्ब्रह्मलिङ्गदर्शनाज्जीवे च तदसम्भवाद्ब्रह्मैवोपास्यन्न जीव इति सिद्धम्। एतदुपलक्षणाय च 'सर्वं खल्विदं ब्रह्म' इति वाक्यमुपन्यस्तमिति। (भामती० पृ० ११३)

४. क० मा० 'असञ्चरन' इति पाठो नास्ति।

५. पञ्चाग्निविद्या 'वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति' (छा० उ० ५।३।३) तत्र भाष्यकारसमन्वयः 'द्युपर्जन्यपृथ्विपुरुषयोषित्सु पञ्चस्वग्निषु श्रद्धासोमवृष्ट्यन्नरेतोरूपा पञ्चाहुती इति' (शां० भा० ३।१।१) तद्वदेव प्रकृतेऽपि बोध्यः।

६. घ० मा० 'मंश्वग्नि' इति पाठः।

७. घ० मा० 'सम्बम्बि' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तदर्थंश्च किमोदनशब्देन भोज्यभोज्यत्वान्यतरल्लक्ष्यते किम्वा नाश्यत्वमिति संशयः।

तत्र पूर्वः पक्षः—

यस्य ब्रह्मेति वाक्येन जीव एवाभिधीयते।
भोक्तृत्वसम्भवात्तस्य न ब्रह्म तदसम्भवात् ॥
अत्र चौदनशब्देन भोज्यो वा भोग एव वा।
लक्ष्यते सुप्रसिद्धत्वान्न तु नाश्यो प्रसिद्धितः ॥
तयोस्सम्बन्धिता जीवे न तु ब्रह्मण्यभोक्तृता।
अथवाग्निरिह ग्राह्यो न तु ब्रह्मात्र गीयते ॥

अत्रौदनप्रतिसम्बन्धित्वेन प्रतीयमानो जीव एव, तस्य भोक्तृत्वोपपत्तेः। न तु परमात्मा तस्याभोक्तृत्वात्। न चौदनशब्दस्य विनाश्यलक्षकत्वेन[१] तत्प्रतिसम्बन्धिनो नाशकत्वप्रतीतेः परमेश्वर एव स्वीकार्य्यः। तस्य सर्वसंहर्तृत्वोपपत्तेः। न तु जीवस्य तदनुपपत्तेरिति वाच्यम्। ओदनशब्दस्य भोज्यभोग्यान्यतरलक्षकत्वेन तत्प्रतिसम्बन्धिनोऽपि भक्षकभोक्त्रान्यतररूपत्वेन[२] व्याघ्रादिजीवविशेषजीवसामान्यान्यतरस्य प्रतीतेः। भोज्यत्वादिलक्षणा च लोकप्रसिद्धत्वादङ्गीक्रियते। अप्रसिद्धत्वाच्च न नाश्यत्वलक्षणा स्वीक्रियते। न च नाशकत्वलक्षणायामपीश्वरो गृह्यते। अग्नेरपि ब्राह्मणादिसंहर्तृत्वोपपत्तेः। [३]सर्वसंहर्तृत्वस्याश्रवणाल्लक्षणायाश्च मानाभावादिति।

सिद्धान्तस्तु :

मृत्यूपसेचनोक्त्या[४] हि नाश्यमोदनशब्दतः।
लक्ष्यते तस्य सम्बन्धि संहर्तेश्वर एव हि ॥
वाक्यशेषप्रसिद्धेश्च लौकिकी दुर्बला मता।
अतो न भोज्यं भोग्यं वा लक्ष्यमित्येव निर्णयः ॥
मृत्यूपसेचनोत्थैव सर्वस्य जगतो ग्रहः।
भवेद्ब्रह्मादिशब्देन तस्मात्सर्वविहन्तृता ॥
लब्धा[५] सा तु न जोवेऽपि नाप्यग्नावुपपद्यते।
दुर्विज्ञेयत्वलिङ्गाच्च[६] जीवो नैवेति निर्णयः ॥

---

१. घ० मा० 'विश्राश्य' इति पाठः।
२. घ० मा० 'भोत्रा' इति पाठः।
३. घ० मा० 'त्वस्यात्रवणा' इति पाठः।
४. घ० मा० 'नोत्या' इति पाठः।
५. घ० मा० 'लच्चा सा' इति पाठः।
६. लक्ष्यलक्षणभावमुरीकृत्य शास्त्रप्रमाणलिङ्गेनापि ज्ञातुमशक्यत्वाद् विज्ञेयत्वलिङ्गमित्युक्तम्। अतो लौकिकपरीक्षकबुद्धिवैषम्यबलादपि न जीव अपितु ब्रह्मैवेति निर्णयः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्रौदनशब्देन नाश्यत्वं लक्ष्यते 'मृत्युर्यस्योपसेचनम्' (क० १।२।२५) इति श्रुत्या मृत्योरुपसेचनत्वोक्तेः। 'उपसेचनत्वञ्च दध्यादेः' स्वयमद्यमानत्वे सतीत्यदनसाधनत्वम्। प्रकृते च मृत्योरुपसेचनत्वं स्वयं नाश्यमानत्वे सतीतरस्यौदनस्य नाशकत्वं स्वीकार्यम्। तथाचौदनवदस्य नाश्यत्वमन्ततः पर्यवस्यति। नाशकमृत्युवाचकपद-समभिव्याहारादेव ब्रह्मक्षत्रपदस्य च मृत्युनाश्यसर्वपरत्वं स्वीकृत्य सर्वसंहर्तृत्वमर्थो वाच्यः। तत्प्रतिसम्बन्धी[१] च परमेश्वर एव स्वीकार्य्यः न त्वग्न्यादिः। ब्रह्मक्षत्रपदयोश्च लक्षणाभोज्यत्वादिषु पूर्वपक्षेऽपि तुल्या[२]। ब्रह्मक्षत्र-मात्रस्य भोज्यत्वं भोग्यत्वन्नियतम्[३]। नाश्यत्वलक्षणा च वैदिकत्वेन शीघ्रोपस्थितत्वेन प्रबला भोज्यत्वादिलक्ष-णातः। तस्मान्न जीवग्रहणम्। किञ्च 'क इत्था वेद यत्र स' (क० १।२।२५) इति श्रुतिदुर्विज्ञेयत्वं प्रतिपाद्यते। न च तदीश्वरादन्यस्य सम्भवति जीवानां प्रसिद्धतरत्वेन तदनुपपत्तेः। न च 'न जायते म्रियते[४]' वेत्यनेन वाक्येन जीवस्य प्रस्तावात्[५] 'यत्र स' इति वाक्यस्थ तत्पदस्य जीवबोधकत्वेन तथा श्रुतस्यात्तुरीश्वरत्वासम्भव इति वाच्यम्। अस्य प्रकरणस्य परमात्मापरत्वेन जन्मादिनिषेधस्य[६] जीवाभेदविवक्षयोपपन्नत्वेन तस्मिन्परमेश्वरस्या-त्तुस्स्तुतिसम्भवात्तस्मादत्ता परमेश्वर इति सिद्धम्।

गुहाप्रविष्टाधिकरणम्

गुहां प्रविष्टावात्मानौ हि तदर्शनात्॥ ३॥

काठके 'ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्धे छायातपौ ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिणाचिकेता' (क० १।३।१)। इति श्रूयते। तत्र संशयः। किमत्र बुद्धिजीवौ गृह्येते–उत जीवपरमात्मानाविति। किम्प्राप्तम्:

१. घ० मा० 'सम्वत्वीव' इति पाठः।
२. घ० मा० 'तुल्य' इति पाठः।
३. घ० मा० 'निपतम्' इति पाठः।
४. घ० मा० 'मृयते' इति पाठः।
५. घ० मा० 'प्रस्तावाद्यत्र' इति पाठः।
६. जगज्जन्माद्यभिन्ननिमित्तोपादानकारणत्वेऽपि स्वतः परमात्मनो जन्म न क्वापि सिद्धम्। अत एव जीवाभेदनित्यानन्द-लक्षणात्मकं तस्मिन्ब्रह्मणि चराचरात्तृत्वं स्तुतिमात्रपरन्न तु वास्तवम्। तथापि स्तुतिपरत्वसम्भवात्परमेश्वर अत्तेति चराचर-ग्रहण पूर्वकमिति। अत एव निषेधस्येत्यस्याभिप्रायो जन्माद्यत्यन्ताभाव इत्युपोद्वेलितः।

अत एव भामतीकार, अत्तात्र परमात्मा, कुतः चराचरग्रहणात्। 'उभे यस्यौदन' इति, 'मृत्युर्यस्योपसेचनम्' इति च श्रूयते। तत्र यदि जीवस्य भोगायतनतया तत्साधनतया च कार्यकारणसंघातः स्थितः न तर्ह्योदनः। नह्योदनो भोगायतनं, नापि भोगसाधनम्, अपितु भोग्यः। न च भोगायतनस्य भोगसाधनस्य वा भोग्यत्वं मुख्यम्। नचात्र मृत्युरूप-सेचनतया कल्प्यते। नच जीवस्य कार्यकरणसंघातः ब्रह्मक्षत्रादिरूपो भक्ष्यः, कस्यचित्क्रूरसत्त्वस्य व्याघ्रादेः कश्चिद्भवेत्, न तु सर्वथा सर्वजीवस्य। तेन ब्रह्मक्षत्रविषयमपि सर्वजीवस्यात्तृत्वं न व्याप्नोति, किमङ्ग पुनर्मृत्यूपसेचनव्याप्तं चराचरम्। न चोदनपदात्प्रथमावगतभोग्यत्वानुरोधेन यथासम्भवमत्तृत्वं योज्यत इति युक्तम्। न ह्योदनपदं श्रुत्या भोग्यत्वमाह, किन्तु लक्षणया। न च लाक्षणिकभोग्यत्वानुरोधेन 'मृत्युर्यस्योपसेचनम्' इति च 'ब्रह्म च क्षत्रञ्च' इति च श्रुती सङ्कोचमर्हतः। न च ब्रह्मक्षत्रे एवात्र विवक्षिते, मृत्यूपसेचनेन प्राणभृन्मात्रोपस्थापनात्। प्राणिषु प्रधानत्वेन च ब्रह्मक्षत्रोपन्यासस्योपपत्तेः, अन्य निवृत्तेरशाब्दत्वात्, अनर्थत्वाच्च। तथा च चराचरसंहर्तृत्वं परमात्मन एव नाग्नेः। नापि जीवस्य तथा च 'न जायते म्रियते वा विपश्चित्' इति ब्रह्मणः प्रकृतस्य न हानं भविष्यति 'क इत्था वेद यत्र स' इति च दुर्ज्ञानतोपपत्स्यते। जीवस्य तु सर्वलोकप्रसिद्धस्य न दुर्ज्ञानता। तस्मादत्ता परमात्मैवेति सिद्धम्। (भामती अत्रधिकरण पृ० २५९)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बुद्धिजीवाविह ग्राह्यौ प्रविष्टत्वेन हेतुना ।
न ब्रह्मव्यापिरूपत्वात् प्रवेशानुपपत्तितः ॥
जडाजडत्वरूपेणच्छायातपसरूपता ।
उपपन्ना तयोर्नैव जीवात्मपरमात्मनोः ॥
पुण्यलोकेन सम्बन्धात्तयोरेव परिग्रहः ।
भोगोपकरणत्वाभ्यामतो हेतोस्तयोर्ग्रहः ॥

'ऋतं पिबन्तावित्यत्र'[1] प्रतिपाद्यौ बुद्धिजीवौ गुहायां प्रविष्टत्वस्य सम्भवात् । [2]नत्वीश्वरपरत्वं तस्य व्यापित्वेन गुहायां प्रवेशासम्भवात् । किञ्च छायातपाविति च्छायात्वेनातपत्वेन च निरूपणं क्रियमाणं बुद्धिजीवयोश्चेतनाचेतनत्वेनोपपद्यते । ईश्वरजीवयोस्तु चेतनत्वेन छायातपत्वानुपपत्तेः 'सुकृतस्य लोक' (क० १।३।१) इति च पुण्यसम्बन्धिलोकवर्त्तित्वं बुद्धिजीवयोरुपपद्यते । जीवस्य भोक्तृत्वोपपत्तेः । मनसश्च[3] भोगसाधनत्वोपपत्तेः । नतु[4] ब्रह्मणो भोगतत्साधनत्वयोरभावादिति ।

प्राप्ते ब्रूमः :-

ऋतपानेन[5] लिङ्गेन जीवे तत्रावधारिते ।
द्वितीयोऽस्य 'क' इत्यत्र व्यपेक्षायां परात्मनः ॥
चेतनत्वेन साजात्याद्ग्रहणं प्राप्यमेव[6] हि ।
अतो जीवेश्वरावत्र ग्राह्यौ जोवधियौ नहि ॥

---

१. क० मा० 'इति मन्त्र' इति पाठः ।

२. क० मा० 'तु जीवेशो ईश्वरस्य' इति पाठः ।

३. ख० मा० 'मनश्च' इति पाठः ।

४. घ० मा० 'न दु' इति पाठः ।

५. (क) ऋतं सत्यमावश्यकं कर्मफलं पिबन्तौ भुञ्जानौ सुकृतस्य लोके सम्यगर्जितस्यादृष्टस्य कार्ये देहे वर्तमानौ परस्य ब्रह्मणोऽर्धं स्थानमर्हतीति परार्धं हृदयं, तस्मिन् परमे श्रेष्ठे या गुहा नभीलक्षणा तां प्रविश्य स्थितौ छायातपवन्मिथो विरुद्धौ तौ च ब्रह्मविदः कर्मिणश्च वदन्ति । (ब्र० सू० न्या० नि० पृ० गुहा० पृ० २६१) ।

(ख) रत्नप्रभाकारस्तु-अत्तृवाक्यानन्तरवाक्यस्यापि ज्ञेयात्मनि समन्वयमाह गुहामिति, ऋतम्-अवश्यंभाविकर्मफलं पिवन्तौ भुञ्जानौ सुकृतस्य कर्मणो लोके कार्ये देहे परस्य ब्रह्मणोऽर्धं स्थानमहतीति पराध्यं हृदयं परमं श्रेष्ठं परमं श्रेष्ठं तस्मिन् या गुहा नाभीरूपा बुद्धिरूपा वा तां प्रविश्य स्थितां छायातपवन्मिथो विरुद्धौ तौ च ब्रह्मविदः कर्मिणश्च वदन्ति । त्रिर्णाचिकेतोऽग्निर्चितो इति यैस्ते त्रिणाचिकेताः । तेऽपि वदन्तीत्यर्थः । नाचिकेतवाक्यानामध्ययनं तदर्थज्ञानं तदनुष्ठानञ्चेति त्रित्वं बोध्यम् ।

(रत्नप्रभा गुहा० पृ० २६१)

६. क० मा० 'न्याय्य' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रवेशो ब्रह्मणोऽप्यस्ति ह्यन्तर्यामित्वरूपतः ।
पुण्यसम्बन्धिलोके तु वर्तित्वमत एव नः ।।
छायातपस्वरूपत्वं[1] स्वतन्त्रपरतन्त्रयोः ।
उपपत्तिमदत्रोक्तञ्जीवात्मपरमात्मनोः ।।

'ऋतं पिबन्ताविति' (क० १।३।१) मन्त्रे ऋतपानकर्मफलभोगरूपम् । तच्च जीवस्येत्येकस्य[2] जीवत्वे निर्धारिते द्विवचनावगतद्वित्वस्य पूरकः कथंभूत इत्याकाङ्क्षायां सजातीयेन संख्यापूरणस्यास्य[3] गोर्द्वितीयोऽन्वये[4] अन्वेष्टव्य इति वाक्ये सजातीयेन गवेव[5] संख्यापुरणस्य दृष्टत्वेन प्रकृतेऽपि परमात्मन एव ग्राह्यत्वात् । जीवपरमात्मनावेव ग्राह्यौ, न तु बुद्धिजीवौ । 'गुहां प्रविष्टाविति' (क० १।३।१) प्रतिपादितप्रवेशो [6]ब्रह्मण्यप्युपपद्यते । तस्याप्यन्तर्यामिरूपेण प्रवेशोपपत्तेः । वस्तुतो जीवे [7]बुद्धिपक्षे बुद्धिप्रवेशातिरेकेण जीवस्य पृथक्[8] प्रवेशाभावात् । जीवे तदुक्तिरनुपन्नैव छायातपत्वञ्च जीवपरमात्मनोरपि स्वातन्त्र्यपारतन्त्र्याभ्यामुपपद्यते । सुकृतलोकवर्तित्वञ्चेश्वरस्याप्युपपद्यते । अन्तर्यामिरूपतया तस्यापि[9] तत्र सत्त्वात् । अत एव ब्रह्मविद्वचनविषयत्वमपि सङ्गच्छते । अत एवान्तरत्रानयोरेव गन्तृगन्तव्यभावेन विशेषणम् 'आत्मानं रथिनं विद्धि' (क० १।३।३) इत्यादिना 'तद्विष्णोः[10] परमपदम्, इत्यन्तेन प्रतिपाद्यमानमुपपद्यत इति धेयम् । 'द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिपस्वजाते तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकसीति' (मु० ३।१।१) इति मन्त्रोऽपि जीवपरमात्मविषय उक्त न्यायादिति केचित् । तत्तु कृत्वा चिन्तारूपम् । [11]पैङ्गिरहस्यब्राह्मणेन शोधितजीवबुद्धिपरतयास्य[12] मन्त्रस्य व्याख्यातत्वात् । तथाहि पैङ्गिरहस्यब्राह्मणम् 'तयोरन्यः[13] पिप्पलं स्वाद्वतीति सत्त्वमनश्नन्नन्योऽभिचरकसीतीत्यनश्नन्नन्योऽभिचाकसीति ज्ञः । तावेतौ सत्त्वक्षेत्रज्ञौ[14] येन स्वप्नं पश्यति । तत्सत्त्वमथ योऽयं शारीर उपद्रष्टा सक्षेत्रज्ञः न ह वा एवं विदि किञ्चन रजः[15] आप्वंसत[16], इत्यस्य चायमर्थः । तयोरस्य पिप्पलं स्वाद्वत्तीत्यस्यांशस्य 'द्वा

१. घ० सा० 'रूपे' इति पाठः ।
२. घ० मा० 'जीवजीस्य' इति पाठः ।
३. घ० मा० 'सेवख्या' इति पाठः ।
४. क० मा० 'गोः द्वितीयः' इति पाठः ।
५. घ० मा० 'गवैरव' इति पाठः ।
६. घ० मा० ब्रह्मवस् प्युपपद्यते' इति पाठः ।
७. घ० मा० 'षक्ने' इति पाठः ।
८. घ० मा० 'ष्स्यव' इति पाठः ।
९. घ० मा० 'तरयापि' इति पाठः ।
१०. घ० मा० 'तद्विघ्योः' इति पाठः ।
११. छान्दोग्यब्राह्मणे ।
१२. घ० मा० 'न सोपित' इति पाठः ।
१३. क० मा० 'तयोरन्य' इति पाठो नास्ति ।
१४. घ० मा० 'क्षत्रज्ञो' इति पाठः ।
१५. घ० मा० 'कियत्ररज' इति पाठः ।
१६. घ० मा० 'आन्वसत' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सुपर्णेति'[१] मन्त्रस्थस्य सत्त्वमन्तः कारणमर्थः 'अनश्नन्नन्योऽभिचाकसीति (मु० उ० ३।१।१) इत्यंशस्य तु भोगरहितो यो द्रष्टा साक्षी सोऽर्थः । तथा[२] च सत्त्वक्षेत्रज्ञावेव द्वाभ्यामंशाभ्यां प्रतिपाद्येते । तथा चायं मन्त्रो न जीवेश्वरप्रतिपादक इति नैषोऽधिकरणसिद्धान्तविषयः ।

ननु सत्त्वशब्देन जीव एव गृह्यते क्षेत्रज्ञशब्देन च परमात्मा, अतोऽस्य प्रकृताधिकरणसिद्धान्तविषयत्वमत आह, 'येन स्वप्नं पश्यति, इति । तथा च स्वप्नकरणस्यैव सत्त्वशब्दप्रतिपाद्यत्वात्तस्यान्तःकरणरूपत्वं सिद्धम् । क्षेत्रज्ञशब्देनापि शारीरः शरीरभाव उपद्रष्टा साक्ष्युच्यते न परमात्मा । एतदधिकरणपूर्वपक्षविषयत्वमप्यस्य मन्त्रस्य न सम्भवति, जीवत्वविनिर्मुक्तस्य शुद्धचित एवानेन मन्त्रेण प्रतिपादनात् । अत एव[३] तज्ज्ञानात्पापनिवृत्त्युक्तिरुपपद्यते । सिद्धङ्कृत्वा चिन्तात्वम् (चिन्तितम्) ।

अन्तराधिकरणम्

अन्तर उपपत्तेः ॥४॥

छान्दोग्यशाखायामित्थमुपाख्यायते । उपकोशलो हि सत्यकामस्य[४] गुरोर्निकटे द्वादशसंवत्सरपर्यन्तमग्निपरिचरणपूर्वकं ब्रह्मचर्येणोवास । स च सत्यकामोऽन्यान् ब्रह्मचारिणस्समावर्तयन्नेतन्न समावर्तयतिस्म । स च सत्यकामो जायया प्रार्थ्यमानोऽप्यग्निपरिचरणरतोऽयं ब्रह्मचारी । अत एनं समावर्तयन्यथा ह्यग्नयस्त्वां निन्देयुरिति तद्वार्तामगणय्यैव ग्रामान्तरञ्जगाम । ततो गौतम उपाध्यायमार्य्यया प्रार्थ्यमानोऽपि-अधियुक्तत्वान्नास ततोऽग्नयः स्वपरिचरणसन्तुष्टास्सन्तो व्याप्तित्वसुखत्वगुणविशिष्टं परमात्मानं प्राणब्रह्मोपासनञ्चोक्त्वा स्वोपासनां (स्वोत्वा) तत[५] [६]'आचार्य्यस्तु ते गतिं वक्ता' (छा० ४।१४।१) इत्युचुः । तत आचार्य्य आजगाम, ततो मुखप्रसादं शिष्यस्य दृष्ट्वा ब्रह्मवित्त्वमनुमायोपदेष्टारमपृच्छत् । सोऽपि च चिह्नेनाग्नीनसूचुचत् । तदन्वाचार्य्यस्त(तमु)दुपदिष्टमर्थं श्रुत्वाह 'लोकान् वाव किल सौम्य तेऽवोचन्नहन्तु ते तद्वक्ष्यामि यथा पुष्करपलास आपो न श्लिष्यन्त एवमेव[७] विदि पापं कर्म न श्लिष्यत' (छा० ४।१४।३) इति तदनुशिष्येण[८] प्रार्थितः प्राहाचार्य्यः 'य[९] एषोऽक्षिणि पुरुषो दृश्यत एष आत्मेति होवाचैतदमृतमयमेतद्ब्रह्म' (छा० ४।१५।१) इति । तद्यद्यप्यस्मिन्सर्पिर्वोदकं वा सिञ्चति वर्त्मनी-एव

---

१. घ० मा० 'सुपर्णे मन्त्रस्थ' इति पाठः ।

२ मा० घ० 'सो अर्थतथाच' इति पाठः ।

३. क० मा० 'न' इत्यधिकः पाठः ।

४. घ० मा० 'गुरूर' इति पाठः ।

५. क० मा० 'ततः' इति पाठो नास्ति ।

६. आचिनोति च शास्त्राण्याचारे स्थापयत्यपि
स्वयमाचरते यस्मात्तस्मादाचार्य्यमुच्यते (चोच्यते) (द्वययोपनिषद्)
आचारं ग्राह्यति 'शिक्षयति' आचिनोत्यर्थान्,
आचिनोति बुद्धिमिति वा, आचार्यः, (निरूक्त पृ० १५)

७. घ० मा० 'विदित' इति पाठः ।

८. घ० मा० 'शिष्य स्म' इति पाठः ।

९. घ० मा० 'य' इति पाठोनास्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गच्छत्येतं सम्पद्वाम[1] इत्याचक्षत एतं हि सर्वाणि वा मान्यभिसंयन्ति सर्वाण्येतं वा मान्यभिसंयन्ति[2] य एवं वेदेष उप एव वामनीरेष हि सर्वाणि वामानि नयति सर्वाणि वामानि नयति य एव वेद ।[3] एष उ एव भामनीरेष हि सर्वेषु लोकेषु भाति सर्वेषु लोकेषु भाति, (छा० ४।१५।१,२,३,) 'इत्युक्तम्' । 'अथ यदु [4]चैतस्मिन्नत्यादिना-र्चिरादिमार्गमिमं मानवमावर्तन्नावर्तन्ते[5] नावर्तन्त' (छा० ४।१५।४–५) इत्यन्तेनावोचत् । तत्र 'य एषोऽक्षिणि पुरुषो दृश्यत एष[6] आत्मेति होवाच' (छा० ४।१५।१) इति वाक्यं विषयः। तत्र संशयः । किं छायात्मा प्रतिपाद्यत उत जीव उत आदित्याभिमानीदेवतोत[7] परमात्मेति ।

तत्र पूर्वः पक्षः––

अक्षणः स्थानस्य निर्देशान्न ब्रह्म ग्रहणं भवेत् ।
अतो जीव गृहीतिस्स्यात्सन्निधेस्तस्य चाक्षिणि ॥
आदित्यात्मकदेवस्य ग्रहो वा तस्य चैव हि ।
अधिष्ठानत्वतस्तत्र सन्निधानं हि विद्यते ॥
छायात्मनो वा ग्रहणात्तस्य चक्षुष्यवस्थितेः ।
'एष दृश्यत' इत्येतद्द्वयं तत्रोपपद्यते ॥
'य एष' इति चैतच्च वक्ष्यमाणस्य बाधकम् ।
पूर्ववाक्येऽपि न ब्रह्म प्रस्तुतं तस्य चैव हि ॥
आकाशबोधकत्वस्य तत्रैव प्रतिपादनात् ।
अग्न्युपास्त्याव्यवायाच्च परामर्शोऽने (न)युज्यते ॥
ब्रह्मणः पूर्ववाक्येऽपि प्रस्तुतत्वे कथञ्च ।
पुरुषत्वादिकं सर्वन्नेयञ्छायात्मकेऽपि हि ॥

'य एषोऽक्षिणि' इत्यक्षणस्थानस्योपास्यं प्रति निर्देशात्परमात्मनश्च स्थानायोगान्न तस्योपास्यत्वमतो जीवो ग्राह्यः । तस्य जाग्रद्दशायामक्षिसान्निधेस्सत्त्वादादित्यो वा देवता ग्राह्यस्तस्य चक्षुरधिष्ठानत्वेन चक्षुषि सन्निधानस्य 'रश्मिभिरधिष्ठित' इति श्रुतिसिद्धत्वाच्छायापुरुषो वा ग्राह्यस्तस्य चक्षुष्येव विद्यमानत्वात् ।

१. घ० मा० 'संप्पद्वाम' इति पाठः ।
एतावदेव क० मा० उपलम्पते
२. घ० मा० 'अभिसंवन्ति' इति पाठः ।
३. घ० मा० 'वेदेष' इति पाठः ।
४. घ० मा० 'यदुषेव' इति पाठः ।
५. घ० मा० 'मावर्ययन्नावर्तन्ने' इति पाठः ।
६. घ० मा० 'एवं आत्मेति' इति पाठः ।
७. घ० मा० 'देवतेन्त' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नन्वयं पूर्वपक्षोऽनुपपन्नः जीव आदित्यपुरुषच्छायानां मध्ये कस्यापि पूर्वप्रस्तुतत्वाभावेन 'य एष' (छा० ४।१५।१) इति सर्वनामपरामर्शनीयत्वानुपपत्तेः, 'प्राणो ब्रह्म कं ब्रह्म खं ब्रह्म' (छा० ४।१०।५) इति पूर्ववाक्ये ब्रह्मणःप्रस्तुतत्वेन तत्परामर्शस्यैव न्याय्यत्वात् । न च ब्रह्मपक्षे 'य एष' (छा० ४।१५।१) इति प्रत्यक्षविषयनिर्देशो दृश्यत इति चाक्षुषज्ञानविषयतोक्तिश्च युक्तेति वाच्यम् । अन्तरादित्यवाक्यस्य' 'दृश्यत' इत्यत्र दृशिधातोश्शास्त्रीयदृष्टार्थकत्वादिहाप्युपपत्तेः, त्वयापि जीवादित्यपूर्वपक्षयोस्तथैवोपपाद्यत्वात् । न च स्थाननिर्देशानुपपत्तिः । उपासनार्थं स्थाननामरूपादेर्ब्रह्मण्यसम्भाविनो बहुषु स्थलेषु निर्देशदर्शनेन तद्वदेव प्रकृतेः स्थाननिर्देशोपपत्तेः । एकदृश्यानुसारेण बहूनाममृतत्वाभयत्वात्मत्वब्रह्मत्वसपद्वामत्ववामनीत्वभामनीत्वनामान्यथानयनायोगाच्च । अतः परमात्मैवेह ग्राह्य इति चेदुच्यते ।

'दृश्यत' इति दृशिधातुना[1] चाक्षुषज्ञानस्योपादानेनैतच्छब्देन च प्रत्यक्षविषयार्थबोधकेनच्छायापुरुषस्यैव ग्राह्यत्वात् । न च तस्मिन्नात्मत्वादीनामसम्भवः शंक्यः 'नाम ब्रह्मेत्युपासीत (छा० ७।१।५) इत्यत्रै वा 'एष आत्मा' इति शब्देऽतिरस्कत्वेनच्छायाप्रतीकोपासनपरत्वावगमात्[2] । न चैवमपि 'एतं सम्पद्वाम इत्याचक्षत' (छा० ४।१५।२) इत्यत्रेति[3] शब्दश्रवणेऽपि 'एष उप च वामनीरेष उप च भामनी' (छा० ४।१५।३) इत्युत्तरयोरिति शब्दच्छ्रवणाभावेन तयोः कथं च्छायापुरुषेऽन्वय इति वाच्यम् । तत्रापीति शब्दानुसङ्गाभ्युपगमात् । अत एव पुरुषशब्दोऽपीति शब्दपरक एव द्रष्टव्यः । न च प्रथमपठितयच्छब्दानुसारेण चरमपठितस्य 'दृश्यत' इत्यस्यान्यथा नेयत्वेन यच्छब्दस्य 'प्राणो ब्रह्म कं ब्रह्म खं ब्रह्म' (छा० ४।१०।५) इति पूर्ववाक्यप्रस्तुतब्रह्मबोधकत्वादिति वाच्यम् । तत्रापि ब्रह्मणः प्राधान्येन प्रस्तावाभावात् । तद्वाक्यं हि भूताकाशे ब्रह्मदृष्टिविधायकम् 'प्राणो ब्रह्म' (छा० ४।१०।५) इति वाक्ये प्राणे ब्रह्मदृष्टिविधानं दृश्यते, तत्प्रायपाठेन 'कं ब्रह्म खं ब्रह्म' इति वाक्ये प्रतीकोपासनस्यैव स्वीकरणात् । अत एव 'प्राणञ्च हास्मै तदाकाशञ्चोचुः, इत्याकाश एवोपसंहृतं तद्वाक्यस्य [4]ब्रह्मपरत्वेऽप्यग्निविधया बहिस्त्वेन तत्परामर्शकत्वानुपपत्तेश्च ।[5] न च 'आचार्य्यस्तु ते गतिं वक्ता' (छा० ४।१४।१) इति वाक्ये स्वोक्तोपासनायामाचार्य्यो मार्गवक्तेत्युक्त्या स्वोक्तोपासनमेवाचार्य्येणाप्युच्येत इति प्रतीतेः । तर्हि कथं सर्वनाम्नो ब्रह्मपरामर्शकत्वाभाव इति वाच्यम् । अग्नीनां भ्रमात्तदुक्तानुपपत्तेः[6] । आचार्य्येणोपासमानमान्तरमुक्त्वा[7] तत्र[8] या गतिरुच्यते सैवात्रापीत्यभिप्रायेण वा तदुपपत्तेः । अतो 'य एष' (छा० ४।१५।१) इति सर्वनामद्वयस्य प्रस्तोष्यमाणच्छाया पुरुषपरामर्शकत्वमेव स्वीकार्य्यमिति ।

---

१. जगतो नाकरूपात्मकस्य वस्तुनः कल्पितस्य प्रपञ्चस्य यदारोपज्ञानं तदधिष्ठानमेवोपादानत्वेन व्यवह्रियते । अत एव 'उपादानत्वञ्च जगदध्यासाधिष्ठानत्वम्' जगदाकारेण विपरिणममाणमायाधिष्ठानत्वं वा । एतादृशमेवोपादानत्वमभिप्रेत्य 'इदं सर्वं यदयमात्मा सच्च त्यच्चाभवत्' 'एकोऽहं बहुस्यां प्रजायेय (तै०२।६) इत्यादिश्रुतिषु ब्रह्मप्रपञ्चयोः तादात्म्यव्यपदेशः । घटः सन् घटो भाति घट इष्ट इत्यादिलौकिकव्यपदेशोऽपि सच्चिदानन्दरूपब्रह्मैक्याध्यासात् । (वे०प०विपृ०२५२)

२. घ० मा० 'निर्देशकत्वेन' इति पाठः ।

३. घ० मा० 'शब्देश्रवणेप्येष' इति पाठः ।

४. घ० मा० 'त्वेप्यग्निविधायक' इति पाठः ।

५. घ० मा० 'अनुपपत्तेश्चन्नचाचार्य' इति पाठः ।

६. ख० मा० 'तदुत्युपपत्ते' इति पाठः ।

७. घ० मा० 'भान्नर' इति पाठः ।

८. घ० मा० 'तदुपक्ते' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्रोच्यते—

'य एष' इति वाक्यं हि ब्रह्मणः प्रतिपादकम् ।
सर्वनाम्नः प्रसिद्धार्थबोधकत्वं स्वभावतः ॥
'कं ब्रह्मे'त्यपि यद्वाक्यं (तथापि) ब्रह्मबोधकम् ।
'यद्वावे'[1]त्यादिवाक्येन तत्प्राधान्यनिरूपणात् ॥
'आचार्य्यस्तुतिवाक्यञ्च वाक्यैकत्वस्य बोधकम् ।
एवञ्च ब्रह्मलिङ्गानि पुरुषत्वादिकानि वै ॥
उपपन्नतराणीह[2] न तु जीवादिवस्तुषु ।
एवञ्च दृशिधातुस्तु शास्त्रीयां दृष्टिमब्रवीत् ॥
अक्ष्यादिस्थाननिर्देश उपासार्थो भविष्यति ।
ब्रह्म प्राप्त्युपदेशश्च ह्याञ्जस्येनोपपद्यते ॥

'य एष' (छा० ४।१५।१) इति सर्वनाम्नो पूर्वप्रसिद्धार्थबोधकत्वेन व्युत्पन्नयोः 'य एषोऽन्तर' (छा० १।७।१) इति वाक्यस्थः पूर्वप्रसिद्धब्रह्मबोधकत्वेन तदनुसारेण दृशिधातोः शास्त्रीयदृष्ट्यर्थतया नेतव्यत्वेनास्य वाक्यस्य छायात्मपरत्वासम्भवेन ब्रह्मपरत्वस्यावश्यकत्वात् । एवञ्च सति पुरुषत्वपाप्मत्वामृतत्वाभयत्वादिकीर्तनमुपपद्यते, ब्रह्मणि तेषां सम्भवात् । ननु जीवादिषु यद्यपि जीवादित्ययोः पुरुषत्वमात्मत्वञ्चेदुपपद्यते, तथापि सर्वकर्म-[3]फलजनकत्वतद्दातृत्वसर्वभासकत्वादीनामसम्भव[4] एव ।

न च तेषां 'नाम ब्रह्म' (छा० ७।१।५) इत्यादिवच्छायात्मादौ प्रतीक उपास्यत्वेन तेषां[5] तत्रासत्त्वेऽपि क्षतिविरहादिति वाच्यम् । अत्रत्येति शब्दस्य प्रतीकोपासनपरत्वाभावात् । किन्तु तेषामसत्त्वाशङ्कानिराकरणद्वारेण वस्तुनो दार्ढ्यं[6] साधकत्वात् । वाच्यादिसमभिव्याहृतेति शब्दस्य 'इति ह उपाध्यायः कथयति' इत्यादौ तथात्वस्य क्लृप्तत्वात् ।

'कं ब्रह्म खं ब्रह्म (छा० ४।१०।५) इति वाक्यमपि ब्रह्मपरन्न प्रतीकोपासनापरमेतद्वाक्यानन्तरं हि 'विजानाम्यहं यत्प्राणो ब्रह्मेति कञ्च तु खञ्च न विजानामि' (छा० ४।१०।५) इत्युपकौशलेनाग्नयो दृष्टाः[7] प्रश्नवाक्यस्यायमर्थः 'प्राणो ब्रह्म' (छा० ४।१०।५) इत्य तद्विजानामि प्राणप्रतीके ब्रह्मोपासनमित्येतद्विजानामि 'कं ब्रह्म खं ब्रह्म' (छा० ४।१०।५) इति । यत्र तु किं सुखादिप्रतीकमुपासनङ् किंवान्यथोपासनमिति संशयनिश्चयात्मकज्ञानाभाववानिति ततोऽग्नीनामुत्तरम् 'एद्वाव कं तदेव खं यदेव खं तदेव कम्' इति (छा० ४।१०।५)

१. ख० मा० 'यद्वाचेत्यादि' इति पाठ ।
२. घ० मा० 'सा हि' इति पाठ ।
३. घ० मा० 'न' इति पाठः
४. ख० मा० 'असम्भति एव' इति पाठ।
५. घ० मा० 'तन्त्रास' इति पाठः ।
६. घ० मा० 'ह्याढ्यं' इति पाठः ।
७. ख० मा० 'पृष्टा' इति पाठः ।

ल. नं. ९८३४०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यस्य चायमर्थः, यदि 'कं' शब्देन सुखमात्रन्निर्दिश्यते तदानीं लौकिकमनित्यत्वादिविशिष्टसुखमात्रं प्रतीयेत। तत्र ब्रह्मसामानाधिकरण्यस्य मुख्यस्यासम्भवेन प्रतीकपरत्वं कल्पेत। तथा 'खं' शब्देन भूताकाशमात्रग्रहणे तत्रापि पूर्ववत्प्रतीकपरत्वं स्यादतो व्यतिहारेण [1]सुखविशिष्टव्यापिनः परमेश्वरस्य ग्रहणेन तत्र च ब्रह्मसामानाधिकरणस्य मुख्यत्वसम्भवेन सुखविशिष्टब्रह्मण एव उपासना प्रतीतेः।

न च तथा सति 'कं खं ब्रह्म' (छा० ४।१०।५) इत्येवोक्तिः स्यात्तावतैव व्यावृत्तिसिद्धेरिति वाच्यम् तथा स्व उपास्यत्वं तस्य न लभ्येतेति ब्रह्मशिरस्कतया तयोर्निर्देशस्यावश्यकत्वात्। अतः पूर्ववाक्ये ब्रह्मप्रस्तावः सिद्धः, 'प्राणश्च हास्म तदाकाशम्' इत्यत्र तदाकाशशब्देन सुखविशिष्टब्रह्माभिधानात्। अत एव 'एषा सौम्य तेऽस्मद्विद्यात्मविद्या' (छा० ४।१४।१) इत्युपसंहार[2] आत्माशब्दः प्रयुक्तः। नचाग्निवाक्यानामाचार्य्यवाक्यापेक्षया भिन्नत्वेन कथमन्यदीयवाक्योपस्थितमन्यदीयवाक्यस्थसर्वनाम्ना परामृष्टुं शक्यत इति वाच्यम्, 'आचार्य्यस्तु ते गतिं वक्ता' (छा०४।१४।१) इति वाक्येनैकवाक्यता करणात्। नन्वाचार्य्यस्त्विति वाक्येन गतिमात्रोक्तेरेव प्रतीयमानत्वेनोत्तरत्र चाक्ष्यादिस्थानस्य गुणानाञ्च[3] बहूनाङ्कीर्तनेन विरोधात्कथमेतदुपपद्येत।

अत इत्थं विरोधस्समाधेयः। आचार्य्यस्तवोपासनान्तरं वक्ष्यति तत्र या गतिस्सैवात्रापीति। तथा च भिन्नविद्यात्वात्कथं सर्वनाम्नः 'कं ब्रह्म' (छा० ४।१०।५) इति वाक्योपात्तब्रह्मपरामर्शकत्वमिति कथमस्य ब्रह्मपरत्वमिति चेत् तदा 'चार्य्यस्तु ते गतिं वक्ता' (छा० ४।१४।१) इति 'तु' शब्दोऽनुक्तविशेषसमुच्चयार्थः। तद्धि वाक्यन्न गतिप्रतिपादनपरम्। तस्य 'तद्य इत्थं विदुः' इति वाक्येनैव सिद्धत्वात्। किन्त्वग्न आचार्येण विशेषपरं, तथा च नाचार्य्यवाक्याग्निवाक्ययोः कश्चिदपि विरोधः। एवञ्चैकवाक्यत्वाद्ब्रह्मपरामर्शकतैवास्य प्रकरणस्येति, यच्छब्दो ब्रह्मपरामर्शक एवेति सिद्धं, ब्रह्मपरत्वमस्य सन्दर्भस्य। अत एवात्रार्चिरादिमार्गद्वारेण ब्रह्मप्राप्त्युपपादनमुपपद्यत इति।

अन्तर्याम्यधिकरणम्

अन्तर्य्याम्यधिदेवादिषु तद्धर्मव्यपदेशात् ॥ ५ ॥

'अथ हैन उद्दालक आरुणिः प्रपच्छ' (बृ० ३।७।१) इत्युपक्रम्योद्दालकादीन्पतञ्जलभार्याभाविष्टं कश्चन गन्धर्वः पप्रच्छ। सर्वभूतविधायकं सूत्रमन्तर्य्यमिणं किं यूयं जानथेति पृष्टा, न वयं जानीम इत्युत्तरे दत्ते तान्प्रति गन्धर्वोऽब्रवीत् 'यो वै तत्सूत्रं विद्यात्तञ्चान्तर्य्यामिणम्' (बृ० ३।७।१) इति 'स ब्रह्मवित्स लोकवित्स देववित्सभूतवित्स आत्मावित्स सर्वविदित्येवमुक्त्वा तेभ्यस्सर्वमुक्तवान् गन्धर्वस्ततो गन्धर्वादवगत्योद्दालको याज्ञवल्क्यमपृच्छत्। तत्र च याज्ञवल्क्यः 'वायुर्वाव' (बृ० ३।७।२) इत्यादिना प्रथमप्रश्नस्योत्तरमुक्तवान्, द्वितीयप्रश्नस्योत्तरं 'यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयत्येष त आत्मान्तर्य्याम्यमृतः (बृ० ३।७।३) इत्यवोचत्। एवं बहून् पर्यायानुक्त्वा 'अदृष्टो द्रष्टाऽश्रुतः श्रोताऽमते मन्ताऽविज्ञातो विज्ञाता नान्योऽतोऽस्ति द्रष्टा नान्योऽतोऽस्ति श्रोता नान्योऽतोऽस्तिमन्ता नान्योऽतोऽस्ति विज्ञाता एव त आत्मान्तर्य्याम्यमृत अतोऽन्यदार्त्तम्' (बृ० ३।७।२३) इत्युपसञ्जहार। तत्रान्तर्यामिवाक्यं विषयस्तत्र प्रतिपाद्यमानोऽन्तर्यामी किन्देवता आहोस्वित्प्रधानमाहोस्वित्कश्चिद्योग्युत परमात्मेति किं प्राप्तम्?

---

१. घ० मा० ,व्यविनः' इति पाठः।

२, विस्तरेण निरूपितस्य पदार्थस्य सारांशकथनेन तन्निरूपणसमापनमुपसंहारः (शा० भा० टी० पृ० १७)।

३. घ० मा० 'गुनानाश्च' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अन्तर्यामी देवतात्मा सशरीरत्वमसम्भवात् ।
परस्य त्वशरीरस्य नान्तर्य्यं मनः सम्भवः ॥
उद्दालात्मास्वरूपत्वं शास्त्रदृष्टया तु तस्य हि ।
इष्टत्वममृतत्वञ्च तस्मिन्नप्युपपद्यते ॥
आत्मत्वदेवतात्वाभ्यां नियन्ता तत्स एव नः ।
एवं सति शरीरत्वं पृथिव्या उपपद्यते ॥
पृथिवीयन्न वेदेति निर्देश्योऽप्युपपद्यते ।
नहि स्वाश्रयके ज्ञाने कर्मत्वं स्वस्य युज्यते ॥

अन्तर्य्यामी, न परमात्मा, लोके हि वाय्यादीनां नियन्तुस्तक्षकस्य सशरीरत्वदर्शनेनाशरीरस्य तदनुपपत्तेः। सर्गादौ[1] शरीराभावेनाशरीरस्यैव जगत्स्रष्टृत्वाभ्युपगमेऽप्युत्तरकालिके[2] नियमने[3] शरीरस्यैव सम्भवेन देवतात्मकस्तदुपपत्तेः ।

न 'चैष त आत्मान्तर्य्यामी' (बृ० ३।७।२३) इति वाक्येनोद्दालकात्मत्वेनान्तर्य्यामिन उपदेशो न स्यात् । देवताया [4]उद्दालकात्मत्वानुपपत्तेरिति वाच्यम् । तस्य शास्त्रदृष्ट्या ब्रह्मात्मकत्वेन 'अहं मनुरभवम्' (ऋ०४।२६।१) इत्यादिवत्सर्वात्मकत्वोपपत्तेः । अमृतत्वञ्च देवताया देवतात्मत्वादेवोपपद्येते 'द्रष्टा श्रोता' (बृ० ३।७।२३) इत्यादि [5]निर्देशोऽप्यात्मत्वाद्देवतायामुपपद्यते । अतो देवताया एवान्तर्य्यामित्वं 'यस्य पृथिवी शरीरम्' (बृ० ३।७।२) इति च निर्देशो देवतायामुपपद्यते। न हि[6] परमात्मनः पृथिवी शरीरं भवति । न च 'यं पृथिवी न वेद' (बृ० ३।७।३) इति पृथिव्या ज्ञानत्वमन्तर्यामिन्युच्यमानं देवता पक्षे नोपपद्यते । तस्याः स्वात्मज्ञानस्यासम्भवादिति वाच्यम् । स्वाश्रयकज्ञाने स्वस्य कर्मत्वासम्भवेन 'यं पृथिवी न वेद' (बृ० ३।७।३) इत्यस्योपपत्तेरिति प्राप्तेऽभिधीयते—

तदेव तानि यन्त्रीह किन्तु ब्रह्म नियामकम् ।
तज्ज्ञानात्सर्वविज्ञान प्रतिपादनतो भवेत् ॥
सर्वान्तिर्य्यामितैकस्य श्रुतौ च प्रतिपादनात् ।
अज्ञानरूपदेहो[7] हि तस्मिन्नपि च विद्यते ॥

---

१. उत्पत्तेः प्रथमक्षणे संदृश्यमानशरीरस्याभावेनाशरीरस्यैव जाग्रति यदेव दृश्यते तज्जगत्स्रष्टृत्वमुररीक्रियमाणे तदुत्तरकालिके नियमने सशरीरस्य सम्भवेन देवतात्मकस्तदुपपत्तेरिति पूर्वपक्षवादः ।

२. घ० मा० 'अभ्युपगमे उत्तर' इति पाठः ।

३. घ० मा० 'नियमेन' इति पाठः ।

४. घ० मा० 'उद्दालकातमानुपपत्ते' इति पाठः ।

५. घ० मा० 'निर्देशेऽपिप्वात्मा' इति पाठः ।

६. घ० मा० 'नही परमात्मा' इति पाठः ।

७. घ० मा० 'दपदहोदि' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्र चान्तर्य्यामिब्राह्मेण प्रतिपाद्यमानोऽन्तर्य्यामी न पृथिव्याद्यभिमानिनी देवता तज्ज्ञानेन सर्वविदित्यादिना प्रतिपाद्यमानसर्वविज्ञानस्य देवतायामुपपादनासम्भवात्। देवता[1] ज्ञानेन सर्वविज्ञानस्य [2]तस्य जगदनुपादानत्वेनानुपपत्तेः। ब्रह्मणस्तु ज्ञानेन सर्वस्य ज्ञानं सम्भवति। तस्य सर्वोपादानत्वात्। तस्यैवान्तर्य्यामित्वम्। किञ्च 'य इमञ्च लोकम्' इत्यादिना सर्वै ह्येक एवान्तर्य्यामी प्रतिपाद्यते; न च तद्देवतात्मनः सम्भवति तेषां नानात्वात्। अतो ब्रह्मैवान्तर्य्यामी, नचाशरीरस्यान्तर्य्यामित्वानुपपत्तिरित्युक्तमिति वाच्यम्। [3]स्वप्नदशायां मन[4] आदि प्रेरणे शरीराभावात्। न च तदानीमज्ञानाख्यं शरीरमस्तीति वाच्यम् तस्य ब्रह्मण्यऽपि सम्भवात्। तस्मान्नदेवतात्मनोऽन्तर्य्यामित्वम्।

द्वितीय पूर्वपक्षवादीत्वाह प्रधानमन्तर्य्यामीति।

कुत —

पृथिव्यादिशरीरत्वं प्रधानस्य हि विद्यते।
तद्रुपादानकत्वेन तत्स्वरूपत्वसम्भवात्॥
अदृष्टत्वादिनिर्देशस्तस्मिन् सम्भाव्यते यतः।
उपादानं हि कार्य्यस्य नियामकतया स्थितम्॥

'यस्य पृथिवी शरीरमिति पृथिव्या अन्तर्य्यामिणम्' (बृ० ३।७।३) इति प्रतिशरीरत्वमुच्यते। [5]शरीरञ्च भोगायतनत्वं [6]वक्तव्यम् स्वरूपभूतं वाधिकरणशरीरमित्यादौ स्वरूपभूतेऽपि शरीरपदप्रयोगात्। ब्रह्मणश्च [7]भोगायतनं स्वरूपभूतं पृथिव्यपि न[8] सम्भवति प्रधानस्य सर्वोपादानत्वेन स्वकार्यं प्रति नियामकत्वसम्भवेन पृथिव्यादीनां

१. घ० मा० 'देवल ज्ञानेन' इति पाठः।
२. घ० मा० 'जगदनुपपादानत्वे नानुपपत्तेः' इति पाठः।
३. इन्द्रियाजन्यविषयगोचरापरोक्षान्तः करणवृत्त्यवस्थास्वप्नावस्था। जाग्रदवस्थाव्यावृत्त्यर्थमिन्द्रियाजन्यतेति। अविद्यावृत्तिमत्यां सुषुप्तावतिव्याप्तिवारणायान्तः करणेति (वे०प०पृ० ३९७)।
४. (क) सुखाद्युपलब्धिसाधनमिन्द्रियं मनः '(त० सं० पृ० १३) वस्तुवस्तु सुखदुःखादिसाक्षात्कारणत्वे सतीद्रियत्वमेव मनसो लक्षणमिति-बोधिनीकारः। सिद्धान्तस्तु 'संकल्पविकल्पात्मकं मनः' इत्येवमाननन्ति।
(ख) साक्षात्कारे सुखादीनां करणं मनः (भा० प० पृ० ८५)
(ग) स्पर्शरहितत्वे सति क्रियावत्त्वं मनसो लक्षणम् (त० दी० पृ० ५२)
(घ) युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम् (न्या० सू० १।१।१६)
(च) आत्मेन्द्रियार्थसन्निकर्षे ज्ञानस्य भावोऽभावश्च मनसो लिङ्गम् (वै०सू० ३।२।१)
(छ) सत्यप्यात्मेन्द्रियार्थसान्निध्ये ज्ञानसुखादीनामभूतत्वोत्पत्तिदर्शनात् करणान्तरणमनुमीयते (प्र०पा०भा०पृ०३५)
(ज) सुखादिसाक्षात्कारः सकरणको जन्यसाक्षात्कारत्वात् चाक्षुषसाक्षात्कारवत्-इत्यनुमानेन मनसः करणत्वसिद्धिः (न्या० सि० मु० पृ० ४३३)
५. आत्मनो भोगायतनं शरीरम् (न्यायमञ्जरी प्रमेय प्रकरण पृ० ४५)
६. घ० मा० 'व्यर्षवक्तव्यम्' इति पाठः।
७. घ० मा० 'भोगपतनम्' इति पाठः।
८. घ० मा० 'पृथिव्यपिन्त' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्स्वरूपत्वसम्भवेन[1] 'अदृष्टोऽश्रुत' (बृ० ३।७।२३) इत्याद्यदृष्टत्वादिकीर्तनेन प्रधानमेवान्तर्य्यामीति सिद्धान्तवादी त्वाह—

नान्तर्य्यामिप्रधानं स्यात् द्रष्टृत्वादेरसम्भवात् ।
शरीरेण न योगोऽस्य भोगभावेन हेतुना ।।

'अदृष्टो द्रष्टा (बृ० ३।७।२३) इत्यादि' । श्रुत्या अन्तर्य्यामिनि द्रष्टृत्वादिकीर्तनेन प्रधाने च द्रष्टृत्वादेरसम्भवेन तस्यान्तर्य्यामित्वानुपपत्तेः । भोगायतनस्य शरीरत्वेन प्रधानस्य भोगाभावेन शरीरानुपपत्तेः । तस्मान्न प्रधानमन्तर्य्यामीति । पूर्वपक्षवादी प्रकारान्तरेण प्रत्यवतिष्ठते ।

भोगायतनदेहस्य जीवात्मन्येव सम्भवात् ।
द्रष्टृत्वादिश्रुतेर्नात्र योगी जीवो नियामकः ।।
तज्ज्ञानात्सर्वविज्ञानं श्रुत्यर्थमिह कीर्तितम् ।
न तु मुख्यमिह ग्राह्यं सूत्रांशे तदसम्भवात् ।।

योगसिद्धैश्वर्यो जीव एवान्तर्यामी, अन्तर्यामिब्राह्मणे प्रतिपाद्यः, शरीरस्य भोगायतनस्य भोगवति जीवे सम्भवात् । शरीरपदस्य भोगायतन एव मुख्यत्वात् । ब्रह्मणि च भोगाभावेन शरीरस्यासम्भवात् द्रष्टत्वश्रोतृत्वादेश्च चक्षुरादिजन्यज्ञानाश्रयरूपत्वे ब्रह्मण्यसम्भवात् । साक्षात्कारश्रवणाद्याश्रयत्वरूपत्वेऽपि तत्रासम्भवात् । अस्मिन्पक्षे द्रष्टृत्वादेरसम्भवाच्च ब्रह्मणः [2]साक्षात्कारविषयत्वाभ्युपगमात् । न चान्तर्य्यामिविज्ञानात्सर्वविज्ञानमुच्यमानञ्जीवपक्षेऽनुपपन्नमिति वाच्यम् । तस्य स्तुत्यर्थत्वात् । अन्यथा सूत्रांशज्ञानात्सर्वविज्ञानस्यानुपपत्तेरतो जीवोऽन्तर्यामीति ।

सिद्धान्तवादी त्वाह—

सम्भवात्प्रकृतित्वस्य जगत्प्रति परात्मनः ।
अन्तर्य्यामित्वमस्यैव न तु जीवस्य युज्यते ।।
प्रकृतित्वस्य राहित्यादनवस्था ततोऽपि च ।
जीवाभेदेन चास्यैव कीर्तनाच्छाखयोर्द्वयोः ।।
तज्ज्ञानात्सर्वविज्ञानमेव मुख्यं भविष्यति ।
अतोऽन्तर्य्यमिता सिद्धा परमात्मन एव नः ।।

अन्तर्य्यामिब्राह्मणे प्रतिपाद्यमानो न जीवस्तस्य 'य पृथिव्यां तिष्ठन्पृथिव्या अन्तर' (बृ० ३।७।३) इति द्वाभ्यां वाक्याभ्यामन्तर्बहिर्व्याप्त्युक्त्या[3] उपादानत्वप्रतीत्या तस्य च योगिजीवे सम्भवात् । ब्रह्मणस्तु सर्वोपादान-

१. घ० मा० सम्भवेनादृष्टोश्रुत' इति पाठः ।

२. अहं ब्रह्मेत्याकारकानुभव एव साक्षात्कार इत्युच्यते । तद्विषयस्य तत्स्वरूपव्यतिरेकेण शास्त्रमुखेन प्रामाण्यसाधनं पिष्टपेषणन्यायानुसरणमिति चेन्न लोकदशायामपलययितुमशक्यत्वात् । लौकिकपारमार्थिकत्वस्य सिद्धान्तेऽप्यभ्युपगमात् । तस्मात्साक्षात्कारविषयत्वाभ्युपगमः ।

३. घ० मा० 'व्यप्त्युक्त्या' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वादुपपन्नम् । किञ्च जीवस्य योगिनो योगाभ्यासा[1] दिप्रवृत्तौ नियन्ता कश्चन वक्तव्यस्तस्याप्यन्यो वक्तव्य इत्यनवस्था । अत ईश्वरस्यैव सर्वान्तरत्वं वक्तुमुचितम् । किञ्च काण्वशाखायां[2] माध्यन्दिनशाखायाञ्च जीवस्यापि 'यो विज्ञाने तिष्ठन् य आत्मनि तिष्ठन्' (बृ० ३।७।२२) इति योगिजीवस्याप्यन्तर्याम्यन्य[3] प्रतिपाद्यते 'यः सर्वेषु भूतेषु बृ० ३।७।१५) इति सामान्य जीवान्तर्य्यामिणमुक्त्वा पुनरुक्तेः । शरीरत्वञ्चानियम्यत्वाभिप्रायेण । एवं सत्येकविज्ञानेन सर्वविज्ञानमपि मुख्यमेवोपपद्यते । सूत्राज्ञानहेतुकान्तर्य्यामिज्ञानस्यैव तत्फलमिष्टत्वादिकञ्च तस्मिन्न भवेदविवक्षयोपपद्यते 'नान्योऽतोऽस्ति द्रष्टा (बृ० ३।७।२३), इत्यग्र अभेदस्यैव प्रतिपादनात् । अतोऽन्तर्य्यामी परमात्मैवेति सिद्धम् ।

अदृश्यत्वाद्यधिकरणम्

अदृश्यत्वादिगुणको धर्मोक्तेः ६ ।।

'अथ परा यया तदक्षरमधिगम्यते यत्तदद्रेश्यमग्राह्यमगोत्रमब्रणमचक्षुः श्रोत्रं तदपाणिपादं नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं तद्भूतयोनिं परिपश्यन्ति धीराः' (मु० उ० १।१।६) 'यथोर्णनाभिस्सृजते गृह्णते च यथा पृथिव्यामोषधयस्सम्भवन्ति यथा सतः पुरुषात्केशलोमानि, तथाक्षरात्सम्भवन्तीह विश्वम्' (मु० उ० १।१।७) इत्याथर्वणिकाः समामनन्ति । तत्र संशयः किमक्षरशब्देन प्रधानजीवयोरन्यतरदग्राह्यमुत परमात्मेति, किम्प्राप्तम्—

भूतयोनिः प्रधानं स्याज्जडेन प्रायपाठतः ।
अदृश्यत्वादिधर्माणां प्रधाने सम्भवादपि ।।
जीवो वा भूतयोनिःस्यात्तस्य कर्तृत्वसम्भवात् ।
परं ब्रह्म न तु ग्राह्यं प्रायः पाठविरोधतः ।।

'यत्तद्रेश्य (मु० उ० १।१।६) इति वाक्यं प्रधानपरमचेतनैः पृथिव्यादिभिः प्रायपाठात् । 'यथोर्णनाभिस्सृजते गृह्णते च यथापृथिव्यामोषधयस्सम्भवन्ति यथा सतः पुरुषात्केशलोमानि' (मु० उ० १।१।७) इति ।

न च तत्राप्यूर्णनाभेर्लूताकीटस्य पुरुषस्य चेतनस्य च दृष्टान्तत्वेन कीर्तनात्प्रकृतेऽपि चेतनस्यैव भूतयोनित्वमिति वाच्यम् । तत्र लालादीनामेवोपादानत्वस्य प्रसिद्धत्वेन चेतनस्यैव दृष्टान्तत्वेनोपादानाददृश्यत्वादिविशेषणानाञ्च तत्रोपपत्तेः । जीवो वा भूतयोनिस्स्यात्तस्यापि धर्माधर्मद्वारा जगत्कर्तृत्वसम्भवात् । ननु ब्रह्म 'तस्याक्षरात्परात्पर' इति वाक्येनाक्षरादपि परत्वोक्तेः । न च ब्रह्मप्रकरणे प्रधानकीर्तनं व्यर्थमिति वाच्यम् । तदुपासनार्थं तत्कीर्तनोपपत्तेरतो न ब्रह्म ग्रहणमिति प्राप्तेऽभिधीयते—

---

१. 'योगश्चित्तवृत्तिनिरोधः' (पा० यो० सू० १।२) 'योगः समाधिः (व्या० भा० पू० १)' 'समाधिः समतावस्था जीवात्मपरमात्मनो.' (योग० त० उ० म० १०७ पृ० ३०२)
तत्ववैशारद्यान्तु-निरुध्यन्ते यस्मिन्प्राणादिवृत्तयोऽवस्थाविशेषे चित्तस्य सा ऽवस्थाविशेषो योगः (तत्त्ववै० सू० १।२पृ०१०)

२. घ० मा० 'काण्वशापाया' इतिःपाठः ।

३. घ० म० 'प्यंतपर्याम्यन्यः' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भूतयोनिः परं ब्रह्म न प्रधानं कथञ्चन ।
यस्सर्वेत्यादिवाक्येन प्रकृतित्वस्य कीर्तनात् ॥
प्रतिज्ञायैव विज्ञानात्सर्वज्ञ (प्तिं ततोऽस्य हि) ।
प्रवृतिर्दृश्यते किञ्च ब्रह्मविद्यासमाख्यया ॥
ब्रह्मप्राधान्यमेवेह ग्राह्यन्न त्वन्यबोधनम् ।
विद्याद्वयप्रतिज्ञातं पूर्वव्युत्पादनादपि ॥
दिव्यत्वेनापि निर्देशादग्निमूर्द्धेति वाक्यतः ।
सर्वात्मकत्वरूपस्य निर्देशाद्ब्रह्म निर्णयः ॥

अदृश्यत्वादिगुणकं परमेव ब्रह्म, न तु प्रधान जीवो वा । अत्र भूतयोनित्वेन निर्दिष्टस्याक्षरस्य 'तथाक्षरात्सम्भवन्तीह विश्वम्' (मु० उ० १।१।७) इति पञ्चमीश्रुत्या उपादानत्वेनावगतस्य 'यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपस्तस्माद्वैतद्ब्रह्मनामरूपमन्नञ्च[१] जायत' (मु० उ० १।१।९) इति तस्यैव सर्वज्ञत्वादिगुणविशिष्टतया[२] प्रत्यभिज्ञायमानत्वात् । ननु 'अक्षरात्परत' इति वाक्येऽक्षरादिति प्रकृतिप्रत्ययोर्द्वयोरपि प्रत्यभिज्ञायमानत्वेन भूतयोन्यक्षरस्य ब्रह्मापेक्षयाभिन्नत्वेनावगमात्कथं भूतयोन्यक्षरस्य ब्रह्मत्वम् । न च शब्दप्रत्यभिज्ञानेऽप्यर्थप्रत्यभिज्ञानाभावात्कथमब्रह्मत्वमिति वाच्यम् । अर्थप्रत्यभिज्ञापेक्षया शब्दस्य प्राथमिकोपस्थितिकत्वेन[३] तत्प्रत्यभिज्ञानस्य प्रबलत्वादिति चेत्तर्हि ततोऽपि पूर्वपठितः 'यः सर्वज्ञः' (मु० उ० १।१।९) इति वाक्यपठितपञ्चमीप्रयुक्तार्थप्रत्यभिज्ञानस्य प्रबलत्वेन सर्वज्ञब्रह्मत्वस्यैवाक्षरे प्रतीतेः । किञ्चैकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय तद्व्युत्पादनार्थं भूतयोनिवाक्यस्य प्रवृतत्वेन तस्यापि ब्रह्मपरत्वावश्यकत्वात् । किञ्च 'स ब्रह्मविद्यां[४] सर्वविद्याप्रतिष्ठा' (मु० उ० १।१।१) इति ब्रह्मविद्याया एवोपक्रमे व्युत्पाद्यत्वेन प्रतिज्ञातत्वेन ब्रह्मपरत्वस्यावश्यकत्वात् । अपि च 'द्वे विद्ये वेदितव्ये' (मु० उ० १।१।४) इति, 'हस्म यद्ब्रह्मविदो वदन्ति'[५] (मु० उ० १।१।४) इति वाक्ये परापरविद्याद्वयं प्रतिज्ञाय तत्रापरां विद्यामृग्वेदादिलक्षणामुक्त्वा 'अथ परा यया तदक्षरमधिगम्यते' (मु उ० १।१।५) इति पराविद्या व्युत्पाद्यते[६] । तथा च समधिगम्यं ब्रह्मैवेति वक्तव्यम् । अन्यथा 'तिस्रो विद्या प्रतिज्ञायेरन्' प्रधानविद्याया अपि प्रतिपाद्यत्वात् ।

ननु मास्तु प्रधानव्युत्पादनमविद्याव्युत्पादनन्तु स्यात् । न च ब्रह्मविद्याप्रकरणेऽविद्याकीर्तनं व्यर्थमिति वाच्यम् । ब्रह्माकारणत्वनिर्वाहकतया विद्याया द्वाभ्यां मन्त्राभ्यां कीर्तनोपपत्तेरिति चेन्न 'अथ परा यया तदक्षरम्' (मु० उ० १।१।५) इत्युपक्रमे[७] परविद्याविषयत्वेनाक्षरं प्रस्तुत्य 'तथाक्षरात्सम्भवन्तीह विश्वम्' (मु० उ० १।१।७)

१. घ० मा० 'दूत' इति पाठः ।
२. घ० मा० 'सर्वज्ञवादि' इति पाठः ।
३. घ० मा० 'ति' इति पाठो नास्ति ।
४. घ० मा० 'ब्रह्मविद्या सर्वविद्या' इति पाठः ।
५. घ० मा० 'वदन्तिति' इति पाठः ।
६. घ० मा० 'व्युत्पाद्यतेतथाच' इति पाठः ।
७. घ० मा० 'अधिगम्यत' इत्यधिकः पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्युपसंहारे– उपादानत्वेन तस्यैव कीर्तनेन भूतयोनेर्ब्रह्मत्वावगमात्। किञ्चोत्तरत्र 'दिव्यो ह्यमूर्तः पुरुष' (मु० उ० २।१।२) इति दिव्यत्वविशेषणेनापि न प्रधानादिरूपत्वं भूतयोनेः। किञ्च भूतयोनेरेव प्रकरणेन (प्रकरणिनः) 'अग्निर्मूर्द्धा चक्षुषी चन्द्रसूर्यौ[1] दिशः श्रोत्रे वाग्विवृस्ताश्च वेदाः, वायुः प्राणो हृदयं विश्वमस्य पद्भ्यां पृथिवी ह्येष सर्वभूतान्तरात्मा' (मु० उ० २।१।४) इति त्रैलोक्यशरीरमुच्यमानं परमेश्वरत्वमेव गमयति। अतोऽपीह परमेश्वर एव ग्राह्यः।

नन्वयं मन्त्रो हिरण्यगर्भपर एव 'तस्माज्जायत' (मु० उ० २।१।३) इति पूर्वमन्त्रे 'तस्मादग्निः समिधो यस्य सूर्यः (मु० उ० २।१।५) इत्युत्तरमन्त्रे च सृज्यमानस्यैव कीर्तनेन पूर्वोत्तरशब्दशबलेन सृष्ट्यवान्तरप्रकरणावगमेन सृज्यमानहिरण्यगर्भस्यैव प्रतोतेः किञ्च पुरुष एवेदं विश्वकर्मतया ब्रह्मपरामृतमित्युत्तरत्र परमेश्वरस्य सार्वात्म्योपदेशेन[2] पौनरुक्त्यान्नायं परमात्मपरः। किञ्च परमेश्वरस्य मूर्द्धाद्यभावेन 'अग्निमूर्द्धा' (मु० उ० २।१।४) इत्याद्यनुपपतेरिति चेन्न सृष्ट्यवान्तरप्रकरणेन स्रष्टुरप्यनुवृत्तेरावश्यकत्वेन[3] तस्य परमात्माद्यविरोधित्वात् 'पुरुष एवेदं विश्वकर्म्म' (मु० उ० २।१।१०) इत्यादिनोक्तस्याप्यवान्तरभेदविवक्षया पुनः कीर्तनोपपत्तेः। मूर्द्धादीनामपि स्तुत्यर्थंकीर्तनोपपत्तेः। अन्यथा तवाप्यगतेरत परमात्मन एवास्यैष शब्दाभ्यां परामर्श इति सिद्धम्।

वैश्वानराधिकरणम्

वैश्वानरसाधारणशब्दविशेषात् ॥ ७ ॥

छान्दोग्य उपाख्यायते प्राचीनशालसत्ययज्ञेन्द्रद्युम्नजनवुडिलैः पञ्चभिः[4] 'को नु आत्मा किं ब्रह्म' (छा० ५।११।१) इति जिज्ञासयोद्दालकसमीपङ्गत्वा स पृष्टस्तेनापि[5] मया न ज्ञायत इत्युत्तरिते तेनापि सहिताः पूर्वं पञ्चके क्व पराजयङ्गताः सोऽपि तैः पृष्टः सन्नेतैर्ज्ञातं[6] तत्प्रथमत एतैर्वक्तव्यशिष्टं, मया वक्तव्यमवशिष्टं मया वक्तव्यमिति तान्प्रच्छा[7] पृष्टाः सन्तो[8] द्युःसूर्यवाय्वाकाशवारिपृथिवीनां मध्ये एकैकमर्थं वैश्वानरमुपास्मह इति प्रत्युत्तरं दत्तवन्तः। तेषाञ्चोपास्यानां सुतेजस्त्वं विश्वरूपत्वादिगुणानुपन्यस्य तेषां प्रत्येकं वैश्वानरत्वेनोपासने मूर्द्धापातादिरूपदोषश्चोपन्यस्य समुदायोपासन कैकयराजेनोक्तम् 'तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्द्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथक्वर्त्मात्मा सन्देहो बहुलो वस्तिरेव रयिः[9] पृथिव्येव पादावुर एव वेदि लोमानि बर्हि हृदयं गार्हपत्यो मनोऽन्वाहार्यपवन आस्यमावहवनीय' (छा० ५।१८।२) इत्यादिना प्राणाग्निहोत्रमुक्त्वा 'य एवं विद्वानग्निहोत्रञ्जुहोति तस्य सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मसु हुतं भवति, तद्यथेषीका तूलमग्नौ प्रोतं

---

१. घ० मा० 'चं इ स र्यो' इति पाठः।
२. घ० मा० 'स ब्रह्मोपदेशेन' इति पाठः।
३. ख० मा० 'स्नैष्टुख्यनुवृते' इति पाठः।
घ० मा० 'स्नैप्टुख्यनुवृतैं' इति पाठः।
४. घ० मा० 'मवंमि' इति पाठः।
५. घ० मा० 'सष्यष्टेत्तापि' इति पाठः।
६. घ० मा० 'सन्नेदेतैं' इति पाठः।
७. घ० मा० 'तान पप्रच्छते' इति पाठः।
८. घ० मा० 'सेतो' इति पाठः।
९. घ० मा० 'वास्तिरेरविः' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रदूयन्ते[१] य एतदेवं 'सर्वे पाप्मानः प्रदूयन्ते' (छा० ५।२४।३) इत्युपसंहृतम्। तत्र 'वैश्वानरशब्देन जाठरप्रसिद्धाग्नि, तदभिमानिनी देवता, जीवात्मनामन्यतम उत परमात्मेति विषये पूर्वः पक्षः—

वैश्वानरादिशब्दोऽत्र नेश्वरप्रतिपादकः।
प्रादेशमात्रनिर्देशादीश्वरे तदसम्भवात् ॥
जाठराग्निरतो ग्राह्यः प्रसिद्धं भूतमेव वा।
तस्याभिमानिनी वा स्याद्देवता तेषु चैव हि ॥
वैश्वानराग्निपदयोः प्रयोगो दृश्यते श्रुतौ।
जीवात्मा वा गृहीतव्य आत्मशब्दस्य दर्शनात् ॥

इदं वाक्यन्न परमात्मप्रतिपादकं, तस्य परत्वे तमेवं प्रादेशमात्रमभिविद्यमानमिति निर्दिष्टप्रादेशमात्रत्वस्य तस्मिननुपपत्तेरतो जाठरो ग्राह्यः। अयमग्निः वैश्वानरो 'योऽयमन्तः पुरुष' इति श्रुतावग्निवैश्वानरशब्दयोः प्रयोगात्। तस्य द्युमूर्द्धत्वादिकमूष्मणा मूर्द्धपर्यन्तं व्याप्तत्वेन मूर्द्धादिचुबुकान्तेषु द्युलोकत्वादिकल्पनमुपपादयितुं शक्यम्। प्रसिद्धभूताग्निर्वा ग्राह्यस्तस्मिन्नपि 'विश्वस्मा [२]अग्निभुवनाय देवा वैश्वानरं [३]केतुमह्नामकृण्व' इत्यग्निवैश्वानरशब्दयोः प्रयोगदर्शनात्। अग्न्यभिमानिनी वा देवता स्यात्तस्यामपि 'वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनानामभिश्रीः' (यजु० २६।७) इति वैश्वानरशब्दप्रयोगस्य दर्शनात्। जीवो वा ग्राह्यः को न आत्मेत्यात्मशब्दात्।

ननु सर्वष्वतेषु पक्षेषु द्युमूर्द्धत्वादिनिर्देशो नोपपद्यत, जाठरादीनां द्युमूर्द्धत्वानुपपत्तेः। न च परमेश्वरेऽपि द्युमूर्द्धत्वादिकमशारीरत्वान्नोपपद्यत इति वाच्यम्। द्युलोकादीनां ब्रह्मोपादेयत्वेन तत्तादात्म्यापन्नत्वेन तन्नियम्यत्वेन मूर्द्धत्वाद्युपपत्तेः। किञ्चोपक्रमे 'को नु आत्मा किं ब्रह्म' (छा० ५।११।१) इति ब्रह्मशब्देनोपक्रमाद्ब्रह्मत्वमेव वैश्वानरस्य स्वीकार्य्यम्। 'तद्यथेषीका तूलमिति सर्वपाप्म प्रदाह' (छा० ५।२४।३) इति निर्देशात् 'स सर्वषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्ति' इति निर्देशाच्च परमात्मैव ग्राह्यः इति चेन्न, उपक्रमे 'को नु आत्मा किं ब्रह्म' (छा० ५।११।१) इति निर्देशस्य ब्रह्मदृष्टिविषयः किमित्येवमभिप्रायकत्वात्तस्यैवाभिप्रायस्य 'दिवमेव भगवो राजन्निति हो वाच' इत्यादिना स्फुटीकरणात्। द्युमूर्द्धत्वादिकन्तु 'उर एव वेदिर्लोमानि बर्हिः' (छा० ५।१८।२) इत्यादि वेदी (त्यत्र) त्रेताग्निकल्पनानुसारेण पूर्वोक्तरीत्या [४]तेष्वेव कथञ्चिन्नेयं सर्वात्माभावापत्तेः। सर्वपाप्मनिवृत्तेश्च प्राणाग्निहोत्रफलत्वान्न परमात्मा ग्राह्य इति।

सिद्धान्तस्तु—

द्युमूर्द्धत्वादिनिर्देशात्प्रक्रमे ब्रह्मतोक्तितः।
सर्वपापनिवृत्तेश्च फलस्येह च कीर्तनात् ॥

---

१. घ० मा० 'बुलोकत्वादि' इति पाठः।
२. घ० मा० 'अग्निभवनाय' इति पाठः।
३. घ० मा० 'ह्नाम' इति पाठः।
४. घ० मा० 'त्यातेष्वेव' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वात्मताया निर्देशाद्ब्रह्म ग्राह्यमिति स्थितेः ।
वैश्वानरादिनिर्देशो योज्यस्तत्र कथञ्च ॥
प्रादेशमात्रता तस्मिन् सूत्रकारेण योजिता ।
बहुधातः परं ब्रह्म ग्राह्यमत्रेति निर्णयः ॥

द्युमूर्द्धत्वादिकं परमेश्वर एव मुख्यं तस्यैव तदुपादानतया तन्नियामकत्वसम्भवात् । अत एव समानप्रकरणे वाजसनेयके 'एष वा–अग्निर्वैश्वानरो यत्पुरुष' इति पुरुषत्वमपि [1]तस्मिन्नुच्यते । किञ्चोपक्रमे 'को नु आत्मा किं ब्रह्म' (छा० ५।११।१) इति ब्रह्मतत्त्वस्य कीर्तनाद्ब्रह्मत्वं स्वीकार्यन्न च तद्ब्रह्म दृष्टिविषयाभिप्रायमित्युक्तमिति वाच्यम् । दृष्टिविषयस्य तत्राकीर्तनाद्विवादानुपपत्तेश्च, नहि बहूनां ब्रह्मदृष्टिविषयत्वे विवाद उपपद्येत । षड्ऋषयो विवादेन केकयराजमागताः । अतो ब्रह्मैव ग्राह्यं गार्हपत्यादि[2] त्रेताग्निमाकल्यनमपि वैश्वानरस्य[3] परमात्मन एव । 'तस्य ह वा एतस्यात्मनो वैश्वानरस्येति श्रुतस्य षठ्यन्तस्यैव[4] हृदयं गार्हपत्य इत्यादावाप्यन्वयस्वीकारात् । प्राणाग्निहोत्रे देवतात्वमपि परमेश्वरस्यैव । अतः सर्वात्मत्वफलकीर्तनं सर्वपापप्रदाहकीर्तनञ्च परमेश्वरपक्ष एवोपपन्नतरम् । वैश्वानरशब्दोऽपि तत्प्रतीकत्वात्तदुपाधिकत्वाद्यौगिकत्वाद्ब्रह्मण्येव नेय इति 'प्रादेशिकमात्रत्वं त्वभिव्यक्तेरित्याश्मरथ्य' इत्यादिसूत्रेऽन्यथा नीतम् । अतः परमेवेह ब्रह्म ग्राह्यम्, किञ्च 'द्यां मूर्धानं यस्य विप्रा वदन्ति, खं वै नाभिः चन्द्रमसौ च नेत्रे । दिशः श्रोत्रे सिद्धिपादौ क्षितिश्च सोऽचिन्त्यात्मा सर्वभूत प्रणेता' । 'यस्याग्निरास्यं द्यौर्मूर्द्धाश्विं नाभिश्चरणो क्षितिः । सूर्यश्चक्षुर्दिशा श्रोत्र तस्यै योगात्मने नमः । इति परमात्माप्रकरणे स्मृतिषु तत्र तत्रोच्यमानं त्रैलोक्यशरीरत्वं मूलाकांक्षायामिमामेव श्रुतिं मूलत्वेन [5]कलयति । न च सा स्मृतिः स्तुतिरूपेति वाच्यम् । तथात्वेऽपि सालंबनत्वसम्भवे निरालम्बनत्वकल्पनायोगादतः परमेवात्र ग्राह्यमिति निर्णयः ।

इति श्रीपरमहंसपरिव्राजकाचार्य्यसर्वतन्त्रस्वतन्त्र-
श्रीमदद्वैतानन्दसरस्वतीचरणारविन्दभृङ्गायमनस्य
स्वयम्प्रकाशानन्दस्य कृतिषु वेदान्तनयभूषणे
प्रथमाध्यायस्य द्वितीयः पादः

---

१. घ० मा० 'उन्वते' इति पाठः ।

२. आहवनीयदक्षिणाग्नी अपि गृह्येते ।

३. वैश्वानरस्यान्वर्थः यथा—विश्वान्सर्वान्नरान्भोक्तृत्वेन व्यवस्थितान् प्रति धर्माधर्मकर्मानुसारेण सुखदुःखादिकर्मफलप्रापणाद्वैश्वानर इत्युच्यते । यद्वा विश्वेनरा अस्येति विश्वानरः 'नरे सञ्ज्ञायम्' इति पूर्वपदस्य दीर्घता । विश्वानर एव वैश्वानरः 'प्रज्ञादिभ्यश्च' इति सूत्रेण स्वार्थिकोऽण् । सर्वपिण्डात्माऽनन्यत्वात् । यद्वा विश्वश्चासौ नरश्चेति विश्वानर उक्तसूत्रेण पूर्वपदस्य दीर्घता, विश्वानर एव वैश्वानरः, राक्षसवासादिवत्प्रज्ञादिभ्यश्चेति सूत्रेण स्वार्थे तद्धितः । यद्वा विश्वेषान्नरशब्दवाच्यानाञ्चतुर्विधस्थूलदेहानामधिष्ठानतोऽयं वैश्वानरः । (मा० उ० मणि प्र० व्या० पृ० १५०)

४. घ० मा० 'षष्ठंनस्यैव' इति पाठः ।

५. यद्यपि 'कल्पयतीति' पाठस्समीचीनस्तथापि 'कलगतौ संख्याने च' इति चुरादिगणीयप्रकृतिनियमानुसारेण कलयति = ज्ञापयति = संख्यापयति इति चार्थ सङ्गमः (ग) मातृकायामपि तादृश एव पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ प्रथमेऽध्याये तृतीयपादः

द्युभ्वाद्यधिकरणम्

द्युभ्वाद्यायतनं स्वशब्दात् ॥ १ ॥

पूर्वस्मिन्पादे सविशेषप्राधानान्यस्पष्टब्रह्मलिङ्गानि वाक्यानि निरूपितानीह तु प्रायेण निर्विशेषवाक्यान्यस्पष्टब्रह्मलिङ्गानि निरूप्यन्ते। 'यस्मिन्द्यौः पृथिवी चान्तरिक्षमोतं मनस्सह प्राणाश्च सर्वैः, 'तमेवैकं[1] जानथ आत्मानमन्या[2] वाचो विमुञ्चथ अमृतस्यैषः[3] सेतु; (मु० उ० २।२।५) इयि श्रूयते। तत्र संशयः। किं द्युभ्वाद्यायतनं सांख्याभिमतं प्रधानमुतास्मदभिमताविद्या उत वायु उत जीव उत परमात्मेति।

तत्र पूर्वः पक्षः

यस्मिन्द्यौरिति वाक्येन प्रधानं प्रतिपाद्यते।
यच्छब्दादनुवादत्वे वाक्यस्यास्यावधारिते[4] ॥
पुरोवादव्यपेक्षायां प्रधानस्यानुमा स्थिता।
तस्याः शीघ्रप्रवृतत्वान्न श्रुतिर्मन्थरा[5] हि सा ॥
अविद्या वा गृहीतव्या तस्या भोक्तृत्वकीर्तनात्।
सूत्रात्मा वा गृहीतव्यो जगत्तारणकीर्तनात् ॥
जीवो वा मन आदेर्हि तस्मिन्नोतत्वदर्शनात्।
न तु ब्रह्म यतस्तस्य सेतुत्वन्नोपपद्यते ॥

'अस्मिन् द्यौः' इति वाक्येन प्रधानमेव प्रतिपाद्यते, 'अमृतस्यैषः सेतुः' (मु० उ० २।२।५) इति द्युभ्वाद्यायतनस्य सेतुत्वनिर्देशादमृतपदस्य ब्रह्मपरत्वात्। एतानि हि वामृतस्य नामधेयानीत्यत्रामृतशब्दस्य ब्रह्मपरत्वदर्शनादतश्चामृतस्य परमात्मनः परमात्मैव सेतुत्वेन निर्देष्टुं शक्यत इति सेतुशब्देन परमात्मापेक्षया वस्त्वन्तरस्य ग्राह्यत्वे स्थिते यच्छब्दसमभिव्याहारेणानुवादत्वे तस्य वाक्यस्य निर्णीते पुरोवादापेक्षायां प्रधानसाधकानुमानमेव पुरोवादत्वेन स्वीक्रियते न तु श्रुतिः। श्रुतेः शक्तिग्राहकमानापेक्षत्वेन[6] विलम्बितत्वादतोऽनुमानसिद्धप्रधानानुवा(दि)दत्वमेव स्वीकार्य्यम्। तस्मिन्नात्मशब्दः ममात्मा भद्रसेन' इतिवद्गौणतया नेय 'तमेवैकं ज्ञानथ' (मु० उ० २।२।५) इत्यपि जगत्कारणत्वेन 'तमेव जानथ' (मु० उ० २।२।५) परमाणवो जगत्कारणमिति 'वाचा विमुञ्चथ' (मु० उ० २।२।५) इत्येवं योज्यम्। यदि च तत्र श्रौतत्वेन परितुष्यसि तदाविद्याया ग्रहणमस्त्वस्य चानुवादस्य

१. घ० मा० 'तमेकं' इति पाठः।
२. घ० मा० 'अन्य' इति पाठः।
३. घ० मा० 'अजस्येप' इति पाठः।
४. घ० मा० 'वधारिति' इति पाटः।
५. घ० मा० 'मश्वरा' इति पाठः।
६. पदेन सह पदार्थस्य सम्बन्धः शक्तिः। सा चास्मात्पदादयमर्थो बोद्धव्य इतीश्वरेच्छारूपा (न्या०सि०मु०पृ० २९३)

तथाच—शक्तिग्रहं व्याकरणोपमानकोषाप्तवाक्याद् व्यवहारतश्च।
वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुरोवादापेक्षायामाकाश एक 'तदोतं प्रोतम्'[१] (बृ० ३।८।११) इति वाक्यमोतशब्द[२]प्रत्याभिज्ञानात्पुरोवादो भविष्यत्यनयोश्च पक्षयोस्सेतुत्वं परिच्छिन्नत्वगुणयोगात्प्रधाने अविद्याया च वर्त्स्यति । ननु 'अमृतस्यैष सेतुः (मु० उ० २।२।५) इति षष्ठ्याः सेतुशब्दस्य [३]परिच्छिन्नत्वार्थकत्वेऽनुपपत्तिः । अतस्सेतुत्वं प्रापकत्वं वा स्वीकार्य-मिति चेन्न परिच्छिन्नत्वस्य [४]सार्वदिक्त्वेनान्तरङ्गत्वात्प्रापकत्वादीनां कादाचित्कत्वेन बहिरङ्गत्वादमतस्य परमात्मनस्सम्बन्धीकरणतानिर्वाहक एव परिच्छिन्न इति वाक्यार्थ सम्भवेनाविद्याग्रहणस्य न्याय्यत्वात् । सूत्रात्मा वा द्युभ्वाद्यायतनं[५] वायुर्वै गौतम तत्सूत्रं वायुना वै सूत्रेणायञ्च लोकः परश्चलोकः सर्वाणि च भूतानि सन्दृब्धानि भवन्ति (बृ० ३।७।२) इति सर्वविष्टम्भकत्वकीर्तनात् ।

जीवो वा ग्राह्यः । तस्य च 'ओतं मनस्सह प्राणैः' (मु० उ० २।२।५) इति मन आद्याधारत्वकीर्तनात्तत्र तस्योपपत्तेरात्मत्वञ्च जीवत्वादुपपन्नं 'तमेवैकं जानथ' (मु० उ० २।२।५) इत्यप्यहमिति प्रतीयमानेषु [६]देहेन्द्रिया-दिष्वात्मैव ज्ञातव्य इति नेयम् । अतो न ब्रह्म ग्रह इति ।

सिद्धान्तस्तु

द्युभ्वाद्यायतनं ब्रह्म ह्यात्मशब्दोऽत्र दृश्यते ।
वाग्विमोचनयुक्तैश्च विज्ञेयत्वस्य कीर्तनात् ।।
सेतुशब्दप्रयोगश्च धारकत्वगुणे नहि ।
ब्रह्मण्येवोपपन्नोऽतो न प्रधानादिसंग्रहः ।।
मन आद्याश्रयत्वञ्च तस्मिन्नेवोपपद्यते ।
जीवाभेदादतस्सिद्धं परस्य प्रतिपादकम् ।।

'द्युभ्वाद्यायतनं' (ब्र० सू० १।३।१) 'परं ब्रह्म तमेवैकं जानथ' (मु० उ० २।२।५) आत्मानमिति श्रुतावात्मशब्द-प्रयोगेण तस्य प्रधानाविद्यात्वयोरनुपपत्तेः । नचात्मशब्दो गौण इति वाच्यम्, मुख्ये सम्भवति गौणत्वायोगात् । किञ्च 'तमेवैकं जानथ' (मु० उ० २।२।५) आत्मामन्या वाचो विमुञ्चथ (मु० उ० २।२।५) इति वाग्विमोक-

---

१. घ—पुस्तके 'प्रोतम्' नास्ति ।

२. सन्निहितविषयत्वस्यैव प्रत्यभिज्ञात्वं भामतीपतीष्टम् । तच्च तत्कालावच्छेदेन सन्निहितविषयत्वे न प्रत्यभिज्ञात्वं परं भूतपूर्वकालावच्छिन्ने देशान्तरे नयनसाक्षात्कारकृतस्य देवदत्तस्यैतत्कालसन्निहितविषयत्वे प्रत्यभिज्ञात्वं युक्तम् ।

३. परिच्छिन्नं त्रिविधम् । देशतः कालतो वस्तुतश्चेति । तत्र देशतः परिच्छिन्नत्वमत्यन्ताभावप्रतियोगित्वम् । कालतः परिच्छिन्नत्वं ध्वंसप्रतियोगित्वम् । वस्तुतः परिच्छिन्नत्वमन्योऽन्याभावतियोगित्वम् । (अ०सि०पृ० १५) तच्च परिच्छिन्नं प्रधाने प्रपञ्चे वा युक्तं न तु ब्रह्मणि ।

४. घ० मा० 'द्युम्वायवनं' इति पाठः ।

५. 'इन्द्रियनित्यवचनमौदुम्बरायणः' इति यास्कवचनव्याख्यानावसरे इन्द्र आत्मा, इन्दी दीप्ताविति धातुनिर्देशात्, औणादिक 'रक्' प्रत्यये नुमि च आत्मावाचकः इन्द्रशब्दः । इन्द्र = आत्मा, स येन ईयते लिङ्ग्यते—अनुमीयते तदिन्द्रियम् । (नि०पृ० ६) 'इन्द्रियमिन्द्रलिंगमि........(अ० ५।२।९३) । तच्चात्मनि निखिलान्यपि प्रपञ्चजातानीन्द्रियाणि, अध्यस्तन्न तु आत्मा, आत्मैव ब्रह्म । अतो न ब्रह्म ग्रह इति ।

६. घ० मा० 'सार्वदिअत्वे' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूर्वकज्ञानविषयत्वं ब्रह्मण एव दृष्टम् । 'तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः । नानुध्यायाद्बहून् शब्दान् वाचो विग्लापनं हि तत् (बृ० ४।४।२९) इति श्रुत्यन्तरात् । अतो ब्रह्मैव द्युभ्वायनं, नन्वमृतस्यैषः सेतुः (मु०उ० २।२।५) इति द्युभ्वद्यायतनस्य सेतुत्वमुच्यते । न च परस्य ब्रह्मणस्सेतुत्वमुपपद्यते, परिच्छिन्नस्यैव सेतुत्वात् । अमृतशब्द-प्रतिपाद्यब्रह्मापेक्षया भिन्नत्वेन सेतोर्व्यपदेशात् । न च सेतुशब्दार्थो ब्रह्म, न च ज्ञानमेवैतच्छब्देन परामृश्यते, तत्सेतुशब्देन प्रापकत्वगुणेन प्रतिपाद्यते । अमृतस्य मोक्षस्य प्रापकञ्ज्ञानमिति च वाक्यार्थपर्यवसानमिति वाच्यम् । ज्ञानस्य पूर्वप्राधान्येनाप्रस्तुतत्वेन सर्वनाम्ना परामर्शानुपपत्तेः, अतः प्रधानपरमेव सेतुपदमज्ञानपरं वा । न च तदा सर्वनाम्नान्वयः[1] इति वाच्यम् । अमृतस्यैषः कारणताघटक इत्यर्थाभ्युपगमेनान्वया[2]भावादिति चेन्न,[3] 'अमृतस्येषः' सेतुः, (मु० उ० २।२।५) इत्यत्र सेतुपदेन धारकत्वं लक्षयित्वामृतशब्देन निवृत्तावरणचैतन्यं बोधयित्वा तद्धारकत्वं ब्रह्मणो बोधयितुं शक्यते[4] । अतो द्युम्वाद्यातनं परमेव ब्रह्म ।

एतच्छब्देन ज्ञानस्य वा परामर्शः । सेतुशब्देन प्रापको बोध्यते । अमृतस्य मोक्षस्य[5] प्रापकञ्ज्ञानमिति वाक्यार्थः । आख्यातोपात्तस्यापि[6] ज्ञानस्य योऽश्नाति तन्नैवात्ति तन्नैवानशितमितिवत्सर्वनम्ना परामर्शसम्भवात्सर्व-व्यापि द्युभ्वाद्यायतनं परमेव ब्रह्म । तस्मिश्च मन आद्यायतनत्वञ्जीवाभेदविवक्षयेति द्रष्टव्यम् । यद्यपि चेदं वाक्यं मुण्डके पठ्यते, मुण्डकस्य सर्वस्य च परमात्मपरत्वमदृश्यत्वाधिकरणे व्युत्पादितम् । तथा च तेन गतार्थमिदम् । तथापि कृत्वा चिन्तनयैतदधि करण प्रवृत्तिरिति बोध्यम् ।

भूमाधिकरणम्

भूमा सम्प्रसादादध्युपदेशात् ॥ २ ॥

छान्दोगशाखायामिदमाम्नायते 'अधीहि भगव' छा० ७।१।१) इति 'होपससाद सनत्कुमारं नारद' इत्युपक्रम्य सनत्कुमारनारदयोस्संवादे प्रवृत्ते नारदेन 'सोऽहं भगव मन्त्रविदेवास्मि नात्मविच्छ्रुतं ह्येवं मे भगव दृश्येभ्यस्तरति शोकमात्मवित्सोऽहं शोचामि'तं'मा भगवञ्छोकस्य पारं तारयतु (छा० ७।१।३) इत्युक्तेः सनत्कुमारेण यत्वया ज्ञायते तद्वक्तव्यमित्युक्ते नारदेन' ऋग्वेदं भगवोऽध्येमीत्यादिना[7] छा० ७।१।२) सर्वशब्दप्रपञ्चं जानामीत्यत्तरितेऽयं सर्वोऽपि प्रपञ्चो नामैवातो 'नाम ब्रह्म' (छा० ७।१।५) इत्युपास्येति सनत्कुमारेण नामनि ब्रह्मदर्शने सफले उक्ते 'अस्ति[8] भगवो नाम्नो भूय' (छा० ७।१।५) इति नारदेन पृष्टे 'नाम्नो वाव भूयोऽस्ति'

---

१. घ० मा० 'सपध्यनन्दय' इति पाठः ।

२. कारणसत्त्वे कार्यसत्त्वमन्वयः, तच्च परस्परान्वयसहचराभादित्यर्थः । तच्च श्रुतिघटितसेतुपदेनाधारकत्वमेव लक्षितम् ।

३. घ० मा० 'अनन्वयामावात्' इति पाठः ।

४. घ० मा० 'शङ्कते' इति पाठः ।

५. नित्यनिरतिशयसुखाभिव्यक्तिर्निशेषदुःखोच्छेदलक्षणः, स पुनरविद्यास्तमय एवेति, तदुदाहणरम् 'अविद्यास्तमयो मोक्षः सा संसार उदाहृता' इति (न्याय०म०पृ० २७१) । 'तस्मादखिलसंसारमूलाविद्यायास्तत्त्वसाक्षात्कारतो निःशेषविनिवृत्तिर्मुक्ति-रिति सकलमपि पुष्कलम्' (न्या०म०पृ० ३०८) ।

६. 'भावप्रधानमाख्यातम्' सत्त्वप्रधानानि नामानि (निरुक्त पृ० ४) भावः = पाकरागत्यागाख्यः, 'स यत्र प्रधानं' गुणभूता क्रिया तदिदं' भावप्रधानम्' आख्यातम्' आख्यातजत्वान्नाम्नां, पश्चान्नामलक्षणमुच्यते । लिङ्गसंख्ययोरत्र सद्भाव इति सत्त्वम्, तेषु प्रधानं गुणभूता क्रिया नामानि (नि० टी० पृ० ४) तत्राख्यातोपात्तस्य ज्ञानस्य भावप्रानत्वादाख्यातम् ।

७. घ० मा० 'इत्याक्षना' इति पाठः ।

८. घ० मा० 'अधि' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(छा० ७।१।५) इति सनत्कुमारेणोक्तेस्तन्मे भगवन्ब्रवीत्विति' (छा० ७।१।५) नारदेन पृष्टे 'वाग्वाव नाम्नो भूयसीत्यादिना (छा० ७।२।१) वाचमारभ्याशापर्यन्तम् (छा० ७।२।१—७।१४।१) व्युत्पादिते पुनरस्ति भगव' (छा० ७।१४।२) इत्यादिप्रश्नपरम्परया (छा० ७।१५।१–४) प्राणं व्युत्पाद्य तस्मिंश्च सर्वात्मकत्वं व्युत्पाद्य तदुपासकस्यातिवादित्वमुक्त्वा 'एष तु[1] वा-अतिवदति यः सत्येनातिवदतीत्युक्ति[2] पूर्वकं भूमानमवतार्य 'यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा (छा० ७।२४।१) इत्यत्र भूमशब्दो 'बह्वोर्लोप भू च बहोः' इति (अ०सू० ६।४।१५८) सूत्रेण भावार्थे[3] इमनिच्प्रत्यये परतो बह्वादेशे-इमनिच इकारस्य लोपे च निष्पन्नो बहुत्वमा (ह्यपि) पादयति' तथापि 'धातुः प्रसादान्महिमानमीशम्' (श्वे० उ० ३।२०) 'स य एषोऽणिमा' इत्यादि[4] प्रयोगेषु भावःप्रत्ययान्तस्य शब्दस्य धर्मिबोधकत्वमपि दृष्टम् । तद्वदिहापि ।

अत्र बहुशब्दो न संख्यावाची, किन्तु वैपुल्यवाचीत्यत्र च वैपुल्याश्रयको वेति चिन्त्यते किं प्राण उत परमात्मेति । किं तावदात्मा—

भूमा प्राण इह(त्य)ग्राह्यस्सन्निधेस्तस्य सत्त्वतः ।
भूयः प्रश्नादिविरहान्न तु ब्रह्मग्रहो भवेत् ॥
एषत्वित्यादिवाक्यञ्च सत्यधर्मविवक्षया ।
प्राणज्ञस्य[5] प्रभूतं हि न तु ब्रह्मविवक्षया ॥
प्रक्रमस्यात्मशब्दोऽपि प्राणस्य प्रतिपादकः ।
अन्यथा वाक्यभेदस्स्याद्भिन्नार्थप्रतिपादनात् ॥

भूमात्र प्राणो ग्राह्यः 'प्राणो वाशाया भूयान्' (छा० ७।१५।१) इति प्रस्तुत्य प्राणस्यैव व्युत्पादितत्वे तस्यैव सन्निहितत्वान्न तु परमात्मा, तस्य पुनः प्रश्नप्रतिवचनयोरदर्शनात् 'अस्ति भगव प्राणो भूय इति प्राणाद्वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीति ब्रह्मैत्र प्राणाद्भूय, इत्येवंरुपयोः[6] । अत्र च प्रकरणे पूर्वप्रतिपादितवस्त्वन्तरप्रतिपादनस्य प्रश्नप्रतिवचनपूर्वकमेव दर्शनात्प्रकृते च तदभावान्न प्राणाद्वस्त्वन्तरत्वं भूम्नः । न च 'एषः तु वा-अतिवदति यस्सत्येनाति वदति' (छा० ७।१६।१) वाक्यपर्यालोचनया प्राणापेक्षयान्यस्य सत्यस्य प्रतिपाद्यतावगमेन भूमासत्यशब्दप्रतिपाद्यं ब्रह्मैवेति वाच्यम् । तस्य वाक्यस्य प्राणातिवादिनः सत्यवचनरूपधर्मविवक्षया प्रवृतत्वेन ब्रह्मपरत्वाभावान्न च भूम्नः प्राणरूपत्वे 'यो वै भूमा तत्सुखम् (छा० ७।२३।१) इति भूम्नः सुखरूपत्वव्युत्पादनमनुपपन्नमिति वाच्यम् । सुषुप्त्यवस्थायां[7] विद्यमानसुखस्यात्रारोपसम्भवान्न चामृतत्वव्युत्पादनानुपपत्तिरिति वाच्यम् । तस्यापि

१. 'उत्तवावृषतु' इति पाठः ।
२. घ० मा० वदस्यत्यु' इति पाठः ।
३. 'प्रकृतिजन्यबोधे प्रकारो भावपदार्थः' तस्य भावस्त्वतलौ (५।१।११९) इति सूत्रे (सि०कौ०पृ०३४९) व्याख्यातम् ।
४. घ० मा० 'एव खाणि' इति पाठः ।
५ घ० मा० 'प्राणस्य' इति पाठः ।
६. 'इत्येवं रूपयोः' कल्पितप्रश्नप्रतिवचनयोरित्यर्थः ।
७. (क) 'यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति तत्सुषुप्तम्' (मा०उ०म० ५) ।
(ख) यत्र यस्मिन्काले स्थाने वा सुप्त उपरतकरणग्रामः सन् कञ्चन कमपि कामं पुण्यपापहेतुपुत्रदारादिविषयजातन्न कामयते न वाञ्छति, कञ्चन कमपि स्वप्नं शुभाशुभजागरितवासनाजन्यं पदार्थन्न पश्यति नावलोकयति तदुक्तकामाकाम स्वप्नादर्शनरूपं सुषुप्तं गाढनिद्रानिमित्तकमवस्थाविशेषम् (मणिप्रभा व्याख्या पृ० १५१) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कथञ्चिदुपपादनीयत्वात् । ननूपक्रमे 'तरति शोकमात्मवित्' (छा० ७।१।३) इति वाक्यादात्मैवात्र प्रतिपाद्यत इति चेन्न तस्यापि प्राणपरत्वात् । नन्वात्मपदस्य प्राणपरत्वं किमर्थं कल्पते[1] मुख्यस्यैवात्मनो ग्रहणसम्भवाद् । न चात्मपक्षे नामादीनामत्र व्युत्पादनमनुपपन्नमिति वाच्यम् । प्राणपक्षेऽपि तुल्यत्वान्नामादिष्वारोप्योपासनामित्युक्तिस्त्वात्मपक्षेऽपि[2] तुल्या । अत आत्मन एव ग्रहणमिति चेदुच्यते 'प्राणो वा-आशाया[3] भूयान् (छा० ७।१५।१) इत्यारभ्य प्रकरणसमाप्तौ प्राणस्यैव प्रतिपादनेनोपक्रमस्थात्मशब्दस्यापि प्राणपरत्वावश्यंभावात् । न चोपक्रमस्थात्मशब्दानुसारेण प्राणपदमेवात्मपरमस्त्विति वाच्यम् । उपक्रमस्थात्मशब्दानुसारेणोपसंहारे श्रुतानां[4] (श्रतीनां[5]) बहूनां प्राणशब्दानां लक्षणया-अन्याय्यत्वात् । न च 'प्राणो वा-आशाया भूयान् (छा० ७।१५।१) इत्यारभ्यैव प्राणप्रतिपादनमस्तूपक्रमे त्वात्मप्रतिपादनमिति किन्न स्यादिति[6] वाच्यम् । एवमपि भूम्नः परमात्मत्वासिद्धेर्वाक्यभेदप्रसङ्गाच्च, नामादिव्युत्पादनन्तु प्रासङ्गिकं, प्राणप्रकरणे प्राणज्ञानस्य मोक्षसाधनत्वञ्च वचनप्रामाण्यादेव[7] भविष्यति । इत्येवं प्राप्ते ब्रूमः

भूमा ब्रह्म न तु प्राणो विच्छेदात्तस्य सन्निधिः ।
एषत्विति तु शब्देन विशेषः प्रतिपादनात् ।।
अबाध्यवाचकात्सत्यशब्दात्प्रकरणादपि ।
लक्षणात्सुखतोक्तेश्च ब्रह्मैवेति विनिर्णयः ।।
प्राणप्रशंसाश्रवणाद् व्यामुग्धो[8] नारदोऽभवत् ।
अतोऽप्राक्षीन्न भूयोऽपि तेन प्राणे न संस्थितिः ।।

भूमा शब्देनेह परमात्मा ग्राह्यो न प्राणः, सन्निधानाद्धि तस्य ग्रहणं वक्तव्यम् । न च तस्य सन्निधानमस्ति । विच्छेदात्तस्य तथा हि 'एष तु वातिवदति यः सत्येनातिवदति' (छा० ७।१६।१) इति वाक्येन सत्यातिवादिनः प्रस्तुतत्वेन प्राणस्य विच्छेदात् । न च प्राणोऽपानस्यैव सत्यवदनमङ्गत्वेन विधीयत इति न विच्छेदकत्वमिति

१. घ० मा० 'कस्यिन्ते' इति पाठः ।
२. घ० मा० 'वारोप्योपासनार्थत्' इति पाठः ।
३. घ० मा० 'आशत्याभूतानि' इति पाठः ।
४. ख० मा० 'शश्रुतानां बहूनान्' इति पाठः ।
घ० मा० 'शश्रुतानाम्' इति पाठः ।
५. ख० मा० 'श्रुतीमां' पाठो नास्ति ।
६. घ० मा० 'किमस्यादिति' इति पाठः ।
७. क–ननु 'इह खलु निखिलप्रमाणानां मायाशरीरत्वाविशेषेऽपि तत्त्वतो विषयाबाधात्सांव्यवहारिकमेव प्रामाण्यं प्रत्यक्षादीनाम्, अद्वैतागमवाक्यानान्तु तद्विपर्ययात्तात्त्विकमेव प्रामाण्यमिति साम्प्रतम्' (न्या०म०पृ० १४६) ।
ख–निखिलप्रपञ्चस्य मायामयत्वेन—तन्मध्यपातीनां प्रत्यक्षागमादीनामपि तथात्वादद्वितीयब्रह्मस्वरूपासिद्धिः, आगमस्य प्रमाणत्वे वा प्रत्यक्षादीनामपि तथात्वं किन्नस्यान्मायाशरीरत्वमानत्वयोरविशेषादित्यत आह—'मायामयत्व' इति । सत्यपि मायाशरीरत्वे तत्त्वतो विषयबाधात्सांव्यावहारिकमेव प्रामाण्यं प्रत्यक्षादीनामित्यर्थः । आगमेऽपि तर्हि तथा किन्न स्यादित्यत आह 'अद्वैत' इति । तत्त्वतो विषयबाधाभावादद्वैतागमस्य तात्त्विकमेव प्रामाण्यमित्यर्थः (न्या० न० चित्सुखाचार्यं टी० पृ० १४५) ।
८. घ० मा० 'मुग्धा' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वाच्यम् । प्राणातिवाद्यपेक्षया[1]सत्यादिवादिनोऽतिशयस्य[2]तु शब्देन प्रतिपादनेन भेदावगमात् । ननु 'तश्चेद्ब्रूयुरतिवाङ' मनसोत्यति[3] वाद्यस्मीति ब्रूयान्नायं ब्रवीतोति' प्राणातिवादिनं प्रतिपाद्य[4] 'एषः तु वातिवदति, (छा० ७।१६।१) इति प्राणातिवाद्यपेक्षया तुशब्दो न सत्त्वातिवादिनोऽतिशयोक्तिसत्त्यवचनसहितत्वतद्रहितत्वोपाधिवशादुपपद्यत[5] इति चेन्न मुख्यभेदे सम्भवत्यौपाधिकभेदकल्यनाया अन्याय्यत्वात् । किञ्च सत्त्यशब्दस्याबाध्यवाचकत्वेन ब्रह्मण एवाबाध्यत्वेन 'सत्यज्ञानम्' (तै० उ० १.१) इत्यादिवाक्यस्थसत्त्यपदवदस्यापि ब्रह्मपरत्वादतः प्रकरणविच्छेद आवश्यकस्सन्निधानात् । ब्रह्मैव भूमशब्देन वक्तव्यम् । नच सत्त्यस्यातिवदने करणत्वानुपपत्तिः । ज्ञानद्वारा तदुपपत्तेः । अत एवोत्तरवाक्ये 'यदा वै विजनातीत्यथ सत्त्यं वदति' (छा० ७।१७।१) इति द्वारभूतं विज्ञानं प्रतिपाद्यते । किञ्च सत्त्येनातिवदतोत्यत्र तृतीयायाः सहार्थकत्वे' उपपदविभक्तित्वमेव स्यान्न तु कारकविभक्तित्वम् । न च सम्भवति तस्मिन्नुपपदविभक्तित्वं न्याय्यम् । अतस्सत्त्यशब्देन ब्रह्मग्रहणं स्वीकार्य्यम् ।

किञ्च प्रकरणञ्चेदं 'परमात्मन एवोपपद्यते । तथाहि 'तरति शोकमात्मवित्तस्मै मृदिकतषायाय तमसः पारं दर्शयति भगवान् सनत्कुमारः' (छा० ७।१।३) इत्युपक्रमोपसंहारयोर्मोक्षजनकज्ञानविषयत्वेन[6] ब्रह्मण एव प्रतिपाद्यतावगमात् । ननु मध्ये प्रसङ्गान्नामाद्युपासनवत्प्राणोपासनमपि वक्तव्यम् । तथा च प्राणावान्तरप्रकरणं सत्त्व एवाधस्तादित्येतत्पर्यन्तं भविष्यति । न च संदंशाभावः 'आशाया भूयात्' (छा० ७।१५।१) इत्युपक्रमे कीर्तनात् । 'स एवाधस्तात्' (छा० ७।२५।१) इत्युपसंहारे तच्छब्देन कीर्तनात् । न च तत्रत्य तच्छब्दः परमात्मपरो न प्राणपर इति वाच्यम् । तथात्वे 'आत्मैषोऽधस्तात्' (छा० ७।२५।२) इत्यनेन पौनरुक्त्यापत्तेः । अत एव तु 'अतिवदाति' (छा० ७।१६।१) इत्यादिकं कथञ्चित्प्राणातिवादिविषयकमेव कल्पनीयमिति 'भूमा' प्राण एवेति चेन्न संदंशाभावेन प्राणावान्तरप्रकरणस्य 'एषः तु वा' (छा० ७।१६।१) इत्यतः प्रागेव विच्छेदेन तावत्पर्यन्तानुवृत्तौ मानाभावात् । नचात्मपर्यायेण पौनरुक्त्यात्तस्य जीवस्य ब्रह्माभेदविवक्षया प्रवृत्तेः 'अहमेवाधस्तात् (छा० ७।२५।१) इति पर्यायस्यापि स्थूलोऽहं 'धावति' इति न्यायेनोपपत्तेः । अतः प्रकरणं परमात्मन एवेति, भूमा परमात्मैव 'यत्र नान्यत्पश्यति' इति लक्षणोक्त्या 'यो वै भूमा तत्सुखम्' (छा० ७।२३।१ इति सुखत्वोक्त्या तदमृतमित्यमृतत्वोक्त्या तु परमात्मपरत्वस्यैव न्याय्यत्वान्न तेषां यथाकथञ्चिन्नयनमुचितम् । न च भूयः प्रश्नप्रतिवचनाभावाद्भूमा प्राण एवेति युक्तम्, 'प्राणो ह पिता' (छा० ७।२३।१) इत्यादिना सर्वात्मकत्वकीर्तनेन तस्य सर्वोत्कृष्टत्वबुध्या भूयः प्रश्नप्रतिवचनभावोपपत्तेः । अतो भूमा परमात्मेवैति सिद्धम् ॥

अक्षराधिकरणम्

अक्षरमम्वरान्तराधृतेः ॥ ३ ॥

'एतद्वै तदक्षरं गार्गी ब्राह्मणा अभिवदन्त्यस्थूलमनण्वह्रस्वमदीर्घम्' (बृ० ३।८।८) इत्यादि बृहदारण्यके श्रूयते । तत्र संदेहः । किमक्षरं प्रणव उत परमात्मेति । तत्र पूर्वपक्षः, अक्षरं प्रणवो ग्राह्यस्तत्र रूढ़त्वसम्भवात् ।

१. घ० मा० 'प्राणतिषाद्यपेक्षा' इति पाठ ।
२. घ० मा० 'वादिनो अति' इति पाठः ।
३. घ० मा० 'मन' इति पाठो नास्ति ।
४. घ० मा० 'पाद्यैषतु' इति पाठः ।
५. घ० मा० 'सत्वानि' इति पाठः ।
६. घ० मा० 'मोजनक' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततो योगस्यास्यैव दौर्बल्यान्न ब्रह्मग्रहणं भवेत्, आकाशशब्दतश्चैव प्रतीतेस्तस्य न ग्रह ओतत्वादादृते गौण्या वृत्त्योपपद्यते। अक्षरशब्देन प्राणव एव गृह्यते, तस्य वर्णेषु रूढत्वात्। न च ब्रह्मण्यप्यक्षरशब्दस्य योगसम्भवात्तस्य ग्रहणं भवत्विति वाच्यम्। रूढ्यपेक्षया योगस्य दुर्बलत्वात्। किञ्चाकाशशब्देन ब्रह्मणो गृहीतत्वात्पुनरक्षरशब्देन तत्प्रत्यधिकरणत्वेन निर्देशानुपपत्तिः। न चाकाशशब्दस्याव्याकृताकाशपरत्वेन ब्रह्मपरत्वन्नेति वाच्यम्। अत्रत्या-काशपदस्य व्याकृताकाशपरत्वायोगात्।

पूर्वऽस्मिन् गार्गीब्राह्मणे गार्ग्या याज्ञवल्क्यः पृष्टः कस्मिन् ब्रह्मलोका ओताश्च प्रोताश्च' (बृ० ३।८।७) इति तत्रोत्तरं 'गार्गि मातिप्राक्षिर्मा ते मूर्धा व्यपतिष्यति'[1], 'प्रश्नां वै देवतामति पृच्छसि गार्गी' माति प्राक्षिरित्यु-क्तवति याज्ञवल्क्ये शापभयादुपरता गार्गी पुनर्ब्राह्मणानां पराजयो माभूदिति ब्राह्मणानुज्ञां लब्ध्वा याज्ञवल्क्यञ्च संप्रार्थ्य पुनः 'पृष्टवति' यदूर्ध्वं हृदि[2] याज्ञवल्क्य दिवो यदवाक्[3] पृथिव्या यदन्तरा द्यावा पृथिवी इमे यद्भूतञ्च[4] भवच्च भविष्यच्च, (बृ० ३।८।५) इत्याचक्षते। कस्मिन्तदोतञ्च[5] प्रोतञ्चेति। कथञ्च प्रश्नः पूर्वं गार्ग्या' [6]कस्मिन्ब्रह्म-लोका' इति यः प्रश्नः कृतस्स एवौचित्यादन्यथा ब्राह्मणानुज्ञावैयर्थ्यप्रसङ्गात्। स च परमात्मविषयः। याज्ञवल्क्ये-नानतिप्रश्नीयत्वस्य तत्पुष्टेः वचनात्परमात्मन एव जल्पकथायां प्रष्टुमनर्हत्वादतोऽयमपि प्रश्नः परमात्मन एव। तस्य चोत्तरे परमात्मैवाकाशपदेन वक्तव्यो नाव्याकृताकाश इति। न च ब्रह्मणः प्रणव ओतत्वासम्भवो गौणत्वेना-प्युपपत्तेस्तवाप्यक्षरशब्देन ब्रह्मणो ग्रहणेऽभेदेनाकाशाधारत्वानुपपत्तेस्तुल्यत्वादन्तरिक्षलोकादीनामधस्तनानामादित्य-लोकादिषु सर्वेषु मुख्यस्योतप्रोतत्वस्यासम्भवेन गौणस्यैव स्वीकार्यत्वेन तत्प्रायपाठादपि प्रकृते गौणत्वोपपत्तेः। 'न चास्थूलम्' (बृ० ३।८।८) इत्यादिनिषेधानामप्रसक्तप्रतिषेधत्वापत्तिरिति वाच्यम्। ब्रह्मपक्षेऽपि तुल्यत्वादिति।

सिद्धान्तस्तु—

ब्रह्मैवाक्षरशब्देन योगवृत्त्येह गम्यताम्।
रूढ्यर्थसम्भवो यस्मादम्बरान्तधृतिश्रुतेः॥
ओतत्वादि च मुख्यस्यादादावन्ते च कीर्तनात्।
अव्याकृतग्रहश्चैव भवेदाकाशशब्दतः॥

अक्षरशब्देन परमेव ब्रह्म ग्राह्यन्न तु प्रणवस्तस्मिन्नाकाशान्तस्य जगत ओतप्रोतत्वासम्भवात्। न च रूढ्यनु-सारेण प्रणवे गृहीते ओतप्रोतत्वं कथञ्चिदापेक्षिकं ग्राह्यमिति वाच्यम्। मुख्ये सम्भवति गौणग्रहणस्यान्याय्यत्वात्। न च गन्धर्वलोकादिषु गौणमेव तद्दृष्टमितीहापि तदेव स्वीक्रियत इति वाच्यम्। गौणप्रायपाठस्य गौणार्थव्यवस्था-पकत्वस्येक्षत्यधिकरणेन निराकृतत्वात्तात्पर्याविषयीभूतस्य तस्य यथाकथञ्चिन्नयनेऽपि परमतात्पर्यविषयस्यादा-वन्ते च कीर्तितस्य मुख्यस्यैवोतप्रोतत्वस्य 'इन्द्रियेभ्यः पराह्यर्थाः' (कठ० १।३।१०) इत्यत्रेन्द्रियादीनां परत्वस्य कथञ्चिन्नयनेऽपि पुरुषपरत्वस्य मुख्यस्यैव स्वीकाराद्गन्धर्वलोकादीनामधस्तनानामप्यूर्ध्वलोकेषु परिच्छिद्यमानेषु

१. घ० मा० 'व्यपनत्ति' इति पाठः।
२. घ० मा० 'हृति' इत्यधिकः पाठः।
३. घ० मा० 'पद्वाक् इति पाठः।
४. घ० मा० 'हृदित च' इति पाठः।
५. घ० मा० 'कस्मि नोन च' इति पाठः।
६ घ० मा० 'बुल्यलोक' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

काष्ठेशिकाद्वारैवौप्रोतत्वसम्भवाच्च। न च तवाप्याकाशशब्देन ब्रह्मणो ग्रहणे सति मुख्यमोतप्रोतत्वन्न सम्भवत्यभेदादित्यौपचारिकमेव ग्राह्यमिति वाच्यम्। आकाशशब्दस्याव्याकृताकाशपरत्वात्। अन्यथा ब्रह्मलोकाधिधिकरणे 'पृष्टे' तदधिकरणस्य विद्यारूपस्य परित्यागे बीजानुपलम्भानिस्तात्पर्यप्रसङ्गात्। न चैवं याज्ञवल्क्यस्य सक्रोधनिवारणमनतिप्रश्नत्वकीर्तनानुपपन्नमिति वाच्यम्। अविद्यायामुक्तायां तदधिकरणीभूतं ब्रह्मानया द्रष्टव्यमिति मनसि कृत्वादावेव तन्निवारणोपपत्तेः। ब्रह्माभिप्रायेणैवानतिप्रश्नत्वस्य वर्तमानसामीप्यार्थक [1]लटं स्वीकृत्य प्रतिपादयितुं शक्यत्वात्। अस्थूलत्वानिषेधाश्च ब्रह्मण्येवाभेदविवक्षया योज्याः। तस्माद्योगेनाक्षरशब्दः परमेव ब्रह्म प्रतिपादयतीति सिद्धम्। अत एवाक्षरप्रशासनाधीनं विधारणं 'एतस्य वाक्षरस्य प्रसाशने' इत्यादिनोच्यमानमुपपद्यत इति।

ईक्षतिकर्माधिकरणम्

ईक्षतिकर्मव्यपदेशात्सः ॥ ४ ॥

सत्यकामप्रश्ने श्रूयते 'यः पुनरेतं त्रिमात्रमित्यनैवाक्षरेण परं पुरुषमभिध्यायीत सः तेजसि सूर्ये सम्पन्नो यथा पादोदरस्त्वचाविनिर्मुच्यता एवं ह वै सः परात्मना विनिर्मुक्तः सामभिरुनीयते ब्रह्मलोकम्' (प्र० उ० ५।४।५) इति तत्र संशयः। किमत्र त्रिमात्रप्रणवोऽन्योऽयमपरं ब्रह्मेति। तत्र पूर्वःपक्षः—

त्रिमात्रं प्रणवे ध्येयमपरं ब्रह्म गम्यताम्।
सः तेजसीति वाक्येन ब्रह्मलोकफलश्रुतेः ॥
परेऽस्योपास्तिपक्षे[2] तु मोक्षमेव वदेच्छ्रुतिः।
उपक्रमानुसारेण कथं वेह प्रतीतितः ॥

'यः पुनरेतं त्रिमात्रेणोमित्यनेनैवाक्षरेण परं पुरुषमभिध्यायीत' (प्र० उ० ५५) इति प्रणवे ध्येयत्वेनोच्यमानमपरमेव ब्रह्म भवितुमर्हति। तद्वचानेन 'सः तेजसि सूर्ये सम्पन्नः' (प्र० उ० ५।५) इति वाक्येन ब्रह्मलोकप्राप्तेरभिधानात्परमात्मोपासनत्वे तु मोक्ष एव फलं वक्तव्यं स्यान्न च दहरशाण्डिल्याद्युपासनेषु परब्रह्मोपासनारूपत्वेऽपि ब्रह्मलोकप्राप्तेरेवाभिधानेन ब्रह्मोपासनपरत्वे मोक्षफलकत्वनियमाभावादिति वाच्यम्। अन्यत्रानियमेऽप्यत्रोपक्रमानुसारेण परोपासनाया[3] मोक्षफलत्वस्यावश्यकत्वादेवं ह्यु पक्रमे श्रूयते 'एतद्वै सत्यकाम परञ्चापरञ्च ब्रह्मयदोङ्कारस्तस्माद्विद्वानेतेनैवायतनेनैकतरमन्वेति' (प्र०उ० ५.२) इति। तस्मात्परो(मु)पासनया (स्य) परप्राप्तिर्वक्तव्या स्यात्। नन्वेवं परब्रह्मोपासने प्रणवावलम्बनमुपक्रमे प्रतिज्ञातन्न व्युत्पादितमेव। न च प्रणवे परब्रह्मोपासनमुपक्रमेणोक्तमेव, किन्तु प्रणवेण ज्ञेयत्वमात्रं समानाधिकरणस्य तावतैवोपपत्तेरिति वाच्यम्। प्रणवज्ञेयत्वस्यापि परमात्मनि क्वाप्यनुक्तेः। अपरं ब्रह्मपरत्वे 'यः पुनरेतम्' इति वाक्यस्य परमिति विशेषणानुपपत्तेश्चेति चेदुच्यते 'स एतस्माज्जीव-

१. 'वर्तमानसामीप्यवर्तमानवद्वा'………इति विहितमित्यर्थः।
२. घ० मा० वा' इति पाठो नास्ति।
३. घ० मा० 'सासनायापरप्राप्तिरूप' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

घनात्परात्परं पुरिशयं पुरुषमीक्षत' (प्र० उ० ५।५) इति श्रुत्या प्रणवसाधकब्रह्मसाक्षात्कारस्य प्रतिपादनेन प्रणवसम्बन्धिपरब्रह्मसाक्षात्कारस्यानुकूल्यसिद्धेः। न चास्य परब्रह्मसाक्षात्कारप्रतिपादकत्वम्।

न तु परब्रह्मसात्कारप्रतिपादकत्वमिति वाच्यम्, वाक्यवैयर्थ्यापत्तेः। तल्लोकगतस्य तत्साक्षात्कारस्यार्थसिद्धत्वात्। न च भवन्मतेऽपि तदुक्तिर्व्यर्था, तत्र ब्रह्मसाक्षात्कारस्यानुक्तसिद्धत्वादिति वाच्यम् 'इमं मानवमावर्यन्नार्वतत' इत्यत्रेदमिति विशेषणस्वारस्येन [1]कल्पान्तरे-आवृत्त्यवगमेन तत्साक्षात्कारस्यानियमेनावश्यंवक्तव्यत्वात्, अत एव परात्परमित्युक्तम्। एवञ्च परमिति विशेषणमपि पिण्डापेक्षया परत्वमादायेत्यवं गन्तव्यम्। न च 'स तस्मात्' (प्र० उ० ५।५) इति वाक्ये-उक्तसाक्षात्कारस्य प्रणवसाधकत्वं कुतोऽवगम्यत इति वाच्यम् सम्मतिश्लोके 'ऋग्भिरेतं यजुर्भिरन्तरिक्षं सामगिर्यत्तत्कवयो वेदयन्ते, तमोङ्कारेणैवायतनेनान्वेति विद्वान्यत्तच्छान्तमजरममृतमभयं परञ्च' (प्र० उ० ५।७) इति वचनेन पूर्वोक्तार्थानुवादकेन प्रणवसाध्यसाक्षात्कारस्योक्त्या पुरोवादे तस्य कल्प्यत्वात्, यद्वा 'स सामभिरुन्नीयते ब्रह्मलोकमित्यस्मात्स एतस्मात्' [प्र० उ० ५।५] इति वाक्यमोङ्कारेण परब्रह्मोपासकस्य परसाक्षात्कारप्रतिपादकस्य मन्त्रस्थतच्छब्दस्य[2] 'तस्माद्विद्वान्' [प्र०उ० ५ १०] इति पूर्ववाक्यप्रस्तुतविद्वत्परामर्शकत्वसम्भवादिति।

अत्राभिधीयते—

त्रिमात्रप्रणवे ध्येयं परं ब्रह्मेति गृह्यताम्।
ध्येयस्येक्षणकर्म (त्व) मु (उ) पदेशेन हेतुना॥

साक्षात्कारस्य विषयस्सत्यमेव भवेन्न तु।
अपरं ब्रह्म बाध्यत्वादेवं सत्यप्रमा भवेत्॥

ब्रह्मलोकगतिद्वारा मोक्षस्य प्रतिपादनात्।
उपक्रमे श्रुतस्येह विरोधो नैव विद्यते॥

त्रिमात्रप्रणवध्येयं परमेव ब्रह्म 'स तस्माज्जीवघनात्[3] परात्परं पुरिशयं पुरुषमीक्षत' (प्र०उ० ५।५) इति परमात्मन ईक्षणविषयत्वेन श्रवणाद्धेयत्वमपि तस्यैव गम्यत ईक्षणध्यानयोरदृष्टद्वारकस्य समानविषयकत्वेनैव कार्यकारणभावस्य स्वीकारादीक्षणस्य च परमात्माविषयत्वञ्ज्ञानानां प्रमात्मौत्सर्गिकत्वेनाबाधितविषयकत्वस्य स्वीकार्यत्वादभ्युपगन्तव्यम्। अत एव घटादिप्रत्यक्षस्य व्यावहारिकविषयत्वेन प्रमात्वं व्यवस्थाप्यते। विषयस्य सत्यत्वमन्तरा प्रमात्वन्न निर्वहति। तत्र च कालानवच्छिन्नबाधविषयत्वस्याबाध्यत्वस्य सम्भवे व्यावहारिकाबाध्यस्य कर्तुमयुक्तत्वा-

१. घ० मा० 'कलान्तरे' इति पाठः।

२ घ० मा० 'समन्त्रमस्त सच्छिन्नमस्तु' इति पाठः।

३. घ० मा० 'जीवद्यवचद' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्कालानवच्छिन्नबाधाविषत्वञ्च[1] 'सत्यं ज्ञानम् (तै०उ० २।१) इत्यादिश्रुतिपर्यालोचनया ब्रह्मण एव, न तु हिरण्यगर्या-देर्नेहनानेति (बृ० ४।४।१९) श्रुत्या ब्रह्मातिरिक्तस्य सर्वस्य बाधात्, 'स एव तस्माज्जीवघनात्' (प्र०उ० ५।५) इति वाक्येन हिरण्यगर्भापेक्षया कर्मणोऽन्यत्त्वावगमात्तात्रत्यैतच्छब्दस्य पूर्वप्रस्तुतहिरण्यगर्भपरामर्शकत्वात्तथा च ब्रह्मण एव प्रकृत ईक्षणकर्मत्वे स्थिते सति तत्कारणीभूतध्यानकर्मत्वमपि परस्यैव ब्रह्मणो युक्तम्। न च परमुपास्ते स्तस्य मोक्ष एव वक्तव्यः, उपक्रमानुसारादित्युक्तमिति वाच्यम्। उपक्रमोक्तेः क्रममुक्ताभिप्रायेणैव पर्यवसन्नत्वात्। न च ब्रह्मोपासनत्वे 'ये चेमे रण्ये[2]' (छा० ५।१०।१) इति वाक्यनैव ब्रह्मलोकप्राप्तिफलकत्वस्य सिद्धत्वात्पुनरस तेजसीत्यादिवाक्येन तदुक्तिव्यर्थेति वाच्यम्, प्रतीकालम्बनस्य ब्रह्मलोकप्राप्तिफलकत्वाभावेन तदुक्तेस्सार्थक्यात्। न च परब्रह्मध्यानस्योपक्रमोक्तस्यानुक्तिर्दोषः। एकमात्रद्विमात्रप्रणवोपासनस्यापरब्रह्मविषयतायाः कथञ्चिदुपपादनीयत्वात् परं ब्रह्मोपासनस्येह प्रकरणे मुख्यतया वक्तव्यत्वात्। अत एव ह्युपक्रमे 'परं ब्रह्मान्वेषमाणा' (प्र० उ० १।१) इत्युक्तम्। तस्मात्परमेव[3] ब्रह्म ध्येयं त्रिमात्रप्रणव इति सिद्धम्।

---

१. शुद्धेऽधिष्ठाने विपरीतमध्यस्य प्रवर्तमानस्य निवर्तमानस्य वा यदधिष्ठानविषयकं बाधकज्ञानं परोक्षमरोक्षं वा, उत्पन्नं तदनन्तरमिदमिह कालत्रयेऽपि नास्तीति योऽयन्निश्चयः स एव बाध इति सर्वजनानुभवसिद्धः। एवं ब्रह्मसाक्षात्कारे जाते ज्ञानं तत्कार्यञ्च सर्वं, यात्किञ्चित्तत्राध्यस्तं तत्सर्वं तत्र कालत्रयेऽपि नास्तीति यो निश्चयः स्वानुभवसिद्धः स एव तस्य तत्र बाध इत्युच्यते। अत एव 'प्रतिपन्नोपाधौ निषेधप्रतियोगित्वमनिर्वचनीयत्वमिति सम्प्रदायविदां लक्षणमपि समञ्जसम्।

साक्षात्कृते त्वधिष्ठाने समनन्तरनिश्चितिः।
अध्यस्यमानन्नास्तीति बाध इत्युच्यते बुधैः॥ (वे० सि० मु० पृ० २२०)

विवरणकारास्तु—'प्रतिपन्नोपाधावभावप्रतियोगित्वं मिथ्यात्वम्' (पं० पा० वि पृ० १७४) यद्यपि प्रकाशानन्दस्य' प्रतिपन्नोपाधौ निषेधप्रतियोगित्वम्' इत्यस्मिल्लक्षणे 'त्रैकालिक' इति पदाभावः। विवरणकाराणां लक्षणे 'तु निषेध स्थाने अभाव पदमस्ति। वेदान्तदेशिकस्य शतदूषण्यां तु 'प्रतिपन्नोपाधौ निषेधप्रतियोगित्वरूपं बाध्यत्वम्।' (श० दू० पृ० ८०) मुक्तावलीकारतुल्यमेव लक्षणं लक्ष्यते। परन्तु-व्यासतीर्थेन 'प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वम्' (न्यायामृत पृ० १२) इति लक्षणखण्डनावसरे 'त्रैकालिक' इति पदं समायोजितं स्यात्। विवरणकारलक्षणान्तः पाति 'अभाव' शब्दस्तथा 'निषेध' शब्दस्तु समानार्थक एव। तथा च 'निषेध' शब्दप्रयोगः पूर्वमद्वैतिभिः कृतः स्यात्। ततः व्यासतीर्थेन स्वमताभीष्टार्थं 'त्रैकालिक' शब्दस्य प्रयोगः कृत इत्यनुमीयते। अत एव न्यायामृतखण्डनावसरे, अद्वैतसिद्धिकारमधुसूदनसरस्वतीभिः 'प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वम्' (अ०सि०पृ० २१) तद्वदेवावतारितम्। तथापि 'प्रतियोगि' शब्दार्थसंघटनावसरे विवरणकारैः 'त्रैकालिकनिषेध' इति शब्दत उपात्तः। यथा 'त्रैकालिकनिषेधं' प्रति स्वरूपेणापणस्थरूप्यम् पारमार्थिक-त्वाकारेण प्रातिभासिकं वा प्रतियोगि '(पं०पा०वि०पृ० १९२) तथैव' 'निषेधप्रतियोगि' शब्दार्थोऽपि संघटित। यथा लौकिकपरमार्थरजतमेव नेदं रजतमिति निषेधप्रतियोगि' इति (पं० पा० वि० पृ० १९२) तस्माल्लक्षणेऽनूपात्तशब्दोऽयमिति न भ्रमितव्यम्। प्रकृते बाधविषयत्वं तु 'सत्यं ज्ञानमनन्तं ब्रह्म' इति श्रुतिप्रमाण्याद्ब्रह्मैवेति।

२. घ० मा० 'ये चेनोरण्य' इति पाठः।

३. ख० मा० 'परमेव ब्रह्मणि' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दहराधिकरणम्

दहरः उत्तरेभ्यः ॥ ५ ॥

अथ यदिदमस्मिन्ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशस्तस्मिन्पदं तदित्यन्वेष्टव्यं तद्वाव विजिज्ञासितव्यम् (छा० ८।१।१) इति छन्दोगास्समामनन्ति। तत्र सन्देहः। किं दहराकाशः परंब्रह्म-उत भूताकाश, उत जीव इति तदर्थञ्च किं दहराकाशस्यब्रह्मत्रोपासना प्रतिपाद्यत उत तदन्तर्वतिन इति। किं प्राप्तम्

रूढ्याकाशशब्दोऽयं भूतस्य प्रतिपादकः।
परमात्मनस्तु गौण्या स्यान्न च सहोपपद्यते ॥
यावान्वायमित्यादि कथञ्चिदुपपद्यते।
एष इत्यादिनिर्देशस्तदन्तर्वर्ति वस्तुनः ॥
उपास्यत्वञ्च तस्यैव शुचिस्वारस्यतो भवेत्।
आकाशोपास्तिपक्षेऽपि जीव एव भवेद्ध्रुवम ॥
'एष' इत्यादिवाक्येन प्रस्तुतस्यैव वस्तुनः।
सम्प्रसादत्वनिर्देशाज्जीव एवेति निश्चयः ॥

'दहरोऽस्मिन्नन्तराकाश (छा० ८।१।१) इत्याकाशशब्दो भूताकाशं शक्त्या प्रतिपादयति गौण्यातु ब्रह्म, न च मुख्यासम्भवे गौणी ग्रहणं युक्तम्। न च 'यावान्वायमाकाश' (छा० ८।१।३) इत्याद्युपमानो (मु) पपद्यते। अभेदे उपमानोपमेयभावानुपपत्तेरिति वाच्यम्। काल्पनिकभेदमादाय[१] तदुपपत्तेः। ननु काल्पनिकभेदे,उपाध्यपेक्षायां हृदयपुण्डरीकस्यैवोपाधित्वं वक्तव्यम्। तथा च यत्[२] परिमाणो बाह्याकाशस्तत्सदृशपरिमाण इत्यर्थं पर्यवसाने सत्यनुपपत्तिरेव [३]हृदयावच्छिन्नस्याकाशस्याल्पपरिमाणत्वात्। किञ्च पूर्वत्र हि शिष्याणामयं प्रश्नः तञ्चेदं ब्रूयुर्यदिदमस्मिन्ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाश किञ्चिदत्र[४] विद्यते यदन्वेष्टव्यं यद्वाव विजिज्ञासिनव्यम् (छा० ८।१।२) इति वाक्ये प्रतिपादितस्तदुत्तरत्वेन 'यावान्वायमाकाशः' तावानेषोऽन्तर्हृदय आकाश उभे अस्मिन् द्यावापृथिवी-अन्तरेव समाहिते-उभावग्निश्च[५] वायुश्च सूर्याचन्द्रमसावुभौ विद्युन्नक्षत्राणि यच्चास्तीति[६] यच्च नास्ति सर्वं तदास्मिन् समाहितम् (छा० ८।१।३) इति वाक्यप्रवृत्तेः।

अत्र च द्यावापृथिव्यादिसकलसमाधानाधारत्वमत्यल्पपरिमाणे हृदयाकाशे तूपपन्नेमेव-अतिसूक्ष्मस्य सकलजगदाधारत्वानुपपत्तेः। किञ्चैष 'आत्मापहत पाप्मा विज्वरविमृत्युर्विशोको विजिघत्सोऽपिपसःसत्यकामः सत्यसङ्कल्पो यथा (छा० ८।१।५) इत्यत्रैतच्छब्देन दहराकाशं[७] परामृश्यात्मत्वादि[८]विधानादमृताकाशानुपपत्तिः।

---

१. ख० मा० 'कल्पकभेदमादाय' इति पाठः।
५. घ० मा० 'यत्' इति पाठो नास्ति।
३. घ० मा० 'आलय' इति पाठः।
४ छान्दोग्ये 'किं' इति पाठः।
५. घ० मा० 'अग्नि' इति पाठो नास्ति।
६. ख० घ० मा० 'चास्य' इति पाठः।
७. ख० घ० मा० 'इ आकाशं' इति पाठः।
८. ख० घ० मा० 'त्वागादि' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परमात्मापक्षे तु तस्मिन्भूताकाशेन सह तुल्यपरिमाणत्वमल्पत्वनिवृत्त्योपपादयितुं शक्यम्। द्यावापृथिव्यादिसमानाधारत्वञ्चोपादनत्वादुपपन्नतरमात्मत्वादिकं तु सम्यगेवोपपन्नमिति चेदुच्यते शिष्याणामाक्षेपो ह्यल्पत्तरहृदयाकाशे किमपि नास्ति विचित्रस्य च परिहर्तुरयमाशयः द्यावापृथिव्यादिकं ह्यत्र ब्रह्मलोकादिगमनोत्तरमुपभोग्यमेव गृह्यते [1]क्रतुन्यायादुपभोग्यञ्च 'मनसैवैतान्पश्यन् [2]क्रमते य एते ब्रह्मलोक' इति वाक्ये मनोग्रहणस्य परिसंख्यार्थंत्वेन मनस एवोपभोगसाधनत्वावगमे मानसमेव [3]स्वाप्निक तुल्यमित्थमगम्यते[4] । स्वाप्निकाश्चान्तरेव[5] शरीरे इति [6]कण्ठे (स्य) स्वप्नंविनिर्देशेदित्यादिवचनादवगम्यते। अतस्तत्तुल्यस्यापि द्यावापृथिव्यादेस्तत्रावस्थानमुपपद्यत इति द्यावापृथिव्यादिसमाधानाधारत्वं हृदयाकाशस्योपपद्यते 'यावान्वायमाकाशः' (छा० ८।१।३) इत्यादिवाक्यञ्च द्यावापृथिव्यादिसमानाधारत्वं यथा बाह्यस्य तथान्तरस्याप्युपपद्यत इत्यभिप्रायः 'एवञ्चात्मा' इति वाक्यमप्युपास्यस्य द्यावापृथिव्या घटावच्छिन्नस्य चैतन्यस्य परामर्शकं सत्तस्यैवात्मत्वं ब्रवीति। अत एवोपक्रमे तस्मिन्यदन्तस्तदन्वेष्टव्यं' तद्वाव विजिज्ञासितव्यमित्यन्तवर्तिन एवोपासनमुक्तं नत्वाकाशस्य।

न च द्यावापृथिव्यादीनां द्विवचनान्तनिर्दिष्टानां कथमेकवचनान्तशब्देन परामर्श इति वाच्यम् 'सर्वं तदस्मिन्समाहितम्' (छा० ८।१।३) इत्यत्राप्येकवचनान्तेन प्रस्तुतत्वादत एव समानप्रकरणवैपरीत्ये[7] तस्मिन्सर्वं प्रतिष्ठितम्' इत्येव[8] श्रूयते[9] आत्म (पद्य) पद सामानाधिकरण्यपुंस्त्वस्याप्युपपत्तिः, 'सा वैश्वदेव्यामामिक्षेतिवत्तस्माद्दहराकाशशब्दो रूढ़भूताकाशस्यैव प्रतिपादको न तु ब्रह्मणः। यदि च सर्वनाम्नो व्यवहितपरामर्शकत्वं स्वीकृत्य' दहराकाश एव 'तस्मिन् यदन्त' (छा० ८।१।१) इत्यत्र हृदये विद्यमान आकाशो गृह्यत उपास्यत्वेन तथापि जीव एव ग्राह्यो द्यावापृथिव्यादीनां मानसानां जीवोपादानकत्वेन तस्मिन्नवस्थितिः सम्भवादपहतपाप्त्वादिकञ्चाविद्योपाधिकस्य जीवस्योपपद्यत एव ब्रह्म लौकिकानां वा तेषां ग्रहणे ब्रह्म तस्मिन्स्वाभाविकदहरत्वस्यानुपपत्तेरौपाधिकदहरत्वस्योपाधिस्वल्पत्वेनैव सिद्धौ पुनः कीर्तनविकल्पेन स्वाभाविकदहरस्यैव स्वीकार्यत्वाद्ब्रह्मपुरशब्दोऽपि कथञ्चज्जीव एव नेयः, 'एष' इत्यादिवाक्यान्तबोधक 'एषः सम्प्रसादः' (छा० ८।२।४) इति वाक्येन प्रकृतमेवोपास्यमात्मानमेवैतच्छब्देन परामृश्य सम्प्रसादत्वरूपसुषुप्त्यवस्थासम्बन्धरूपजीवधर्मप्रतिपादनञ्च जीव इति प्राप्तेऽभिधीयते—

आकाशो ब्रह्म विज्ञेयं यावानित्यादिवाक्यतः।
नह्येतदन्यथा नेयं गतौ सत्यां तथा सति ॥
सर्वेषामेव शब्दानां लक्षणा वृत्तितो भवेत्।
ब्रह्मलोकादिशब्दास्तु[10] ब्रह्मणः प्रतिपादकाः ॥

१. घ० मा० 'तत्ववनुपायादुपभोग्यम्' इति पाठः।
२. ख० घ० मा० 'मनसंतातामान्यश्यक्रमते' इति पाठः।
३. घ० मा० 'स्वान्पिक' इति पाठः।
४. ख० मा० एतावदेवोपलम्यते।
५. घ० मा० 'स्वाकाशाश्चान्तरेव' इति पाठः।
६. घ० मा० 'स्व अं विनिर्दशेदि' इति पाठः।
७. घ० मा० 'वैपरिप्येके' इति पाठः।
८. घ० मा० 'प्रविद्वित' इति पाठः।
९. घ० मा० 'शूयते' इति पाठः।
१०. घ० मा० 'श्व इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सेत्यत्र तेन ब्रह्मैव ग्राह्यं नेतरयोर्ग्रहः ।
ध्येयत्वं दहरस्यैव फलवाक्यश्रुतेर्बलात् ।।
'एष' इत्यादिवाक्यञ्च तद्बोधकतया स्थितम् ।
अतोऽत्र परमात्मैव ध्येयो नान्य इतीष्यते ।।
'एष' इत्यादिवाक्येन जीवस्य प्रतिपादनम् ।
परस्य बोधनेच्छातः प्रवृत्तमिति निर्णयः ।।

दहराकाशः पर एवात्मा न तु भूताकाशः 'यावान् वायमाकाशः' (छा० ८।१।३) इति श्रुत्या वायं भूताकाशसदृशपरिमाणत्वस्य प्रतिपादनेन तदन्यत्वावगमात् । न च पूर्वपेक्षोक्तरीत्या मानसद्यावापृथिव्यादिसमानाधारत्व[1] एव पर्यवसानात्कथञ्चित्तं नेयमिति[2] वाच्यम्, तथा सति सर्वस्य वाक्यस्यैव स्वार्थपरित्यागप्रसङ्गात् । न चात्यागेनोपपत्तौ त्यागकल्पनमुपपत्तिमत् । ननु भवतामपि मते भूताकाशतुल्यत्वन्नोपपद्यते, ज्यायानाकाशादित्यादिश्रुतेः । न चाल्पत्वनिवृत्तिपरमिदमिति वाच्यम्, तथात्वे लक्षणायाः तुल्यत्वादिति[3] चेदुच्यते 'इतं चेद् ब्रूयुः' (छा० ८।१।२) इति प्रश्नवाक्येऽल्पत्वस्यैवाकाशे प्रतिपादनपूर्वकं तत्र किमपि नास्तीत्याक्षेपस्य कृतत्वेन तदुत्तरत्वनिवृत्तेरेव वक्तव्यत्वेन तत्तात्पर्यावगमेन लक्षणाया अदोषत्वात् । न चास्मन्मतेऽपि द्यावापृथिव्यादीनां मानसानामेव ग्रहणे तदाधारत्वयोग्यस्यैव वैपुल्यस्य वक्तव्यत्वेन तदनुसारेणार्थवर्णस्यापि तात्पर्यविषयत्वौचित्यादिति वाच्यम्, द्यावापृथिव्यादीनां सङ्कुचितानां ग्रहणे द्यावापृथिव्यादिपदानां [4]सङ्कोचस्य बोधापत्तेः । न च तत्क्रतुन्यायेन' सङ्कोचोयुक्त इति वाच्यम्, न्यायानुसारेण वचनस्य बोधानुपपत्तेः[5] । न च तथापि हृदयावच्छिन्ने परमात्मनि सर्वजगत्समाधानमनुपपन्नमिति वाच्यम् । परमात्मनि तत्समाधानोक्तेः 'उभेऽस्मिन्द्यावापृथिवी अन्तरेव समाहिते' इत्यत्रान्तःशब्दस्यात्मान्तरित्यर्थकत्वात् । किञ्च 'एष आत्मा' (छा० ८।१।५) इति प्रकृतं दहराकाशमात्माशब्देन परामृश्यात्मत्वादीनां [6]बोधनाद्दहराकाशपर एवात्माशब्द सर्वं समाहितमिति सर्वावच्छिन्नं ब्रह्म पूर्ववाक्यस्थं परामृशति, न तु दहराकाशम् । न च 'नास्य [7]जरयैतज्जीर्यति न बधेनास्य हन्यते सत्यं ब्रह्मपुरमस्मिन्कामाः समाहिताः' (छा० ८।१।५) इति वाक्ये—इदमादिपदानां भूताकाशस्य[8] परामर्शकत्वं स्वीकृतम् 'अस्मिन्कामाः समाहिताः' (छा० ८।१।५) इति कामाधारत्वोक्त्या ब्रह्मलौकिकपित्रादीनां काम्यमानानामाकाशान्तर्वर्तित्वोक्तेः, यच्चास्येहास्ति यच्च नास्ति' (छा० ८।१।३) इति कामानामेवाकाशे विद्यमानत्वश्रवणादिति वाच्यम् 'तं चेद् ब्रूयुः' इत्याक्षेपवाक्ये[9]

१. घ० मा० 'समधानाधारत्वरव' इति पाठः ।
२. घ० मा० 'देयम्' इति पाठः ।
३. घ० मा० 'अल्पत्वात्' इति पाठः ।
४. घ० मा० 'बाधापत्तेः' इति पाठः ।
६. घ० मा० घोषणात्' इति पाठः ।
७. घ० मा० 'विरम्येतव' इति पाठः ।
८. घ० मा० 'च' इति पाठः ।
९. घ० मा० 'त्यापक्ष वाक्ये' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हि शरीरजराप्रध्वंसाभ्यामाकाशस्य नाशो न दृष्टः। (अपि) तर्हि तदन्तर्वर्ति किमपि [1]नास्तीत्येवाक्षिप्तं, अत उत्तरवाक्येऽपि तस्यैव नाशः प्रतिषेद्धव्यः। अन्यथाकाशस्यामूर्तत्वेन जराध्वंसयोरप्रसक्त्या[2] तद्वैयर्थ्यापत्तेः।

अतो द्यात्यादिशब्देन ब्रह्मैव वक्तव्यम्। अत एव 'एतत्सत्यं ब्रह्मपुरम्' (छा० ८।१।५) इति सत्यशब्देन बौध्यत्वं ब्रह्मशब्देन च तत्र हेतूक्तिपूर्वकं शरीरध्वंसाद्धि[3] न ध्वंसाभावः प्रतिपादितः 'अस्मिन्कामाः' छा० ८।१।५) इति तु कामशब्देन सृष्ट्यनुकूला इच्छैवोच्यते, न तु काम्यमानाः पित्रादयः; 'तस्यैवैष आत्म्य इत्यत्रैतच्छब्देन (ब्रह्मणः)[4] परामर्शो युक्त इति चेदुच्यते। आक्षेपवाक्यस्य ह्ययमभिप्रायो यथा हि राजाश्रितामात्यभृत्योश्च राज्ये धनादिनाशे[5] दरिद्रो[6] भवति तथा शरीरे नष्टे तदन्तर्वर्त्याकाशान्तर्वर्तिद्यावापृथिव्याद्यपि नष्टं भवतीति वाक्यं वा दधिभाण्डे नष्टे तदन्तर्वर्त्यप दध्यादिनष्टं भवति तद्वच्छरीरे नष्टे द्यावापृथिव्यादिरपि[7] नष्टो भवतीत्येवमेव वर्णयन्ति अन्यथा प्रश्नस्य द्यावापृथिव्यादिसमाधानाधारत्वेनोक्ताकाशं परित्यज्य शरीरजराप्रध्वंसानुविधायि जराप्रध्वंसविषयस्यानुपपत्तेरिति।

तत्राद्याभिप्राय[8] दूषणाय 'नान्यज्जरयैतज्जीर्यते न बधेनास्या हन्यत' (छा० ८।१।५) इत्यन्तरवाक्यं प्रवृत्तं, तथा चाकाशस्य जराप्रध्वंसादिकमेव नास्तीत्यभिप्रायः। द्वितीयस्य तूत्तरमेत् 'सत्यं ब्रह्मपुरम्' (छा० ८।१।५) इति तथा च न दधिमाण्डस्याकाशतुल्यता, दहराकाशस्य ब्रह्मरूपता तु[9] 'या सर्वा हि वा' इति कामाधारत्वोक्त्या ब्राह्मलौकिकपित्रादीनां काम्यमानाधारत्वादिति। अतः प्रश्नप्रतिवचनं दहराकाशविषय एवेति 'तस्यैवैष आत्मापहत पाप्मा' (छा० ८।१।५) इत्यादीनामात्मत्वादय धर्माः कीर्त्यन्त इति परमात्मन एव ग्रहणन्न्याय्यम्। न चैव (मपि ?) द्यावापृथिव्यादिसमानाधारस्योपास्यत्वे मानाभावः तदन्तर्वर्तिन एव तस्मिन् (पदन्तरि) (छा०८।१।१) इत्यादिनोपास्यत्वावगमादिति वाच्यम्। उपक्रमस्य ब्रह्मवदस्वारस्यानुरोधेन ब्रह्मण उपास्यत्वावगमात्। अन्यथा तदुक्तिवैपर्थ्यात्। न चात्र ब्रह्मशब्दो जीवपर इति वाच्यम्, लक्षणायां मानाभावात्। ब्रह्मणोऽप्युपलभ्याधिष्ठानत्वेन तत्सम्बन्धसम्भवाच्च, अग्र 'चतद्य[10] इहात्मानमननुविद्य ब्रजन्त्येतांश्च सत्यान्कामान्' इति [11]'वाक्येनात्मनोऽप्युपास्यत्वकीर्तनाच्च। न च तद्वाक्यमुपासनाविधायकमस्त्विति वाच्यम्। तथा सति तस्यैवोत्पत्तिविनियोगरूपत्वेन गौरवप्रसङ्गात् 'एतांश्च सत्यान्कामान्' इति पुनः कीर्तनस्य परिसंख्यात्वप्रसङ्गाच्च। अत इदमेव वाक्यं दहराकाशस्योपासनाबोधकमिति वक्तव्यम्। तदा च 'तदन्वेष्टव्यमिति[12] तच्छब्द आकाशविशिष्टस्य द्यावापृथिव्यादेः परामर्शको भविष्यति। पूर्वोक्तवाक्यस्य वा परामर्शको भविष्यति।

१. घ० मा० 'इत्येवाक्षि' इति पाठः।
२. घ० मा० 'जरावसमो' इति पाठः।
३. घ० मा० 'धंसादि न वंसा भाव' इति पाठः।
४. घ० मा० 'एतच्छब्देन' परामर्शं' इति पाठः।
५. घ० मा० 'घसदिनाशे' इति पाठः।
६. घ० मा० 'हरिद्रो' इति पाठः।
७. घ० मा० 'व्यावा' इति पाठः।
८. घ० मा० 'तत्रा घामिप्राय' इति पाठः।
९. घ० मा० 'ब्रह्मरूपतया तु या सर्वा हि वा' इति पाठः।
१०. घ० मा० तदय' इति पाठः।
११. घ० मा० 'मिति' पाठः।
१२. तुलनीय 'सो न्वेष्टव्य' (छा० उ० ८।७।३)।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवञ्च सति दहराकाशस्य नोपास्यत्वमपि तु तदन्तर्वर्तिन एव 'यावान् वायमाकाशस्तावानेषः' (छा० ८।१।३) इत्येकं वाक्यमन्तर्हृदय आकाश (छा० ८।१।३) इत्यःपरं वाक्यमिति वाक्यभेदं स्वीकृत्य दहराकाशान्तर्वर्तिपरमात्मन एवोपास्यत्वमिति शङ्कापरास्ता[१] उक्तरीत्योपपत्तौ वाक्यभेदादिकल्पनाया अन्याय्यत्वात् । किञ्च 'अहरहर्गच्छन्त्येतं ब्रह्मलोकं न विन्देदिति ब्रह्मलोकशब्दः परमेश्वरपरिग्रहे द्यवतेनेतादिशब्दश्च तस्मिन्नेवोपपन्नः । अतः पर एवात्मेहोपास्याकाशशब्दप्रतिपाद्यश्चेति सिद्धम् । जीवस्योपास्यत्वमनाङ्कनीयमेव सत्यकामत्वादीनां तस्मिन्नसम्भवात् 'एषः सम्प्रसादः' (छा० ८।३।४) इति वाक्यन्तु जीवः सम्प्रसन्नो यत्र विलीनस्तदेव ब्रह्मेति प्रतिपादनायाकाशशब्दस्य रूढ़िनिरूढ़िभ्याञ्जीवे क्वच्यप्रयोगात् । परमात्मनि तु निरूढ्या प्रयोगः । अतसिद्धम् परमात्मेव दहराकाश इति ।

ननूत्तरस्मात्प्रजापतिवाक्याज्जीव एवात्रोपास्यत्वेन प्रतिपाद्यते[२] । तथा हि 'य आत्मा अपहत पाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासस्सत्यकामस्सत्यसङ्कल्पस्सोऽन्वेष्टव्यस्स विजिज्ञासितव्यस्सर्वांल्लोकान्प्राप्नोति सर्वांश्च कामानित्युपक्रम्येन्द्रविरोचनौ प्रति 'य एषोऽक्षिणि पुरुषो दृश्यत' (छा० ८।७।४) इत्यादिना जाग्रदभिमानिनि जीवै उपन्यस्ते विरोचनस्य देहात्मवादो दृढो जातः । इन्द्रस्य तु प्रतिबिम्बभ्रमो जातः । विरोचनस्तावतैव स्वगृहं गतवान् । इन्द्रस्तु प्रतिबिम्बात्मनि दोषं दृष्ट्वा पुनः प्रजापतिनिकटमागतवान् । तं प्रति प्रजापतिरेतत्त्वेव ते भूयोऽनुव्याख्यास्यामीत्युपक्रम्य' 'य एष स्वप्ने महीयमानश्चरति (छा० ८।१०।१) इति स्वप्नसम्बन्धिनमुपन्यस्यात्मानं तूष्णीं[३] प्रजापतौ पुनरपि तत्र निदर्शनपूर्वकं पुनरागत्य पुनः प्रजापतिः सुषुप्तिसम्बन्धिनमात्मानमुपदिष्टवान् । तत्रापि दोषदर्शनेन पुनः पृष्टवति मघवति शरीरनिन्दापूर्वकं चतुर्थे पर्याय 'एष सम्प्रसादोऽस्माच्छरीरात्समुत्थाय परञ्जोतिरूपसंपद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमपुरुषः' (छा० ८।१२।३) इत्यात्मानं प्रतिपादितवान् । अतः प्रजापतिवाक्यं सुषुप्त्यादिसम्बन्धाज्जीव अपरमिति निश्चीयते । न च त्रिभिः पर्यायः जीवमनुद्य चतुर्थे पर्याये तस्य ब्रह्मत्वं बोध्यत इति वाच्यम् । एवं हि सति निर्विशेषविद्यैव स्यात्तत्र 'एष आत्मापहतपाप्म' (छा० ८।१।१५) इत्यादिना गुणकीर्तनमनुपपन्नं स्यात् । अग्रेऽपवादादर्शनेनापवादार्थत्वस्य चानुपपत्तेः । अतो जीवपरमेव तस्य च यच्छब्दयोगेनानुवादत्वे निर्णीते पुरोवादाकाङ्क्षायां दहरवाक्यमेव पुरोवादकमिति स्वीकार्यम् । एवञ्च तस्यापि जीवपरत्वमेवानुवादानुसारेण पुरोवादनिर्णस्य ज्योतिश्चरणात्रिधादित्याधिकरणे व्यवस्थापितत्वान् । अतस्सत्यकामत्वादिकञ्जीवे तिरोभूतं स्वीकृत्य तत्परमेव नेयमिति, चेन्न, प्रजापतिवाक्यस्योपक्रमानुसारेण ब्रह्मपरत्वावधारणात् । न च तथात्वे जीवकीर्तनानुपपत्तिः । जीवानुवादेन ब्रह्मभेदबोधकत्वोपपत्तेः । अत एव 'मघवन्मर्त्यं वेदं शरीरम् (छा० ८।१२।१) इत्यादिना चतुर्थे पर्यायेे शरीरनिन्दापूर्वकं ब्रह्मभेद बोधनं प्रतीयते 'एषः सम्प्रसादः' इति वाक्यस्य चायमर्थः, 'अस्माच्छरीरात्समुत्थाय' (छा० ८।१२।३)श्रवणादिना देहं विविच्य ज्ञात्वा 'स्वेनरूपेणाभिनिष्पद्येत' (छा० ८।१२।३) स्वरूपक्षासात्कृत्य परञ्ज्योतिरूपं सम्मद्य स्वरूपं प्राप्नोति । क्त्वाप्रत्ययाच्च[४] 'मुखं व्यादाय स्वपिति' इतिवद्रष्टव्यः एतादृशार्थकरणञ्च' अशरीरो वायुरभ्रंविद्युत्स्तनयित्नुरशरीराण्येतानि' (छा० ८।१२।२) इति दृष्टान्तवाक्यानुसाराद्द्रष्टव्यम् । न च निर्विशेषविद्यात्वे सत्यकाम-

---

१. घ० मा० 'सकापरास्ता' इति पाठ; ।
२. घ० मा० 'प्रतिपाद्यति' इति पाठः ।
३. घ० मा० 'इमाभूत' इति पाठः ।
४. घ० मा० 'क्राप्रत्यश्च' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वादिगुणकीर्तनवैयर्थ्यम्। यस्य मुक्तप्राप्यमैश्व(र्य)मपि रूपमिति प्रतिपादनार्थत्वात्। यच्छब्दस्य च विद्वत्प्रद्धिधाभिप्रायकत्वाद्दहराकाशः परमेव ब्रह्मेति सिद्धम्। अधिकश्चास्मगुरुकृतभाष्यव्याख्याने ब्रह्मविद्याभरणे[1] व्यक्तम्।

अनुकृत्यधिकरणम् ।

अनुकृतेस्तस्य च ।।६।।

मुण्डके पठ्यते 'न तत्र सूर्यो भाति न चन्द्र तारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः। तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति' (मु० उ० २।२।१०) इत्यत्र मन्त्रे प्रतिपाद्यमानं किं तेज उत परब्रह्मेति। तदर्थञ्चास्मिन्मन्त्रे 'यस्य च भावेन भावलक्षणम्' (पा० सू० २।२।३७) इति विहिता सप्तमी[2] उत विषय सप्तमीति[3]।

तत्र पूर्वः पक्षः

सप्तम्याः[4] विषयार्थत्वे भावतोर्लक्षणा[5] भवेत्।
अतो यस्येति सूत्रेण सप्तमीय[6] भविष्यति।।
ततश्च तेज एवेह तेजोत्तर निरोधकृत्।
अनुमाने न च ग्राह्यं तुल्याश्चानुकृतीर्यतः।।

तेजोऽन्तरमेव ग्राह्यम्, न तु ब्रह्म, न तत्रेति सति सप्तमीबलेन[7] तस्मिन् सत्यज्ञानादीनामभावोक्त्या[8] आदित्य :तेजोऽन्तरभानप्रतिबन्धकत्वमादित्यादितेजोऽन्तरस्य दृष्टमितोहापि तेजस्त्वस्यैवौचित्यात्। न च 'सूक्तवाकवाकालविधिरितिन्यायेन' [9]'कारकविभक्तेर्बलीयस्त्वेन' (प० शे० पृ० ३०७) कथं सति सप्तमी स्वीकार इति वाच्यम्। तथात्वे

१. वाक्यार्थं कृत्स्नेऽप्यन्वेष्टव्ये प्रतिपादितेऽप्यन्तर्वर्तिन्येवासम्भावनायाः समुद्भवात्तावान्मात्रमेवाक्षिप्तम्। तदन्वेष्टव्यमिति वाक्यार्थपरामर्शके तत्पदे च सामान्याभिप्रायं नपुंसकमौत्सर्गिकञ्चैकवचनमुपपद्यते। वाक्यार्थस्य लिङ्गविशेषेण वचनविशेषेण चाप्रस्तुतत्वात्। यदि तु' अथ य इहात्मानमनुविद्य व्रजत्येतांश्च सत्यान् कामानिति वाक्य एव फलेन विशिष्टमुपासनं विधीयते 'उद्भिदा यजेत पशुकामः' इतिवत्। चशब्दश्चोक्तवक्ष्यमाणगुणसंग्रहार्थः, अन्येषां गुणानामाम्नानं व्यर्थमाभूदिति, तदानित्यदहराकाशस्य ब्रह्मत्वे न कोऽपि विरोधः इति द्रष्टव्यम् (ब्र० वि० पृ० २९६)।

२. घ० मा० 'सत्प्रभा' इति पाठः।

३. घ० मा० 'सत्प्रमेति' इति पाठः।

४. घ० मा० 'सत्प्रभा' इति पाठः।

५. घ० मा० 'वधा' इति पाठः।

६. घ० मा० 'सत्प्रीयम्' इति पाठः।

७. ख० मा० 'सत्प्रभा' इति पाठः।

८. घ० मा० 'सत्यज्ञानादिना' इति पाठः।

९. करोति क्रियां निर्वयतीति कारकम्। अत एव कारकविभक्तित्वञ्च 'क्रियाजनकार्थकविभक्तित्वम्' (प० भा० शे० पृ० ३०७) तत्त्वबोधिनीकारोद्देश्यको कारकविभक्त्या तु कर्मत्वादिसम्बन्धविशेषो झटित्येवावगम्यत इति तस्या बलीयस्त्वमित्याहुः (सि० को० तत्त्व, पृ० १४७)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भातीत्यस्य णिजर्थलक्षणापत्तेः, न च तस्य भासेत्यग्रिमवाक्यविरोध इति वाच्यम्। तदनुरोधेन स्पष्टभानप्रतिषेधाभ्युपगमात्। न च तादृशे तेजसि भानाभावः। एतन्मन्त्रबलादेव तत्सिद्धेः। तस्य च सर्गकाले-उत्पत्तिप्रलयकाले च विलय इत्यधिक्रियते। तच्च तेज आदित्यादिभिश्लिष्टमेव[1] तिष्ठतीति तेषामभावेऽन्धकारश्चोपपद्यते 'तस्य भासा' (मु० उ० २।२।१०) इति च सहार्थे तृतीया स्वीकारात्करणे न[2] तृतीया क्रियते। तेजश्चाक्षुषेऽपि तेजस्साधनत्वाभ्युपगमात्तेजोऽन्तरप्रतिघातकत्वेन लिङ्गने तेजस्त्वे निर्णीते[3] प्रकरणाद्ब्रह्मग्रहणन्न भवति, प्रकरणस्य दुर्बलत्वात्। सर्वनाम्नां चैतन्मन्त्रबललभ्यतेजः परामर्शकत्वमेव स्वीक्रियते। पूर्वप्रस्तुतपरामर्शकत्वस्य तस्यापत्यादिस्थले व्यभिचारात्। अनुभातीत्यनुकरणोक्त्या सजातीयेष्वैवानुकरणदर्शनात्तेजोऽन्तरमेतदिति।

सिद्धान्तस्तु

सप्तम्या विषयार्थत्वन्निरपेक्षतया भवेत्।
यस्य चैत्यादिसूत्रेण विधेया सप्तमी यतः॥
क्रियान्तरमपेक्ष्यैव तद्भानाल्लक्षणा[4] मता।
लक्षणादोषसद्भावो भवतो यदि[5] विद्यते।
स्मृतेरनुग्रहाच्चैवं न्यायस्य च परिग्रहः॥
प्रकृत्यानुग्रहश्चैव सर्वमेतद्भविष्यति॥
अनुक्तेऽप्यनुकारो हि लोके च बहुदृश्यते।
अपेक्षितविधानाच्च परं ब्रह्मेति निर्णयः॥

एतन्मन्त्रप्रतिपाद्यं परमेव ब्रह्म, प्रकरणात्तेजोऽन्तरकल्पने गौरवाच्च। न च 'अनुभाति' (मु० उ० २।२।१०) इत्यनुकरणोक्तेस्तेजस्सजातीयमेव ग्राह्यमित्युक्तमिति वाच्यम्, विजातीयेष्वनुकारस्य लोके वह्निं दहन्तमन्वयो दहतीत्यादिषु बहुषु स्थलेषु दर्शनादपेक्षितविधानस्य पंक्तिसंधानजातान्यहानि तिष्ठन्त इतिवदुचितत्वाच्च 'हिरण्मये परे कोशे विरजं ब्रह्म निष्कलम्। तच्छुभ्रं ज्योतिषां ज्योतिस्तद्यदात्मविदो विदुः (मु० उ० २।२।९) इति मन्त्रप्रतिपाद्यस्य ज्योतिषाञ्जोतिष्ट्वस्य व्युत्पादनपरत्वात्। न च तेजोऽन्तरभानप्रतिबन्धकत्वेन सति सप्तमी बलेन

---

१. घ० मा० 'संष्पृष्ट' इति पाठः।
२. घ० मा० 'वा' इति पाठः।
३. घ० मा० 'निर्गते' इति पाठः।
४. घ० मा० 'सादार्लता' इति पाठः।
५. घ० मा० 'भवतो हि' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तस्यावगमात्तस्य तेजस्त्वमेव युक्तमिति वाच्यम्, इत्युक्ते सति सप्तम्या[१] उपपदविभक्तित्वेन दौबल्यात्। न च णिजर्थलक्षणादोषाय तवापि बाधतोऽस्पष्टभानलक्षणाया आवश्यकत्वादन्यथा 'तमेव भ्रान्तम्' (मु० उ० २।२।१०) इत्यस्यानन्वयापत्तेः। अतश्चोभयोलर्थक्षणायां तुल्यां विषयसप्तम्योचिता। सूक्तवाक्येन वेति न्यायानुग्रहात्। 'न तद्भासयते सूर्यो न शशांको न पावकः, (गी० १५।६) यद्गत्वा न निर्वतन्ते तद्धाम परमं मम' इति स्मृत्यनुरोधाच्च। एवं सति प्रकरणाभाससर्वनाम्नोत्सर्गतः सर्वप्रस्तुतपरामर्शकत्वञ्चोपपद्यते। अत्र पक्षे **सर्वशब्दोऽसङ्कुचितवृत्या सर्वप्रपञ्चबाधे सङ्कोचो न्याय्यः**[२]। तस्मादेतन्मन्त्रप्रतिपाद्यं परं ब्रह्मेति सिद्धम्।

प्रमिताधिकरणम्

शब्दादेव प्रमितः ॥ ७ ॥

'अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति ज्योतिरिवाधूमक, ईशानं भूतभव्यस्य स एवाद्य स उ एव एतद्वैतत् (क० २।१।१३) इति कठवल्लीषु श्रूयते। तत्र संशयः। किमङ्गुष्ठमात्रो जीव उत परमात्मेति किं प्राप्तम्। जीव इति।

१, (क) नन्वत्र तेजो ग्रहणे किं नियामकं, किं रूपं वा तेजः। तत्र तावत् (न तत्र सूर्यो भाति) इत्यनेन यस्मिन् सति सूर्याद्यो न भातीत्यर्थकेन सूर्यादज्योतिरभिमापकत्वं प्रतीतं तेजोलिङ्गम्। तत्रेति न सति सप्तमी, अपितु विषयसप्तमी। कारकविभक्तित्वात्। सति सप्तमीत्वपक्षे तूपपदविभक्तित्वापत्तेः, तथा च सूर्याद्यभास्यत्वं ब्रह्मलिङ्गम्। ब्रह्मणः स्वत एव भासमानत्वात्। (भा० व्या० पृ० ३०९)।

(ख) औपश्लेषिको वैषयिकोऽभिव्यापकश्चेत्याधारस्त्रिधा। उप समीपे श्लेषः सम्बन्ध उपश्लेषः तत्कृत औपश्लेषिक इत्यर्थः। 'यन्मासेऽतिक्रान्ते दीयते' तस्य मास औपश्लेषिकमधिकरणमिति' 'तत्र च दीयते, इति सूत्रे भाष्योक्ते। अत एव 'इकोयणचि' इत्यत्र 'अधि' इति सप्तमी, औपश्लेषिकाधारे सहितायां 'सूत्रे भाष्ये उक्ता। एवञ्च' अव्यवहितसामीप्यमेवाधारत्वनियामकन्न तु व्यवहितम्, इत्यपि ध्वनितम्, यत्किञ्चिदवयवावच्छेदेनाधारस्याषेयेन व्याप्तिरप्युपश्लेषः, एवं 'यथा कटे आस्ते' इति। एवमेवगङ्गैकदेशे तरन्तीषु गोषु' गङ्गायां गावः' कूपैकदेऽस्ति गर्गकुले' 'कूपे गर्गकुलम्' इति। व्यवहितसामीप्ये 'गङ्गायां घोषः' इत्यादौ गङ्गापदस्य तीरे लक्षणा। तदापि गौणमेवाधारत्वं सर्वावयवावच्छेदेन तीरस्य घोषसम्बन्धाभावात्।

२. 'वैषयिक इति। अप्राप्तिपूर्वकप्राप्तिरूपसंयोगसमवायातिरिक्तिसम्बन्धे यदधिकरणं तद्वैषयिकं यथा' खे शकुनय इति।

३. अभिव्यापक इति, सर्वावयवावच्छेदेन व्याप्तिस्तदभिव्यापकं यथा 'तिलेषु तैल' मित्यादि। इदमेव मुख्यमधिकरणम्, आचार्य्यः किमधिकरणं न्याय्यं मन्यते ? यत्र कृत्स्नाधारात्मव्याप्त इति 'स्वरितेनाधिकार' इति सूत्रे भाष्योक्तेः। एवञ्चौपश्लेषिक वैषयिकयोर्गौणमेवाधारत्वमिति बोध्यम्। अत्रेदं बोध्यम् तथा 'विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु विधिरेवानुस्यूतः, तथात्रापि त्रिष्वप्युपश्लेष एवास्ति; सम्बन्धभेदात्तु त्रिधेति व्यवहारः। (सि० कौ० तत्व टिप्प० पृ० १९७)।

उक्तरीत्या सप्तमीघटकाधारविषये शाब्दिका अपि विप्रपतिपद्यन्ते। तथा च प्रकृतविषयेऽभिव्यापकाधार 'एव सप्तम्या विषयार्थत्वम्' इति सिद्धान्तकारिकया सूचितम्। तस्मात् 'सम्विदि भासमानत्वं विषयत्वं' अभिव्यापकाधाराधिष्ठानस्वरूपं ब्रह्मैवेति।

२, अज्ञानस्य स्वकार्येण वर्तमानेन प्रविलीनेन वा सह ज्ञानेन निवृत्तिर्बाधः।

—(पं० पा० वि० पृ० १७८)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कुतः

परिच्छेदो हि जीवस्य न परस्योपपद्यते ।
अथ सत्यवतः कायादिति स्मृति बलादपि ।।

अङ्गुष्ठमात्रत्वं हि परिच्छिन्नपरिमाणस्य जीवस्योपपद्यते, न तु व्यापकस्य परमात्मनः,

अथ सत्यवतः काया...[1] सम्बन्धवसङ्गतम् ।
अंगुष्ठमात्रं पुरुषन्निश्चकर्ष यमो बलात्[2] ।।

एवं निक्रिष्यमाणत्वेन निर्णीते जीवेऽगुष्ठमात्रत्वम् निर्देशाच्च । ननु जीवोऽपि व्यापक एव तस्याकारमङ्गुष्ठमात्रत्वम् । न च स्मृत्यनुसारात्तस्य तदिति वाच्यम् । परमेश्वरेऽप्यङ्गुष्ठञ्च समाश्रित्य 'ईशः सर्वस्य जगतः प्रभु प्रीणाति विश्वभुग्' इति मन्त्रेण तदुक्तेः । न च जीवे हृदयौपाधिकमङ्गुष्ठमात्रत्वं स्मृतावगन्तुः प्रयाणकाले जीवस्य हृदयदेशे स्थिते श्रुतिप्रसिद्धत्वादिवच्च 'मध्य आत्मनि तिष्ठति' (क० २।१।१३) इति हृदयोपाधिकमेव तत्प्रतीयते । ब्रह्मण एकपादाङ्गुष्ठोपाधिकमिति वैषम्याज्जीव एव गृह्यत इति वाच्यम् ।

अङ्गुष्ठमात्रपुरुषोऽन्तरात्मा सदा जनानां हृदये सन्निविष्टः । हृदा (मनिषामिकल्पोय) मन्वीशो मनसाभिल्क्रृप्तो एतद्विदुश्मृतास्ते भवन्ति' (श्वे० उ० ३।१३) इति श्रुतावीश्वरोऽपि हृदयोपाधिकस्याङ्गुष्ठमात्रत्वस्योक्तत्वात् । न चाङ्गुष्ठमात्रो रवितुल्यरूपः (श्वे० उ० ३।१३) सङ्कल्पाहङ्कारसमन्वितो य इति जीवेष्यङ्गुष्ठमात्रत्वं हृदयौपाधिकमुक्तमिति वाच्यम् । एवञ्च सति संदेहाद्वा शेषानुसारेणेश्वर इति निर्णयोऽस्तु, 'ईशानो भूतभव्यस्य (क० २।१।१२) इति वाक्यशेषे तस्य [3]श्रवणादिति चेदुच्यते । जीवस्य हि हृदयौपाधिकत्वस्वाभाविकं सर्वलोकप्रसिद्धम् । अत एवाह 'अङ्गुलिनिर्देशपूर्वकं हृदयेदेशमेवाभिलपति ! ततश्च प्रसिद्धग्रहणमेव न्याय्यम् । न चाधिकरणन्यायेन वाक्यशेषप्रसिद्धेः प्रबलत्वाद्वाक्यशेषे च 'भूतभव्येशानत्व' (क० २।१।१२) इति श्रुतेः परमेश्वर एवग्राह्य इति वाच्यम् । भूतभव्येशानत्वस्य 'य इमं मध्वदं वेदात्मानं जीवमन्तिकात्' ईशानं भूतभव्येस्य (क० २।२।५) इति श्रुतौ जीवे भूतभव्येशानत्वश्रवणात् । तस्य कथञ्चिन्नेयत्वे प्रकृतेऽपि तथासम्भवात् । 'एतद्वै तत् (क० उ० २।१।५) इति च जीवस्यापि पृष्टत्वाज्जीवपरामर्शकमिति ।

प्राप्तेऽभिधीयते—

अङ्गुष्ठमात्रशब्दोऽयं परेशप्रतिपादकः ।
ईशानं[4] इति शब्देन सामानाधिकरण्यतः ।।
एतद्वा इति वाक्यञ्च न जीव इति गृह्यते ।
सन्निधेस्तु न सङ्कोचः श्रुतेरत्रोपपद्यते ।।
जीवलिङ्गस्य सद्भावात्स्मृतिर्जीवपरास्थिता ।
मनुष्यहृदयापेक्षा परिणामश्रुतिर्भवेत् ।।

---

१. घ० मा० 'कायात्यादिति' पाठः ।
२. घ० मा० 'यमोबलायमेव' इति पाठः ।
३. घ० मा० 'शूयमाणात्' इति पाठः ।
४. ईशानशब्दोऽपि परमेश्वरे योगरूढः, तथा च प्रकृते परमात्माविरुद्धं लिङ्गमात्रं भूतभव्येशानत्वम्, अपित्वीशानश्रुतिरपि (भा० व्या० पृ० २१५) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यद्यप्यङ्गुष्ठमात्रशब्दो जीवे स्वरसस्तथापीशानपदसामानाधिकरण्येन तस्य परमात्मपरत्वे निर्णीतिऽङ्गुष्ठमात्रत्वम् । मनुष्याणां विद्यायामधिकारेण तेषाञ्च हृदयस्याङ्गुष्ठमात्रत्वेन तदुपाधिकमात्रमित्येव निर्णयः । न चेशानशब्दस्य जीव एव कथञ्चिद्योजनं सम्भवतीति वाच्यम्, रूढ्याः परमेश्वरबोधकत्वात् । न च योगरूढीनां पदानां योगार्थप्रतिसम्बन्धिनि निर्देशे रूढ्यर्थत्याग एव युक्तः । अत एव 'हरस्यापि पिनाकपाणे 'धैर्यच्युतिं के मम धन्विनोऽन्ये' (कु० सं० ३।१०) इत्यत्र हरपदस्य प्रयोगः, पद्मानि[1] यस्याग्रसरोरूहाणि, प्रबोध्य [2]यदूर्ध्वमुखैर्मयूखैः (कु० सं० १।१६) इत्यत्र पृथक् पद्मपदप्रयोगः । प्रकृते च भूतभव्यस्येति योगार्थप्रतिसम्बन्धिनः प्रयोगोऽस्तीति वाच्यम्, योगार्थप्रतिसम्बन्धिनिर्देशस्य रूढ्यर्थमानप्रतिबन्धकत्वे[3] मानाभावात् । काव्ये[4] च व्यञ्जनाविशेषलाभाय पृथगूढार्थप्रतिपादकपदस्य प्रयोगाभ्युपगमादत एव योगार्थप्रतिसम्बन्धिनिर्देशाभावोऽपि 'कुर्यां हरस्यापि पिनाकपाणेर्धैर्यच्युतिं के मम धन्विनोऽन्य (कु० ३।१०) इति श्लोके हरपदस्य प्रयोगः । तस्मादीशानश्रुत्या सामानाधिकरणमङ्गुष्ठमात्रपदं परमात्मनमेव बोधयति ।

१. घ० मा० 'बद्धपदानि' इति पाठः ।
२. घ० मा० 'प्रबोध्ययत्पूप' इति पाठ :
३. घ० मा० 'प्रबन्धकत्वे' इति पाठः ।
४. घ० मा० 'काव्येव' इति पाठः ।
४. (क) 'रसात्मकं वाक्यं काव्यम्' (सा० द० १/३)
(ख) तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि' (का० प्र० पृ० १, ३)
(ग) रमणीयार्थप्रतिपादकशब्दः काव्यम्' (र० गं० घ० पृ० १०)
(घ) 'निर्दोषं गुणालङ्कारलक्षणरीतिवृत्तिमत् काव्यम्' (चं० लो० पृ०)
(च) 'काव्यं स्फुरदलङ्कारं गुणवद्दोषवर्जितम्' (अग्नि पु० ३३७, ६, ७,)

उक्तरीत्य बहुमानपुरः सरं काव्यलक्षणं कृतमालङ्कारकैः । तथा च 'अङ्गुष्ठमात्र' 'ईशान' इति विवादास्पदीभूतपदप्रयोगे च भाष्यव्याख्यानकाराः प्रकारान्तरेण समादधति, काव्यानां व्यञ्जनाप्रधानत्वाद् व्यञ्जनोपयोगी योऽर्थः, तत्रैव कवेस्तात्पर्यातिशय इति यस्याग्रसरोरूहाणीत्यत्र हिमवदग्रभागगतेषु सरस्सु विद्यमानानां विकसनमूर्धमुखरविमयूखीकृतमिति वर्णनं हिमवदौन्नत्यव्यञ्जनाक्षममिति सरोरूहपदं तादृशव्यञ्जनोपयुक्तं, योगार्थमादायैव भवतीति कवेस्तत्रैव तात्पर्यमिति रूढ्यर्थप्रतीतिर्झटिति न स्यादिति तादर्थे पुनः पद्मोपादानम् । एवञ्च सति पिनाकपाणेरित्यत्रापि हरस्येति पृथक्ग्रहणमुपपद्यते । पिनाकपाणिपदस्य शिवे शौर्यातिशयद्योतकतया योगार्थपरत्वस्यैवाभिमतत्वात् । अतिसूरस्य पिनाकपाणेरपि धैर्यच्युतिं सम्पादयामि, किमु वक्तव्यमन्यस्य धैर्यच्युताविति हि तत्र विवक्षितोऽर्थः । ततश्च यत्र योगरूढं पदं व्यञ्जनाव्यापारव्यग्रं तन्निर्वाहकतया योगार्थमेवापेक्षते, रूढ्यर्थविवक्षा युक्ता, झटिति तदप्रतीतेः । नैवं प्रकृते वाच्यातिरेकैणान्यार्थो विवक्षितः । परमात्मन एव मुख्यया वृत्त्या गम्यमानस्य विवक्षाविषयत्वात् । अपि च भूतभव्यस्येतीशानपदे गुणभूतन्न तेन प्रधानपदगतरूढेः परित्यागो न्यायः, पद्मानि यस्येत्यत्र तु सरोरूहपदमग्रपदमपेक्षते । नहि तेन विना व्यञ्जनोपयोगिहिमवदग्रभागवतःसरस्तु विद्यमानत्वमर्थो लभ्यते । अतस्तत्र यः पदस्वारस्यलभ्यो योगार्थः सोऽपि परित्यज्य एव । पदस्वारस्यलभ्यस्य योगार्थस्य सामान्यरूपस्य निरङ्कुशत्वात् । तथा च विशेषणेनापि यस्याग्रेत्यनेन स्वापेक्षितान् यथा योगार्थसङ्कोचोऽपि सह्यते, एवं रूढ्यर्थपरित्यागोऽपि सोढव्यः । प्रकृते तु भूतभव्यपदं न योगलभ्यार्थसंकोचकम् । तदभावेऽपीशानपदेनैव सङ्कोचकाभावान्निरङ्कुशमैश्वर्यं लभ्यते । परं तु तत्सिद्धार्थानुवादमात्रमिति न तेन रूढ्यर्थसङ्कोचोऽङ्गीकर्तुं युक्तं । अतो युक्तमीशानपदं प्रकृते श्रुतिरैवेति ।

(भा० व्या० पृ० ११६) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न च 'इमं मध्वदम्' (क० २।१।५) इति पूर्ववाक्ये जीव इतिनिर्देशेन तत्प्रपठितस्यास्यापि जीवपरत्वमेव युक्तमिति वाच्यम्। श्रुतिविरोधिनः प्रायपाठस्याकिञ्चित्करत्वात्।

किञ्चिद्वैत्तत् (क० उ० २।१।५) इति पृष्टस्य परमेश्वरस्यैवेह निर्देशेन परमात्मापरत्वमेव न्याय्यम्। न च जीवोऽप्यत्र पृष्ट इति वाच्यम्। जीवस्य परिच्छिन्नं तस्य प्रत्यक्षावगतत्वेन तद्बोधने वैयर्थ्यापत्त्या असङ्गस्यापरिच्छिन्नस्यैवेह व्युत्पाद्यत्वस्योपगन्तव्यत्वादङ्गुष्ठमात्रं पुरुषमिति स्मृतिस्तु[1] (वैष० क० १।२।२३) यमेनानिष्कृष्यमाणत्वोक्त्या[2] जीवपरैवेह तु वाक्यशेषानुसारात्परमेश्वरपरत्वमेवेति स्थितम्। एवं वाङ्गुष्ठमात्रवाक्यञ्जीवस्य ब्रह्मोपासनोपासनापरं वा उत (छा० ६।१३।३) तत्त्वमस्यादिवाक्यवज्जीवब्रह्मैक्यबोधकमिति विशयः

ऐक्यबोधकविवक्षाणां परिच्छेदस्य बोधकम्।
अनर्थकं भवेत्तस्मादुपास्तिपरमिष्यते ॥

यदि जीवब्रह्मैक्यपरमिदं वाक्यं स्यात्तदाङ्गुष्ठमात्रमिति परिच्छिन्नत्वकीर्तनमनर्थकं स्यात्।

अत उपास्तिपरमेवेति प्राप्तेऽभिधीयते—

उपासनापरत्वे हि प्रक्रिया भावनं भवेत्।
अश्रुतस्य प्रवक्लृप्तिश्च तस्मादैक्यपरो ह्यसौ ॥
परिच्छेदस्तु जीवस्य व्याप्यवादप्रयोजकः।
निर्दिष्टो न तु जीवस्य तत्त्वभावविवक्षया ॥

'तत्त्वमस्यादि' (छा० ६।१३।३) वाक्यवदयमपि मन्त्रो जीवब्रह्मैक्यपर एव, अङ्गुष्ठमात्रपदेशानपदयोस्सामानाधिकरण्यात्। न तूपास्तिपरः प्रकरणविरोधप्रसङ्गादश्रुतोपास्तिकल्पनाप्रसङ्गाच्च। [3]परिच्छेदनिर्देशस्त्वपवादार्थ इति द्रष्टव्यम्।

अत एवोत्तरमन्त्रेऽङ्गुष्ठमात्रपुरुषोऽन्तरात्मा स जनानां हृदये सन्निविष्टः, तं स्वाच्छरीरात्प्रवृहेन्मुञ्जादिवेषीकां धैर्येण' (क० उ० २।३।१७) इत्यङ्गुष्ठमात्रशब्दो जीवपरो दृश्यते। अत एव पूर्वमन्त्रेऽपि 'य इदं मध्वदं वा' (क० उ० २।१।५) इति जीवनिर्देश उपपन्नस्तस्माज्जीवब्रह्मैक्यपर एवायं मन्त्र इति सिद्धम्।

देवताधिकरणम्

तदुपर्यपि वादरायाणस्संभवात् ॥ ८ ॥

पूर्वाधिकरणेऽङ्गुष्ठमात्रश्रुतिर्मनुष्याधीनाधीत्वाच्छास्त्रस्य[4] मनुष्याङ्गुष्ठाभिप्रायेण व्याख्याता। तत्प्रसङ्गाद्देवानामधिकारोऽत्र[5] चिन्त्यते। तत्र किं देवा ब्रह्मविद्यायामधिक्रियन्त उत नेति। तदर्थञ्च किं देवास्सचेतना

१. घ० मा० 'स्मृतितुयमेननि' इति पाठः।

२. घ० मा० 'स्रोक्ता' इति पाठः।

३. पूर्वमध्यारोपितस्य वस्तुनोऽपवादः, यथा 'रज्जुसर्पः' (रज्जोः पूर्वमज्ञानवशात् सर्प इति भ्रमात्मकं ज्ञानं जातं, रज्जुज्ञाने जाते सर्पज्ञानस्यापवादो भवति। तद्वदेव प्रकृतेऽपि परिच्छेदनिर्देशोऽपवादार्थः।

४. (क) प्रासङ्गिकी सङ्गतिमाह 'अङ्गुष्ठमात्रश्रुतिरिति'। तत्प्रसङ्गादिति। मनुष्याधिकारत्वादिति, श्रवणे हि मनुष्याणामेवाधिकारो नान्येषामिति भ्रमः प्रसक्तः 'तन्निवृत्तये इत्यर्थः' (भा० व्या० पृ० ३१७)।

(ख) अङ्गुष्ठमात्रश्रुतिर्मनुष्यहृदयापेक्षया मनुष्याधिकारत्वाच्छास्त्रस्य (शां० भा० १।३।२६)

५. अधिकारलक्षणम् 'प्रवृत्तिप्रयोजकफलेच्छाफलान्यतरसमानाधिकरण्यं कर्तृत्वम्'।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विग्रहवन्तस्तु नेति। तत्सिध्यर्थं[1] चैतच्चिन्तनीयं किं मन्त्रार्थवादादेः प्रमाणान्तरसम्बादविसम्वादयोरभावे स्वार्थबोधकत्वमस्ति नेति।

तत्र पूर्वः पक्षः —

देवानान्नाधिकारोऽस्ति विद्यायामशरीरतः।
मन्त्रार्थवादो नैवात्र प्रमाणं भवतः कुतः॥
तयोरन्यपरत्वस्य पूर्वतन्त्रे व्यवस्थिते।
इतिहासपुराणादेर्नात्र मानं भविष्यति॥
पौरुषेयत्वतस्तस्य मूलस्यानुपलब्धितः।
अग्न्यादयस्तु शब्दो हि ज्योतिषां वाचको यतः॥
वेदे लोके च तत्रैव प्रयोगो दृश्यते न तु।
चेतने तेन तेषां हि नाधिकारो भविष्यति॥
आदित्यादिकदेवानां मधुविद्यादिषु ध्रुवम्।
कर्तृकर्मविरोधेन नाधिकारो हि विद्यते॥

[2]देवास्तावद्ब्रह्मविद्यायान्नाधिक्रियन्ते। चेतनत्वविग्रहत्वादिनालाभेनार्थित्वादिविशेषणाभावेन सामर्थ्याभावात्।

न च 'इन्द्रो वृत्राय वज्रमुदयच्छत् सहस्राक्षो गोत्रभिद्वाः वज्रबाहुः, इत्यादिमन्त्रार्थवादबलात्तेषां विग्रहादिकमङ्गीक्रियत इति वाच्यम्। 'इन्द्रो वृत्राय' इत्यस्यार्थवादस्य[3] संसर्गेणास्य बोध्यंविग्रहविधिशेषतया प्रापकत्वेन स्वार्थे[4] प्रामाण्याभावात्। 'सहस्राक्ष' इत्यस्य च मन्त्रास्यानुष्ठेयदेवताप्रकाशकत्वेन स्वार्थतात्पर्याभावात्। अपश्चार्थः पूर्वतन्त्रेषु व्यक्तः। नन्वर्थवादानां विधेयस्तुतिपरत्वेऽपि शब्दादवगतेऽर्थे बोधकाभावे सोऽर्थः कुतः परित्यक्तव्यः। न च तात्पर्याभावे शब्दस्य प्रामाण्याभावात्सोऽर्थः प्रतीतोऽपि[5] त्यज्यत इति वाच्यम्। अवान्तरतात्पर्यस्यात्रापि स्वीकर्तुमुचितत्वात्। यच्च समिधादिवाक्यानां दर्शपूर्णमासभावानां[6] महत्तात्पर्येऽपि तत्तद्भावनायामवान्तरतात्पर्यं तद्वदेवं मन्त्राणामप्यस्तु। ततश्च देवताविग्रहादिसिद्धिरिति चेन्मैवं प्रयाजादिवाक्यानां हि योऽर्थं प्रतीयतेऽवान्तरवाक्यार्थविधया स एवार्थो महावाक्यार्थविधया भासत इति तत्र तात्पर्यस्योपपन्नत्वेऽपि मन्त्रार्थवादादिषु

---

१. घ० मा० 'तच्छ्यिध्यर्थं' इति पाठः।
२. ब्रह्मविद्यायां देवानान्नाधिकार इति पूर्वपक्षीयभाष्यस्वरूपानुरूपमेव भाष्यमभाषीति। न देवानां देवान्तराभावात्। (शा० भा० ६।१।५)
३. घ० मा० 'बादोऽत्र संगेणस्योकध्या' इति पाठः।
४. घ० मा० 'स्वाये' इति पाठः।
५. घ० मा० 'प्रतितोऽपि' इति पाठः।
६. घ० मा० 'छवनां यां' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तदसम्भवात् । अर्थवादानां[1] ह्यध्ययनविध्यध्यापितानां प्रयोजनवदर्थपर्यवसानाय स्तुतौ तात्पर्यमिति स्वीक्रियते, न तु स्वार्थप्रयोजनानवाप्ते[2] एवं मन्त्राणामपि ।

न च तात्पर्याभावेऽपि जायमानो बोधःप्रमेति वक्तुं शक्यतेऽतो न मन्त्रार्थवादादिबलाद्देवताविग्रहसिद्धिः । यद्यपीतिहासपुराणादिषु देवानां विग्रहादिमत्त्वमुपलभ्यते, तथापि तेषां पौरूषेयत्वेन स्वतः प्रामाण्याभावे वेदमूलकतया प्रामाण्यं वक्तव्यम् । तस्य चानुपलब्धेस्तेषामपि[3] तदंशे प्रामाण्यन्नास्ति । प्रत्यक्षादिकं त्वनाशङ्कनीमेव । किञ्च विग्रहवत्त्वेऽभ्युपगतेऽपि मधुविद्यादिष्वनधिकार एवादित्यादिदेवानां कर्तृकर्मविरोधेन स्वस्य स्वोपास्यत्वानुपपत्तेः । 'असौ वादित्यो देवः (छा० उ० ३।१।१) मध्वित्यादिनादित्यस्योपास्यत्वावगतेः । तत्र पञ्चामृतान्युक्तानि 'तद्यत्प्रथमममृतं तद्वसव उपजीवन्त्यग्निना (छा० ३।६।१) वसूनामुपजीवकत्वं 'वसूनामेवैको भूत्वाग्निः[4] (छा० ३।६।३) इति वाक्येनोपासकस्य वस्वादिभावापत्तिफलमुच्यते । न च वस्वादिनां तत्सम्भवति । कर्तृकर्मविरोधेन वस्वादिनां तदुपासनानुपपत्तेः । वस्वादिमत्त्वस्य प्राप्तत्वेन प्रेप्साया अभावेन[5] तत्प्राप्तेः फलत्वानुपपत्तेश्च ।

तत्सामान्यादितरत्राप्यधिकारः । नन्वत्र वस्वादिपदानां[6] क्व शक्तिरिति चेज्ज्योतिर्मण्डल इति गृहाण, लोके तत्रैव प्रयोगात्, कृतिकानक्षत्रमक्षिर्देवतेत्यादि वेदेऽपि तत्र प्रयोगाच्च । तस्माद्देवानां ब्रह्मविद्यायामनधिकार इति प्राप्तम्—

एवं प्राप्ते वदामोऽत्र देवानामस्त्यधिक्रिया ।
देहादेस्सम्भवात्तेषां कुतो मन्त्रार्थवादतः ।।
प्रतीतेर्विग्रहादीनां न च सा भ्रान्तिरिष्यते ।
तात्पर्यविरहे शब्दात्प्रतीतमपि चेष्यते ।।
विशिष्टविधिवाक्ये हि या विशेषणसङ्गतिः ।
स्वीकृता सापि तेनेह विग्रहोऽस्तीति गम्यते ।।

---

१. प्राशस्त्यनिन्दान्यतरवाक्यरूपार्थवादस्त्रिधाभिद्यते । अत एवार्थवादानामिति पदमुपात्तम् । तदेव प्रामाणिकैर्व्यवहृतम् ।

विरोधे गुणवादस्स्यादनुवादोऽवधारिते ।
भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मता ।। इति

लक्षणञ्च—प्रमाणानन्तरविरोध सत्यर्थवादो गुणवादः, यथा 'आदित्यो यूपः' इत्यत्र यूप आदित्याभेदस्य प्रत्यक्षवाधितत्वादादित्यवदुज्ज्वलत्वरूपगुणोऽनेन लक्षणया प्रतिपाद्यते । द्वितीयः प्रमाणान्तरावगतार्थबोधकोऽर्थवादः, अनुवादः, यथा' अग्निर्हिमस्य भेषजम्' अत्र हिमविरोधित्वस्याग्नौ प्रत्यक्षावगतत्वादनुवादमात्रम् । परं—प्रमाणान्तरविरोधतत्प्राप्तिरहितार्थबोधकोऽर्थवादो, भूतार्थवाद, यथा' इन्द्रो वृत्राय वज्रमुदयच्छत्' इत्यादिवाक्यम् ।

२. घ० मा० 'प्राप्तेरेवम्' इति पाठः ।

न ऋषीणामाषार्षेयाभावात् (शा० भ० ६/१।५), देवा सत्रमासते इत्येवमादीनि (शा० भ० ६।१।५), अर्थवादास्तै विधिप्ररोचनार्थाः (शा० भा० ६।१।५), तस्मान्मनुष्याणामेवाधिकारः (शा० भा० ६।१। ५)।

३. घ० मा० 'चानुपलक्षस्ते' इति पाठः ।

४. घ० मा० 'अग्निलिलेनेति' इति पाठः ।

५. घ० मा० 'अधावेन' इति पाठ ।

६. घ० मा० 'नन्ववस्वादि' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तन्मूलमितिहासादेस्तत्रः मानं (भ) विष्यति ।
अग्न्यादयस्तु[1] शब्दास्तेऽपि चेतनसाधकाः ।।
वैदिकी च प्रसिद्धिर्या सापि चेतनदेवगा ।
लौकिकी भ्रान्तिमूला स्यादेकत्र नाधिकारतः ।।
अन्यत्राधिक्रिया तावन्निराकर्तुन्न शक्यते ।
तेनाधिकारो देवानां ब्रह्मविद्यास्विति स्थितम ।।

मन्त्रार्थवादादिबलेन देवानां विग्रहत्वं तावदवश्यमभ्युपगन्तव्यं प्रतीतार्थपरित्यागे प्रमाणाभावात् ।

न च तात्पर्यराहित्यात्तत्यागः । प्रतीतस्यार्थस्यासति बाधके त्यागानुपपत्तेः । अन्यथा सा प्रतीतिर्भ्रान्ता स्यात् । अत एव विशिष्टविधिषु भावनायां[2] तात्पर्येऽपि विशेषणसम्बन्धसिद्धिःस्वीक्रियते[3] । अन्यथा नामाऽपि सिध्येति ।[4] 'यन्नदुःखेन'[5] संभिम्नं न च ग्रस्तमनन्तरम्' इत्याद्यर्थवादानां स्वार्थे प्रामाण्यं स्वीक्रियते ।[6] न च 'यजेत स्वर्गकामः' (ता० म० ब्रा० १६।३।३) इति शास्त्रेण यागस्य स्वर्गसाधनत्वे बोधिते स्वर्गजिज्ञासायां विध्यपेक्षितस्वर्गस्वरूपबोधकत्वाद्ध स्वीक्रियत इति वाच्यम् । देवताविग्रहस्यापि 'यस्यै देवतायै हविर्गृहीतं स्यात्तां बोधयेद्वेषाकरिष्यन्निति, शास्त्रेण देवताध्यानस्य देवतास्वरूपापेक्षितत्वेनोपेक्षितविधित्वस्यात्रापि तुल्यत्वात् । देततावरप्रदानादिशास्त्रानुसाराच्चेत्थमेवाभ्युपगन्तव्यम् ।[7] इतिहासपुराणामप्यर्थवादमूलकत्वात्प्रमाणं भवत्येव । एषां त्वर्थवादानां

१. घ० मा० 'अप्रदायस्तु' इति पाठः ।

२. भावना हि नाम—अनुभूतस्य विषयस्य पुनः पुनः स्मरणात्मिका वृत्तिः । सा हि भूतविषयणी स्यान्न जातु भविष्यद्विषयिणी । (मो० शा० भा० पृ० ७) तथा च क्वच्चिद् दृष्टादृष्टविषयत्वेनापि स्मरणात्मिका वृत्तिरुदेति ।

३. घ० मा० 'संवह्यसिद्धिसिष्ट' इति पाठः ।

४. घ० मा० 'नामो पि न' इति पाठः ।

५. उद्धृतम् सांख्यतत्व कौमुदी पृ० २२ ।
वार्तिकसारे १।४६ ।
सांख्यप्रवचनभाष्ये पृ० ११ ।
वेदान्तकल्पतरु ४।३.४ ।
भाष्यव्याख्याने पृ० ३३९ ।

६. क—स्तुतिनिन्दापरकार्थवादानां स्वस्यार्थे प्रयोजने विद्यमाने प्रामाण्यं, न तु स्वार्थपरित्यागेऽपीति । प्रामाण्यानामप्रामाण्य प्रसङ्गात् । यद्यपि कर्ममीमांसका अर्थवादवाक्यानान्न स्वार्थे प्रामाण्यमभ्युपगच्छन्ति, परं 'विधेयनिषेध्यस्तवननिन्दनद्वारा प्रवृत्तिनिवृत्तिरूपे तात्पर्ये प्रामाण्यमिति । प्रमाणान्तराविरुद्धस्वार्थेऽप्यर्थवादवाक्यानां प्रामाण्यमिति (ब्र० सू० १।३।८)
ख—प्रामाण्यन्तु 'अनधिगताबाधितार्थबोधकत्वमेव' (शा० भा० भू० पृ० २३) ।

७. घ० मा० 'शास्त्रानुसारामेव' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रमाणान्तरविरोधस्सम्वादो वा तेषां न स्वार्थे प्रामाण्यं बाधितत्वाज्ज्ञातज्ञापकत्वाच्च। अतः सिद्धं देवताविग्रहवत्त्वम्।

अत एवाधानजनितसंस्काराश्रमत्वेन चेतनानां देवानामभ्युपगमस्सर्वसिद्धः। अन्यथा संस्काराश्रयः कोऽपि न स्यात्। पवमानेष्ट्युत्तरकालमेवाप्तीनां[1] नष्टत्वेन संस्कारस्यापि नाशापत्तेः। अत एव 'गार्हपत्यादाहवनीयं ज्वलन्तमुद्धरतीति[2] कल्पसूत्र (भारद्वाज श्रौ० सू० ६।८।६) कृताः प्रयोगा उपपद्यन्ते। आहवनीयेऽपि जुह्वोतीत्यादि[3] व्यवहाराभिमान्यभिमानिनोरभेदविवक्षयाप्युपपन्नतराः[4] अग्न्यादिशब्दाश्च ज्योतिष्येव प्रयुज्यन्त इत्यप्यत एव निरस्तम्।

कृत्तिकानक्षत्रमग्निदेवतेत्यादिस्थले च तस्येति पदाध्याहारः। अत एव इन्द्रो ज्येष्ठमनुनक्षत्रमेति भेदनिर्देश उपपद्यते। मध्वादिविद्यायामनधिकार इतर विद्यायामधिकारसम्भवेन ब्रह्मविद्यायामधिकारे किं बाधकं तस्यैकत्रानधिकारोऽन्यत्राधिकारं विहन्ति। तथात्वे ब्राह्मणस्य राजसूयेऽनधिकारेण ज्योतिष्टोमादावप्यनधिकारापत्तेः[5] वस्तुतः पञ्चाग्निविद्यान्यायेनाभेदे-उपास्योपासकभावोपपत्तेः। वस्वाद्युपासनास्वपि वस्वादिनामधिकारत एव न किञ्चिद्बाधकम्, प्राप्तस्यापि जन्मान्तरे पुनः प्रेतोपपत्तेश्च न फलत्वानुपपत्तिः। तस्मान्मन्त्रार्थवादादिप्रामाण्यबलेन देवानां विग्रहवत्त्वसिद्धेरस्ति ब्रह्मविद्यायामधिकार इति सिद्धम्।

ननु मन्त्रार्थवादादिप्रामाण्यबलेन विग्रहाद्यभ्युपगमे तस्य कर्मदेशेषु गमनं वक्तव्यं स्यान्न, चैतदुपपद्यते। एकस्य युगपदनेकदेशेषु सन्निधानानुपपत्तेः। न चाङ्गस्य सन्निधानं त्वन्मतेऽपि तुल्यं देवतावाचकशब्दोच्चारणस्यैवांगत्वं शास्त्रार्थं' इति तु ममापि तुल्यमिति कथं त्वया कर्मदेशे सन्निधानमापाद्यत इति वाच्यम्। मन्त्रार्थवादप्रामाण्ये-आवाहनादिमन्त्रानुसारेणगमनस्यापि स्वीकार्यत्वादिति।

नैष दोषो देवानामनेकशरीरपरिग्रहस्य श्रुतिस्मृतिसिद्धस्यान्तरधानशक्तियोगस्य च स्वीकारेणानेकदेशसन्निधानोपपत्तेः। इन्द्रत्वादिजातेरभ्युपगमाच्च शब्दार्थसम्बन्धस्यापि नित्यतोपपत्तिः। एवञ्च सति वेदस्य प्रामाण्यमप्युपपद्यते।

'मन्त्रकृत्' (रघुवंश ५।४) इत्यादीनां मन्त्रद्रष्टृत्वेनाप्युपपत्तेः। महाप्रलयेऽपि सर्वात्मना सर्वस्य जगतो न नाशः। अविद्यायास्सर्वसंस्काराधारभूतायाः स्थित्यभ्युपगमान्मन्त्रार्थत्वादादिप्रामाण्यपरानुसारेण देवताविग्रहाभ्युपगमे सृष्टिप्रलययोरप्यङ्गीकर्तव्यतया जात्यादिनामपि नाशे शब्दार्थसम्बन्धस्यानित्यत्वादप्रामाण्यमिति शङ्काया अनवकाशः। न च देवतानामुपनयनाभावादनधीतवेदाः'[6] कथन्ते ब्रह्मविद्यां सम्पादयेयुरिति वाच्यम्। स्वशाखाया-

---

१. घ० मा० 'पवमानेस्युत्तर' इति पाठः।

२. घ० मा० 'ज्वलन्तमुद्धरतिति' इति पाठः।

३. घ० मा० 'ह्वोतिसादि' इति पाठः।

४. घ० मा० 'प्यन्नतरा' इति पाठः।

५. घ० मा० 'ज्योष्टोम' इति पाठः।

६. घ० मा० 'वेदेः कथन्ते' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मेवास्य नियमस्य स्वीकारेण देवानां स्वीयशाखाया[1] अभावेन विद्याग्रहणे बाधकाभावात्। अध्ययनगृहीतानामेव स्मृतिसम्भवाच्चेति सिद्धं देवानामधिकार[2] इति।

अपशूद्राधिकरणम्

शुगस्य तदनादरश्रवणात्तदा द्रवणात्सूच्यते हि ।।९।।

यथा मनुष्याधिकारमयो ह्ययं देवानामधिकारः स्थापितस्तथा त्रैवर्णिकाधिकारमयो हि शूद्राणामप्यधिकारोऽस्त्विति प्रत्यवस्थीयते। तत्र शूद्राणामधिकारो ब्रह्मविद्यायामस्ति नेति संशयेऽधिकारोऽस्तीति तावत्प्राप्तम्।

कुतः

मोक्षार्थित्वं हि शूद्राणां वर्तते तेन तेऽपि हि।
अधिक्रियन्ते विद्यायां निषेधविरहादपि ।।
न चास्ति नात्र विद्यायां कार्यमस्ति मनागपि।
जानश्रुतौ शूद्रशब्दाः प्रयुक्तौ त्रेद एव हि ।।

मोक्षसाधनं विद्या, मोक्षे च कामना शूद्राणामपि सन्भवतीति, तदर्थतया विद्यार्जनं स्यादेव तस्य, न च कर्मणि 'तस्माच्छूद्रो' यज्ञेऽनववल्कृप्त[3] इतिवद्विद्यायामनवक्लृप्त[4] इति निषेधोऽस्ति। न च शूद्रस्य कर्मानधिकारकारणीभूत-

---

१. घ० मा० 'प्रियशाखाया' इति पाठः।

२. क——तस्माद्देवादीनामपि विद्यास्वधिकारः केन वार्यते ? (शा० भा० १।३।२६)

ख——आग्नेयादीनामिवोत्पत्तिपरमापूर्वावान्तरव्यापाराणां भवन्मते स्वर्गसाधनत्वं तस्मात्कर्मणोऽपूर्वावान्तरव्यापारस्य वा देवताप्रसादावान्तरव्यापारस्य वा फलत्वात्प्रधानत्वमुभयस्मिन्नपि पक्षे समानं, न तु देवताया विग्रहादिमत्याः प्राधान्यमिति न धर्ममीमांसायाः सूत्रम् 'अपि वा शब्दपूर्वत्वाद्यज्ञकर्मप्रधानं गुणत्वे देवताश्रुतिः' इति विरुध्यते। तस्मात्सिद्धो देवतानां प्रायेण ब्रह्मविद्यास्वधिकारः इति। (भामती १।३।३३ पृ० ४१८)

ग——अर्थित्वसामर्थ्याद्यधिकारकारणस्य सम्भवादित्यर्थः (ब्रह्मतत्त्व प्र० २।३।२६)।

घ——देवादीनां ब्रह्मविद्याधिकारे सत्येव देवत्वप्राप्तिद्वारा मुक्तिफलान्युपासनानि युज्यन्ते, देवानामनधिकारे ज्ञानाभावात्क्रममुक्त्यर्थिनामुपासनेषु प्रवृत्तिर्न स्यात्। अतोऽधिकारनिर्णयात्प्रवृत्तिसिद्धिरिरि भावः। (रत्नप्र० १।३।३३)

च——ब्रह्मलोकादिप्राप्तानां देवादिभावप्राप्तानां तत्रोत्पन्नापरोक्षधियां मुक्तिवादीन्यपि श्रुतिस्मृतिवाक्यानि देवादीनामधिकारं सूचयन्तीति तेषां विद्याधिकारे श्रुतार्थापत्तिमाह' (न्यायनि० १।३।३३)।

छ——'लोकप्रसिद्धिरपि न सति सम्भवे निरालम्बनाध्यवसातुं युक्ता। तस्मादुपपन्ना मन्त्रादिभ्यो देवादीनां विग्रहवत्त्वाद्यवगमः। ततश्चार्थित्वादिसम्भवादुपपन्नो देवादीनामपि ब्रह्मविद्यायामधिकारः। क्रममुक्तिदर्शनान्येवमेवोपपद्यन्ते' (शा० भा० १।३।३३)

ज——तत्तद्देवताविशेषरूपादिस्मारकत्वमपि भविष्यतीति——न काचिदनुपपत्तिः। (वे० क० प० प० ३२२)

३. घ० मा० 'छूद्रयक्ष्नैनवक्रित' इति पाठः।

४. घ० मा० 'अनवक्रिस' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ब्रह्माभाववद्विद्यायामधिकारे हेतुर्भविष्यति। अग्निसाध्यत्वस्य[1] विद्यायामभावेना[2] ग्नावभावस्य विद्याभावेऽप्रयोजकत्वात्। न च सविशेषविद्यायां समुच्चयस्योक्तत्वात्तदर्थमग्न्यपेक्षेति[3] वाच्यम्। स्ववर्णोचित कर्मणां समुच्चयसम्भवात्। चित्तशुद्धेश्च जन्मान्तरानुष्ठितकर्मभिरेवोपपत्तेः। अतो न शूद्रस्य विद्यायां कर्मापेक्षा।

न च शूद्रस्य 'न शूद्रे पातकं किञ्चिन्न च संस्कारमर्हति' (मनु० १०।१२६) इति वचनेनोपनयनस्य प्रतिषेधादनुपनीतस्य[4] कथं विद्यायामधिकारः। उपनयनस्य विद्याङ्गत्वादिति वाच्यम्। धर्मेप्सवस्तु[5] धर्मज्ञाः सतां सृतिमनुव्रताः। मन्त्रवर्ज न दुष्यन्ति प्रशंसां प्राप्नुवन्ति' (मनु० १०।१२।१२७) इति वचनानुसारेण शूद्रस्यापि-मन्त्रोपनयनोपपत्तेः। 'न शूद्राय मति दद्यात्' (मनु० ४।८०) इति वचनं तु यत्र शूद्रस्य विशिष्य नाधिकारस्तद्विषयम्। शूद्रस्य विद्यायामधिकारसूचकं जानश्रुतौ विद्याधिकारिणि शूद्रशब्दोच्चारणमेव। न च तद्यौगिकमिति वाच्यम्, रूढ़ेरपेक्षया योगस्य दुर्बलत्वात्। हंसनिन्दावाक्यश्रवणेन शोकोत्पत्या 'शुचा दुद्राव[6]' इति योगकल्पने हंसवाक्यादेव सद्गुरुलाभेन सन्तोषस्यापि सम्भवेन शोकनियमाभावः। न च रैक्वस्य स्वपर्याप्तधनानुपादानादेव कोपवशाच्छूद्रशब्द प्रयोग[7] इति वाच्यम्। अपेक्षितधनानयनोत्तरकालमपि शूद्रशब्दप्रयोगात्। अतोऽस्ति विद्यायां शूद्रस्याप्यधिकार इति प्राप्ते।

अभिधीयते

उपनीतेरभावेन[8] शूद्रस्याध्ययनं नहि।
तदभावे तु विद्यायाःका प्रसक्तिर्भविष्यति॥
जानश्रुतिर्न शूद्रो हि क्षत्रप्रेषणदर्शनात्।
राज्ययोगाच्च राजासौ प्रायपाठाच्च दृश्यताम्[9]॥
विद्याङ्गोपनयाभावाच्छ्रवणादेर्निषेधनात्।
न शूद्रो ब्रह्मविद्यायामधिकारित्वमृच्छति॥

---

१. घ० मा० 'अग्नि' इति पाठो नास्ति।
२. घ० मा० 'अग्नि' इति पाठो नास्ति।
३. घ० मा० 'अग्नि' इति पाठो नास्ति।
४. घ० मा० 'अनुपस्थितस्य' इति पाठः।
५. घ० मा० 'धर्मच्छवस्तु' इति पाठः।
६. घ० मा० 'शुचतदुद्रावेति योग' इति पाठः।
७. छान्दोग्य ४।२।२।५
८. 'अपतितिर' इति घ मातृकाम्।
९. 'प्रापपाठ चदस्यताम्' इति घ मातृकायाम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'स्वाध्यायोऽध्यतव्यः' (तै०आ० २।१५) इति विधिर्हि[1] न स्वर्गाद्यर्थमध्ययनं विद्यते। स्वर्गादेरश्रवणात् किन्तु कल्पनीया कल्पना च[2] दृष्टे सम्भवति। अदृष्टकल्पनस्यान्यात्वाद्, (दृष्टमर्थपानमक्षरावति[3] वेति) कल्पते। तत्र चाध्ययनविधेर्नियमविधित्वं पुस्तकनिरीक्षणादिव्यावृत्त्यर्थं स्वीक्रियते। तस्य च नियमस्याधीतेन यत्सम्पाद्यते तादर्थ्ये स्वीक्रियते। वेदेन यत्सम्पाद्यते तत्तेनैवेति। तत्र चोपस्थितोऽधिकारी[4] उपनयनश्च त्रैवणिकस्यातः शूद्रस्योपनयनानाभावोऽध्ययनाभावादध्ययनप्रयुक्तफलन्न शूद्रस्यांतो ब्रह्मविद्यायामनधिकारस्तस्य। नन्वेवं त्रैवणिकस्यापि सर्वशाखाध्ययनाभावेन सर्वाङ्गोपसंहारपूर्वकं कर्मानुष्ठाने प्रवृत्तिर्नस्यात्। न च स्वशाखाविषय एवाध्ययननियमस्स्वाध्यायोऽध्येतव्य' (तै०आर० २।१५) इत्युपात्तस्य विवक्षितत्वादिति वाच्यम्। तथा सति शूद्रस्य विद्याधिकारापत्तेः। तस्य स्वशाखाया अभावात्। न च प्रयुक्तिलाधवाय त्रैर्वणिकस्यैव कर्मज्ञानेऽधिकारोऽभ्युपगम्यते।

---

१. (क) लिङ्लेट्लोट्तव्यप्रत्ययादिभिर्विधीयमानोऽर्थो विधिः। स चेष्टसाधनत्वकृतिसाध्यत्वबलवदनिष्टाननुबन्धित्वत्रितयरूपः। तत्र च विशेषणविशेष्यभावे विनिगमनाविरहात्प्रत्येकं लिङादेशशक्तिः। व्युत्पत्तिवैचित्र्याच्चार्थत्रयस्यापि युगपदेव बोधः। (तन्त्र सि० र० १ प० पृ० ५)

(ख, 'स्वाध्यायोऽध्येतव्य' इत्यध्ययनविधिना ह्युपनीताधिकारस्थेन विधिवदुपनीतेन त्रैर्वणिकेन माणवकेन स्वकुलपरम्परागता शाखाऽध्येतव्यत्वेन विधीयते। तच्चाध्ययनं यद्यपि सकृद्गुरुमुखोच्चारणानूच्चारणमात्रे पर्यवस्यति (तन्त्रसि० र० पृ० १)

(ग) 'प्रमाणान्तरागोचरो लिङ्गादिशब्दमात्रालम्बनः कार्यात्मा यागादिभावार्थगोचरः स्वर्गकामादिनियोज्यमात्मानं प्रेरयन्नियोगो विधिः। (न्या० र० मा० पृ० ४०)। 'प्रवर्त्तनात्मकशाब्दभावना विधिः, प्रवृत्तिहेतुभूते व्यापारः प्रवर्त्तना, समीहितसाधनादन्यत्र चेतनः प्रवर्त्तयितुन्न शक्यत इति, विधिस्स्वस्य प्रवर्त्तकस्वसिध्यर्थं स्वभाव्याया भावनायास्समीहितभाव्यत्वं गमयति' (न्या० र० भा० भू०, पृ० ८२) अज्ञातार्थज्ञापको विधिः वा (अ० स० पृ० ३२) एवं 'उत्पत्तिविनियोगप्रयोगाधिकाराणाञ्चतुर्णां विध्यपेक्षितरूपाणां क्रियायान्निरूपितानां ज्ञानेऽपि न्यायसाम्येन बोद्धुं शक्यत्वात्। तत्रोत्पत्तिविधिर्नाम' कर्मस्वरूपमात्रबोधकः, 'अग्निहोत्रं जुहोति' इत्यादि। तथाङ्गाङ्गिसम्बन्धबोधकः 'दध्ना जुहोति' इत्यादिर्विनियोगविधिः। साङ्गप्रधानकर्मण्यनुष्ठानबोधकः प्रयोगविधिः। फलकामिनो जीवनादिनिमित्तवतो वा कर्मण्यधिकारप्रतिपादकोऽधिकारविधिः। त एते विधयः क्रियायान्निरूपिता ज्ञानेऽपि यथायोगमुत्प्रेक्षितुं शक्या। अन्यथा क्रियामेकामुदाहृत्य निरूपिताः क्रियान्तरे पुनः प्रतिपादनीयाःस्युः। (वि०प्र०सं० पृ० ३७९)

२. घ० मा० 'कल्पनीयं कल्पनाया च' इति पाठः।

३. घ० मा० 'दृष्टमर्थपानभक्षरावर्ति वेति कल्पने' इति पाठो दृश्यते।

४. किन्तु परस्परार्थपाठादिसंघटनेऽपि सङ्गतीकरणाभावान्मूले यथावदत्रस्थापितः :
क० मा० ख० मा० श्चार्पूर्णत्वातत्रायं पाठः कदाचिदभवितुं शक्नोति।

५. घ० मा० 'चौपरयित' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तथा सति शूद्रस्य सर्वाक्षेपकल्पनापत्तेरिति वाच्यम् । तथा सति यस्मिन्कर्मणि यच्छाखायामवशिष्टानि[1] त्वङ्गानि बहूनि शाखान्तरे आम्नातानि । तस्मिन् कर्मणि तस्यानधिकारापत्तेः । न तु यत्किञ्चिदाम्नातसार्थवयायेतरांगेष्वाक्षेपकल्पनान्न कश्चिद्विरोधः[2] । तथा च यत्राधिकारे किञ्चित्प्रमाणमुपलभ्यते तत्र तस्याधिकार निर्वाह्य विद्याक्षेपः कल्पत इति वाच्यम् । तथा सति शूद्रस्यापि संवर्गविद्यायां विद्याधिकारिणः[3] शूद्रशब्दप्रयोगस्याप्यधिकारापत्तेः[4] न चास्तुसंवर्गविद्यायामधिकार इति वाच्यम्, जानश्रुतेः प्रवृत्तिवेलायां रेक्वसंवर्गविद्यानिष्ठ इति प्रागनिश्चयादतः शूद्रस्यापि ब्रह्मविद्यायामधिकारः स्यादिति चेन्न जानश्रुतेः क्षतृप्रेषणेन परिपालकत्वेन रैक्वाय कन्यादानेन च क्षत्रियत्वावधारणात् । नहि शूद्रस्य क्षत्रियवैश्यब्राह्मणकन्यायां क्षत्तानाम प्रजायन्ते' जीविकावृत्तिरेतस्य राजान्तः पुररक्षणमिति स्मृतेः । नापि राज्यपालनं शूद्रस्य—

यो मोहादधमो भूत्वा जीवेदुत्कृष्टकर्मणा ।
तं राजा निर्धनं कृत्वा क्षिप्रमेव प्रवासयेत् ॥

इति स्मृतेः रैक्वस्य तत्र इत्यनुपपत्तेश्च 'न शूद्रराज्ये निवसेत्' इति निषेधात्, न चेदं सर्वमतिक्रान्तमर्यादाभ्यां रैक्वजानश्रुतिभ्यां कृतमिति वाच्यम् तर्हि 'न शूद्राय मतिं दद्यात्' (मनु० ४।८०) इति निषेधमतिक्रम्यापि विद्यादानोपपत्तेः । नह्येकशूद्रपदानुसारेण बहून्यन्यथा नेयानि । किन्त्वेकमेव शूद्रपदं बहुलिङ्गानुसाराद्योगेन नीयते[5] शुचादुद्रावेति शूद्र (अ० ६।३।१०९) इति पृषोदरादित्वादुपपत्तेः । अतो जानश्रुतिः क्षत्रियः । किञ्च संवर्गविद्यायां ब्राह्मणस्य द्वितीय क्षत्रिय इति नियमो दृष्टः 'अथ ह शौनकञ्च कापेयमभिप्रतारिणञ्च कांक्षसे निपरिविष्यमाणा ब्रह्मचारिभिक्ष' (छा० ४।३।५) इति कापेयस्य ब्राह्मणस्य द्वितीयोऽभिप्रतारि क्षत्रियो दृष्टः 'एतेन वै चैत्ररथ कापेय अयाजयत' (ताण्डय ब्र० २०।१२।५) इति कापेयानां याजकत्वेन ब्राह्मणावगमात् । चैत्ररथश्च तस्मादेकं क्षत्रपतिर्जयतेति' क्षत्रियत्वावगमेनाभिप्रतार्यपि क्षत्रिय एव कापेययाज्यत्वात् । बहुकुलयाजकत्वस्य प्रशस्तत्वात्पितृभूर्तत्विजां प्रशस्तत्वात् । अतोऽभिप्रतारिक्षत्रिय इति तत्प्रायपाठाज्जानुश्रुतिः क्षत्रिय एव । तस्माच्छूद्रस्याधिकारसूचकाभावान्न शूद्रस्य विद्यायामधिकारः

किञ्च शूद्रश्चतुर्थो वर्ण एकजातिरिति-एकजातित्वोक्त्या विद्याङ्गोपनयनाभावेन तद्भावे विद्यायामधिकारः । न वाध्ययानाङ्गोपनयस्यैव द्वितीयजन्मत्वोक्त्या तद्भावेऽपि विद्याङ्गोपनयनं सम्भवत्येवेति वाच्यम् 'त्वं हि नः पिता (पृ० उ० ६।८) इति शास्त्रपर्यालोचनया-अस्याप्युनयनस्य द्वितीयजन्महेतुत्वावगमात् । 'न च संस्कारमर्हति' (मनु० १०।१२६) इति निषेधत्वाच्च मन्त्रवर्जनं दुष्यतीति वचनन्तु जातकर्मादिविषयकम् । किञ्च

---

१. घ० मा० 'स्वल्पांगान्त' इति पाठः ।

२. घ० मा० 'नात्र काश्चिद्विरोधः' इति पाठः ।

३. घ० मा० 'विद्याधिकारिणी' इति पाठः ।

४. घ० मा० 'प्यदधिकारपत्तेः' इति पाठः ।

५. घ० मा० 'योगेन पते इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तस्माच्छूद्रस्य समीपे नाध्येतव्यमुदाहरणे(उच्चारणे)जिह्वाच्छेद, धारणे हृदयभेद (शां० भा० १।३।३८) इत्यादिशास्त्रपर्यालोचनया शूद्रस्य[१] विद्यायामनधिकारस्यैव वक्तव्यत्वादतस्त्रैवर्णिकानामेवाधिकार[२] इति।

कम्पनाधिकरणम्

कम्पनात् ॥१०॥

कठवल्लीषु पठ्यते 'यदिदं किञ्च जगत्सर्वं प्राण एजति निस्सृतम्। महद्भयं[३] वज्रमुद्यतं य एतद्विदुरमृतास्ते भवन्ति (क०उ० २।३।२) इति तत्र संशयः निस्सृतप्राणवज्र[४] शब्दाभ्यां वायुविकारयोरतद्विकार ग्रहणमुत ब्रह्मण इति।

---

१. (क) अवयववृत्तीति व्याख्याने वेदान्तकल्पतरौ परिमले च शूद्रशब्दस्य व्याख्यानमित्थं कृतम्। शुचा द्रुद्रावेत्याद्यर्थेषु शूद्रशब्दस्य रुद्रां द्रावयतीत्यर्थे रुद्रशब्दस्यैव नैरुक्तप्रक्रियया निष्पत्तिः। उकारदैर्घ्यस्यापि तत एव सिद्धिः (नै० क० प० पृ० ३२०)।

(ख) शूद्रशब्दस्तु वर्णितेन प्रकारेण रूढ्यसम्भवे क्षत्रिय एव जानश्रुतौ शुचमांभिदुद्राव इत्यादियोगाद्वर्तितव्यः (शास्त्रदर्पणे १।३।१०)।

(ग) शोचतीति हि शूद्रः 'शूचेर्दश्च' इत्यौणदिकसूत्रेण रप्रत्यये धातोश्च दीर्घे चकारस्य च दकारे 'शूद्रः' इति भवति। अतश्शोचयितृत्वमेवास्य शूद्रशब्दस्य प्रयोगेन सूच्यते, न तु जातियोगः। (श्री भाष्य १।३।३३ पृ० २६८)

(घ) विद्योपदेशयोग्यत्वख्यापनार्थं शोक एवास्य जानश्रुतेः रैक्वेण सूचितो न जाति योगः (वे० कौ० भा० पृ० १०७)।

(ङ) तदेव गुरुं प्रत्याद्रवणाच्छुक्सञ्जाता इदि शूद्र इति सम्बोधनेन सूच्यते' (वे० सौ० भा० पृ० १०५)

(च) 'ब्रह्मज्ञं रैक्वं प्रत्याद्रवणाच्छुक्सञ्ज्ञाजातेति न तदर्थंवर्णत्वेन' (वे० कौ० प्र० पृ० १३९)।

(छ) शुचमभिदुद्राव, शुचा वाभिद्रदुवेः शुचा वा रैक्वमभिदुद्रावेति शूद्रः, अवयवार्थसम्भवाद्यर्थस्य चासम्भवात्' (शां० भा० पृ० २६९)।

२. (क) शूद्राणां वेदपूर्वकाधिराभावोऽपीतिहासपुराणाधिगमे स्मृतिमूलकोऽधिकार अस्त्येवेति। तथा च भाष्यम् येषां पुनः पूर्वकृतसंस्कारवशाद्विदुरधर्मव्याधप्रभृतीनां ज्ञानोत्पत्तिस्तेषां न शक्यते फलप्राप्तिः प्रतिषेद्धुं, ज्ञानस्यैकान्तिकफलत्वात्।' 'श्रावयेच्चतुरो वर्णान्' इति चेतिहासपुराणाधिगमे चातुर्वण्यस्याधिकारः स्मरणात्। वेदपूर्वकस्तु नास्त्यधिकारः शूद्राणामिति स्थितम्' (शां० भा० १।३।३८)

(ख) मिताक्षरायान्तु 'न शूद्रस्य ब्रह्मविद्याधिकार उपनयनाभावेन वेदाध्ययनाभावात्, देवानान्तु सुकृतविशेषात्स्वयं प्रतिभात वेदत्वादधिकाराविरोधः न्यायाभावाच्च न लिङ्गसाधकम्' (ब्र० सू० वृ० मि० १।३।३४ पृ० ६०)।

(ग) 'विशिष्टबुध्यादिमत्त्वरूपयुक्तेर्न केवलमुपाद्धलकाभावेन दौर्बल्यम्, किन्त्वनिषेधत्वसहितविशिष्टबुध्यादिमत्त्वरूपोपाधिग्रस्तत्वेनापीत्याशयेनोपाधेः पक्षात् व्यावृतिसिद्धये शूद्रस्य वेदश्रवणाध्ययनादेर्निषेधकप्रमाणोक्तिरिति सूत्रक्रमः'। (त० प्र० व्या० मा० बो० १।३।३४, पृ० १५३)।

(घ) द्विजातीनामिति प्रतिग्रहवैलक्षण्यप्रदर्शनपरा न तु शूद्रस्य दानाभावादपरेत्याह द्विजातीनामिति। नत्विति। नत्वेवं वार्यते। दानञ्च दद्याच्छूद्रोऽपीति स्मृतिरिति भावः।' (आभोग १।३।३४, पृ० ३५७)।

(च) एवञ्चाध्ययनविधिविरोधेऽर्थवादगतलिङ्गन्न शूद्रमधिकारयितुमलम्। निषादस्य तु विधिब्रह्मादिष्व्यधिकार इति वैषम्य' (शा० द० १।३०।१०)।

३. घ० मा० 'महाक्षयम्' इति पाठः।

४. घ० मा० 'नि प्रणवज्र' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पञ्चवृत्त्यात्मके[१] वायौ प्राणशब्द प्रयुज्यते ।
अशनौ वज्रशब्दश्च तयोस्तस्माद्ग्रहो भवेत् ॥
तयोरुपासनञ्चापि ब्रह्मज्ञानां गमिष्यति ।
अमृतत्वफलोक्तिश्च प्रधानस्य भविष्यति ॥

अत्र मन्त्रे प्राणपदं पञ्चवृत्त्यात्मकस्य वायुविकारस्य प्रतिपादकम् । न च सर्वशब्दस्य सकलजगत्परत्वेन तद्बाधकत्वस्य[२] प्राणेऽसम्भवादयुक्तमिति वाच्यम् । प्राणशब्दस्यात्यन्तबाधापेक्षया सर्वशब्दस्य सङ्कोचस्यैव न्याय्यत्वात् । न च परमात्माप्रकरणविरोधः[३], ब्रह्मविज्ञानाङ्गत्वेन तयोरुपासनस्य विध्युपपत्तेः । न च "अमृतास्ते भवन्ति" (क० उ० २।३।२) इति मोक्षप्रतिपादनाश्रयजनकब्रह्मज्ञानविषयत्वेन, तयोर्ब्रह्मत्वं निश्चीयत इति वाच्यम् । अङ्गभूतोपासने[४] प्रवृत्त्यर्थप्रधानफलस्य कीर्तनोपपत्तेः । विज्ञानमयकोशोपासनायां प्रधानफलस्य सर्वकामाशनस्य कीर्तनवत् । न च वाक्यभेदापत्तिरुपासनाद्वयविधानादिति वाच्यम् । एकस्या एवोपासनाया उभयविषयाविधानाद्वाक्यभेद इति प्राप्ते । अभिधीयते ।

सर्वचेष्टानिमित्तत्वं ब्रह्मान्यस्य न सम्भवेत् ।
लोकाश्रयत्वं पूर्वत्र यदुक्तं ब्रह्मणोऽत्र वै ॥
तस्येह प्रत्यभिज्ञानात्प्राणे ब्रह्मेति निर्णयः ।
परप्रकरणाच्चैव[५] मुक्तेश्चैव हि कीर्तनम् ॥
उपपन्नतरः[६] सर्वं शब्दोऽप्येवं समञ्जसः ।
दृष्टा चाभीतिरीशानाद्यस्त(?)दिति वाक्यतः[७] ॥

---

१. (क) प्राणाणुत्वश्रुतिबलाद्वाक्यप्रकरणञ्च भङ्क्त्वा वायुः पञ्चवृत्तिराध्यात्मिको बाह्यश्चात्र प्रतिपाद्य तथाहि प्राणशब्दो मुख्यो वायावध्यात्मिके, वज्रशब्दश्चाशनौ । अशनिश्च वायुपरिणामः । वायुरेव हि बाह्यो धूमज्योतिः सलिलसंवलितः पर्जन्यभावेन परिणतो विद्युत्स्तनयित्नुवृष्ट्यशनिभावेन विवर्तते । (भामती १।३।३८, पृ० ४२९)

(ख) 'ब्रह्मणि निमित्ते वज्रस्यैवोद्यमे हेतुभावेन वज्रशब्दः छत्रिन्यायेन लाक्षणिकः स्यात्, प्राणे निमित्ते वज्रस्यैवोद्यमे तयोः प्रकृतिविकारभाववद्वज्रब्रह्मणोरसाधारणसम्बन्धाभावात् । (आभोग, पृ० ३५८) ।

२. घ० मा० 'तद्बालकत्वस्य' इति पाठः ।

३. घ० मा० 'परमात्माप्रकरण' इति पाठः ।

४. येनरूपेण पुरुषस्य समीहितं साधयति, तेन रूपेण तद्वस्तु, तत् समीहानिमित्तपुरुषव्यापारगोचरीभूतेन येन वस्तुना साध्यते, तत्तस्याङ्गमित्यभिधीयते, इदमेव परोद्देशप्रवृत्तपुरुषप्रकृतिव्याप्यत्वमित्युच्यते । एवञ्च यदुद्देशप्रवृत्तपुरुषकृतौ यत्कारकत्वेन विहितम्, तत्तदङ्गमित्युच्यते. प्रोक्षणादौ समन्वयप्रकारश्चेत्थम्, अत्र परशब्देन प्रधानमभिप्रेतम् । परोद्देशेन व्रीहिसंस्कारोद्देशेन प्रवृत्तः पुरुषः तत्समवेता कृतिः, व्रीहिसंस्कारकर्मिका कृतिः तत्र करणकारकत्वेन प्रोक्षणादीनां विधानाल्लक्षणसमन्वायः । तथा प्रकृतेऽपीति (न्या० र० मा० भू० पृ० ८३) ।

५. घ० मा० 'प्रकरणम्' इति पाठः ।

६. घ० मा० 'उपपन्नतरम्' इति पाठः ।

७. घ० मा० 'रीशानाबास्मा' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वाक्यशेषे भयादस्य तपत्यग्निरिति श्रुतेः।
अतः प्राणश्रुतेर्गभस्तथा वज्रश्रुतेरपि ॥

प्राणशब्दवज्रशब्दश्च परमात्मपर एव अङ्गीकार्यः[1] 'प्राण एजति' (क० उ० २।३।२) इति सर्वचेष्टायाः प्राणाधीनत्वेन प्रतिपादनात्। पूर्वमन्त्रे प्रत्यभिज्ञानाच्च 'ऊर्ध्वमूलोऽवाक्शाखा एषोऽश्वत्थः[2] सनातनः। तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते॥ तस्मिँल्लोकाश्रिताः सर्वे तदु नात्येति कश्च (क० उ० २।३।१) इति ब्रह्मणः सकलजगदाश्रयत्वमुक्तमिहापि जगत्सर्वं प्राणः सृजति प्राणाश्रयत्वं सर्वस्य जगत उच्यत इति प्रत्यभिज्ञानात्पूर्वमन्त्रावगतब्रह्मविषयत्वस्य निर्मितत्वात्। न च प्राणैजनाश्रयत्वमेव प्रतीयते, न जगदाश्रयत्वमिति वाच्यम्, 'यो हि यत्र चेष्टते न तत्र स्थित्वैव चेष्टत' इत्यस्यार्थस्य लोकसिद्धत्वात्।

किञ्च 'ऊर्ध्वमूलोऽवाक्शाखा एषोऽश्वत्थ[3] सनातन' (क० उ० २।३।१) इत्युक्त्या तदेव शुक्रं तद्ब्रह्मेत्युच्चते। तत्र तच्छब्देन किमश्वत्थस्य[4] परामर्श उत तन्मूलस्येति, तथा क्वासावश्वत्थ इति न ज्ञायते, तदर्थमुत्तरवाक्यं प्राणान्निसृतं सत्प्राण एजतीत्युक्त्याश्वत्थ (क० उ० २।३।२) जगदिति निर्णीयते। तन्मूलञ्च तच्छब्देन परामृश्यत इति। अतोऽपेक्षितार्थत्वेनान्वये सत्येकवाक्यतालाभात्प्राणो ब्रह्म। एवञ्च सति मोक्षजनकज्ञानविषयत्वं ब्रह्मप्रकरणम्। सर्वशब्दो 'यदिदं किञ्चेत्यनेन (क० उ० २।३।२) 'सामानाधिकृतश्चोपपन्नतरो भवति, तथा ब्रह्मशब्देनापि परमात्मैव ग्राह्यः, 'महद्भय' (क० उ० २।३।२) इति भयहेतुत्वोक्तेः, वाक्यशेषे भयादस्यादिभिस्तपतीति श्रवणाद्भीषास्माद्वातपवत' (तै० उ० २।८) इति श्रुत्यन्तरे भयहेतुत्वस्य ब्रह्मण्येव प्रतिपादनात्, 'तदु नात्येति कश्च' (क० उ० २।३।२) इति पूर्वमन्त्रप्रत्यभिज्ञानाच्च। अतो वज्रप्राणशब्दौ ब्रह्मपरावेवेति।

ज्योतिरधिकरणम्

ज्योतिर्दर्शनात् ॥११॥

प्रजापतिविद्यायामाम्नायते 'एषः सम्प्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरूपं सम्पद्य स्वेन रूपेणाभिनिष्पद्यते स आत्मा[5]' (छा० ८।३।४) इति श्रूयते। तत्र सन्देहः। किञ्ज्योतिश्शब्देनादित्यादिज्योतिर्गृह्यते किं वा परमात्मेति। तत्र पूर्वपक्षः। आदित्य एव गृह्यतामिति।

---

१. घ० मा० 'एव कार्य' इति पाठः।
२. घ० मा० 'एषोऽत्थ' इति पाठः।
३. घ० मा० 'गिमश्वस्य' इति पाठः।
४. अश्वत्थशब्दो पिप्पलवृक्षवाचकः, श्वध्यर्थः। परं सनातनशब्दप्रयोगमात्रेण परिमितमर्थनाविन्यमादघातीति। न श्व इत्यश्व परिदृश्यमानचराचरात्मकः प्रपञ्चः, तत्र व्यापकत्वेन तिष्ठतीत्यश्वत्थः परमात्मा सनातन इत्यर्थः। द्वितीयार्थस्तूर्ध्वमुत्कृष्टं ब्रह्मात्मकं मूलं कारणमस्य स ऊर्ध्वमूलः निकृष्टाः कार्योपाधयो हिरण्यगर्भादयो नाना दिक्षु प्रसृतत्वाच्छाखा इव शाखा अस्येत्यवाक् शाखः। एवं लक्षणकस्य संसारवृक्षस्य यन्मूलं तदेव शुद्धं तदेव व्यापकं ब्रह्म। एव प्रत्यक्षसिद्धः ब्रह्मादिस्थावरान्तसंसार अश्वत्थवृक्षः सनातनः प्रवाहरूपेणानादिसिद्धः इति।
५. घ० मा० 'स उद्यम पुरुष' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कुतः

ज्योतिश्शब्दस्य तत्रैव रूढत्वाद्ब्रह्मणो नहि।
ग्रहणं सर्वनामादेर्विरहान्नीयते क्वचित्॥
इन्द्रस्य त्रातुरित्यादिमन्त्रस्यैवं भविष्यति।
अस्य वाक्यस्य तेनात्र ज्योतिषा ग्रहणं भवेत्॥

ज्योतिश्शब्दस्य भौतिकज्योतिषि रूढत्वान्न[1] ब्रह्म, तस्य तत्रारुढत्वात्, 'ज्योतिश्चरणाभिधानात्' (ब्र० सू० १।१।२४) इत्यत्र तु पूर्वप्रस्तुतं ब्रह्मप्रतिपादकयच्छब्दसामाधिकरण्याज्ज्योतिःपदस्य ब्रह्मपरत्वं निर्णीतम्। न चेह तथा यच्छब्दादिकमस्ति। अत आदित्यादिकमेव ज्योतिर्ग्राह्यम्, परशब्दश्च नक्षत्राद्यपेक्षया प्राप्तमुत्कर्षं बोधयति। न च ब्रह्मप्रकरणविरोधः श्रुत्यनुसारेणोत्कर्षोपपत्तेः। यथा दर्शपूर्णमासप्रकरणेऽनुमन्त्रणमन्त्रमिन्द्रस्य त्रातुरहं देवयज्ययात्रातो भूयासमित्ययमिन्द्राय[2] त्रात्रे 'चरुपुरोडाशमेकादशकपालं[3] निष्क्रामेदिति विहिता ययिष्टा उत्कृष्यते। एवमिदमपि वाक्यं सविशेषविधायामुत्कृष्टव्यम्। एवञ्च सति 'अस्माच्छरीरात्समुत्थाय' (छा० ८।३।४) इति समुत्थानमुत्क्रान्तिरूपमुपपद्यते। निर्विशेषविद्यायां तु प्रतिषेधादिति चेन्न शारीरादित्यधिकरणे निर्विशेषविदुत्क्रान्तिप्रतिषेधेन तदनुपपत्तेः। अतस्समुत्थानं विवेकरूपमिति वक्तव्यम्। न च तद्वाचकता उत्पूर्वस्य धातोरस्ति। अत उत्कर्ष एव न्याय्य इति।

सिद्धान्तस्तु

उत्कृष्टस्यास्य वाक्यस्य वैयर्थ्यस्य प्रसङ्गतः।
ज्योतिपदं परेशस्य तस्माद्बोधकमिष्यते॥
प्रक्रियानुग्रहैश्चैवमुपपन्नो[4] भविष्यति।
समुच्छ्रायति शब्दश्च विवेकप्रतिपादकः[5]॥

ज्योतिश्शब्देन परमेव ब्रह्म ग्राह्यं नत्वादित्यादिज्योतिः। निर्विशेषविदां तत्प्राप्त्याभावात्[6]। प्रजापतिविद्यायाश्च निर्विशेषविद्यात्वस्य दहराधिकरणे व्यवस्थापितत्वात्। न चास्माच्छरीरात्सत्थायेत्याद्यति रिक्ततया 'ज्ञात्वा परं ज्योतिरूपसम्पद्ये' (छा० ८।१२।२) इति ब्रह्मसाक्षात्कृत्य 'स्वेन रूपेणभिनिष्पद्य' (छा० ८।१२।२) स्व स्वरूपं प्रतिपद्यत इति, न च ज्योतिश्शब्दानुसारादस्य वाक्यस्य प्रकणादुत्कर्ष इति वाच्यम्। उत्कृष्टस्य क्वचिदपि नयनासम्भान्निर्विशेषविद्यायामनुपयोगात्। सविशेषविद्यायामपि 'तद्य इत्थं विदुर्ये चेमेरण्ये श्रद्धातप इत्युपासते' (छा० ५।१०।१) इति वाक्येनार्चिरादिपर्वान्तरप्रतिपादकत्वेनावश्यापेक्षितत्वेनादित्यप्राप्तेर्लभ्यत्वेनास्य वाक्यस्य वैयर्थ्य-

१. घ० मा० 'न तु' इति पाठः।

२. घ० मा० 'भूयसम्' इति पाठः।

३. यवव्रीह्यादिपिष्टनिर्मितः कूर्माकृतिकः कपालश्रपितः पिण्डविशेषः, पुरोडाशो नाम चरुपशब्दोऽनवस्रावितान्तरूष्मजन्ययाकाश्रयोदनवाची (तन्त्र० र० पृ० २५) 'होम्यं यत्कठिनं स्यात्तु पुरोडाश इति स्मृतम्' (अधिकरण कौ० पृ० १०)।

४. घ० मा० 'प्रक्रिया तु ग्रहश्च' इति पाठः।

५. घ० मा० 'प्रतिपादकम्' इति पाठः।

६. घ० मा० 'प्राप्त्याभावात्' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रसङ्गेणानर्थक्यप्रतिहवाना[१]मिति न्यायेन श्रुतिबाधापूर्वकं प्रकरणे निवेशस्यैवङ्गीकार्यत्वात् । न च दहरविद्यायां तपोधर्मा यन्नामृतत्वमेती[1] ति क्रममुक्तेस्तद्युक्तत्वादन[१]मनेन न क्रियत इति वाच्यम् । अस्मिन्वाक्ये क्रममुक्ति-प्रकारस्य स्पष्टमप्रतीतेः । तत्प्रतिपादकवाक्यान्तरस्य 'वेदान्तविज्ञानसुनिश्चितार्था' (मु० उ० ३।२।६) इत्यस्य तैत्तिरीयकशाखायां स्पष्टत्वात् 'अमृतत्वं चानुपोष्यक्षे[2]' इत्यमृतत्वस्य सविशेषमुक्तिपरतया व्याख्यातत्वाच्च । अतः प्रकरणादुत्कर्षानुपपत्तिरतो ज्योतिः पदं परमात्मापरमिति ।

अर्थान्तरत्वादिव्यपदेशाधिकरणम्

आकाशोऽर्थान्तरत्वादिव्यपदेशात् ॥१२॥

'आकाशो ह वै नामरूपयोर्वाहिता ते यदन्तरा तद्ब्रह्म, (छा० ८।१४।१) इति श्रूयते । तत्र सन्देहः । किमाकाशब्देन भूताकाशं गृह्यत उत परमात्मेति । किं प्राप्तम् । भूताकाशमिति ।

रूढ्याकाशशब्दस्य तत्र तु प्राप्तेयोगतः[3] ।
मुख्यस्य ग्रहणे चैव न गौणोऽर्थो ग्रहीष्यते ॥

मुख्यस्य ग्रहणासम्भवे हि गौणोऽर्थग्रहणमर्हति । प्रकृते मुख्यार्थग्राहकविरोध्यदर्शनात् । गौणार्थग्रहणा-भावेन[4] मुख्यार्थस्यैव ग्रहणं न्याय्यम् । न च नामरूपनिर्वोढृत्वोक्तिस्तद्बाधकतन्निर्वाहकत्वस्यावकाशदातृत्वेन भूताकाशेऽप्युपपत्तेः । अजनकेऽपि ग्रामनिर्वाहक इति प्रयोगदर्शनात्, निर्वहणस्य जनकत्वस्वरूपत्वाभावात्, 'ते यदन्तरा' (छा० ८।१४।१) इति यत्पदमपि न पूर्वोक्ताकाशपरामर्शकं येन तद्बलेन तद्ब्रह्मेति वाक्याद्ब्रह्मत्वं लभ्येत । तच्छब्दावमर्शो तच्छब्दस्य पूर्वप्रस्तुतपरामर्शकत्वाभावात्, 'अथं[5] वै' शब्द आकाशस्य प्रसिद्धत्वं चोक्तं[6] यद्भूताकाशमेव गमयति । यस्यैव लोकवेदप्रसिद्धत्वादात्मनस्तु वेदप्रसिद्धत्वेऽपि लोकप्रसिद्धत्वाभावात् 'सर्वाणि ह वा इमानि भूतानि' इत्यत्र तु 'ह' शब्दावगतप्रसिद्धि पञ्चम्यर्थकारणत्वे [7]एवान्वेति, तस्यैव प्रधानत्वात् । कारणत्वञ्च न लोकप्रसिद्धमतस्तत्र ब्रह्मैव ग्राह्यमिह तु प्रातिपादिकार्थस्य प्रसिद्धावगमान्न[8] ब्रह्म ग्राह्यमिति ।

सिद्धान्तस्तु :—

नामरूपाद्यसंस्पृष्टं ब्रह्मात्र प्रतिपाद्यते ।
तदेवाकाशशब्देन वक्तव्यं तत्पदश्रुतेः ॥

---

१. घ० मा० तपोधमायन्नमृतत्व०' इति पाठः ।
२. घ० मा० 'चानुयोष्ये' इति पाठः ।
३. घ० मा० 'कुप्राप्त' इति पाठः ।
४. घ० मा० 'गौणो र्थहणमर्हसि इति पाठः ।
५. घ० मा० 'भावार्थः' इति पाठः ।
६. घ० मा० 'प्रसिद्धत्व यद्भूत' इति पाठः ।
७. घ० मा० 'कारणत्वद्देषान्वेति' इति पाठः ।
८. घ० मा० 'प्रसिध्यवगम' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नामरूपस्य[1] निर्वाहश्चेतनस्यैव दृश्यते ।
घटादिर्नहि निर्वोढा लोके कुत्रापि दृश्यते ॥
'ह वै' शब्दोदिता या तु प्रसिद्धिस्सापि वैदिको ।
निर्वोढृत्वप्रसिद्धिर्न लोके कस्यापि दृश्यते ॥

यन्नामरूपाभ्यामर्थान्तरत्वेन निर्दिष्टं ब्रह्म तदेवाकाशपदप्रतिपाद्यम् । सर्वनाम्नां पूर्वप्रस्तुतबोधकत्वेन 'यदन्तरा' (छा० ८।१४।१) इति यच्छब्दस्य पूर्वप्रस्तुतपरामर्शकत्वस्यावश्यकत्वाद्यच्छब्दार्थस्य तच्छब्देनापि परामर्शोऽधिकोऽपेक्षित । ननु पूर्वोपस्थितपरामर्शकत्वस्य तावता त्यागः 'ह वै नाम' (छा० ८।१४।१) इति निपातसमुदायावगताप्रसिद्धिरपि नामरूपनिर्वोढृत्वविशिष्ट एव प्रतीयते, 'देवदत्तः खलु पण्डितः' इत्यत्र खलु-शब्दात्प्रतीयमानाप्रसिद्धिः पण्डितत्वविशिष्टस्यैव सा च वैदिक्येव ग्राह्येति । आकाशः परमात्मैव स्वीकार्यः । किञ्चनामरूपनिर्वोढृत्वञ्चेतन एव प्रसिद्धम् । निर्वाहकत्वस्य चेतनधर्मत्वान्नहि घटो निर्वाहक इति प्रसिद्धिरस्ति । अतश्चेतनग्रहणे निर्णीते हिरण्यगर्भादीनामसङ्कुचितस्यासम्भवात्परमात्मैव ग्राह्य इति न [2]भूताकाशोपासनं विवक्षितम् ।

सुषुप्त्युत्क्रान्त्यधिकरणम्

सुषुप्त्युत्क्रान्त्योर्भेदे न ॥१३॥

ज्योतिर्ब्राह्मणे श्रूयते 'कतम आत्मेति योऽयं विज्ञानमय प्राणेषु हृद्यन्तर ज्योतिः पुरुषः' (बृ० ४।३।७) इति तत्र विचार्यते किमिदं प्रकरणञ्जीवपरमुत परमात्मपरमिति । तत्र पूर्वः पक्षः । जीव एवास्मिन् प्रकरणे व्युत्पाद्यत इति ।

कुतः

जन्मादीनां हि धर्माणाञ्जैवानां दृश्यते यतः ।
कीर्तनं तेन न ब्रह्म ग्राह्यमत्र भविष्यति ॥

'ससमान[3] सन्न भौलोकावनुसञ्चरतीति श्रुतिर्मन[4] उपाधिकस्य लोकद्वयगमनं प्रतिपादयति 'स वायं पुरुषो जायमानः' (बृ० ४।३।८) इत्यादिर्जन्मादि' स वां एष एतस्मिन्सम्प्रसादः' (बृ० ४।३।१५) इत्यादिश्चावस्थाः । एवञ्च सर्वज्ञीव एव सम्भवति न परमात्मनि, असौ नेह परमात्मा ग्राह्यः । न चात्मैवास्य ज्योतिर्भवत्युपक्रमे आत्मशब्दनिर्दिष्टजीवापेक्षया भिन्नत्वेनेदं शब्दनिष्ठस्य परमात्मनः 'कतम आत्मा' (बृ० ४।३।७) इति प्रश्नपूर्वकं व्युत्पादनं क्रियते, 'मध्येऽपि स्वोऽन्येन शरीरमभिप्रहत्येति जीवप्रहन्तृत्वेन परमात्मा निर्दिश्यते । उससंहारे च 'सर्वस्य वशी सर्वस्येशान' इति परमात्मैव कीर्त्यते । अत उपक्रमोपसंहारमध्ये परामर्शः परमात्मपरत्वेन निर्णीयते ।

---

१. नामरूपस्येत्यत्र नाम च रूपञ्च नामरूपे तयोर्नामरूपयोः निर्वाह घटपटादिप्रापञ्चिकव्यवहारे चेतनस्यैव लोकेऽपि दृश्यते । नहि घटः स्वयमर्थक्रियाकारित्वे प्रवर्त्तते जड़त्वात् तर्हि नामरूपात्मकप्रपञ्चवद्ब्रह्मणोऽपि नामरूपास्तिभातिप्रियस्वरूपत्वाद-नित्यत्वं प्रसज्येत इति चेन्न व्यवहारमात्रगम्यत्वात् ।

२. बहिरिन्द्रियग्राह्यत्वे सति विशेषगुणवत्वं भूतत्वम् ।

३. घ० मा० 'समामन्नुभगे' इति पाठः ।

४. घ० मा० 'श्रुतिमनः पाधि' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न च[1] श्रुतीनाञ्जीवधर्मान्तरयामिणि कथञ्चिद्योजनीयमिति वाच्यम्। उपक्रमस्यात्मैवास्य ज्योतिर्भवत्यस्याभेदेऽपि षष्ठ्या असम्भवे[2] च संदिग्धस्यौपाधिकसांसारिक[3] जीवधर्मानुपपत्तिः। अहमिति तस्य निश्चितत्वादिति वाच्यम्। अहमिति प्रतीयमानेषु देहेन्द्रियादिषु 'क आत्मेति' प्रश्नोपपत्तेः। अत एव कतम आत्मा (बृ० ४।३।७) इति तमसा प्रयोगः। अत एवात्राथ[4] पुरुषः स्वयञ्ज्योतिर्भवतीति स्वस्येव ज्योतिरूपत्वमुक्तम्। स्वापेन[5] शारीरमभिप्रहत्येत्यत्र जीवमेव शरीरं[6] कार्याक्षमं कृत्वेत्यर्थः, स्वयं विहत्य स्वयं निर्मायेति वाक्यान्तरात्। इहापि शुक्रमादाय पुनरेति स्थानमिति गत्यागत्युक्तेश्च। न च 'प्राज्ञेनात्मना सम्परिष्वक्तः प्राज्ञेनात्मानान्वारूढः सर्वस्य वशीत्या'दिश्रुतिपर्यालोचनया परमात्मनोऽपि प्रतिपाद्यमानत्वाज्जीवब्रह्माभेदपरमिदं वाक्यमिति वाच्यम्। ईश्वरमनभ्युपगम्यस्याधिकरणस्या[7] प्रवृत्तेः। अत एवान्यत्र परमात्मनो व्युत्पादनात्परमात्मा, इह तु जीव एव ग्राह्य सोपाधिकस्यैवात्र ग्रहणात्। असङ्गत्वादिकीर्तनन्तु सांसारिकधर्माणां बहुलमुपलम्भात्कथचिन्नेयम्।

उपसंहारे परमेश्वरधर्मकीर्तनं तु तदभेदोपपादनार्थं भविष्यति। मोक्षकीर्तनमपि पापनिवृत्त्यभिप्राममिति।

सिद्धान्तस्तु

जीवस्य ब्रह्मणा तावदभेदोऽत्राभिधीयते।
विज्ञानमय 'इत्यादिवाक्ये जीवो ह्यनूद्यते॥
सर्वस्येशान' इत्यादिवाक्यैर्ब्रह्मत्वबोधनम्।
एवञ्च सति मोक्षस्य कीर्तनन्न विरुध्यते॥

ईश्वरस्तावन्नास्तीति वक्तुमशक्यं जन्मादिसूत्रे तस्य साधितत्वात्। न च लाघवाज्जीवैरेव जगद्रचनोपपत्तिः शंक्या, श्रुत्या बोध्यमानेऽर्थेऽपि लाघवस्य गौरवस्य वा किञ्चित्करत्वात्। इहापि प्राज्ञेनात्मना सम्परिष्वक्तः प्राज्ञेनात्मनान्वारूढ[8] इत्यादिवाक्यैरीश्वरस्य प्रतिपादनाच्च। अतो 'योऽयं विज्ञानमय' इत्यादिवाक्यैः 'असङ्गो ह्ययं पुरुषः' (बृ० ४।३।१५) इत्यादिवाक्यसहस्रेण तात्पर्यसहितेन सिद्धं शुद्धजीवमनुद्य 'तस्य सर्वस्य वशी'त्यादिना भेदबोधकमेव युक्तम्।

न च ब्रह्मोपासनापरं[9] तदिति वाच्यम्, तथा कल्पनायां मानाभावात्। 'कतम आत्मा' (बृ० ४।३।७) इति जनकस्य प्रश्नो हि मुमुक्षयेति तावदविवादम्। अत ऊर्ध्वं विमोक्षायैव ब्रूहीति पुनः पुनरुक्तेर्मोक्षश्च न

१. घ० मा० 'न च' इति पाठो नास्ति।
२. घ० मा० 'सम्भवे. इषि पाठः।
३. घ० मा० 'संहारिक' इति पाठः।
४. घ० मा० 'एवात्राय' इति पाठः।
५. घ० मा० 'स्वायनेन' इति पाठः।
६. घ० मा० 'जीव एव' इति पाठः।
७. घ० मा० 'अभ्युपगम्यस्य' इति पाठः।
८. घ० मा० 'अन्वरूढ़' इति पाठः।
९. घ० मा० 'ब्रह्मोपोसनापरम्' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चाधिक्यनिवृत्तिरूप[१], इति तात्पर्यग्राहकलिङ्गादवगम्यते । मोक्षसाधनीभूतञ्च ज्ञानञ्जीवपरमात्माभेदविषयमेव । अत इदं प्रकरणं प्रत्यगभिन्नब्रह्मपरमिति सिद्धम् ।

इति श्री श्रीमत्परमहंसपरिव्राजकाचार्यसर्वतन्त्रस्वतन्त्र श्रीमदद्वैतानन्दसरस्वतीचरणारविन्दभृङ्गाय-मानस्य स्वयंप्रकाशानन्दस्य कृतिषु वेदान्तनयभूषणे प्रथमस्याध्यायस्य तृतीयपादः ।

अथप्रथमाध्याये चतुर्थपादः

आनुमानिकाधिकरणम्

आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च ।।१।।

जिज्ञास्यस्य ब्रह्मणो जगज्जन्मादिकारणत्वं लक्षणमुक्तम् । तच्च प्रधान एव वर्तते न ब्रह्मणीत्यसम्भव-माशंक्य तत्समाधानम् 'ईक्षतेर्नाशब्दम्' (ब्र० सू० १।१।५) इत्यत्रोक्तम् । तदनन्तरञ्च सर्वश्रुतीनां ब्रह्मपरत्वमेवेति 'गतिसामान्यात्' (ब्र० सू० १।१।१) इत्यनेनोक्तम् । तच्च 'गतिसामान्यम्' (ब्र० सू० १।१।१०) आनन्दमयोऽभ्यासात् (ब्र० सू० १।१।१२) इत्यारभ्य 'पत्यादिशब्देभ्यः' (ब्र० सू० १।३।४३) इत्यन्तैस्सूत्रैः प्रतिपादितम् । अस्मिंस्तुपादे ब्रह्मणो जगत्कारणत्वविरोधित्वे प्रतीयमानपदजातस्य ब्रह्मविरोधित्वं व्यवस्थाप्य कठवल्लीषु पठ्यते—

इन्द्रियेभ्यः पराह्यर्था अर्थेभ्यश्च परं मनः ।
मनसस्तु पराबुद्धिर्बुद्धेरात्मा महान्परः ।।
महतः परमव्यक्तमव्यक्तात्पुरुषः परः ।
पुरुषान्न परं किञ्चित्सा काष्ठा सा परागतिरिति ।।

(क० उ० १।३।१०, ११)

तत्र सन्देहः किमव्यक्तशब्देन प्रधानं ग्राह्यमुत रूपकविन्यस्तं शरीरमिति । तत्र पूर्वः पक्षः—

सांख्यस्मृतिप्रसिद्धस्य प्रधानस्य परिग्रहः ।
युक्तो व्यक्तपदेनेह तदीयानां प्रतीतितः ।।
तत्त्वानां योगरूढ़िभ्यां तस्य शब्दस्य वर्तनात् ।
न देहस्य तयोस्तत्र स्वल्पभावस्य सिद्धयः ।।

सांख्याभिमतप्रधानमव्यक्तशब्दादार्हतत्त्वानामत्र प्रतीतेः । न व्यक्तमव्यक्तमिति योगस्य तद्व्यवहारा-वगतढेश्च तत्र सत्त्वात् । न च[२] सांख्येयो व्यवहारो न रुढिसाधकः, तान्त्रिकव्यवहारत्वादिति वाच्यम् । तथात्वे नैयायिकव्यवहारस्यापि शक्यग्राहकत्वासङ्गेन, ऐक्यनानात्वसंयोगसमवायविशारदः । पञ्चावयवयुक्तस्य वाक्यस्य गुणदोषवित्' इति भारतस्थवचनस्याबोधकत्वप्रसङ्गात् । न चैवमपि प्रधानस्य महदपेक्षया परत्वप्रतिपादनेऽपि कारणत्वसिद्धिरिति वाच्यम् । परशब्दप्रतिपाद्योत्कर्षस्य कारणत्वे पर्यवसानात् । देहस्य तु योगरुढ्योरभावान्न तस्य ग्रहणम् । अपि तु सांख्याभिमतस्य ग्रहणमिति । ननु सांख्यस्मृतेर्मूलाभावेन प्रामाण्यान्न तदुक्तस्य ग्रहणं

१. घ० मा० 'न चाधिक्येये' इति पाठः ।

२. घ० मा० 'न च' इति पाठो नास्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्याय्यम्। नेयं श्रुतिस्तस्या स्मृतेर्मूलं, तथात्वे, एतच्छ्रुत्यनुसारेण स्मृतेर्वर्णनीयत्वे[1] परस्य सांख्यस्मृत्यनुसारेण-व्यक्तपदस्य[2] प्रधानपरत्वकल्पनानुपपतेः। इयं हि श्रुतिरव्यक्तपरस्य शरीरपरत्वमेव परस्परश्रुतिरूपकवाक्यविन्यस्तानामेवेह ग्रहणस्य न्याय्यत्वात्। तथा हि—

आत्मानं रथिनं विद्धि शरीरं रथमेव तु।
बुद्धिन्तु सारथिं विद्धि मनःप्रग्रहमेव च ॥
इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान्।

(क० उ० १।३, ४) इति रूपकवाक्ये आत्मादीनां षण्णां स्मरणकीर्तनस्य प्रयोजनाकाङ्क्षा। तथा 'इन्द्रियेभ्यः' (कठ० १।३।१०) इति वाक्ये-आत्मनस्सर्वपरत्वप्रतिपादके 'पुरुषान्न परं किञ्चित् (कठ० १।३।११) इति वचनस्वारस्येनावगते सति के त इन्द्रियादय इत्याकाङ्क्षा[3], अतस्तयोः शब्दसाम्ये परमाणां[4] यदा परिशिष्यमाणमव्यक्तं पदं परिशिष्यमाणस्य शरीरस्य बोधकमिति कल्प्यते। अतोऽव्यक्तपदं[5] शरीरपरत्वमेव न्याय्यम्, न प्रधानपरत्वम्।

न च रूपकवाक्योक्तानां[6] वशीकरणविधिशेषत्वं स्वीक्रियते, 'यस्त्वविज्ञानवान्भवति (क० उ० १।३।६) इत्युत्तरसन्दर्भे वशीकरणप्रतिपादनात्, न च[7] 'इन्द्रियेभ्यः परा ह्यर्थाः' (क० उ० १।३।१०) इति वाक्ये च प्रसिद्धानामेवेन्द्रियाणां ग्रहणमिति वाच्यम्। प्रसिद्धानामिन्द्रियाणां[8] ग्रहणेन तत्राप्याकाङ्क्षाया अभावात्[9] वशीकरणविधिशेषत्वेऽपि किं प्रथमतो वशीकर्तव्यमित्याकांङ्क्षया रूपकवाक्येऽपि सत्त्वेनेन्द्रियेभ्य इत्यात्रापि सर्वापेक्षया 'पर' इत्यनुक्त्वा इन्द्रियाणां परत्वकीर्तनस्य किं प्रयोजनमित्याकाङ्क्षायास्सत्त्वेन परस्पराकाङ्क्षा-बलाद् गयोरैक्यार्थनिश्चयेनाव्यक्तपदस्य शरीरपरत्वादेतच्छ्रुतिमूलत्वं सांख्यस्मृतेरनुपपन्नम्। श्रुत्यन्तरं तु मूलभूतन्नोपलमामह इति सांख्यस्मृतेर्मूलाभावेनाप्रामाण्यात्तत्स्मृतिप्रसिद्धानां कथं ग्रहणमिति चेन्न, सांख्यस्मृतेरनुमानादि-मूलकत्वस्य तैरङ्गीकारात्। अस्याः श्रुतेस्सम्वादमात्रत्वादियमपि श्रुतिरव्यक्तशब्देन प्रधानमेव बोधयति। रूपक-वाक्यन्यस्तानामस्य[10] वशीकरणविधिशेषत्वेनाकाङ्क्षाविरहात्। केन प्रकारेण वशीकर्तव्यानीत्याकाङ्क्षा तु 'ध्यायतो विषयान् पुंसः' (गी० २।६२) इत्यादिस्मृत्येन्द्रियप्रवृत्तेः प्रयोजकं ज्ञात्वा तन्निरोध एव प्रकार इत्यवगति सम्भवेन निवर्तनीया। न चावान्तरपरापरभावसार्थक्याय[11] तत्राकाङ्क्षोत्थापनमिति वाच्यम्' सोपानपंक्तिन्यायेन'

१. घ० मा० 'वर्णणीयत्वा' इति पाठः।
२. तद्रूपकमभेदो न उपमानोपमेययोः (का० प्र० १०)।
३. पदार्थानां परस्परजिज्ञासाविषयत्वयोग्यत्वमाकाङ्क्षात्वम्। (वे० प० भा० आ० प० पृ० २०३)
४. घ० मा० 'रमचानाम्' इति पाठः।
५. घ० मा० 'अव्यक्तपदम्' इति पाठो नास्ति।
६. घ० मा० 'रूपकवाक्योनाम्' इति पाठः।
७. घ० मा० 'न च' इति पाठो नास्ति।
८. घ० मा० 'कोष्ठान्तर्गतः' पाठो नास्ति।
९. घ० मा० 'इति वाच्यम्' इत्यधिक पाठः।
१०. घ० मा० 'न्यस्तानास्य' इति पाठः।
११. घ० मा० 'सार्थक्या' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्कथनोपपत्तेः। तथा हि सति दृढ़ा बुद्धिर्भवति। किञ्च सांख्यतत्त्वानां ग्रहणे सर्वापेक्षया परत्वमात्मनो व्युत्पादितं भवति। रूपकवाक्यविन्यस्तानां ग्रहणे तु न सर्वपरत्वं व्युत्पादितं स्यादतस्सांख्याभिमतप्रधान-ग्रहणमव्यक्तपदेनेति।

सिद्धान्तस्तु

अव्यक्तशब्देन प्रकृतिर्भवेत्।
सांख्यीयप्रकृतत्वेन परिशेषेण च स्फुटम्॥
तन्त्रान्तरीयरूढेश्च नार्थसाधकतात्र वै।
परमात्मप्रक्रियाश्च न प्रधानपरिग्रहः॥

रूपकवाक्योपन्यस्तानां सन्निधानादिन्द्रियेभ्यः' (क० उ० १।३।१०) इति वाक्ये ग्रहणं न्यायम्। तत्र च रूपकवाक्ये षड्पदार्था आत्मशरीरमनोबुद्धीन्द्रियविषया रथरथित्वादिना च निरूपिताः। तत्रेन्द्रियादयश्चत्वार 'इन्द्रियेभ्यः' इति वाक्ये स्वशब्देनैव प्रत्यभिज्ञायन्ते। अर्थाव्यक्तशब्दौ परिशेषाच्छरीरविषयपरादिति निर्धार्यते। सन्निहितशरीरग्रहणसम्भवेऽसन्निहितसांख्यीयग्रहणे प्रमाणाभावात्सांख्यीयरूढ़ेः श्रुतिविरोधेऽर्थसाधकत्वाच्च। न च सांख्यीयानां तत्त्वानामिहाग्रहणे सर्वपरत्वमात्मनो न सिध्येदिति वाच्यम्। स्वस्य वाक्यस्य पुरुषस्य सर्वपरत्वप्रति-पादनपरत्वाभावात्। रूपकवाक्येन हि शरीरादेः रथत्वादिकल्पनापूर्वकं 'सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्' (क० उ० १।३।६) इति विष्णवाख्यं[2] परमं पदं गन्तव्यत्वेन प्रतिपादितम्। तत्र च प्राप्तृप्राप्तव्यभावेनेह[3] शङ्कायां प्रसक्तायां तन्निराकरणार्थमिन्द्रियेभ्यः परा' (क० उ० १।३।१०) इति वाक्यं तद्विवरणरूपं प्रवृत्तं 'सा काष्ठा सा परा गतिः' (क० १।३।११) इति गतिशब्देन गन्तव्यत्वप्रतिपादनात्। अत्र च 'पुरुषान्न परं किंचित् (क० उ० १।३।११) इति वाक्येनेतरनिषेधपूर्वकमभेदप्रतिपादनात्।

अत्र च येष्वात्मत्वभ्रमसम्भावना[4] तेषामनात्मत्वव्युत्पादनपूर्वकमात्मनो ब्रह्माभेदव्युत्पादनमेव। अत एव

इन्द्रियेभ्यः परं मनो मनसस्सत्त्वमुत्तमम्
सत्त्वादधि महानात्मा महतोऽव्यक्तमुत्तमम्॥
अव्यक्तात्तु परः पुरुषो व्यापकोलिङ्गएव च।

(क० उ० २।३।७, ८) इति मन्त्रे[5] येऽर्था गृहीतास्तेषामात्मत्वभ्रमाभावात् 'इन्द्रियेभ्यः पराह्यर्थो' (क० उ० १।३।१०) इत्यत्र त्वर्थग्रहणं रूपकवाक्यनिर्दिष्टानां ग्रहणाय। एवञ्च सत्यव्यक्तपदं शरीरपरमित्येव स्वीकार्यम्। सर्वपरत्वव्युत्पादनपरत्वेप्यस्य वाक्यस्य न सर्वोत्कर्षसिद्धिः। इन्द्रियसमभिव्याहृतार्थशब्दस्येन्द्रिय विषयपरत्वेन भूतसूक्ष्मपरत्वाभावात्। बुद्धिशब्दस्याहङ्कारप्रतिपादकत्वाभावाच्च कथञ्चित्कल्पनं त्वस्माकं मतेऽपि तुल्यम्। परं प्रकृतानुगुण्यमित्येवं गुणो न चाव्यक्तशब्देन शरीर-ग्रहणन्न सम्भवति' योगरूढ़योरभावादिति वाच्यम्। अव्यक्ताज्ञानमूलत्वेन शरीरस्याव्यक्तशब्दनिर्देश्यत्वोपपतेः।

---

१. घ० मा० 'वाक्ये' इति पाठः।
२. घ० मा० 'विरण्णं' इति पाठः।
३. घ० मा० 'भावे मेह' इति पाठः।
४. घ० मा० 'येष्वन्मत्व' इति पाठः।
५. घ० मा० 'मन्त्रेर्थ' इति पाठ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न चाव्यक्ताभ्युपगमोऽपसिद्धान्त[1] इति वाच्यम्[2], ईश्वराधीनाया मूलाविद्याया-अवश्याभ्युपगन्तव्यत्वात्। अतोऽव्यक्तशब्देन शरीरमेव ग्राह्यम्।

किञ्चाग्निजोवपरमात्मनां 'स्वर्गे लोके न भयं किञ्चनास्ति' (क० उ० १।१।१२) येयं प्रेते[3] विचिकित्सा मनुष्ये' (क० उ० १।१।२०) अन्यत्र धर्मादन्यत्राधर्मात् (क० उ० १।२।१४१) इति वाक्यैः पृष्टत्वेन 'लोकादिमग्निं तमुवाच तस्मै (क० उ० १।१।१५) 'हन्त त इदं प्रवक्ष्यामि 'न जायते म्रियते वा कदाचित्[4] (क० उ० १।२।१८) इत्यादिवाक्यैस्त्रयाणामेवोक्तत्वेन प्रधानप्रसक्तेरत्राभावात्। न चास्मिन् 'वरान्वृणीष्वेति' (क० ३।१।१) वरत्रये दत्ते-अदत्तो वर चतुर्थो यथा पृच्छते एवमपृष्टमपि प्रधानं प्रतिपाद्यत इति किन्न स्यादिति वाच्यम्, परमात्मप्रश्नस्य[5] तृतीय एवान्तर्भावात्। अत एव 'तृतीये वरे पृष्टेऽन्यं वरं नचिकेतो वृणीष्वेत्या (क० उ० १।१।२१) दिना मृत्युनोच्चार्यमाणोऽपि नचिकेता 'नान्यो वरस्तुल्य एतस्य कश्चि'दिति[6] (क० उ० १।१।२२) तं वरन्न तत्याज। अतश्चास्यापि रक्ताय मयेदं कथं वक्तव्यमिति वैराग्यपरोक्षायै मृत्युर्नचिकेतसं प्रलोभयामास 'शतायुषः पुत्रपौत्रान्वृणीष्वेत्यादिना (क० उ० १।१।२३) नचिकेता तु 'स्वोभावा मर्त्यस्य यदन्तकैतदित्यादिना (क० उ० १।१।२६) स्वोयं वैराग्यं[7] प्रकटितवान्। ततो नचिकेतसं तुष्टाव मृत्युः तदनन्तरञ्चान्यत्रधर्मा (क० उ० १।२।१४ इति क्रियमाणः प्रश्नः पूर्वोक्तप्रश्न एव द्वितीयप्रश्नभूतस्य जोवाभिन्नब्रह्मविषयत्वमेवं सति सिद्धि भवति। देहातिरिक्तात्माविषयस्सो देहातिरिक्तात्मनः कर्म श्रद्धावशेनैवावगतत्वात्, अतः प्रधानं न पृष्टमिति नोत्तरे वक्तुं शक्यम्। परमात्मप्रकरणञ्चेदयुक्तयुक्तेस्तत्र न सांख्यीयस्य प्रधानस्य प्रसक्तिः। अतः शरीरमेव ग्राह्यमिति।

१. घ० मा० 'पगमे यसिद्धान्त' इति पाठः।

२. घ० मा० 'इति वाच्यम्' इति पाठो नास्ति।

३. घ० मा० तेते' इति पाठः।

४. घ० मा० 'वा दिवश्चि' इति पाठः।

५. घ० मा० 'परमात्मा प्रश्नस्य' इति पाठः।

६. घ० मा० 'किश्चित्' इति पाठः।

७. (क) दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यम् (यो० सू० १।१२)।

(ख) स्त्रियोन्नपानमैश्वर्यमिति दृष्टविषये वितृष्णस्य स्वर्गवैदेह्य प्रकृतिलयत्वप्राप्तावानुश्रविकविषये वितृष्णस्य दिव्यादिव्यविषयासंप्रयोगेऽपि चित्तस्य विषयदोषदर्शिनः प्रसंख्यानबलादनाभोगात्मिका हेयोपादेयशून्या वशीकारसञ्ज्ञा वैराग्यम्' इति (व्या० मा० १।१५, पृ० ४९)

(ग) मधुसूदनस्वामिनस्तु गीताविवरणे वैराग्यं विवरणयन्ति—'अत्र जगति किं सारं किमसारं वेति गुरुशास्त्राभ्यां ज्ञास्यामीत्युपयोगी यतमानसञ्ज्ञावैराग्यमिति' (गी० वि० ६।३५)।

(घ) वैराग्योऽयम् यतमानव्यतिरेकैकेन्द्रियवशीकारभेदाच्चतुर्धा तत्र च 'वितृष्णज्ञानपूर्वकं वैराग्यसाधनानुष्ठानं यतमानसंज्ञा, द्वितीयभूमिका व्यतिरेकसञ्ज्ञा, सा च जितान्येतानीन्द्रियाणि एतानि च जेतव्यानीति, व्यतिरेकावधारणयोग्यता, तृतीय भूमिका चैकेन्द्रियसञ्ज्ञा सा च बाह्येन्द्रियविषयेषु रागादिक्षये सत्येकस्मिन्नेव मनसि मानापमानादिविषयक रागद्वेषादिक्षयो रागद्वेषज्ञानपूर्वक इति। चतुर्थी भूमिका तु वशीकारसञ्ज्ञा स्पष्टैव' (यो०वा० १।१५, पृ० ५१)

(ङ) भामतीपतिस्तु—'रागादयः खलु कषायाश्चित्तवर्तिनस्तैरिन्द्रियाणि यथा स्वविषयेषु प्रवर्तन्ते, तन्मा प्रवर्तिषतेन्द्रियाणि तत्तद्विषयोक्षिति तत्परियाचनायारम्भः प्रयतनः यतमानसञ्ज्ञा। तदारम्भे सति केचित्कषायाः पक्वाः, पच्यन्ते, पक्ष्यन्ते च क्वचित्। तत्र पक्ष्यमाणेभ्यः पक्वानां व्यतिरेकावधारणं व्यतिरेकसञ्ज्ञा। इन्द्रियप्रवर्तनासमर्थतया पक्वानामौत्सुक्यमात्रेण मनसि व्यवस्थानमेकेन्द्रियसञ्ज्ञा। औत्सुक्यमात्रस्यापि निवृत्तिरूपस्थितेष्वपि दिव्यादिव्यविषयेषूपेक्षाबुद्धिः सञ्ज्ञात्रयात्परा वशीकारसञ्ज्ञा' (तत्त्व० वै० पृ० १।१५ पृ० ५०)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चमसाधिकरणम्

चमसपदविशेषात् ।।२।।

'अजामेकां[१] लोहितशुक्लकृष्णां बह्वीः प्रजाः[२] सृजमानां स्वरूपाः, अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्या (श्वे० उ० ४।५) इति श्वेताश्वतरास्समामनन्ति । तत्र संशयः । किमजशब्देन सांख्याभिमता मूलप्रकृतिर्ग्राह्या उत तेजोऽबन्नलक्षणा छान्दोग्योक्तेति । किं प्राप्तम् । सांख्याभिमता प्रकृतिरिति । कुतः

अजाशब्दस्य योगेन प्रवृत्तेस्तत्र सम्भवात् ।
तेजोऽबन्नादिरूपे तु योगरूढेरसम्भवात् ।।
जीवनानात्वलिङ्गाच्च सर्वकर्तृत्वबोधनात् ।
भोगापवर्गकर्तृत्वान्मूलप्रकृतिरिष्यताम् ।।

अजाशब्दस्य [३]पशुविशेषे रूढस्य छागेन मूलप्रकृतिबोधकतैवाङ्गीकार्या न 'तेजोऽबन्न' लक्षणा तत्राजाशब्दस्य योगरूढेरभावात् । लोहितशुक्लकृष्णत्वञ्च सत्त्वरजस्तमोगुणात्मकत्वात् प्रधाने-उपपद्यते, 'अजो ह्येको अजोन्य' इति जीवनानात्वं[४] सांख्येयमत[५] उपपद्यते, 'सृजमानाम्' (श्वे० उ० ४।५) इति सर्जनकर्तृत्वं तन्मते प्रकृतेः कर्तृत्वादुपपद्यते । भोगापवर्गपदत्वमपि प्रधानस्य स्वीकृतम् । अतः प्रधानमेव ग्राह्यमिति ।

सिद्धान्तस्तु
रूढेरसम्भवे तावल्लक्षणैवार्थबोधिका ।
योगात्प्रबलता तस्याः पूर्वतन्त्रे हि साधिता ।।
तेजोऽबन्नस्वरूपा च लक्ष्या (श्नोतत्व) हेतुता ।
कल्पना प्रायपाठाच्च ह्यनारूपत्वकल्पना ।।

प्रोद्गातॄणामित्यत्र हि पूर्वतन्त्र उद्गातृशब्दो रूढिपूर्वकः । लक्षणाया योगापेक्षया प्रबलया अप्सु ब्रह्मण्यानां त्रयाणां बोधक इत्युक्तम् । तेनैव न्यायेन[६] प्रकृतेरप्यजाशब्दस्य छागपरत्वासम्भवेन लक्षणाया एव स्वीकर्तुमुचितत्वात् । तत्र च लक्ष्याकाङ्क्षायां वैदिकत्वसामान्याल्लोहितशुक्लकृष्णत्वसाम्याच्च तेजोऽबन्नानामेव लक्ष्यत्वं कल्प्यते[७], ननु सांख्याभिमतप्रकृतेरप्रत्यासन्नत्वात्तस्यास्तेजोऽबन्नेष्वेवाजात्वकल्पनमुचितम्, 'द्वा सुपर्णो'

१. मन्त्रोऽयं परिमितव्यत्ययेन सांख्यकारिकाव्याख्यानावसरे मिश्रपादेनोद्धृतः ।
न जायत इत्यजा = जनिविकारविधुरा मूलकृतिः ।

२. प्ररूपेण व्यक्तरूपेण जायन्ते आविर्भवन्तीति प्रजा = महदादयो विकाराः, ताश्च प्रजाः सुखदुःखमोहात्मकत्वेनानेकविधा इति बह्वयश्च, ता अनेकविधाः प्रजाः सृजमानाम् = आविर्भावयन्तीम् अनेकविधविकाराकारेण परिणममानामित्यर्थः । (सां० कौ० वि० पृ० ३)

३. सर्वमविशेषेण पश्यतीति पशुः (दृशेः कु० सू०)

४. घ० मा० 'जीवकानात्वम्' इति पाठः ।

५. घ० मा० 'सांखिये मते' इति पाठः ।

६. घ० मा० 'स्यायेन' इति पाठः ।

७. घ० मा० 'कल्पेते' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(श्वे० उ० ४।५) इति कल्पनाप्रायपाठाज्जीवनानात्वोक्तिस्त्वौपाधिकजीवनानात्वमादाय, सृष्टिकर्तृत्वं भोगापवर्गकर्तृत्वञ्च[1] तत्रौपचारिकम् । त्यागोक्तिस्तु बाधायामिति । अतो न सांख्येयप्रकृतेर्ग्रहणमिति ।

संख्योपसंग्रहाधिकरणम्

न संख्योपसंग्रहादपि नानाभावादतिरेकाच्च ।।३।।

'यस्मिन् पञ्च पञ्चजना आकाशश्च प्रतितिष्ठति तमेवमन्य आत्मानं विद्वान् ब्रह्मामृतामृतम् (बृ० ४।४।१७) इति काण्वाः माध्यान्दिनाश्च समामनन्ति । तत्र सन्देहः । किमिह सांख्याभिमतानां तत्त्वानां पञ्चपञ्चजनाशब्दाभ्यां ग्रहणमुत (नेति) अत्र—

पञ्चविंशतितत्त्वानां योगाद्ग्रहणसम्भवः ।
रूढ्यर्थग्रहणे तावद्वाक्यं तात्पर्यवर्जितम् ।।
लक्ष्यार्थग्रहणे चापि स्यादाकाशपरिग्रहः ।
उत्कर्षप्रतिपत्यर्थस्तस्मात्सांख्यीयसङ्ग्रहः[2] ।।

पञ्चजनशब्दो हि मनुष्येषु रूढस्तेषां पञ्चानां ग्रहणे वाक्यं निस्तात्पर्यकं स्यात् । सर्वाधारत्वादात्मनः रूढिपूर्वकलक्षणया च प्राणादीनां ग्रहणेऽपि निस्तात्पर्यकत्वमविशिष्टम् । परन्तु वाक्यशेषे माध्यन्दीनानां 'प्राणस्य प्राणरुतः चक्षुषश्चक्षुरुतः श्रोतस्य श्रोतमुतान्नस्यान्न मनसो मनोविदुरिति प्राणादयः पञ्चकीर्त्या काण्वानां त्वन्नं नास्ति । अत्र[3] पूर्ववाक्योपपत्तौ ज्योतिषा पूरणं कर्तव्यम् । अतो वैरूप्यं स्यादतो योगेन पञ्चत्वविशिष्टे पुनः पञ्चत्वान्वये सति पञ्चविंशति संख्यालाभात्सांख्यविहितपदार्थानां लाभः । आकाशस्य पुनरुक्तिस्तूत्कर्षविवक्षया

१. अपवृज्यते = केवलीभवति मुच्यते येन विवेकज्ञानेन सोऽपवर्गः इति स्वामिबालरामोदासीनः (सां० त० कौ० पृ० ६)

२. सम् उपसर्गक चक्षिङ्ख्याय प्रकृत्यर्थानुगमपुरस्सरनिष्पन्नोऽयं सांख्यशब्दः । सम्यक् ख्यानं तावत्समीचीनविचारः । अत एव भारते

दोषाणाञ्च गुणानाञ्च प्रमाणं प्रविभागतः ।
कमप्यर्थमभिप्रेत्य सा संख्येत्युपधार्यताम् ।।

वस्तुतस्तु सदसद्विवेकिनी बुद्धिरेव संख्या, तयाऽऽलोचितं प्रकृतिपुरुषात्मकयथार्थज्ञानसाधनमेव सांख्यत्वेनाभिहितम् । अथवा

संख्यां प्रकुर्वते चैव प्रकृतिश्च प्रचक्षते ।
तत्त्वानि च चतुर्विंशत्तेन सांख्याः प्रकीर्तिता ।। (म० हा० १२।३०६।४३)

तच्च शाब्दिकप्रक्रियानुगुण्येन भूयस्त्वं संख्यानम्— 'संख्यायन्ते गण्यन्ते तत्वानि येन तत्सांख्यम् प्रकृतिपुरुषान्यथाख्यातिरूपोऽवबोध सम्यग्ज्ञाप्यते येन तत्सांख्यम् ।

३. ष० मा० 'अत्य' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'ब्राह्मणा आगताः वसिष्ठोऽप्यागत' इतिवन्नेया। अतस्सांख्याभिमतानां तत्त्वानां ग्रहणं, तेषां पञ्चविंशति

"मूलप्रकृतिरविकृतिर्महदाद्या[1] प्रकृतिविकृतय सप्तः।
षोडशकश्च विकारो न प्रकृतिर्न विकृतिःपुरुषः" इति कारिकासिद्धमिति।

प्राप्तेऽभिधीयते—

रूढेर्न सम्भवे नेह सांख्यीयग्रहणं यदि।
तन्त्रान्तरीयग्रहणं कुतो नेह भविष्यति॥
पञ्चसंख्या निवेशार्थं धर्मोऽपीह न दृश्यते।
अतिरेकस्य सं[2]द्भावात्तस्मात्प्राणादि गृह्यते॥

---

१. (क) सत्वरजतमसां साम्यावस्था प्रकृतिः, प्रकृतेर्महान्, महतोऽहङ्कारः, अहङ्कारात् पञ्चतन्मात्राण्युभयमिन्द्रियं, तन्मात्रेभ्यः स्थूलभूतानि, पुरुष इति पञ्चविंशतिर्गणः (सा० सू० १।६१) 'अकार्यावस्थोपलक्षितत्वे सति गुणसामान्यत्वं प्रकृतित्वम्' (सां० प्र० मा० पृ० ४०) पुराणेष्वपि प्रकृतेर्लक्षणमुपपादितम्—

प्रकृष्टवाचकः प्रश्च कृतिश्च सृष्टिवाचकः।
सृष्टौ प्रकृष्टा या देवी प्रकृतिः सा प्रकीर्तिता॥ ४॥
गुणे प्रकृष्टसत्त्वे च प्रशब्दो वर्तते श्रुतौ।
मध्ये रजसि कृश्च तिशब्दस्तमसि स्मृतः॥ ५॥
त्रिगुणात्मास्वरूपा या सर्वशक्तिसमन्विता।
प्रधानसृष्टिकरणे प्रकृतिस्तेन कथ्यते॥ ६॥
प्रथमे वर्तते प्रश्च कृतिश्च सृष्टिवाचकः।
सृष्टेराद्या च या देवी प्रकृति सा प्रकीर्तिता॥ ७॥

(ख) पद्यान्येतानि देवीभागवते (९।१।५, ६, ७, ८) तद्वदेव वर्तन्ते।

(ग) बालरामस्वामिनस्तु प्रकृतेः तटस्थलक्षणं शाब्दिकतरणिमाश्रित्येत्थमापादयन्ति 'तत्र प्रथमस्तटस्थलक्षणमाह प्रकृष्टवाचक इति। प्रापूरण इति धातोः पचाद्यचि निष्पन्नः प्रशब्दः, कृतिशब्दस्य व्यापारसामान्यार्थकत्वात् सृष्टिव्यापारार्थकत्वम्, तथा च प्रा प्रकृष्टा मुख्या कृतौ सृष्टौ या सा प्रकृतिरिति व्यधिकरणपदबहुव्रीहिकरणत्वे स्वार्थस्य लाभः पृषोदरादित्वात्प्राशब्दस्य ह्रस्वत्वम्। तथा च मुख्यत्वेन सृष्टित्वेन सृष्टिकर्त्री या सा प्रकृतिरित्यर्थः। स्वरूपलक्षणमाह—'गुणे सत्त्वे' इति प्रकृष्टे सत्त्वे गुणे प्रशब्दो वर्तते, व्युत्पत्तिस्तु पूर्ववदेव, मध्यमे रजसि मध्यमः कृशब्दो वर्तते मध्यमत्वसादृश्यात्, तमसि तमोगुणे चरमे ति शब्दो वर्तते चरमत्वादिसादृश्यादित्यर्थः। पदार्थमुक्त्वा विशिष्टार्थमाह—त्रिगुणात्मा निरतिशयावरणविक्षेपादिशक्तिरहिता गुणत्रयसाम्यावस्थात्मिका सृष्टिकरणे प्रधाना या सा प्रकृतिशब्देनोच्यत इति। तथा च प्रयुक्तः कृः प्रकृःसत्वेन गुणेन सहितो रजोगुणः, शाकपार्थिवादित्वात्संयुक्तपदलोपः, पुनः प्रयुक्तः तिः सत्त्वगुणरजोगुणेन युक्तः तिः तमोगुणो यस्यां वर्तत इति बहुव्रीहिणा गुणत्रयात्मिकेत्यर्थः। पृषोदरादित्वात्साधुः। देवीभागवतव्याख्यानां नीलकण्ठेन व्याख्यातम् (सां० त० कौ० पृ० ६८)।

२. ग० मा० 'प्रसंगाच्च' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वाक्यशेषस्य सद्भावान्निस्तात्पर्यकता नहि[1][2]।
ब्रह्मक्षत्रादिवद्यत्र[3] लक्षणार्थं भविष्यति ॥

पञ्चजनशब्दो[4] 'दिक्संख्ये सञ्ज्ञायाम्[5]' (अ० २।१।५०) इति समासविधानात्पुरुषेषु रूढः, भाषिकस्वरेण चान्तानुदात्तस्वरत्वेन[6] च समस्तपदं, तत्र रूढ्यर्थ[7]ग्रहणनिस्तात्पर्यकत्वाद्योगादेर्ग्राह्यं[8], सांख्याभिमततत्त्वग्रहणे किमिति शैवाभिमतानां तत्त्वानां ग्रहणं भवेत्। तेषामपि च[9] हीमानि पञ्चविंशति तत्त्वानि तुल्यानि। परन्त्वाकाशविच्छक्तिरूपोपाधिकस्तदधिष्ठानभूतः[10] शिवश्चेति। अयं मन्त्रः तेषामपि सम्यगेवोपपद्यते। यदि[11] च सांख्यानामपि प्रधानं त्रिधा भित्वा पञ्चविंशतित्वं सम्पद्यते[12] चेच्छैवतन्त्रेण सह विनिगमनाविरहस्तुल्य एव। परन्त्ववच्छेदकधर्मलाभः। तदर्थं प्रधानस्यैकीकरणेऽतिरेकात्माकाशयोस्स्यादतो[13] रूढ़िपूर्वकलक्षणया वाक्यशेषप्रसिद्धानां प्राणादीनां ग्रहणं, तत्र माध्यन्दिनानामनेन सह पञ्चविंशतित्वं काण्वानां तु ज्योतिषा सहेति न काप्यनुपपत्तिः। एकस्यापि मन्त्रस्य विनियोगभेदेन[14] नानार्थत्वस्याप्यविरोधात्। न च निस्तात्पर्यकता प्राणादीनामितरोपलक्षणत्वसम्भवात्, 'यस्य ब्रह्म च क्षत्रम्' (क० उ० १।२।२५) इति मन्त्रे ब्रह्मक्षत्रग्रहणवत्। अतो न सांख्याभिमततत्त्वग्रहणमिति।

कारणत्वाधिकरणम्

कारणत्वेन चाकाशादिषु यथा व्यपदिष्टोक्तेः ॥४॥

एवं[15] श्रुतीनां ब्रह्मणि समन्वये व्युत्पादिते स एव नोपपद्यत इत्याक्षिप्यते। किं वेदान्तवाक्यानि ब्रह्म प्रतिपादयन्त्युत नेति। तदर्थञ्च किं विरोधोऽस्ति नेति विशये।

१. ग० मा० 'वाक्यशेषबलात्तस्य' इति पाठः।
२. ग० मा० 'न च' इति पाठः।
३. ग० मा० 'ब्रह्मक्षत्रादिवद्यस्मात्' इति पाठः।
 घ० मा० 'वध्यत्र' इति पाठः।
४. ग० मा० 'पञ्चजन' इति पाठो नास्ति।
५ ग० मा 'दिक्संख्ये' इति सूत्रं नास्ति।
६. ग० मा० 'स्वरत्वेन' इति पाठो नास्ति।
७. घ० मा० 'यद्यर्थं' इति पाठः।
८. घ० मा० 'त्वायत्यायोगादेः' इति पाठः।
९. ग० मा० 'च' इति पाठो नास्ति।
१०. घ० मा० 'परन्तु काचिच्छावित' इति पाठः।
११. घ० मा० 'पदे च' इति पाठः।
१२. ग० मा० 'उपपाद्यते' इति पाठः।
१३. ग० मा० 'अतिरेकात्माकाशयोः' इति पाठः।
१४. विनियोगो नाम सम्बन्धः, स च सम्बन्धिद्वयाधीनः सम्बन्धिद्वयप्रतिपत्तिपूर्वकः। स च समभिव्याहाररूपाद्वाक्यादेव भवति (न्या० र० मा० भू० पृ० ८१)।
१५. ग० मा० अत्र ब्रह्मणस्सकलजगत्कारणत्वेन विरोधो नास्ति। कुतः 'आत्मन आकाश सम्भूत' (तै० उ० २।१) इत्यादिवाक्यैराकाशादिषु यथाभूतेश्वरः कारणत्वेन व्यपदिष्ट एतस्मिन् वाक्ये, तथाभूतस्यैवेश्वरस्य व्यपदिष्टस्यापरस्मिन् वाक्येऽपि 'स इमांल्लोकानसृजत' (ऐ० आ० ४।१।२) त्यादौ कारणत्वोक्तेः, अभिधानाच्च शब्दादसतः कारणत्वशङ्कानिरास इत्युक्तम्।' इत्यधिकः पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूर्वःपक्षः

क्रमाक्रमव्युत्क्रमैर्हि विरुद्धं कार्य्यमुच्यते ।
कारणञ्चापि सत्त्वेन ह्यसत्त्वेन च वर्ण्यते ॥
स्वकारणकता चापि क्वचिद्वाक्ये प्रतीयते ।
अतो वाक्यानि न ब्रह्म प्रतिपत्तिक्षमाणि हिं ॥

क्वचिद्धि 'तस्माद्वा एतस्मात्' (तै० उ० २।१) इत्यादिना-आकाशादिका सृष्टिराम्नायते । क्वचित्तेज आदिका 'तत्तेजोऽसृजते' (छा० ६।२।३) । इति क्वाचित्प्राणादिका 'एतस्माज्जायते प्राणः' (कै० उ० १।१५) इति । क्वचिद्क्रमेण सृष्टिराम्नायते । 'इत्यस्माल्लोकानसृजत' (ऐ० ब्रा० २।४।१।२) इति । अतः[2] कार्यस्य विरुद्धत्वात् कारणैकरूपं प्रतिपत्तुमशक्यम् । कारणेऽपि[3] च विगानं दृश्यते 'असद्वा इदमग्र आसीत्' (तै० उ० २।७) 'ततो वै सदजायत' सतः कारणत्वम्[4] 'सदेव सौम्येदमग्र आसीत्' (छा० ६।२।१) इति सतस्तं तर्ह्यव्याकृता-सोत्तन्नामरूपाभ्यामेव व्याक्रियते (बृ० दा० १।४।७) इति कार्यकर्तृकैव व्याक्रियोक्ता । अतो विरोधे ब्रह्मकारणत्वप्रतिपादनाक्षमत्वात्तदध्ययनमदृष्टार्थमेव तत्कारणत्वमस्मदेव[5] भविष्यतीति प्राप्ते सिद्धान्तः

कार्यविरोध दृष्टर्या[6] हि कारणं नैव दुष्यति ।
कारणे तु विरोधोऽत्र न मनागपि विद्यते ॥

कार्ये तत्क्रमे च न विरोध इति वियत्प्राणादयः स्पष्टं भविष्यति । सत्यपि कार्यविरोधेन कारणस्य प्रतिपित्तिः, कार्ये तात्पर्थभावात्फलवत्प्रज्ञातेऽर्थे वेदस्य तात्पर्यात् कारणेऽपि न विरोधः, 'असद्वा इदमग्रआसीत् (तै०उ० २।७) इत्यत्रासीतपदसामानाधिकरण्येनासत्पदस्यानभिव्यक्तनामरूपार्थकत्वान्नामरूपाभ्यामेव व्याक्रियत (बृ० दा० १।४।७) इत्यत्रापि कर्मणि लकारेण कर्तुराक्षेपे सत्यात्मन[7] एव कर्तृत्वपर्यवसानात् । अतो विरोधाभावाद्वेदान्तानां ब्रह्मप्रतिपादकत्वमुपपन्नमिति ।

बालाक्यधिकरणम्

जगद्वाचित्वात् ॥५॥

कौषीतकिब्राह्मणे बालाक्यजातशत्रुसम्वादे उपाख्यायते गार्ग्यबालाकिरजातशत्रुराजानमुपेत्य 'ब्रह्म ते ब्रह्मवाणीत्युवाच' (कौ० ब्रा० उ० ४।१) राजा तु[8] 'सहस्रमस्यां वाचि दद्म' (कौ० ब्रा० उ० ४।१)

१. ग० मा० 'वेदान्तवाक्यानां न ब्रह्मपरता भवेत्' इति पाठः ।
२. ग० मा० 'एवं' इति पाठः ।
३. घ० मा० 'कारणेऽपि च विधानं दृश्यते' इति पाठः ।
४. ग० मा० 'उक्तम्' इति पाठः ।
५. ग० मा० 'तत्कारणत्वम्' इति पाठो नास्ति ।
६. ग० मा० 'सत्वेन' इति पाठः ।
घ० मा० 'विरोध दृष्टया' इति पाठः ।
७. ग० मा० 'चिदात्मन एव' इति पाठः ।
८. ग० मा० 'च' इत्यधिकः पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्युवाच । ततो ब्राह्मणेनादित्यादयः केचन पुरुषा उपक्षिप्ताः । ते च राज्ञा सगुणं प्रतिपादिता । तदनन्तरञ्च 'मृषा वै खलु मा संवरिष्ठा' इति राज्ञा प्रतिपाद्य 'यो वै बालाक एतेषां पुरुषाणां कर्ता यस्य वैतत्कर्म स वै वेदितव्य' इत्युक्तम्[1] ततो बालाकस्तत्रैव शिष्यभावं गते[2] पुनर्वुबोधयिषया[3] सुप्तपुरुषं गत्वा ब्रह्मन्[4] पाण्डरवासस्सोम राजन्नित्यामन्त्रणे कृते-आमन्त्रणश्रवणेन सुप्तपुरुषस्य प्राणव्यतिरिक्तत्वं व्युत्पाद्य 'क्वैष एतद्' बालकेऽपि पृष्ठवति 'क्वैष तदाभूत्कुत एतदागात्' (कौ० ब्रा० उ० ४।१९) इति राजा पृष्टे तेन चाज्ञातेन-उद्भाविलेऽजातशत्रूणां 'यदा सुप्तस्वप्नन्न कञ्चन पश्यत्यस्वस्मिन्प्राण एवैकधा भवति तदेनं वास वै नामभिः सहाप्ययेति (कौ० ब्रा० उ० ४।१९) इन्द्रियलयं व्युत्पाद्य 'एतस्मादात्मनः सर्वे प्राणा यथायतनं प्रतिष्ठन्त' इत्युक्त्वोपसंहृतम् 'एवं विद्वान् सर्वान् पाप्मनापहृत्य सर्वेषां भूतानां श्रेष्ठमाधिपत्यं[5] स्वाराज्यं पर्येति' (कौ० ब्रा० उ० ४।२०) न[6] तत्र स वै वेदितव्य' 'इत्यत्र वेदितव्यत्वेन श्रुतः प्राणो' वा हिरण्यगर्भो वा जीवसामान्यं वा परमात्मा वेति सन्देहः । तत्र पूर्वःपक्षः

कर्मशब्द परिस्पन्दे रूढत्वेनेह[7] तद्वतः ।
प्राणस्य ग्रहणं न्याय्यन्न जीवादेरसम्भवात् ॥

कर्मशब्दो हि परिस्पन्दात्मके कर्मणि रूढः । अतस्तद्वतः[8] प्राणस्यैव ग्रहणन्न्यायम् । न[9] तु जीवादेतेषु परिस्पन्दासम्भवादित्येक पक्षः ।

आदित्यपुरुषादीनां कर्तृत्वन्नैव सम्भवि ।
हिरण्यगर्भ एवातो ग्राह्यस्तत्रेति[10] संस्थितिः ॥

द्वितीयपूर्वपक्षवादीत्वादित्यपुरुषकर्तृत्वस्य मुख्यप्राणे[11] सम्भवाद्धिरण्यगर्भ एव ग्राह्यः । तस्मिञ्च स्पन्दत्वमभिमान्यभिमानिनोरभेदविवक्षया[12] योज्यम् । प्राणशब्दोऽप्येवमेव नेय इत्याह । जीवसामान्यपूर्वपक्षवादी तु—

कर्मशब्दो ह्यदृष्टस्य वाचकस्तेन तद्वतः ।
जीवस्य ग्रहणन्याय्यं सुप्तस्याग्रेव दर्शनात्[13] ॥

---

१. ग० मा० 'प्रतिपादितम्' इति पाठः ।
२. घ० मा० 'गते पुनः' इति पाठः ।
३. ग० मा० 'वरम' इति पाठः ।
४. घ० मा० बृहन्या दुःखासने सेम राजन्निति' इति पाठः ।
५. घ० मा० 'यष्ठमाधिपत्यम्' इति पाठः ।
६. ग० मा० 'न' इति पाठो नास्ति ।
७. ग० मा० 'तेनेह' इति पाठः ।
८. ग० मा० 'गतसाद्वत एव ग्रहणं न्याय्यम्' इति पाठः ।
९. ग० मा० 'जीवहिरण्यगर्भपरमात्मानाम्' इति पाठः ।
१०. ग० मा० 'संग्राह्यस्तत्र तत्स्थिते' इति पाठ :
११. ग० मा० 'आदित्यादिपुरुषः कृर्तृत्वासम्भवात्' इति पाठः ।
१२. ग० मा० 'परिपन्दत्वम्' इति पाठः ।
१३. ग० मा० 'बोधनात्' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कर्मशब्दो हि धर्माधर्मयोरपि रूढः 'पुण्यो वै पुण्येन कर्मणा' इत्यादौ पुण्यशब्दसामानाधिकरण्येन कर्मशब्दस्य तत्रापि शक्तेःकल्पनादादित्यादिपुरुषकर्तृत्वञ्च धर्माधर्मद्वारा जीवस्याप्युपपद्यते। एतदर्थमेव धर्माधर्मकीर्तनमन्यथा[२] परिस्पन्दकीर्तनस्य वैफल्यापत्तेः। किञ्चात्र[३] सुप्तस्य जीवस्य व्युत्पादनं तस्योपास्यत्वे[४] घटते। अन्यथा[५] व्युत्पादनं व्यर्थं स्यात्। न च 'क्रियते' इति कर्मेति व्युत्पत्त्या कर्मशब्द कार्यमात्रपरः। एतच्छब्दे 'यतो वा इमानि भूतानि जायन्ते' (तै० उ० ३।१) इत्यत्रेदंशब्द इव सकलंजगत्पूर्वकं 'यस्येति च' (अ० ६।४।१४८) कर्तरि षष्ठी तथा च जगद्यत्कर्तृकं कार्यं 'स वेदितव्य' (कौ० त० ब्रा० ४।१९) इति वाक्यार्थपर्यवसाने परमात्मैव स्वीकार्यं इति वाच्यम्। रूढिर्योगमपहरतीति न्यायेन रूढ्यर्थग्रहणेन योगार्थस्य ग्रहीतुमशक्यात्वादेतेषाञ्च पुरुषाणां कर्तृत्वस्य वैयर्थ्यात्सुप्तपुरुषगमनवैयर्थ्याच्च। न च सुप्तपुरुषगमनं तदाश्रयब्रह्मप्रतिपत्त्यर्थम्। अत एव सुप्तपुरुषाश्रयः प्रश्नः[८]। अन्यथा तस्य वैयर्थ्यमेव स्यादिति वाच्यम्। सुप्तजीवस्योपास्यत्वलाभाय[९] तत्प्रश्नोपपत्तेः। स्वापे सुप्तपुरुषो हितासु नाडिषु स्थित इत्युक्त्या दहरविद्या वाक्यगतपापास्पर्शस्य बुद्धिस्थत्वेन तस्योपास्यत्वापत्तेः[१०]।

द्वितीयप्रश्नोऽपीन्द्रियजातं क्व लीनमित्यभिप्रायकस्तस्योत्तरमथास्मिन्प्राण एव तदा भवति, तदेनं वाक् सर्वैर्नामभिरित्यादीनां[११] सर्वेन्द्रियलयाधिकरणत्वञ्जीवस्योक्तम्। अत्र च प्राणशब्दो जीवपरः, 'सम्प्रासन्नैव[१२] प्राणो नाम भवतीति श्रुतेः।

तृतीयप्रश्न-इन्द्रियाणामुत्पत्तिविषयकः कुत उत्प्लवन्तीन्द्रियाणीति[१३]। तस्य चोत्तरं यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्तीत्यादिना[१४] प्रतिपादितम्। अतो जीव एवेह ग्राह्यः। न च 'ब्रह्म ते ब्रवाणी' त्युपक्रमान्मोक्षजनकज्ञानविषयत्वोपसंहाराच्च ब्रह्मैव ग्राह्यमिति वाच्यम्। उपक्रमस्य मृषावादिबालाकिवाक्यत्वान्मोक्षजनकज्ञानविषयत्वस्य च ब्रह्मणोऽन्यत्रापि सम्भवादित्याक्षेप प्रवृत्तेः। अतो जीव[१५] एवेह प्रतिपत्तव्य इत्याह।

---

१. ग० मा० 'भवतीत्यादौ' इति पाठः।
२. ग० मा० 'अत्र' इति पाठो नास्ति।
३. ग० मा० 'उतरत्र' इति पाठः।
४. घ० मा० 'जीवस्योपासत्वे' इति पाठः।
५. ग० मा० 'तत् व्युत्पादनं व्यर्थमेव स्यात्' इति पाठः।
६. ग० मा० 'वैदितव्य फलमिति वाच्यम्' इति पाठः।
७. घ० मा० 'सुप्तपुरुषोषमन' इति पाठः।
८. ग० मा० 'वर्वषः' इति पाठः।
९. ग० मा० 'गद्गमनतदाश्रयप्रश्नयोः' इति पाठः।
१०. ग० मा० 'तस्योपास्यभानात्' इति पाठः।
११. घ० मा० 'रित्याना' इति पाठः।
१२. ग० मा० 'स प्राणन्नेव' इति पाठः :
१३. ग० मा० 'उद्भवन्ति' इति पाठः।
१४. ग० मा० 'व्युच्चरन्ति' इति पाठो नास्ति।
१५. घ० मा० 'जीवोह' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सिद्धान्तस्तु

प्रक्रमे ब्रह्मशब्दस्य श्रवणादुपसंहृते[1]।
मुक्तिकारणविज्ञानविषयत्वस्य[2] कीर्तनात् ॥
कर्मशब्देन जगतः कार्यता बोधनादपि।
सुप्तजोवस्य गमनमाधारं ब्रह्मसिद्धये ॥

'ब्रह्म ते ब्रवाणी' त्युपक्रमेण मोक्षजनकज्ञानविषयत्वोपसंहारेण च ब्रह्मण[3] एव ग्रहणं निश्चीयते। न च मृषावादिबालाकिवाक्यत्वादिदन्न[4] निर्णायकमिति वाच्यम्। अजातशत्रुणा हि 'मृषा वै खलु मा सम्वदिष्ठाः' इत्यादिना तस्य मृषावादित्वकीर्तनत्वस्य ब्रह्म वक्तृतायाः[5] प्रतिपादनात्। न च सोऽपि ब्रह्म न जानाति 'सहस्रं मे तस्यां वाचि दद्याम्' (कौ० ब्रा० उ० ४।१) इति सहस्रदानप्रतिपादनादिति[6] वाच्यम्। संवादकरणाय पुरुषान्तरलाभयुक्तवारितोषिकदानोपपत्तेः। अजातशत्रुवाक्यसन्दर्भे च[7] कर्मशब्दस्य योगेन कार्यवाचकत्वमभ्युपगम्य 'यो वै बालाक' (कौ० ब्रा० उ ४।१९) इति वाक्यस्य [8]परमात्मपरत्वस्यावश्यक्तव्यत्वात्। न च रूढिर्योगमपहरतीति न्यायेन योगार्थस्य त्यागः स्पन्दपदस्य[9] धर्माधर्मेषु योगेनैवोपपत्तौ 'प्रोक्षणी न्यायेन' रूढ़ेरकल्पनात्। रूढ़िकल्पनेऽपि वा रुढ्योः परस्परं कलहानामुन्मेषे[10] सति प्रतिबन्धकाभावेन योग एवात्मानं[11] लभते। न चैतेषां[12]-पुरुषो मामित्यस्य वैयर्थ्ये गौबलिबर्दन्यायेनोपपत्तेः। जीवमुख्यप्राणब्रह्मग्रहणमस्त्विति[13] शङ्का तु प्रतर्दनाधिकरण एव निराकृता। सुप्तपुरुषगमनन्तु तदाश्रयब्रह्मप्रतिपत्त्यर्थम्। अत एव 'क्वैस एत ह बालाके' शपिष्ट (कौ ब्रा० उ० ४।१९) इत्यादिप्रश्नः।

---

१. घ० ग० मा० 'अवस्मा' इति पाठः।
२. ग० मा० मुक्तिद ज्ञानकर्मत्व कीर्तनस्य च दर्शनात्' इति पाठः।
३. ग० मा० 'ब्रह्मविषयमेव वेदितव्यत्ववचनम्' इति पाठः।
४. ग० मा० 'उपक्रमणम्' इति पाठः।
५. ग० मा० 'प्रतिज्ञानात्' इति पाठः।
६. ग० मा० 'परितोषतस्तदुपपत्तेः' इति पाठः।
घ० मा० 'पारितोषिक' इति पाठः।
७. घ० मा० 'च' इति पाठो नास्ति।
८. ग० मा० 'अवश्य' इति पाडी नास्ति।
९ घ० मा० 'पदस्य' इति पाठो नास्ति।
१०. ग० मा० 'अनुन्मेपे सति' इति पाठः।
११. ग० मा० 'लब्धात्मकत्वाञ्च' इति पाठः।
१२. ग० मा० 'मित्यस्य' इति पाठः।
१३. ग० मा० 'मास्त्विति' पाठो नास्ति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्र प्रथमः प्रश्नः जीवस्य पापास्पर्शप्रतिपादनाय न भवति, तस्योत्तरत्र प्रतिपादनात्। नाज्यधारत्वोक्त्या[1] च छन्दोगशाखोक्तपापस्पर्शप्रतीतौ[2] च नाज्याधाराकीर्तनमपि[3] विफलमेव स्यादेतदनुसारेण प्रथमप्रश्नोत्तरं 'अथास्मिन् प्राण एव एकधा भवति' (कौ० ब्रा० उ० ४।१९) इत्येव मतम्।

द्वितीयप्रश्नस्तु नेन्द्रियाणामाश्रयविषयः कोऽत्र वाक्येऽनुक्तेः पूर्वाक्येऽ प्रस्तुतत्वाच्च। अतो जीवः स्वापप्रबोधानन्तरमाप्रबोधत्वाभवत्किमात्मको [4]भवत्प्रश्नाभिप्राय-उत्तरमपीन्द्रियाणामुपरतत्वेन ब्रह्मात्मकमभवदित्येवमभिप्रायकम्'[5] तदेनं वाक् सर्वैर्नामाभिस्सहाप्येति (कौ० ब्रा० उ० ४।१९) इत्यादितृतीयप्रश्नेऽपि ब्रह्मणा सहैव[6] तावन्तं कालमेकताङ्गतस्य जीवस्य [7]मुक्तवत्सत् पुनरुत्थानं न स्यादित्यभिप्रायेणोत्तरमप्युक्तवन्मूलाज्ञानलयाभावेन पुनः प्राणादीनामुत्पत्त्या पुनरुत्थानोपपत्तेः। अतस्सर्वमिदं प्रकरणं ब्रह्मपरमेवेति सिद्धम्।

वाक्यान्वयाधिकरणम्

वाक्यान्वयात् ॥६॥

बृहदारण्यके 'अथ ह याज्ञवल्क्यस्य द्वे भार्ये बभूवतुः (बृ० ४।५।१) इत्युपक्रम्य[8] 'न बारै पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवति' आत्मनस्तु प्रियो भवति (बृ० ४।५।६) इत्यादिना-आत्मनस्सर्वप्रियत्वं व्युत्पाद्य 'आत्मा बारे द्रष्टव्य श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' (बृ० ४।५।६) इत्यादिना द्रष्टव्यत्वं प्रतिपाद्यं 'ब्रह्म तं परादाद् (बृ० ४।५।७) इत्यादिना स्तुतिकाले[9] सर्वप्रपञ्चस्य तत्रैव स्थितं व्युत्पाद्य

---

१. ग० मा० 'नारमाधारत्वोक्त्याच' इति पाठः।

२. घा० मा० 'प्रतिज्ञा च' इति पाठः।

३. घ० मा० 'नामधारत्व' इति पाठः।

४. घ० मा० 'भवदिव्यभिप्रायक' इति पाठः।

५. ग० मा० 'मभवादित्य' इत्यन्तः पाठो नास्ति।

६. ग० मा० 'सहैकतां गतस्य जीवस्य' इति पाठः

७. घ० मा० पुनरुध्याननस्या' इति पाठः।

८. ननु मैत्रेयीब्राह्मणोपक्रमे याज्ञवल्क्येन गार्हस्थ्याश्रमादुत्तमाश्रमं यियासता मैत्रेय्या भर्यायाः कात्यायन्या सहार्थसंविभागकरण उक्ते मैत्रेयी याज्ञवल्क्यं पतिममृतत्वार्थिनी पप्रच्छ, 'यन्नु म इयं भगोः सर्वा पृथिवी वित्तेन पूर्णास्यात्किमहं तेनामृता स्यामुत नेति। तत्र नेति होवाच याज्ञवल्क्यः। यथैवोपकरणवतां जीवतं तथैव ते जीवितस्यादमृतत्वस्य तु नाशास्ति वित्तेन। एवं वित्तेनामृतत्वाशा भवेद्यति वित्तसाध्यानि कर्माण्यमृतत्वे उपयुज्येरन्। तदेव तु नास्ति, ज्ञानसाध्यत्वादमृतत्वस्य कर्मणाञ्च ज्ञानविरोधिनां तत्सहभाविल्वानुपत्तेरिति, भावः। सा होवाच मैत्रेयी 'येनाहं नामृता स्यां किमहं तेन कुर्यां यदेव भगवन् वेद तदेव मे ब्रूहि' अमृतत्वसाधनमिति शेषः। तत्रामृतत्वसाधनज्ञानोपन्यासाय वैराग्यपूर्वकत्वात्तस्य रागविषयेषु तेषु तेषु पतिजायादिषु बैराग्यमुत्पादयितुं याज्ञवल्क्यो 'न वारे पत्युः कामाय' इत्यादिवाक्यसन्दर्भमुवाच। (भामती १।४।१९ पृ० ५००)।

मैत्रेयीब्राह्मणे निर्देशादानावौपाधिको भेदो वास्तवमैक्यमित्याह वाक्येति। विषयवाक्यमादत्ते बृहदिति। आत्मशेषत्वेन पत्यादेस्सर्वस्य प्रियत्वादनन्यार्थतया निरुपाधिप्रियत्वेनानतिशयानन्दस्यात्मनो ज्ञापकत्वं मत्वाऽऽह 'न वेति (आ० गि० पृ० ५००)

९. ग० मा० 'स्थितिकाले' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यथाग्नेयो[1]ऽग्नेरित्यादिना सर्वस्य प्रपञ्चस्य तस्मादेवोत्पत्तिं प्रतिपाद्य-एकायनप्रक्रियया लयोऽपि[2] प्रतिपादितः। तत्रैव तदनन्तरञ्चेदं 'महत् स्थूलमनन्तमपारं प्रज्ञानघन एवैतेभ्यः' (बृ० ४।५।१३) 'इत्यादिना तस्यैवोत्पत्तिविनाशौ प्रतिपादितौ। उपसंहारे च 'विज्ञातारमरे केन विजानीयात्' (बृ० ४।५।१५) इत्यादिविज्ञातृत्वमुपसंहृत्य 'एतावदरे खल्वमृतत्वम्' (बृ० ४।५।१५) इति तत्र विचार्यते। किमिहोच्यमान आत्मा जीव उत परमात्मेति।

तत्र पूर्वपक्षः

प्रियादियोगाज्जीवस्य द्रष्टव्यत्वादि सिध्यति।
विनाशोत्पत्तियोगाच्च विज्ञातृत्वश्रुतेरपि॥

मैत्रेयीब्राह्मणञ्जीवपरमेव स्वीकार्यम् 'न वारे प्रत्युःकामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवति' (बृ० ४।५।६) इत्यादिना पत्यादिविषयकप्रीतिमत्त्वस्यात्मनि प्रतिपादनेन तस्य च जीव एव सम्भवात्। न चायमात्मशब्दो[3] जोवेश्वरसाधारण्याद्ब्रह्मपरस्तथाचायमर्थः। पतिर्जाया इति[4] विषयो भवतोति यत्तन्न पत्युः[5] कामाय अपि तर्ह्यस्यायं प्रियो भवत्वितीश्वरेच्छार्थमत्रेदं वाक्यमीश्वरपरमेवेति वाच्यम्। जीवेश्वरसाधारणस्याप्यात्मशब्दस्य पत्यादिसमभिव्याहारेण जीवपरत्वस्यैव वक्तव्यत्वात्तथैव लोकव्युत्पत्तेः। 'वै' शब्दबलेनास्यार्थस्य प्रतिसिद्धत्वोक्त्या। मैत्रेय्याः प्रतसिद्धस्यैवार्थस्य वक्तव्यत्वेन तस्याश्चेश्वरेच्छा परत्वस्या-प्रसिद्धत्वाच्च। न च प्रियादिमते[6] आत्मत्वेप्यात्मा वारे द्रष्टव्य (बृ० ४।५।६) इति वाक्यस्थात्मपदमीश्वरपर-मस्तु। यत आत्मा सर्व प्रियतमोऽतस्तस्येष्टसाधनश्रवणादिकर्तव्यमित्यर्थस्वीक्रियतामिति वाच्यम्। प्रक्रमगतस्यै वात्मन इह प्रत्यभिज्ञानात्। न' चात्मनो वारे दर्शनेन श्रवणेनेत्यादिना—आत्मज्ञानेन सर्वज्ञानप्रतिपादनात्तदनु-सारेण प्राचीनात्मशब्दोऽपि ब्रह्मपरोऽस्त्विति वाच्यम्। उपक्रमस्वारस्यानुसारेण जोवपरत्वेऽवगते[7] उपसंहारस्यैक-विज्ञानसम्बन्धिसर्वविज्ञान[8] प्रतिपादनायान्यथा नेयत्वात्। तस्मादुपक्रमानुसारेण जीव एव ग्राह्यः। किञ्चेदं महद्भूतमनन्तमपारं[9] 'विज्ञानघन एवं तेभ्यो भूतेभ्यस्समुत्थाय तान्येवानुविनश्यति' बृ० २।४।१२) औपाधिक[10] उत्पत्तिविनाशौ सन्निहितबोधकेदंशब्दपरामृष्टात्मनि प्रतिपाद्यमानौ तस्य जीवताङ्गमयतः 'बिज्ञातारमरे केन विजानीयत् (बृ० ४।५।१५) इत्युपसंसारेऽपि विज्ञातृत्वजीवलिङ्ग दृश्यते। न च विज्ञातृत्वं नाम[11] विशेषज्ञातृत्वं, तच्च सर्वज्ञत्वरूपमेवेति न जीवलिङ्गमिति वाच्यम्। विज्ञानशब्दस्यान्तःकरणवृत्तिविशेषरूपत्वात्तद्ग्रहणस्यैव[12]

---

१. घ० मा० 'यथामेरित्यादिना' इति पाठः।
२. ग० मा० 'तस्य तत्रैव' इति पाठः।
३. ग० मा० 'परमात्मपरः' इति पाठः।
४. ग० मा० 'प्रीतिविषयः' इति पाठः।
५. घ० मा० 'पत्नन्नपत्फुः' इति पाठः।
६. ग० मा० 'प्रियादिमदात्मनस्संसारित्वेऽपि इति पाठः।
७. ग० मा० 'सत्युप' इति पाठः।
८. घ० मा० 'पादनाया' इति पाठः।
९. घ० मा० 'महदमूततमनपारम्' इति पाठः।
१०. ग० मा० 'औपाधिकाबुत्पत्तिविनाशो' इति पाठः।
११. घ० मा० 'नाम' पाठो नास्ति।
१२. ग० मा० 'रूढत्वेन' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्याय्यत्वात् । न च जीवब्रह्मणोरभेदमभ्युपगम्यैक-एकविज्ञानेन सर्वविज्ञानप्रतिज्ञानञ्जीवधर्माश्चेति द्वयं योज्यमिति वाच्यम् । अत्यन्ताभेदे 'तत्त्वमसि' (छा० ६।११।३) इत्यादिवाक्यैरुद्देश्यविधेयभेदाभावे नैक्यस्यावबोधयितुमशक्यत्वात् । न च 'येनाहं नानृता स्यां किमहं तेन कुर्यां यदेव भगवन् वेद तदेव मे ब्रूहीति' (बृ० ४।५।४) 'एतावदरे खल्वमृतत्वम्' (बृ० ४।५।१५) इत्युपक्रमोपसंहरयोर्मोक्षसाधनीभूतज्ञानविषयत्वस्य 'अस्य महतो भूतस्य निश्वसितमेत्' (बृ० ४।५।११) इति वाक्येन जगत्कारणत्वस्य चात्मनि प्रतिपादनात्परमात्मापरत्वमेवास्य प्रकरणस्य स्वीकार्यमिति वाच्यम् । अस्य पूर्वपक्षिणो जीवज्ञानमेव मोक्षसाधनमित्यभिमानात् । जगत्कारणत्वमपि तस्यैवेति च । अतो जीव एवेह ग्राह्य इति ।

सिद्धान्तस्तु

आत्मज्ञानेन सर्वस्य ज्ञातृत्वप्रतिपादनात्[1] ।
तज्ज्ञानान्मुक्तिलाभाच्च[2] जगदुत्पत्तिहेतुतः ॥
परात्मैवेह विज्ञेयो जीवाभेदविवक्षया ।
जीवधर्मास्तु कीर्त्यन्ते नातः किञ्चिद्विरुध्यते ॥

मैत्रेयीब्राह्मणं हि परमात्मपरमम् 'आत्मनो वारे दर्शनेन श्रवणनेत्यादिना' आत्मज्ञानेन सर्वस्य ज्ञातत्वोक्तेः । न च तद्गौणमग्रे तदुपपादनेन तत्र तात्पर्यावगमात् । तथा हि 'ब्रह्म तं परादाद्योऽमन्यात्मनो ब्रह्म वेद क्षत्रं तं परादाद्योऽन्यत्रात्मनः क्षत्रं वेद' (बृ० ४।५।७) इत्यादिना सर्वस्य ब्राह्मणत्वादेर्ब्रह्मभेदं व्युत्पाद्य ब्रह्मज्ञानेन सर्वज्ञान व्युत्पादनाय दृष्टान्त उक्तः, स यथा दुन्दुभेर्हन्यमानस्य न बाह्यछब्दाच्छक्नुयादग्रहणाय[3] दुन्दुभैस्तु ग्रहणेन दुन्दुभ्याघातस्य ह शब्दो गृहीत' (बृ० ४।५।८) इत्यस्याश्चार्यमर्थः । दुन्दुभेः दुन्दुभिश-दस्य ग्रहणेनेति पूरणीयं दुंदुभेस्तु ग्रहणेनेति-अग्रे ग्रहणशब्ददर्शनात् बाह्यशब्दवत् दुंदुभिविशेषशब्दान् गृहीतुन्न शक्नुयात् । एवं व्यतिरेक उक्तः ।

अन्वयमाह दुंदुभेः दुन्दुभिशब्दसामान्यस्य ग्रहणेन तु शब्दो दुंदुभिविशेषशब्दो गृहीतो भवति । दुन्दुभ्याघातस्य वाशब्दो विजातीयो गृहीतः । तथा ब्रह्मणस्सामान्यस्याग्रहणं प्रपञ्चस्य विशेषस्या ग्रहणम् । तद्ग्रहणे च[4] तद्ग्रहणमित्येकविज्ञानेन सर्वविज्ञानमुपपादितं भवति । '[5]ननु' ब्रह्म तं परादादिति वाक्येऽधिकारणार्थकप्रत्ययेन[6] ब्रह्मणोऽधिकरणत्वमुक्तं प्रतीयते, नत्वभेदः, इदं सर्वं यदयमात्मेति वाक्यं तूपक्रमानुसारेणाधाराधेयपरमेव भविष्यति । स यद्यादित्यादिदृष्टान्तो[7] भवदुक्तेऽर्थे न स्वरस अध्याहारादिदोषात् । किन्तु दुन्दुभौ हन्यमाने बाह्याः शब्दाः गृहीतुन्न शक्याः[8] तेन दुंदुभिशब्देन प्रतिरोधात् । दुंदुभौ तदा हन्तरि प्रतिरुद्धे[9] सति बाह्यशब्दाः गृहीता[10]

१. ग० मा० 'ज्ञानत्व' इति पाठः ।
२. ग० मा० 'तदज्ञानादमृतत्वक्तैः जगद्वैतुत्वतोऽपि च', इति पाठः ।
३. घ० मा० 'ब्राह्य शब्दो छ कुर्या' इति पाठः ।
४. घ० मा० 'विशेषस्य' इत्यधिकः पाठः ।
५. घ० मा० 'ननु' इति पाठो नास्ति ।
६. ग० मा० 'कर्तृलिङ्ग प्रत्ययेन' इति पाठः ।
७. घ० मा० 'यद्यत्यादि' इति पाठः ।
८. घ० मा० 'न शक्यं' इति पाठः ।
९. घ० मा० 'प्रतिरुद्ध' इति पाठः ।
१०. घ० मा० 'त्वा' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भवन्ति। एवमिन्द्रियाणामनिरोधेनात्मा गृहीतुन्न[1] शक्यते, तत्प्रतिरोधे तु गृहीतुं शक्यत इत्यर्थे सर्वात्मकत्वञ्च 'सर्वं समाप्नोषि ततोऽसि सर्वः' (गी० ११।४०) इतिस्मृत्युक्तरीत्या-उपपादनीयम्[2] कैत्रप्रत्ययस्य[3] समं समाधानमन्यत्राभिनिवेशादित्यत्र-अन्यत्र भीमगाङ्गेयादित्यत्र[4] च सार्वविभक्तिकत्वदर्शनेन तस्य प्रकृते सन्देहे सत्यत्राधिकरणन्यायेन वाक्यशेषनिर्णयस्य[5] वक्तव्यत्वात्। वाक्यशेषे चेदं ब्रह्मेदं क्षत्रमित्यादिसामानाधिकरण्यदर्शनेनेहापि तन्निर्वाहाय त्रलः कर्मत्वार्थकतया[6] अभ्युपगमात्। दृष्टान्तवाक्यस्यैतदनुसारेणैवाध्याहारादिभिर्योज्यत्वात्, 'सर्वं समाप्नोषि' (गी० ११।४०) इत्यत्रापि सम्पदस्वारस्येन तादात्म्यस्यैव प्रतीतेः। अत 'एक विज्ञानेन सर्वविज्ञानप्रतिपादनं[7] मुख्यमेव। एवं मोक्षजनकज्ञानविषयत्वमपि[8] ब्रह्मण एव। परमात्मज्ञानस्यैव मोक्षहेतुतायास्सर्वासूपनिषत्सु प्रतिपादनात्, एवमुत्पत्तिहेतुत्वं लयहेतुत्वाञ्च ब्रह्मण एव, न जीवस्येत्यसकृदावेदितम्।

तत्र जीवधर्मकीर्तनञ्जीवाभेदविवक्षया। स चाभेदो भेदसमानाधिकृतः। अन्यथा उद्देश्यविधेयभावानुपपत्तेरिति केचिन्मुक्तिपर्यन्तं भेदः, अनन्तरं त्वभेद इत्यपरे, तदुभयमप्यनुपपन्नं सर्वद्वैतनिषेधेन भेदस्यापि मिथ्यात्वावगमात्, 'तत्त्वमसि' (छा० ६।११।३) इति शास्त्रानुपपत्तेरन्यस्यान्यभावानुपपत्तेश्च। अत औपाधिक एव भेदः[9]। अभेदस्तु पारमार्थिकः इत्येव तत्त्वम्। अतो जीवधर्मा ब्रह्मणि योजयितुं शक्याः, 'तत्त्वमसि' (छा० ६।११।३) इत्यादिवाक्यानामखण्डार्थबोधकत्वमित्युद्देश्यविधेयभावाभावेऽपि नानुपपत्तिरतो मैत्रेयीब्राह्मणञ्जीवाभिन्नब्रह्मपरमिति।

प्रकृत्यधिकरणम्

प्रकृतिश्च प्रतिज्ञादृष्टान्तानु(प)रोधात् ॥७॥

जन्मादिसूत्रोक्तं यज्जगज्जन्मादिकारणत्वं तत्कर्तृत्वमेव अत उपादानत्वमिति विचार्य्यते।

ईक्षापूर्वकस्त्रष्टृत्वप्रतिपादनतो ह्ययम्[10]।
कर्तेव केवलं तावदीश्वरत्वप्रसिद्धितः[11] ॥

१. गघयोः मातृकयोः न' इति पाठो नास्ति।
२. घ० मा० 'उषया दनियमिति' इति पाठः।
३, ग० मा० 'लिङ् प्रत्ययस्य' इति पाठः।
४. ग० मा० 'अर्थान्तरे पि प्रयोग दर्शनेन' इति पाठः।
५. घ० मा० ' शेषार या विस्ययस्य' इति पाठः।
६. ग० घा० 'कर्मत्वार्थकताया' इति पाठः।
७. ग० मा० 'प्रतिज्ञानम्' इति पाठः।
८. ग० मा० 'जनकत्वमपि' इति पाठः।
९. उप समीपे स्वगुणनादधातीप्युपाधिः, अन्य वस्तुनो धर्मोऽन्यस्मिन् संसर्गमात्रेण प्रतीतिः। तत्कृतौपाधिकभेदोऽपारमार्थिकः। तत्र तावदभेदस्वाभाविको व्यवहारदशायामिति न चैवमप्रत्यक्षत्वं भेदस्य सम्यगपरोक्षानुभवविषयस्यैव सत्त्वात्। (मा० म० ह० पृ० ३४) अहमिदं ममेदमिति 'नैसर्गिकोऽयं लोकव्यवहारः' (शां० भा० १।१।१) 'अत एव तु व्यवहरामः'। किन्तु नास्या मूलं पश्यामः (इष्ट सि० पृ० २) अग्रेऽपि विमुक्तात्मना स्वरूपवाक्यविन्यासेनोक्तम् 'न च भेदभेदिनोर्भेदोऽनवस्थाप्रसक्तेः' (इष्ट सि० पृ० ३) एवञ्जाग्रति परिदृश्यमाना बाध्यव्यवहारभेदसत्त्वेऽपि परमार्थतस्त्वभेद इत्येवं तत्त्वम्।
१०. ग० मा० 'परः' इति पाठः।
११. ग० मा० 'तद्वरोश्वरस्व' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परमेश्वरस्य कर्तृत्वमेव नोपादानत्वमीक्षापूर्वकस्रष्टृत्वोक्तेः[१]। कर्तुः कुलालादेरुपादानत्वादुपगमादीश्वरत्वप्रसिद्धेश्च नोपादानत्वं 'तमीश्वराणां परमं महेश्वरमिति' हि शास्त्रम्। ननु कर्तुरपि ह्यु पादानत्वं[२] दृश्यते। यागादावीश्वरत्ववत्[३] मृदादिदृष्टान्तेनोपादनमपि[४] शास्त्रेण प्रतिपाद्यते। तदपि स्वोकार्यं 'तदैक्षद्बहु स्यां प्रजायेयम्' (छा० ६।२।३) इति चोत्पद्यमानप्रपञ्चस्यात्माभेदोक्त्या-उपादानत्वमेवावगम्यते। तदुभयमेव स्वीकार्यमिति चेन्न द्रव्यकर्तुः कुलादेस्तं प्रत्युपादानत्वादर्शनेनोक्तनियमासिद्धेर्मृदादिदृष्टन्तस्त्वेक 'विज्ञानेन सर्वविज्ञानं' प्रतिज्ञाय व्युत्पाद्यमानाः कथञ्चिदुन्नेयाः[५]। नह्येकविज्ञानेन सर्वविज्ञानं सम्भवति ब्रह्मणि विदितोऽपि घटादिसंशयदर्शनात्। अत एव येनाश्रुतं श्रुतं[६] भवती'ति प्रपञ्चेऽश्रुतत्वमेव कीर्तितम्। अतः प्रतिज्ञावाक्यं 'राजनि[७] दृष्टेऽन्ये दृष्टा भवन्ति यथा तथा ब्रह्मणि विदिते[८] प्रधाने[९] अन्ये विदितप्राया एव भवन्तीति योजनीयम्। मृत्पिण्डादिनाञ्चानुपादानत्वेनोपादानत्वमादायैवोपपादनमिति निर्बन्धो न शक्यते कर्तुम् 'बहु स्यां प्रजायेय' (तै० उ० ३।६) तदपि न मुख्यार्थः। किन्तु 'प्रजया पशुभिर्मिथुनैर्जायते[१०]' इतिवदुपपादनीयम्। न च 'तस्माद्वा[११] एतस्मादात्मन आकाशः सम्भूत' (तै० उ० २।१) इति पञ्चम्या उपादानत्वसिद्धिरिति वाच्यम्, 'पुत्रात्प्रमोदो जायत' इत्यादौ पञ्चम्या निमित्तत्वेऽपि दर्शनादनुपादानेऽपि 'भूतले घटो ध्वस्त' इतिवदनुपादानस्यापि कार्याधारत्वोपपत्तेः। ब्रह्मण उपदानत्वे निर्विकारत्वश्रुतिविरोधः। अतो ब्रह्मणः कर्तृत्वमेवेति।

सिद्धान्तस्तु

ब्रह्मज्ञानेन[१२] सर्वस्य ज्ञेयत्वं प्रतिपाद्य हि।
मृदादिदर्शनत्वस्य ह्यु पादानकारणात्॥
ब्रह्मोपादानमित्येव स्वीकार्यं पञ्चमीबलात्।
प्रजायेयेति निर्देशाल्लयाधारत्वतोऽपि[१३] च॥

---

१. ग० मा० 'नपूगादानत्व९' इति पाठः।
२. ग० मा० 'यागादौ' इति पाठः।
३. ग० मा० 'श्रुतिवत्' इति पाठः।
४. ग० मा० 'उपादानत्वश्रुतिरपि विद्यतेततस्तदपि स्वीकार्यम्' इति पाठः।
५. घ० मा० 'औन्नेया' इति पाठः।
६. घ० मा० 'अश्रुतम्' इति पाठो नास्ति।
७. घ० मा० 'राजसि' इति पाठः।
८. ग० मा० 'ब्रह्मणिप्रधाने विदिते त्ये विदिता अपि विदितप्राया' इति पाठः।
९. घ० मा० 'प्रश्वने' इति पाठः।
१०. घ० मा० 'मथुनेः' इति पाठः।
११. घ० मा० 'तस्माद्यामे तस्मादादा मन' इति पाठः।
१२. ग० मा० 'लयोक्तेश्च परात्मनि' इति पाठः।
१३. ग० मा० 'विज्ञेयत्वं प्रतिज्ञाय सर्वस्यविबोधतः' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एक[1] विज्ञानेन सर्वविज्ञानप्रतिज्ञाया ब्रह्मोपादानत्वमन्तरानुपपत्तेः[2] ब्रह्मोपादानम्। यद्यपि ब्रह्मणि विदिते तत्कार्यभूतविशेषांशा न विदिताः[3] तदादाय संशयोपपत्तिः, अश्रुतत्वनिर्देशोपपत्तिश्च। तथापि कार्यञ्च 'द्वे रूपे' ब्रह्मरूपसद्रूपताघटादिविकाररूपता च घटस्सन्निति प्रतिपत्तेः। तथा च संदेशमादाय श्रुतत्वादिकमुपपादनीयमिति वा नानुपपत्तिः। मृदादिदृष्टान्ता अपि ब्रह्मण उपादानत्व एव समञ्जसाः। न च[4] पिण्डस्य घटा[5]दावननुस्यूतत्वान्नोपादानत्वमिति वाच्यम्। अन्वयव्यतिरेकाभ्यां मृत्पिण्डेन घटः कृत इति व्यवहारेण च तस्योपादानत्वसिद्धेः। न च निमित्तत्वेप्येतदुपपद्यत इति वाच्यम्। मृत्पिण्ड एव घटोऽभवदिति व्यवहारात्पिण्डावस्थाया अननुस्यूतत्वेऽपि पय[6] आदिना दध्यादाविवोपादानत्वोपपत्तेः। अतो ब्रह्मण उपादानत्वमपि स्वीकार्यमिति।

किञ्च[7] पञ्चमीबलादपि ब्रह्मण उपादानत्वं स्वीकार्यम् 'जनि कर्तुः प्रकृतिः' (पा० १।४।३०) इति सूत्रेण जायमानस्योपादन एवापादानसञ्ज्ञाविधानात्। प्रकृतिशब्दस्योपादन एव[8] रूढत्वात्। पुत्रात्प्रमोदो जायत इत्यत्र कथञ्चिदुपपादितत्वात्, 'सोऽकायमत बहु स्यां प्रजायेय' (तै० उ० ३।६) इत्युत्तमपुरुषस्वारस्येन ब्रह्मण एव कार्यात्मकत्वावगत्या-उपादानोपादेयभावस्य प्रतीतेरेकविज्ञानेन सर्वविज्ञानप्रतिपादनार्थप्रवृत्तत्वेन 'प्रजाया पशुभिर्मिथुनैर्जायत' इतिवत्कथञ्चिदुपपादयितुं शक्यत्वात्। 'आकाशादेव समुत्पद्यन्त आकाशं प्रत्यस्तं यन्ति' (छा० १।९।१) इति वाक्य आकाशशब्दिते परमात्मनि लयीकृतयापि तस्योपादनत्वसिद्धिः। न च लयोऽनुपादानत्वेऽपि दृष्ट इति वाच्यम्[9],—प्रकृतेरनन्तोपादानार्थस्य वाक्यस्य प्रवृत्तत्वेनान्यत्र लयस्य वक्तुमशक्यत्वात्। अतस्तूपादान एव स वक्तव्य इत्युपादानत्वसिद्धिर्ब्रह्मणः।

किञ्च 'तदात्मानं स्वयमकुरुतेति' श्रुत्या स्वस्यैव कर्मत्वकर्तृत्वोक्त्या ब्रह्मण उपादानत्वावगमादुपादानत्वसिद्धिः। न च निर्विकारित्वश्रुतिविरोधः। मायाविशिष्टस्योपादानत्वस्वीकारेण मायायामेवोपानत्वपर्यवसानादिति केचिदाहुः। तथा सति ब्रह्मण उपादानत्वाभावात्तत्प्रतिपादकश्रुतिविरोध इति मन्यमाना उपादानत्वं परम्परया विकाराश्रयत्वमिति मनसि कृत्य परिणममानमायाधिष्ठानत्वमुपादानत्वन्निर्विकारित्वेन[10] साक्षादित्यन्ये वदन्ति। उपादानत्वश्रुतिबलेन साक्षात्कार्याश्रयत्वस्यैव प्रतीतेः विकारस्य मिथ्यात्वान्निर्विकात्वसविकारत्वञ्च काल्पनिकत्वादुपपद्यत इति साम्प्रदायिकाः। अतो ब्रह्मण उपादानत्वन्निमित्तत्वञ्चेति सिद्धम्।

---

१. ग० मा० 'एकब्रह्मबोधनेन' इति पाठः।
२. घ० मा० ' त प्रतरानुपपत्तेः' इति पाठः।
३. घ० मा० विशेषांशानविद्धिता' इति पाठः।
४. ग० मा० 'मृत्पिण्डादेः' इति पाठः।
५. घ० मा० 'घटाटा वननुस्यूतत्वात्' इति पाठः।
६. ग० मा० 'वय' इति पाठः।
७. ग० मा० 'किञ्च' इति पाठो नास्ति।
८. घ० मा० 'एव' इति पाठो नास्ति।
९. ग० मा० 'तथापि' इति पाठः।
१०. घ० मा० 'चिविकारित्व साक्षात्' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वव्याख्यानाधिकरणम्

तेन सर्वे व्याख्याता व्याख्याता ।। ८ ।।

सांख्यमतनिराकरणं वैशेषिकादिमतेप्यतिदिशति । यथा सांख्यादिमतानां श्रुतिविरुद्धप्रधानादिबोधकत्वमेव[1] कणादादिशास्त्रस्यापि[2] परमाण्वादिबोधकश्रुत्यभावादिति । विशेषशङ्का तु 'एतस्यैव सौम्यैषोऽणिम्न एव महान्यग्रोधो तिष्ठति' प्रश्न साम्येति 'स य एषोऽणिमैव तदात्म्यमिदं सर्वं तत्सत्यं स आत्मा' इति श्रुतौ दृष्टान्ते अणोः सकाशात्न्यग्रोधोत्पत्तिवद्दार्ष्टान्तिकेप्यणोस्सकाशादुत्पतेरवगमादणव एव जगत्कारणमिति मन्दमतीनां[3] शङ्का तन्निराकरणन्त्वेकविज्ञानेन सर्वविज्ञानप्रतिज्ञापूर्वकं ब्रह्मव्युत्पादनार्थं प्रवृत्तेः । तस्मिन्संदर्भे श्रुतस्याणुशब्दस्य दुर्विज्ञेयत्वपरत्वात् । अतो न शब्दत्वमणोरित्यतस्सर्वेषां वेदान्तानामद्वैते ब्रह्मणि समन्वय इति सिद्धम् ।

त्रैय्यन्तसन्दोहसमन्वयोऽत्रै[4]
निरूपितप्रत्यगभिन्नरूपे ।
परमेश्वरे तत्र विरोधशङ्का
पराकरिष्यत्यधुनाग्रिमेण ।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यसर्वतन्त्रस्वतन्त्रश्रीमदद्वैतानन्दसरस्वतीचरणारविन्दभृङ्गायमानस्य स्वयंप्रकाशानन्दस्य कृतिषु वेदान्तनयभूषणे प्रथमाध्यायस्य चतुर्थः पादः ।

द्वितीयोऽध्याये प्रथमः पादः

स्मृत्यधिकरणम्[5]

स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गात् ।।१।।

पूर्वस्मिन्नध्याये 'अध्यारोपापवादाभ्याम्'[6] (तेजो वि० उ० ४।२३) निष्प्रपञ्च[7] प्रत्यगभिन्नब्रह्मजगत्कारणत्वादिप्रदर्शनमुखेन वेदान्तैः प्रतिपाद्यत इति निरूपितम् । अथेदानीं तत्र स्मृतिन्यायविरोधमाशंक्य परिह्रियते । तत्र प्रथमं तावत्सांख्यस्मृतिविरोधाज्ज्ञेयो[8] नेति संशयः तत्र पूर्वःपक्षः स्मृत्या बाध्यत इति ।

सर्वज्ञात्कपिलस्येह तदुक्तेः प्रबलत्वतः ।
अवकाशस्य चाभावाद्धातव्यान्यस्मृतिर्भवेत्[9] ।।

---

१. ग० मा० 'धाधकस्त्वम्' इति पाठः ।

२. घ० मा० 'कणादादिमते पि परमाण्वादिभेदक स्वाभावात्प्यवैदिका एवेति' इति पाठः ।

३. घ० मा० 'मन्दमतीनां' इति पाठो नास्ति ।

४. घ० मा० पद्यमिदं नास्ति ।

५. घ० मा० 'श्रीगणेशायनमः' इत्यधिकः पाठः ।

६. असर्पभूतरज्जौ सर्पारोपोऽध्यारोपः 'रज्जुरियन्नायं सर्प इत्याकारकवाक्यज्ञानमेवापवादशब्देन लोके व्यवह्रियते । तदेवाध्यारोपापवादन्यायस्य प्रयोजनमिति ।

७. च० मा० 'निष्प्रपंचं प्रत्यगभिन्नं' इति पाठः ।

८. च० मा० 'विरोधः परिह्रियते प्रथमाधिकरणेन, पूर्वोक्त समन्वयः' इत्यधिकः पाठः ।

९. घ० मा० 'ज्ञातव्या नान्यस्मृतिभवेत्' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'ऋषिं प्रसूतं कपिलस्तमग्रे ज्ञानैर्बिभर्ति जायमानञ्च पश्यन्' (श्वे० उ० ५।२) इति श्रुत्या कपिलस्य सर्वज्ञावगमेन तदुक्तीनां प्राबल्याबगमात् । तदनुरोधेन वेदान्तसमन्वयो हेयः । न च मन्वादिस्मृतीनामपि 'यद्वैकिञ्च मनुरवदत्तद्भेषजम्' इति श्रुत्यनुसारेण प्रमाणत्वावगमेन तद्वाक्यैस्सहह्यन्तरात्मा भूतानां क्षेत्रज्ञश्चेति कथ्यते इत्यादिभि'स्सर्गकाले च करोति सर्गमित्यादिविष्णुपुराणादिवाक्यैः अहं कृत्स्नस्य जगतः' (भ० गी० ७।६) इत्यादिगीतावाक्यै'स्समूलं शाश्वतिकस्स नित्य' (प० सू० १।८।२३।२) इत्यादिधर्मसूत्रकारवाक्यैश्च निर्विशेषात्मनः कारणत्वावगमात्कपिलवाक्यानामादरे नियामकन्न पश्याम इति वाच्यम् । सांख्यस्मृतीनां तत्त्वविषये प्रवृत्तानां निरवकाशत्वान्मन्वादिस्मृतीनाञ्च धर्मादिविषये सावकाशत्वात्तत्त्वविषये मन्वादिस्मृत्यपेक्षया सांख्यस्मृतिनामेवादरणीयत्वात् । न च मन्वादिस्मृत्यपेक्षया प्राबल्य[1] नियमाकस्यानवकाशत्वस्य[2] सत्त्वेऽपि श्रुतिविरोधे स्मृतेर्हेयत्वेन सैव हातव्येति वाच्यम् । तात्पर्यानुसारेण श्रुत्यर्थस्य वर्णनीयत्वेन तात्पर्यग्राहकत्वेन स्मृतिवचसां तदनुरोधेन श्रुतीनां व्याख्येयत्वादिति ।

सिद्धान्तस्तु

मनुस्मृत्यादिवाक्यानाञ्जगत्कारणबोधिनाम् ।
विषयाभावतौल्येन[3] मनूक्तीनाञ्च वेदतः ॥
प्रमाणत्वावगत्या[4] च कापिली[5] हेयतां ब्रजेत् ।
श्रुतौ कपिलशब्दोऽपि पद्मयोनेः प्रबोधकः ॥

श्रुतीनां ह्युपक्रोपसंहारपर्यालोचनया निर्विशेषजगत्कारणत्वोपलक्षिते [6]तात्पर्यविगमात्स्मृतीनां वेदविरोधः स्थित एव । न च वेदविरोधे सत्यनवकाशत्वमात्रेण स्मृतिर्वेदार्थं बाधितुमीष्टे । तथा सति विरोधाधिकरणविरोधापत्तेरेवं[7] स्थितेऽपि स्मृत्या प्रत्यवतिष्ठमानस्य स्मृत्यैव परिहारो वक्तव्य इति सांख्यस्मृतेर्मानवादिस्मृत्या जगत्कारणविषये निरवकाशाया 'यद्वै किञ्च मनुरवदत्तद्भेषजमिति श्रुत्यवगतप्रमाणभावे[8] बाधः प्रतिपाद्यते । न चर्षिप्रसूतं कपिलमिति (श्वे० उ० ५।२) श्रुतिः कपिलस्य सार्वज्ञ्यं प्रतिपादयतीति वाच्यम् । तत्रत्य कपिलपदस्य हिरण्यगर्भपरत्वात्, हिरण्यगर्भं पश्यते[9] जायमान इति (श्वे० उ० ४।१२) श्रुत्येकार्थेनर्षिप्रसूतमित्यादिश्रुतिमन्त्रस्य हिरण्यगर्भपरत्वावसायात् । सकलप्रमाणविधुरमहत्तत्त्वप्रायपठित[10] ? प्रधानबोधितत्त्वञ्चाप्रमाण्यमेव वक्तुं सांख्यस्मृतेः । अतस्तद्विरोधान्न वेदान्तसमन्वयो हेय इति ।

---

१. घ० मा० 'शवल्य' इति पाठः ।
२. च० मा० 'अनवशा' इति पाठः ।
३. च० मा० 'तैल्य' इति पाठः ।
४. ग० मा० 'प्रमाणभावावगमात्' इति पाठः ।
५. कपिलस्येयं कापिली = कपिलविरचिता स्मृतिः ।
६. ग० मा० 'प्रसाधनात्' इति पाठः ।
७. घ० मा० 'पत्तेररेएवं' इति पाठः ।
८. घ० मा० 'या' इत्यधिकः पाठः ।
९. घ० मा० 'पश्यति' इति पाठः ।
१०. घ० मा० 'यजितं' इति पाटः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

योगप्रत्युक्त्यधिकरणम्

एतेन योगः प्रत्युक्तः ॥२॥

पूर्वाधिकरणातिदेशोऽयं सांख्यस्मृतिविरोधवद्योगस्मृतिविरोधोऽपि नादरणीयः। संशयपूर्वोत्तरपक्षास्तु पूर्ववदेव 'तां[1] योगमिति मन्यते' (कठ० २।२।११) 'त्रिरुन्नतं स्थाप्य समं शरीरम्' (श्वे० उ० २।८) 'योगविधिञ्च कृत्स्नम्' (कठ० २।६।१८) इत्यादिश्रुतिवाक्येषु[2] योगस्य प्रतिपादितत्वेन योगस्मृतेर्वेदमूलकत्वावश्यंभावे प्रधानांशेऽपि[3] प्रामाण्यं स्यादिति विशेषा शङ्का। वेदानुमतांशेऽपि[4] वेदमूलकत्वेऽपि तद्विरुद्धांशे[5] वेदमूलत्वाभावेन तदंशेऽप्रामाण्योपपत्तेरिति परिहारात्।

विलक्षणत्वाधिकरणम्

न विलक्षणत्वादस्य तथात्वञ्च शब्दात् ॥३॥

इत आरभ्यापादपरिसमाप्तिन्यायविरोधः[6] परिह्रियते। तत्र जगत्कारणत्ववादिसमन्वयो[7] वियदादि न चेतनप्रकृतिकं चेतनविलक्षणत्वादिति न्यायो विरुध्यते न वेति संशये।

---

१. भ० मा० 'तं योगमिति' इति पाठः।

२. क—भाष्ये 'सम्यक् दर्शनाभ्युपायो हि योगो वेदे विहितः श्रोतव्य इत्यादिः (शां० भा० २।१।३) यत्तु दर्शनमुक्तं तत्कारणं सांख्ययोगाधिगम्यम्' इति, वैदिकमेव तत्र ज्ञानं ध्यानञ्च सांख्ययोगाभ्यामभिलप्यते प्रत्यासत्तेरित्यवगन्तव्यम्। येन त्वंशेन न विरुध्यते तेनेष्टमेव सांख्ययोगस्मृत्योः सावकाशत्वम्' (शां० भा० २।१।३)।

ख—मायास्वरूपनिरूपणावसरे—अद्वैतब्रह्मसिद्धिटिप्पणे, 'एवमुपादितम्' अत एव एतेन योगप्रत्युक्त 'इति एतत्सूत्रेणापि योगशास्त्रस्य हैरण्यगर्भपातञ्जदेः सर्वथा प्रामाण्यन्न निराक्रियते। किन्तु जगदुपादानस्वतन्त्रप्रधानवद्विकारमहदहङ्कारपञ्चतन्मात्रगोचरं प्रामाण्यन्नास्तीत्युच्यते। न चैतावत्तेषामप्रामाण्यं भवितुमर्हति। (अ० ब्र० सि० ५१) विचारासम्भवे योगाभ्यासकर्तव्य इत्युक्तम्, तत्र विचारासम्भवे किं कारणम्, ? इति चेत्, शृणु यतोऽतिशयेन व्यग्रबुद्धीनां विचारेण तत्त्वज्ञानञ्च सम्भवति। अतो योगः कर्तव्यः। तेन योगेन बुद्धेर्दर्पो नश्यति। अतस्स एव व्याकुलचित्तस्य मुख्य इत्यर्थः। व्याकुलधियां केवलमज्ञानमात्रेणाच्छादितात्मनां 'सांख्यनामा' सांख्यपदवाचः विचार एव मुख्य ? यतोऽयं शीघ्रं सिद्धि ददाति। विषयव्यग्रबुद्धीनां योगाभ्यासेन बुद्धिस्थैर्यं भवति। स्थिरायां तस्यां विचारेण ज्ञानमुत्पद्यते। अतो बुद्धिस्थैर्यायैव योगो न ज्ञानाय, न तु वेदान्तविचारादिनैव भवतीति सर्वं समञ्जसम्। (अ० ब्र० सि०, पृ० ३६६)।

ग—एतेषां हिरण्यगर्भादिशास्त्राणां योगस्वरूपं चित्तवृत्तिनिरोधस्तत्साधनं यमादिस्तदवान्तरफलं विभूतिरणिमादिः। (द० क० त० पृ० २३१)

घ—वेदान्ताविरोध्यंशेन सांख्ययोगयोः प्रामाण्येऽपि तद्विरोध्यंशेन सर्वथा अप्रामाण्यम् (मिताक्षरा २।१।३)।

३. च० मा० 'धंशेपि' इति पाठः।

४. घ० मा० 'अपि' इत्यधिकः पाठः।

५. च० मा० 'खण्ड-अकारो' नास्ति।

६. च० मा० 'समाप्तेः' इति पाठः।

७. ग० मा० 'वेदान्त' इत्यधिकः पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्मृतेर्वेदविरोधेन मूलराहित्यहेतुना ।
अप्रामाण्येऽपि तर्कस्य व्याप्तेर्मूलस्य सम्भवात् ॥
श्रुतिबाधकतैव स्याच्छ्रुतेर्न्यायानुसारतः ।
अर्थस्य वर्णनीयत्वात्प्राबल्यं तस्य चेष्यते ॥

जडवर्गस्य[1] प्रपञ्चस्य यदि चेतनोपादानकत्वं स्यात्तर्हि चैतन्यस्य प्रपञ्चे तु वृत्तिः स्यान्न चानुवर्तते। अतो न[2] ब्रह्म प्रकृतिकत्वम्। न च पूर्वमेनात्रापि[3] मूलाभावः शक्यते वक्तुम्। व्याप्तेरेव मूलस्य सम्भवात्। न च श्रुत्यपेक्षया न्यायस्य दौर्बल्यं[4] श्रुत्यर्थवर्णने न्यायस्यापेक्षणीयत्वेनोपजीव्यत्वेन प्राबल्यात्। न चानुमाने वियदादिर्न चेतनप्रकृतिकश्चेतनविलक्षणत्वादित्यस्मिन्दृष्टान्ताभावः सुवर्णानुपादानस्य घटस्य सामान्यव्याप्तौ दृष्टान्तत्वसम्भवात्। विशेषव्याप्तावविद्याया दृष्टान्तत्वात्। न चाप्रयोजकत्वन्निरूपाधिकसहचारभङ्गस्यैव विपक्षे बाधकत्वात्। न च हेतुरसिद्धः, चैतन्यस्य घटादावनुपलब्धेः। न चानुद्भूतत्वादभावं, कल्पकाभावात्। न च चेतनकार्यत्वान्यथानुपपत्त्या चैतन्ये कल्पिते तत्प्रतीत्या अनुद्भूतत्वं कल्प्यते चक्षुरादिरूपस्यैवेति वाच्यम् 'विज्ञानञ्चाविज्ञानञ्च' (तै० २।६) इति श्रुतिविरोधेन चेतनोपादनत्वानुपपत्तेः[5] कल्पकत्वाभावात्।

'तत्तेज ऐक्षत' (छा० ६।२।३) इत्यादिश्रुतिस्त्वभिमानपरा[6], प्राणसंवादादिस्थलेऽपि श्रुतेर्देवतापरत्वमेवेति प्राप्ते। अभिधीयते—

व्यभिचारादिदोषेण न न्यायो वेदसाधकः।
जडानामपि चैतन्यसत्त्वेऽपि न विरुद्धता ॥

सामान्यव्याप्त्यौ हरिद्राचूर्णाभ्यामारभ्यमाणे रक्तै वस्तुनि व्यभिचारः वैलक्षण्यमपि निर्वक्तुमशक्यम्। तद्वृत्तिधर्मभिन्नधर्मवत्त्वस्य तन्त्वारब्धे पटत्वेन[7] व्यभिचारः तद्वृत्तिधर्मवत्वाभावस्य स्वरूपासिद्धत्वमन्ततरस्सत्ताया[8] एव सत्त्वान्न चैतन्याभाववत्त्वं दृष्टान्तासिद्धेः वक्ष्यमाणरीत्या घटादावपि चैतन्यसिद्धेः। विशेषव्याप्तौ[9] चाप्रयोजकत्वम्। भावत्वावच्छिन्नसाध्यव्यापकानादित्वेन सोपाधिकत्वम् च[10]। ईश्वरघटसंयोगे व्यभिचारश्च वैलक्षण्यस्य चैतन्यविरहे पर्यवसानादन्यथासिध्यापत्तेः। न च द्रव्यत्वेन हेतुर्विशेष्यतेऽविद्याया द्रव्यत्वे मानाभावात्

१. ग० मा० 'रूपस्य' इति पाठः।
२. ग० मा० 'चेतन' इति पाठः।
३. घ० मा० 'पूर्वं पत्रे वापिन्नो' इति पाठः।
४. घ० मा० 'दौर्बल्यायश्नत्यर्थ' इति पाठः।
५. घ० मा० 'चेतनोवपादानत्व' इति पाठः।
६. ग० मा० 'तदधिष्ठातृपरदेवतापरा' इति पाठः।
७. ग० मा० 'पटे अतादृश' इति पाठः।
८. घ० मा० 'अन्ततस्स तया' इति पाठः।
९. व्याप्तिः सम्बन्धविशेषः, स च साध्यसाधनस्थले, अनौपाधिकस्सम्बन्धः (वै० उ० ३।१।१४) अनौपाधिकन्तु यावत्स्वव्यभिचारिव्यभिचारिसाध्यसमानाधिकरणम्। यावत्स्वसमानाधिकरणात्यन्ताभावाप्रतियोगिप्रतियोगिकात्यन्ताभावासमानाधिकरणसाध्यसमानाधिकरणम् इति (वि० २, पृ० ८)
१०. घ० मा० 'च' इति पाठो नास्ति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

साधनावैकल्यापत्तेः। अप्रयोजकत्वस्यानुद्धाराच्च प्रपञ्चे चैतन्यबाधकाभावेन स्वरूपासिद्धेश्च। न चानुपलब्धिबाधः, चाक्षुषवृत्त्यादिसहकारिविरहेणापि[1] तदुपपत्तेः। अन्यथा चाक्षुषादिवृत्तिकाले घटःस्फुरतीति प्रतीत्यनुपपत्तेः। उपपादयिष्यते चेदं विज्ञानवादनिराकरणे 'विज्ञानञ्चाविज्ञानञ्चे (तै० २।६) इति श्रुतिस्तु कादाचित्काभावाभिप्रायेण[2] नेया। आगमबाधितञ्चेदमनुमानं श्रुतिविरोधे न्यायस्याभासत्वात्। श्रुत्यनुगतानामेव न्यायानां तदुपजीव्यत्वादतः श्रुतिर्न्यायेन न बाध्यत इति।

शिष्टापरिग्रहाधिकरणम्

एतेन शिष्टाः परिग्रहा अपि व्याख्याताः ॥ ४ ॥

महतो ब्रह्मणो जगत्कारणत्वप्रतिपादकसमन्वयः, वियदादिद्रव्यं न परममहत्प्रकृतिकं तन्निकृष्टपरिमाणत्वाद्घटवदित्यनुमानेन विरुध्यते नवेति[3] सन्देहे पूर्ववदेव पूर्वपक्षः।

सिद्धान्तस्तु योऽयं[4] न्यूनपरिमाणः स न तदारभ्य-इति सामान्यव्याप्तौ तूलपिण्डविशेषारब्ध[5] तन्त्वादौ व्यभिचारः। विशेषव्याप्तौ त्वप्रयोजकत्वमागमाधितत्वञ्च तदुपादानत्वग्राहकप्रमाणरहितत्वञ्चोपाधिः। विवर्तवादे-आत्मनि देहभ्रमे-आत्मनस्तदुपादानत्वाद्व्यभिचारः[6]। अतो न परममहत्कारणत्वबोधकस्य समन्वयस्य विरोधः।

भोक्त्रापत्त्यधिकरणम्

भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत् ॥ ५ ॥

'तत्त्वमसि' सर्वं खल्विदं ब्रह्म' (छा० ३।१४।१) इत्यादिश्रुत्या बोध्यमानो जीवगतो ब्रह्माण्डभेदो जीवजगतः परस्परमभेद स्यादिति तर्कबाध्यो नेति सन्देहे पूर्वःपक्षः, बाध्यत इति, कुतः

उपादाने विकारस्य समवायो न सङ्गमः।
अनभ्युपगमात्तस्य तेन तादात्म्यमेव हि ॥
अभेदरूपं तच्चापि जीवेनापि तदिष्यते।
तथा च भोक्तृभोग्यादेर्व्यवस्था नैव सिध्यति ॥

कार्यस्य हि कारणे न सम्बन्धो न समवायोऽनभ्युपगमादतस्तादाम्यमेव सम्बन्धो वक्तव्यस्स चाभेदः। तथा च जीवस्यापि ब्रह्माभिन्नत्वाज्जगतोऽपि जीवाभिन्न ब्रह्माभिन्नत्वाज्जोवाभेदे[7] भोग्यभोक्तृव्यत्वस्था न सिद्धेत्। अतो भेदबोधिकाः श्रुतयः कथञ्चन्नेया इति। सिद्धान्तस्तु—

१. घ० मा० 'काक्षुप' इति पाठः।
२. ग० मा० 'भाना' इति पाठः।
३. घ० मा० 'नेति' इति पाठः।
४. घ० मा० 'यो य न्यून' इति पाठः।
५. घ० मा० 'लपिच्च' इति पाठः।
६. घ० मा० 'उपादानत्वाव्यभिचारः' इति पाठः।
७. ग० मा० 'प्राप्तां' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सम्बन्धत्वेऽप्यभेदस्य भेदोऽप्यङ्गीकृतो यतः ।
जगता सह जीवानामभेदस्याप्रतीतितः ॥
भोक्तृभोग्यव्यवस्थात्र ह्युपपन्नतरा भवेत् ।
श्रुतयोऽतोऽन्यथा नैव नेतव्या न्यायबाध्यतः ॥

कार्यकारणयोर्ह्यभेदसम्बन्धाङ्गीकारेऽपि भेदोप्यङ्गीकार्यः । भेदसामानाधिकरणस्यैव सम्बन्धत्वात् । प्रतियोग्यनुयोगिभावस्य भेदं विनानुपपत्तेः । अन्यथा संयोगेन सम्बन्धेन[1] तद्घटस्तद्घटवानिति[2] प्रतीत्यापत्तेः । सोप्यभेदो यत्राभेदप्रतीतिस्तत्रैव प्रपञ्चपरमात्मनश्च प्रतीतिबलादङ्गीक्रियते, न[3] जीवप्रपञ्चयोः, प्रतीतेरभावात् । नहि तरङ्गफेनयोरभेदोऽस्ति । अभेदे वा भेदांशमादाय भोक्तृभोग्यव्यवहारोपपत्तिः[4] । अतोऽत्र श्रुतिर्नान्यथा नेयेति ।

आरम्भणाधिकरणम्

तदनन्यत्वमारम्भणशब्दादिभ्यः ॥६॥

परिणामवादमभ्युपगम्य पूर्वपक्षे निराकृते पारमार्थिकं विवर्तवादमादाय सिद्धान्तं वक्तुमिदं सूत्रम् ।

जीवस्य ब्रह्मणस्तावदभेदो ह्यैक्यमिष्यते ।
प्रपञ्चस्य तु मिथ्यात्वाद्भेदो नेत्यैव कल्पते[5] ॥

जीवब्रह्मणोर्ह्यैकमेवाभेदः[6] । प्रपञ्चस्य तु ब्रह्मणा सहाभेदो नैक्यं जडाजड्योरैक्यानुपत्तेः । किन्तु मिथ्यात्वाद्भेदो नेष्यते । मिथ्यात्वञ्च प्रपञ्चश्रुत्यनुमानसिद्धम् ।

श्रुतिस्तावच्छन्दोगशाखायाम् उत्तमादेशमप्राक्ष्यो येन श्रुतमश्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमित्येक विज्ञानेन' (छा० ६।१।२,३) इति सर्वविज्ञानमुपक्षिप्य कथमन्यस्मिन्विदितेऽन्यद्विदितं भवतीत्याङ्क्यां[7] कथमनु भगव[8] स आदेशो भवतीत्युपक्षिप्य यथा 'सौम्य एकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' (छा० ५।१।४) इत्यादिना मिथ्यात्वं घटादीनां व्युत्पाद्यैवं 'सौम्य स आदेशो भवति' (छा० ६।१।६) इति प्रपञ्चस्य कृत्स्नस्यापि[9] मिथ्यात्वं व्युत्पादितम्[10] । ननु कथं[11] श्रुतिः प्रपञ्चमिथ्यात्वमाह 'एक विज्ञानेन सर्वविज्ञानोक्त्या कार्यकारणयोरभेद उपक्षिप्तः । तत्रेयमाङ्का पिण्डे दृष्टे घटादिपिण्डदृग्गोचरदर्शना-

१. घ० मा० 'सम्बन्धेन' इत्यधिकः पाठः ।
२. घ० मा० 'तद्घवानिति' ईति पाठः ।
३. च० मा० 'च' इति पाठः ।
४. ग० मा० 'व्यवस्थया' इति पाठः ।
५. घ० मा० 'कल्पते' इति पाठः ।
६. ग० मा० 'जीवब्रह्मणोरैक्यमेव ह्यभेदः' इति पाठः ।
७. घ० मा० 'भवतीतित्याशंका' इति पाठः ।
८. घ० मा० 'कथमनु भवस्स' इति पाठः ।
९. ग० मा० 'कृत्स्नस्य' इति पाठो नास्ति ।
१०. ग० मा० 'व्युत्पादयति तन्निराशाय' इति पाठः ।
११.०मा च० 'नैयं' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दिष्टेऽर्थक्रियाभेदाच्च मृद्घटयोर्भेदः एवाङ्गीकार्य इति । तत्परिहाराय[1] 'बाचरम्भणम्' (छा० ६।१।४) इत्यादि वाक्यशेषः । बाचा वागर्थमध्ययनेन बस्तीतिवच्चतुर्थ्यर्थे तृतीया । वाक्शब्देन च घटेन जलमाहरेत्यादिस्तत्पूर्वको व्यवहारश्चोच्यते । विकारो घटादिस्तन्नामधेयं घटः मृत्तिकया आरम्भणं आलम्भनीयः[2] स्पर्शनीयः । तथा च घटेन जलमाहरेत्यादिव्यवहारसिध्यर्थं मृत्तिकया घटस्संयोज्यते । घट इति नामधेयमपि घटेन संयोज्यते । तदा चैकस्यैव मृत्पिण्डस्य घटाद्यवस्थाभेदमादाय सन्देहाद्युपपत्तिरत्यन्तभेद एव मृद्घटयोः कस्मान्न भवतीत्याशंक्याह 'मृत्तिकेत्येव सत्यम्' (छा० ६।१।४) इति घट पदमध्याहर्तव्यं, घटो मृत्तिकेत्येव सत्यमित्यर्थः । तथा च 'मृद्घट' इत्यभेदप्रत्ययादवस्थाभेद एव, न पारमार्थिक इत्यतः कथं मिथ्यात्वसिद्धिरिति चेदुच्यते । वाचेति तृतीयायाश्चतुर्थ्यर्थं कल्पनं मृत्तिकयेत्यस्य विभक्तिविपरिणामेनानुषङ्गः । मृत्तिकेत्येत्र घट' इति पदाध्याहारश्चेत्यादिक्लेशापत्तिरतो मिथ्यात्वपरतयैव योजनीया । वाचा[3] आरम्भणं वागालम्बनं[4] विकारो घटादिनामधेयं नामधेयमात्रन्न तु तत्त्वतोऽस्ति मृत्तिकेत्यव सत्यमित्यधिष्ठानस्य [5]सत्यत्वप्रतिपादनात्प्रपञ्चमिथ्यात्वसिद्धिः । एवं श्रुत्यन्तराण्यप्युदाहार्याणि । श्वेतमृदधारिणां[6] व्याख्यानान्तराणि तु ब्रह्मविद्याभरण एव दूषितानि विस्तरभयान्नेह लिख्यते ।

अनुमानमपि मिथ्यात्वे मानं, तथा हि विच्छिन्नं सत्तादात्म्यापन्नं स्वप्रकारकप्रतीतिविशेष्यताव्यापकीभूतसंसर्गाभावप्रतियोगि दृश्यत्वाद् घटवत् । अत्र [7]प्रतियोगिता[8] प्रकारताघटकसम्बन्धेन प्रकारतावच्छेदकधर्मेण

---

१. घ० मा० 'तत्परिहाराय' इत्याधिकः पाठः ।

२. 'बहुत्रालम्भशब्द प्रायो हिंसार्थे प्रयुक्तो दृश्यते । यथा 'अश्वालम्भ, गवालम्भ अग्निसोमीयं पशुमालभेत' इत्याबिबाक्येषु प्रयुक्तालम्भशब्दः हिंसापरक एवेति बहुविज्ञशेमुषीकाः प्रत्यवतिष्ठन्ते (पृ० ४५३ सि० कौ) ।
काशकृत्स्नव्याकरणे 'लभि' धारणे घर्षणे चार्थः (भ्वादिगणे पृ० ५८) । परं 'अर्थवादोपपत्ते' रिति मीमांसासूत्रव्याख्यानावसरे सुबोधिनीटीकाकारमुकुन्दभट्टेनाभिहितम्—'आलम्भः स्पर्शो भवति' (२।३।१७) इति । पार्थसारथिमित्रस्तु अग्निहोत्रदोहाधिकारे 'वत्समालभेत' (मं० सं० १।५।९) इत्युक्त्वा 'आलम्भो नाम स्पर्शमात्रम् । इति (शा० दी० २।३।१७) 'वर्जयेत् स्त्रीणाञ्च प्रेक्षणालम्भम्' (मनु० २।१७९) अत्रापि ब्रह्मचारिणां स्त्रीस्पर्शनिषेधे 'आलम्भ' शब्द प्रयोगः पारस्करगृहसूत्रे चोपनयनसंस्कारे अथास्य (ब्रह्मचारिणः) दक्षिणांशमधिहृदयमालभते' (पार० गृ० सू० २।२।२६) अत्र ब्रह्मचारिणामालम्भनमयुक्तम् । अत एवाचार्यो ब्रह्मचारिणः शिष्यस्य वा हृदयस्पर्शं करोत्यर्थः पर्यवसायोति विवाहसंस्कारेऽपि वरो वध्वा दक्षिणाशमधिहृदयमालभेत' (पार० गृ० सू० १।८।८) इति । यास्केनापि अग्निपशुरासीत्तमालभन्त तेनायजन्त इति च ब्राह्मणम्' (निरुक्त १२।२९ पृ० ५७६) ।
भाष्यव्याख्याने 'वाचारम्भणं श्रुतितात्पर्यविशदीकरणावसरे किलैवं प्रत्यपादि विकारो घटादिः, तन्मामधेयं घटः, मृत्तिकया आरम्भणं स्पृश्यं सम्बन्धनीयमिति यावत् । आलम्भस्स्पर्शहिंसयोः' इति वचनात् । स्पर्शार्थकस्यालभतेस्सम्बन्धे पर्यवसानात्' (भा० व्या० पृ० ४४६) ग० मा० 'आलम्नीय' इति पाठो नास्ति ।

३. घ० मा० 'वाचया' इति पाठः

४. ग० मा० 'आरम्भणमालम्बनम्' इति पाठः ।

५. ग० मा० 'कार्य' इति पाठः ।

६. ग० घ० मा० 'श्वेतनृधादिणां व्याखानन्तराणि' इति पाठः ।

७. च० मा० '।ह यो भेद एवांगीकार्य इति तत्परिहाराय वाचारम्भणमित्यादिवाक्यशेषः । वाचा वागथ, अध्ययनेन वसतीतिवच्च बुर्थ्यथे तृतीया, वाक्शब्देन च घटेन जलमाहरेत्यादिस्तत्पूर्वको व्यवहारश्चोच्यते । बिकारो घटादि तन्नामधेयम्' इति पाठः ।

८. ग० मा० 'च' इत्यधिकः पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चावच्छिन्ना बोध्या, तेन सम्बन्धान्तरधर्मान्तरावच्छिन्नाभावमादाय नार्थान्तरम्, अभावश्चावच्छिवृत्तिकान्यत्वेन[1] विशेषणीयस्तेनाव्याप्यवृत्त्यभावमादाय नार्थान्तरम्। अन्योऽ[2]न्यभावमादायार्थान्तरवारणाय संसर्गेति, नैयायिकादिमते शुक्तौ[3] समवायसम्बधेन[4] रजतभ्रमे शुक्तेर्विशेष्यतासत्त्वेन तत्सामानाधिकरणात्यन्ताभावस्य[5] रजते सत्त्वाद थार्न्तरवारणाय सामानाधिकरण्यमपहाय व्यापकत्वानुधावनम्, निरुक्तप्रतियोगितावच्छेदकधर्मवत्त्वमपहाय तदवच्छिन्नप्रतियोगिताकत्वनिवेशश्च[6] साध्याप्रसिद्धिवारणाय, रजतावयवनिष्ठं[7] रजतत्वेन घटाभावमादाय घट एव प्रसिद्धेः। व्यधिकरणधर्मावच्छिन्नाभावानभ्युपगमे तु शुक्तिरूप्यादिकमेव प्रसाध्याङ्गको दृष्टान्तः।[8] एतदेव[9]

१. घ—'अवच्छिन्नवृत्तिकार्यत्वेन' इति पाठः।

२. तादात्म्यसम्बन्धाच्छिन्नप्रतियोगिताकाभावः। (ल० मा* पृ० ७) यथा घटो न पटः इत्यादिना' घटात्मा पटो न भवतीत्यर्थो बोध्यते। एवञ्च घटतादात्म्यस्याभावः घटतादात्म्येनावच्छिन्ना या घटनिष्ठा प्रतियोगिता तन्निरुपको भेदो वा पटे वर्तते' इति एव लक्षणं सङ्गच्छते।

३. कार्यकारणयोरवयवावयविनो यतस्सबन्ध 'इहेदम्' इति प्रत्ययः स समवाय इति (वै० वि० ७।२।२६) अयुतसिद्धानामाधार्याधारभूतानां यस्सम्बन्धः 'इह' प्रत्ययहेतुस्स समवाय इति (प्रशस्त० १।पृ० २५) समवायसत्त्वे प्रमाणन्त्वनुमानम् तच्च 'जात्यादिगोचरो विशिष्टव्यवहारस्सम्बन्धनियतः भावमात्रविषयाबाधितविशिष्टव्यवहारत्वात् सघटं भूतलम्' इति व्यवहारवत् (न्या० ली० पृ० ५४) घटे घटत्वं रूपञ्च समवेतं, तन्तुषु पटसमवेत इह कर्मसमवेतमित्यनुगतसमवायाकारप्रतीत्या तत्सिद्धिः (न्या० म० पृ० ९) वस्तुतस्तु स्वाश्रयसमवेतत्वसम्बन्धेनावयवनीलादेरवयविनीलादौ हेतुत्वात्कारणतावच्छेदकसम्बन्धघटकतया समवायसिद्धिः (म० प्र० १।पृ० १२) समवायसम्बन्धेन पटत्वावच्छिन्नं प्रति तादात्म्यसम्बन्धेन तन्तुत्वेन हेतुत्वात् कार्यतावच्छेदकसम्बन्धविधया समवायसिद्धिः (दि० १।पृ० ३९)।

४. घ० मा० 'रत' इति पाठः।

५. ग० मा० 'प्रतियोगित्वस्य' इति पाठः।

६. ग० घ० 'तदवच्छिन्नत्वप्रतियोगिताकत्वन्निवेशश्च' इति पाठः।

७. ग० मा० 'घटः' इति पाठः।

८. यत्र लौकिकपरीक्षकणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः। (न्या० द० १।१।२५) प्रापञ्चिककुटुम्बभरणक्रयविक्रयादिव्यवहारपेशलनिगमागमतत्वसंस्कारविधुरः नरो लौकिकः। लक्षितस्य लक्षणं सम्भवति न वेति विचारः परीक्षा, यथा सास्नादिमत्त्वं गोत्वम्, गन्धवती पृथिवीत्यादिविचारः। परितः सर्वतः प्रमाणैस्तर्केण च य ईक्षते पश्यति वस्तुतत्त्वन्निश्चिनोति स परीक्षकः पारमार्थिकविचारचतुरः शास्त्रीयसंस्कारवान्नर इत्यर्थः। (सां० त० कौ० बि० तो० टी० पृ० १०)।

९. अत्र मिथ्यात्वलक्षणे प्रतिपन्नशब्दस्य स्वसम्बन्धितया ज्ञातमर्थः। उपाधिपदस्य चाधिकरणमर्थः। तथा च स्वसम्बन्धितया ज्ञाते सर्वत्र धर्मिणि प्रतिपन्नोपाधिशब्दस्यार्थः पर्यवस्यति। शुक्ताविदं रजतमिति दृष्टान्ते स्वं = रजतं, तस्याधिकरणं शुक्तिः, तत्र शक्तिशकले त्रैकालिकः सर्वदाविद्यमानः यो निषेध =अत्यन्ताभावः नास्ति न भविष्यति न भूतमित्याकारकरजतात्यन्ताभावः, तत्प्रतियोगी रजतम्। वस्तुतः शुक्तिशकले कालत्रयेऽपि रजतमापादयितुन्न शक्यते। तत्र शुक्तौ चाकचिक्याद्यनेकदोषशम्बलनान्मिथ्यारजतं भासते न तु तथ्यम्।

प्रकृते स्वपदेन प्रपञ्चो विवक्षितः। तत्सम्बन्धितया ज्ञातधर्मी ब्रह्म। तस्मिन् ब्रह्मणि त्रैकालिकः=सर्वदा विद्यमानः यो निषेधोऽत्यन्ताभावः, प्रपञ्चात्यन्ताभावः तत्प्रतियोगित्वं प्रपञ्चे वर्तते। अत एव प्रपञ्चस्य मिथ्यात्वं सिध्यति। अतः प्रतिपन्नशब्देन स्वप्रकारकधीविशेष्यकज्ञानं विविक्षितम्। स्वशब्ददेन द्वैतकार्यं विवक्षितं, तच्च ब्रह्मण्याध्यासिकतादात्म्यसम्बन्धेन वर्तते। द्वैतन्नास्तीत्यत्र द्वैतं प्रकारः, प्रकारता द्वैतनिष्ठा, द्वैतनिष्ठप्रकारतानिरूपिता या विशेष्यता सा ब्रह्मनिष्ठा, तद्वति योऽत्यन्ताभावः द्वैतात्यन्ताभाव तत्प्रतियोगित्वं द्वैतेऽस्ति। अतो द्वैतमिथ्यात्वं वदन्तीत्यभिप्रायो ग्रन्थकारस्य।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वम्' (अ० सि० पृ० २८) मिथ्यात्वमिति वदन्ति। दृश्यत्वञ्च वृत्तिविषयत्वम्[१]। न वा ब्रह्मणि व्यभिचारः। शुद्धस्य ब्रह्मणो वृत्तिविषयत्वानङ्गीकारात्। वृत्त्युपाधिकचैतन्यस्यैव वेदान्तवृत्तिविषयत्वस्य[२] भामत्यादौ व्यवस्थापितत्वात्। वृत्तित्वञ्च [३]धीपदवृत्तिनिमित्तजातिविशेषः[४]। न च सुखादौ हेत्वसिद्धिरनवस्थाभयेन तत्र वृत्तिविषयत्वानभ्युपगमात्। शुक्तिरूप्ये च साधनवैकल्यम्। तस्याविद्यावृत्तिविषयत्वेनान्तःकरणोपादानकधीवृत्तिविषयत्वानुपपत्तेरिति वाच्यम्। सुखावांश्चैत्रः शुक्तिरजतमित्यादिशब्दवृत्तिविषयत्वेन सिद्धिसाधनवैकल्ययोरभावात्। शुद्धं ब्रह्म वृत्तिव्याप्यमिति मते[५] तु सप्रकारकत्वेन वृत्तिर्विशेषणीया, अतो न कोऽपि दोषः। हेतुतावच्छेदकसम्बन्धश्च विषयत्वीयस्वरूपसम्बन्धविशेषः। अतः कालिकसम्बन्धेन हेतुत्वेऽनादिपदार्थाविद्यादौ न भागासिद्धिः। अथवा चैतन्यविषयत्वं, विषयता च तादात्म्यम्[६] अन्त्यानिर्वचनात्। चैतन्यप्रतियोगिकत्ववैशिष्ट्यञ्च विवक्षणीयम्। अतो न ब्रह्मणि व्याभिचारः। हेतुतावच्छेदकसम्बन्धश्च स्वरूपसम्बन्धविशेषः।[७] न चाप्रयोजकत्वेन हेतूच्छित्तेरेव विपक्षे बाधकत्वान्नहि चिज्जडयोः पारमार्थिक तादात्म्यमस्ति, ततः काल्पनिकमेव तद्वाच्यम्। तच्च चैतन्ये जडस्य कल्पितत्वमन्तरा[८] नोपपद्यते। अतो मिथ्यात्वसिद्धिः।

न चाकाराख्यैव विषयता वृत्तेस्सम्बन्ध इति प्रथमहेतावप्रयोजकत्वं नोद्धृतमिति वाच्यम्। सम्बन्धस्य सम्बन्धिद्वयसमानकालिकत्वसनियमेन विषयतायाश्चातीतानागतस्थलेऽप्यङ्गीकारेण काल्पनिकत्वावश्यंभावेन सम्बन्धिनोऽपि[९] काल्पनिकत्वावश्यंभावात्। न च प्रपञ्चमिथ्यात्वानुमाने प्रत्यक्षप्रमाणविरोधः[१०] शंक्यः। प्रत्यक्षविषयीभूतसत्त्वस्यानुमानेनाभावानवगाहनात्, श्रुतिप्रत्यक्षविरोधे प्रत्यक्षदौर्बल्यस्यादिमाधिकरण एव व्यवस्थापितत्वात्।

न च वेदस्य मिथ्यात्वे तज्जन्यं ज्ञानं भ्रमस्स्यादिति वाच्यम्। विषयाबाधेन प्रमाणत्वाद्विषयसत्त्वासत्त्वयोगेन[११] प्रमाणत्वभ्रमत्वयोः प्रयोजकत्वात्। अत एवासल्लिङ्गकपरामर्शजन्याप्यनुमितिर्विषयाबाधे प्रमैवेत्यङ्गीकृतम्। न चैवं कर्मकाण्डप्रामाण्यं स्वर्गकामिनस्स्वर्गसाधनत्वबोधकत्वेनाज्ञं प्रति प्रामाण्योपपत्तेः। न च शुक्तिरूप्येऽ[१२]नादिदृष्टासिद्धिस्तस्यानिर्वचनोयस्योत्पत्त्यभ्युपगमात्। अन्यथा चाक्षुषत्वानुपपत्तेः। द्रव्यञ्चाक्षुषं प्रति चक्षुस्संयोगस्य[१३]हेतुत्वेन देशान्तरस्थे तद्भावेन तदनुपपत्तेः। न च ज्ञानमेव सन्निकर्षः। तस्य सन्निकर्षत्वे

१. च० मा० 'सुखादि हेत्वसिद्धिः' इति पाठः।
२. ग० मा० 'जनित' इति पाठः।
३. घ० मा० 'धी' इति पाठो नास्ति।
४. च० मा० 'पदवृत्तिनिमित्त जाति' इति पाठः।
५. घ० मा० 'मन्त्रे' इति पाठः।
६. च० मा० 'न्यानिर्वचनात्' इति पाठः।
७. ग० मा० 'एव' इति पाठः।
८. घ० मा० 'मन्त्ररानोपपद्यते' इति पाठः।
९. ग० मा० 'रपि' इति पाठः।
१०. ग० मा० 'बाध' इति पाठः।
११. ग० मा० 'रेव' इति पाठः।
१२. घ० मा० 'प्येत्तादि दृष्टान्त' इति पाठः।
१३. च० मा० 'चक्षुस्संयोग' इति पाठो नास्ति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मानाभावात्। न च सुरभिश्चन्दनमित्यादिज्ञानानुपपत्तिरेव तत्कल्पितस्य सौरभांशे स्मृतित्वात्। अन्यथा 'सौरभं पश्यामीत्यनुव्यवसायापत्तेः। न च लौकिकविषयतैव [1]तन्नियामिकेति वाच्यम्। एतादृशकल्पनायां मानाभावात्। न च चन्दनखण्डांशे चाक्षुषत्वाभावेन सौरभांशे स्मृतित्वाङ्गीकारे ाङ्कर्योपत्तेरेतादृशकल्पनमिति वाच्यम्। जातिसङ्कर्यादिनिषेधत्वाभावात्[2]। अत एव प्रमीणोमीत्यनुव्यवसायबलात्प्रमाणत्वस्य जातित्वम्।

किञ्च भ्रमस्थले ज्ञानस्य सन्निकर्षत्वेन रजतं पश्यामीत्यनुव्यवसायानुपपत्तिर्लौकिकविषयतायां लाघवेन संयोगस्यैव नियामकत्वात्।[3] सिद्धान्ते त्वनावृत्तचित्तादात्म्यापन्नत्वमेव[4] परोक्षप्रयोजकमिति न काप्यनुपपत्तिः। तथा हि शुक्तोन्द्रियसन्निकर्षे दोषवशाच्छुक्तित्वाग्रहे इदमाकारा चाक्षुषवृत्तिरुदेति, तादृशवृत्त्यवच्छिन्ने चैतन्ये विद्यमानं शुक्तित्वाज्ञानदोषसहकृतं[5] रजताकारेण परिणमते। तच्च रजतमनावृत्तसाक्षिचैतन्ये न भासते।[6] न च दोषस्य भ्रमप्रत्यये हेतुत्वन्न रजतं[7] प्रति इति वाच्यम्। रजतचाक्षुषत्वापेक्षया लघो [8]रजतत्वस्यावच्छेदकत्वौचित्यात्। अतो रजतस्यानिर्वचनस्य सिद्ध[9] शक्तित्वज्ञानदोषसहकृतदृष्टान्तेन प्रपञ्चमिथ्यात्वसिद्धिः।

अन्यद्विस्तरभयान्नेह लिख्यते। अतो न भोक्तृभोग्यव्यवस्थेति सिद्धमग्रिमसूत्रव्याख्यानादिकञ्च भाष्य एव सुव्यक्तमिति नेह प्रपञ्च्यते।

इतरव्यपदेशाधिकरणम्

इतरव्यपदेशाधिकरणादिदोषप्रसक्तिः ॥६॥

पूर्वाधिकरेण ह्यनन्यत्वपदेन ब्रह्माव्यतिरेकेणाभावे-उक्ते जीवांशे भेद इतरांशे तु मिथ्यात्वमित्येवमुक्तम्।[10] तत्र जीवब्रह्मणोरैक्य ईश्वरस्य जगत्कर्तृत्वन्नोपपद्यत इत्याक्षिप्यते। ईश्वरस्य जगत्स्रष्टृत्वप्रतिपादकसमन्वयो बुद्धि पूर्वकारी पुरुषः 'स्वाहितं[11] न करोतीति' न्यायेन विरुध्यते नवेति[12] संशये, ईश्वरो न जगत्स्रष्टा। तथा सति न संसृतिं स्वाहितां रचयेत्, बुद्धिपूर्वकादिष्टदर्शनात् सर्वस्य[13] सर्वशक्तेः स्वाहितसंसारस्रष्टृत्वन्न सम्भवति। नहि बुद्धिपूर्वकारीस्वतन्त्रः स्वयमेव बन्धनागारं कृत्वा प्रविशति। अत ईश्वरस्य जगत्स्रष्टृत्वन्नोपपद्यत[14] इति। प्राप्ते ब्रूमः

---

१. ग० मा० 'न तदापत्तिरिति' इति पाठः।
२. ग० मा० 'जातिसांकर्यस्य दोषात्वाभावात्' इति पाठः।
३. ग० मा० 'कल्पनात्' इति पाठः।
४. ग० मा० 'अपरोक्ष' इति पाठः।
५. ग० मा० 'सद्रजताकारेण' इति पाठः।
६. घ० मा० 'साक्षिचैतन्यानासक्तेः' इति पाठः।
७. घ० मा० 'रजतम्' इति पाठः।
८. घ० मा० 'शरीरस्य' इति पाठः।
९. ग० मा० 'शक्तित्वाज्ञानदोषसहकृत' इति पाठो नास्ति।
१०. ग० मा० 'भवति' इति पाठः।
११. ग० मा० 'स वाहितं' इति पाठः।
१२. घ० मा० 'नेति' इति पाठः।
१३. घ० मा० 'ईश्वरो न जगत्स्रष्टा तथा सति न संसृष्टिं स्वाहितां रचयेत्बुद्धिपूर्वकारिष्टदर्शनात्' इति वाठो नास्ति।
१४. ग० मा० 'प्रतिपादक समन्वयः' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ईश्वरो जीवतो भिन्न उपाधिवशगो भवेत् ।
[1]अतस्संसारधर्मिणाञ्जीव एव व्यवस्थितिः ॥

जीवेशयोर्हि नात्यन्तमभेदः किन्त्वौपाधिको भेदः । [2]स [3]वोपाधिप्रतिबिम्बभूतो जीव एव भवति ।[4] ईशस्य जगत्स्रष्टृत्वाद्दर्पणादिगतश्यामलत्वं मुख इव । अतस्स्रष्टृत्वे न कोऽपि दोष इति ।

उपसंहारदर्शनाधिकरणम्

उपसंहारदर्शनान्नेति[5] चेन्न क्षीरवद्धि ॥८॥

'सदेव सौम्येदमग्र आसीत्, (छा० ६।२।१) इत्यादिसहायस्य जगत्कर्तृत्वोपादानत्वप्रतिपादकं वाक्यमसहायस्य कर्तृत्वोपादानत्वेनोपपद्यत[6] इति न्यायेन विरूध्यते नेति सन्देहे । पूर्वः पक्षः

उपादानत्वकर्तृत्वे सहायरहिते यदि ।
इष्येते तर्हि जगतो वैचित्र्यन्नैव सिध्यति[7] ॥
अदृष्टान्तस्य सिद्धेश्चेत्प्रलये तदभावतः
नैव वैचित्र्यसिद्धिःस्यात्परिशक्तेश्च वर्जनात् ॥

असहायं ब्रह्म यदि जगदुपादानं स्यात्तदा जगतो वैचित्र्यन्न स्यात् कारणवैचित्र्यं बिना तदनुपपत्तेः । न चादृष्टवैचित्र्यात्तद्वैचित्र्यमुपपद्यत इति वाच्यम् ।[8] प्रलयकालेऽदृष्टस्याप्यभावात् । न च सूक्ष्मात्मना तस्य तदापि[9] व्यवस्थानमिति वाच्यम् । अपरिपक्वस्य तस्य[10] कारणत्वेन सर्वदा कार्योत्पत्तिप्रसङ्गेन[11] परिपाकस्य सहकारित्वेन प्रलये च परिपाकाभावेन तस्य वैचित्र्याभावात् । अतस्सहायकस्य कारणत्वन्नोपपद्यत इति ।

सिद्धान्तस्तु

असहायस्य दुग्धस्य दधिभावो यथेष्यते ।
तथैव चेतनस्यापि जगद्भावो भविष्यति ॥

---

१. ग० मा० 'संसारिधर्मणाम्' इति पाठः ।
२. ग० मा० 'स' इति पाठो नास्ति ।
३. घ० मा० 'प्रतिबिलम्बभुते' इति पाठः ।
४. ग० मा० 'अत ईशस्य' इति पाठो नास्ति ।
५. घ० मा० 'चेतिरवद्धि' इति पाठः ।
६. ग० मा० 'उपादानत्वे नोपपद्यत' इति पाठः ।
७. ग० मा० 'उपादानत्वे नोपपद्यते' इति पाठः ।
८. ग० मा० 'सृष्टेः प्राक्' इति पाठः ।
९. घ० मा० 'प्य इति पाठो नास्ति ।
१०. घ० मा० 'स्यातस्य' इति पाठः ।
११. ग० मा० 'तत्' इत्यधिकः पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आतञ्चनाद्यपेक्षावद्दृष्टापेक्षयाऽत्र[1] वै ।
परिपाकश्च[2] तस्यापि वाच्यः कालादिहेतुतः ।।

असहायोऽपि परमेश्वरः जगत्सृजति । असहायं क्षीरं यथा दध्यादिकञ्जनयति । न च तत्रातञ्चनाद्यपेक्षास्तीति वाच्यम् । आतञ्चनाद्यभावेऽपि[3] क्षीरस्याकालपरिपाकवशेन कार्यविशेषान्नात्र परिणामस्य दृष्टत्वात् । न च तत्र कालविशेष एव सहकारीति वाच्यम् । इहापि कालविशेषस्यादृष्टादेश्च सहकारित्वसम्भवात् । न चादृष्टस्य परिपाकाभावः । अगत्या प्रलयवादिभिस्सर्वैरपि कालादेः कर्मपरिमाकत्वस्य वक्तव्यत्वात् ।[4] अतोऽसहायस्य समन्वयो न न्यायविरुद्धः । असहायस्य कर्तृत्वमपि देवादीनां यथा कर्तृत्वं तद्वदेवोपपादनीयमिति ।

कृत्स्नप्रसक्त्यधिकरणम्

कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा[5] ।।६।।

निरवयवं ब्रह्म जगत्कारणमिति वदन्तमन्वयो निरवयवो नोपादानं कृत्स्नप्रसक्त्यादिदोषप्रसङ्गादिति न्यायेन विरुध्यते नेति संशये पूर्वः पक्षः

नोपादानं[6] प्रपञ्चस्य ब्रह्मावयववर्जनात् ।
कार्त्स्न्येन परिणामे हि ब्रह्माभाव प्रसज्यते ।।

ब्रह्म तावदुपादानमिति वदता वक्तव्यम्, किमेकदेशेन परिणमते उत कार्त्स्न्येनेति । यद्येकदेशेन तर्हि सावयवत्वापत्त्या 'निष्कलं निष्क्रियम्' (श्वे० उ० ६।१९) इत्यादिश्रुतिविरोधापत्तेः । यदि कार्त्स्न्येन तर्हि ब्रह्माभावप्रसङ्गः । नच विवर्तवादे नायं दोषः, परिणामवादमाश्रित्य पूर्वपक्षः प्रवृत्तेः, त्रिवर्तासंभवेन वा । विवर्ता हि ज्ञानसमकालिकाः[7] शुक्तिरजतादयो दृष्टाः । वियदादीनाञ्चोत्पत्तिकाले[8] कस्यचिज्ज्ञानं सम्भवति जीवानां शरीररहितत्वादीश्वरस्य चाभ्रान्तत्वात् । अत परिणामवाद एवाश्रयणीयः, ब्रह्मणो जगत्कारणत्वबोधकश्रुतिप्रामाण्यमङ्गीकुर्वीत न चानुपपन्न इत्युक्तम् ।

---

१. ग० मा० 'आतश्चन्विद्यभावेऽपि' परिणामस्य दर्शनात् इति पाठः ।
ख० यथा हि लोके क्षीरं जलं वा स्वयमेव दधि हिमप्रभावेन परिणमते, अनपेक्ष्य बाह्यं साधनं तथेहापि भविष्यति (शां० भा० पृ० ६०२) तस्मादेकस्यापि ब्रह्मणो विचित्रशक्तियोगात्, व० क्षीरादिवद्विचित्रपरिणाम उपपद्यते । (शां० भा० पृ० ६०३) ।
एकस्मादपि च विचित्रशक्तेः कारणादनेककार्योत्पादो दृश्यते ।
(भा० २।१।२४)
२. ग० मा० 'अदृष्टपरिपाकश्च' इति पाठः ।
३. आञ्चनं नाम = दधिजोडनसाधनम् ।
४. ग० मा० 'एवमसहायस्य कर्तृत्वमपि देवादीनां यथा कर्तृत्वंतद्वदेवोपपादनीयम्' इति पाठः ।
५. ख० मा० 'शब्दको वा' इति पाठ ।
६. ग० मा० 'नापादानमिति' इति पाठः ।
७. ख० मा० 'वित्रज्ञा सम कालीनाः' इति पाठः ।
८. ग० मा० 'नोत्पत्तिकाले' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सिद्धान्तस्तु

वेदवाक्यात्तु[1] यत्प्राप्तं वैदिकं तत्तथैव हि[2]।
अङ्गीकार्यन्नचान्यस्मिन् बाधकं क्रमतेऽत्र वै ॥

विवर्तवाद एवास्माभिरिष्यते, तत्र चोक्तौ दोषो नैव प्रसरति। न च विवर्तस्य[3] ज्ञानकसत्ताकत्वनियमः द्वैविध्योपपत्तेः, यथा परिणामवादे[4] सुखादयो ज्ञातैकसत्ताकाः घटादयोऽज्ञातसत्ताका अपि तद्वदुपपत्तेः। परिणामवादेऽपि श्रुतिगम्यार्थस्य यथा श्रुत्युपपादनीयत्वेन तत्रापि बाधकस्य तर्कस्यानवतारात् प्रधानवादेऽपि निरवयवत्वात्परिणामानुपपत्तिदोषस्तुल्य एव। नैयायिकादिमते परमाणूनां[5] निरवयवत्वे, नाव्याप्यवृत्तिसंयोगाद्यनुपपत्त्या द्व्यणुद्यारम्भानुपपत्तिः[6]। तस्मादस्मदीयं दर्शनमेव समीचीनमिति।

सर्वोपेताधिकरणम्

सर्वोपेता च तद्दर्शनात् ॥१०॥

निरवयवस्य ब्रह्मणो विचित्रशक्तियोगात्कृत्स्नप्रसक्त्यादिदोषपरिहारो वक्तव्यस्स च न सम्भवति, शरीरेन्द्रियरहितस्य शक्तिमत्वादर्शनाद्; अतो न परमेश्वरः परिणामो, विचित्रशक्तिप्रतिपादकसमन्वयानुपपत्तिश्चेति प्राप्ते ब्रूमः।

---

१. ग० मा० 'यत्प्राप्तं वेदवचनात्' अंगीकार्ये नवान्यश्चबाधकं क्रमते श्रुतौ इति पाठः।

२. घ० मा० 'तन्न श्वंवहि' इति पाठः।

३. अतात्विकोऽन्यथाभावस्य विवर्तवादोऽभ्युपगम्यते। स चापरित्यक्तपूर्वरूपस्य रूपान्तरप्रकारकप्रतीतिविषयत्वम् (वै० सा० द० पृ० २) वेदान्तसिद्धान्ते परब्रह्मणि सर्वस्य प्रपञ्चजातस्य विवर्तः, पूर्वरूपापरित्यागेनासत्यनानाप्रतिभासः, यथा शुक्तिकायां रजतस्य रज्वां वा सर्पप्रतीतिः। अत एव सिद्धान्ते सन्दृश्यमानस्य सकलप्रपञ्चस्य परिणाम्युपादानकारणं माया विवर्तोपादानकारणञ्च ब्रह्मेत्यप्युपगम्यते।

४. अवस्थितस्य द्रव्यस्य पूर्वधर्मनिवृत्तौ धर्मान्तरोत्पत्तिः '(वा० भा० ३।२।१६) सतो द्रव्यस्य पूर्वगुणनिवृत्तौ गुणान्तरोत्पत्तिः, यथा पयसः परिणामो दधि विद्यमानस्य क्षीरस्य पूर्वरसतिरोभावोऽऽम्लरसात्मकगुणान्तरस्याविर्भावादिति' (गौ० वृ० ३।८७) प्रकृतेरन्यथाभावो विकारः यथा परिणामतापसंस्कार दुःखम् (पात० सू० २।१५) परिणामतः सलिलवत् (सां० का० १६) तथा हि वारिदविमुक्तमुदकमेकरसमपि तत्तन्भूमिविकारान्नासाद्य नारिकेलतालीविल्वचिरविल्वतिन्दुकामलककपित्थफलरसपरिणामान्मधुराम्लतिक्तकटुकषायतया विकल्पते, एवमेकैकगुणसमुद्भवात् प्रधानं गुणमाश्रित्याप्रधानगुणाः परिणामभेदान् वर्णयन्ति' (सां० का० श्लो० १६) वेदान्तिस्तु 'पूर्वरूपपरित्यागे सति नानाकारप्रतिभासः, यथा क्षीरस्य दधिप्रतिभासः....(अ० वे० सा० भा० भू० पृ० १३७), परिणामेऽमृतोपमम्' (गी० १८।३७)।

५. मूर्तत्वे सति निरवयवत्वं परमाणुत्वम्। 'परं वा त्रुटेः' (गौ०सू०४।२।१७) त्रुटेः परं यदतिसूक्ष्मः तत्परमाणुः। वा शब्दोऽवधारणे। अथवा त्रुटेरवयवस्तदवयवो वा परमाणुरिति विकल्पार्थो वा शब्दः। त्रुटेः परं सूक्ष्मं परमाणुः, त्रुटावेव वा विश्रामः, इति विकल्पोऽभिमतः (गौ० सू० ४।८२) अवयवविभागस्यानवस्थानात् द्रव्याणामसंख्येयत्वात्त्रुटिनिवृत्तिरिति (वा० भा० ४।२।१७) यस्मान्नाल्पतरमस्ति, यः परमोऽल्पर तत्र निवर्तते, यश्च नाल्पीयोऽरित तं परमाणुं प्रचक्षत इति (वा० भा० ४।२।१६) जालसूर्यमरीचिस्थं यत्सूक्ष्मं दृश्यते रजः। तस्य षष्ठतमो भागः परमाणुः स उच्यते। चरमस्तु विशेषाणामनेकासंयुतः सदा। परमाणुस्स विज्ञेयो नृणामैक्यभ्रमो यतः ॥ (भाग० ३।१२।१) परमाण्ववच्छिन्नकालविशेषः, यथा स काल परमाणुर्वै यो भुङ्क्ते परमाणूनाम्। (भाग० ३।११।५)।

६. घ० मा० 'णुकायांरम्या' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कार्यान्यथानुपपत्ति[1]कल्पनया[2] यथा कार्यं कल्पनीयतया, परमेश्वरस्य च सर्वं कर्मा सर्वं काम इत्यादिश्रुत्या सर्वकार्यत्वा(त्य)वगमेन स्वप्नदृशो जीवस्य नानास्वाप्निकपदार्थसृष्ट्यनुकूलशक्तिवच्च सर्वशक्तिमत्त्वे बाधकाभावादिति।

प्रयोजनवत्त्वाधिकरणम्

न प्रयोजनवत्त्वात् ॥११॥

सर्वज्ञस्येश्वरस्य जगत्कर्तृत्वं वदन्तं समन्वयः प्रेक्षापूर्वकारी प्रयोजनमनुद्दिश्य न करोतीति [3]न्यायेन विरुध्यते नेति संशये पूर्वः पक्षः। प्रेक्षावतां प्रवृत्तिस्सर्वापि प्रयोजनपूर्विकैवेति[4] दृष्टा, न चेश्वरस्य प्रयोजनोद्देशोऽस्ति, आप्तकामत्वश्रुतिविरोधाद्, अतो न्यायविरोध इति। सिद्धान्तस्तु-सुखितस्य हासे दुःखितस्य रोदने।[5] आधुनिकानामध्यापकानामर्थानुकरणम्[6] हस्तचेष्टादौ प्राणक्रियादौ प्रयोजनं विनापि प्रवृत्तिदर्शनेन व्यभिचारान्नोक्त न्यायेन समन्वय बाध इति।

वैषम्यनैर्घृण्याधिकरणम्

वैषम्यनैर्घृण्येन सापेक्षत्वात्तथा हि दर्शयति ॥१२॥

परमेश्वरस्य जगत्कर्तृत्वं वदन्समन्वयो, विषयं कुर्वतः पक्षपातित्वम् मारकस्य[7] निर्घृणत्वमिति न्यायेन विरुध्यते नेति संशये विरुध्यत इति प्राप्तम्। कुतः

सुखिनः कुरुते कांश्चिद्दुःखिनोऽन्यांस्तथैव च
प्रलये सर्वसंहारस्ततस्तद्दोषभागसौ।[8]

स्वतन्त्रस्सन् यो हि कस्मैचित्सुखं प्रयच्छति, कस्मैचिद्दुःखं कञ्चित्[9] पुरुषञ्च संहरति तस्य पक्षपातित्वन्निर्घृणत्वञ्च लोके प्रसिद्धम्। परमेश्वरस्य तथा कुर्वाणस्य तदुभयं प्रसज्येत। तच्च निरवद्यत्वश्रुतिविरुद्धम्। अतो न्यायविरुद्धस्समन्वय इति प्राप्ते ब्रूम न विरुध्यत इति। कुतः

तत्तत्कर्मानुसारेण दीक्षां[10] कुर्वति राजनि।
न पक्षपातिता नापि नैर्घृण्य विद्यते यतः॥

---

१. ग० मा० 'कार्यानुपत्पतिकल्पानां शसीना' इति पाठः।
२. घ० मा० 'कल्पनाय' इति पाठः।
३. परितृप्ताद्ब्रह्मणो जगत्सर्गवादिसमन्वयस्य ब्रह्म न, बिना प्रयोजनेन सृजति, अभ्रान्तचेतनत्वात्सम्मतवदिति न्यायेन बाध सन्देहे पूर्वत्र सर्वशक्तित्वं ब्रह्मेत्युक्तम् (वे० क० त० पृ० २४६) तस्मात्प्रेक्षावत्प्रवृत्तिः प्रयोजनवत्तया व्याप्ता तदभावेऽनुपपन्ना ब्रह्मोपादानतां जगतः प्रतिक्षिपतीति प्राप्तम्। (भामती० पृ० ६१६)।
४. ग० मा० 'उद्देश' इति पाठः।
५. घ० मा० 'रोधने' इति पाठः।
६. घ० मा० 'समर्थानुकरण' इति पाठः।
७. घ० मा० 'मार कस्य' इति पाठः।
८. घ० च० मा० 'प्रथमं सर्वसंहारं ततस्तद्दोष युज्यते' इति पाठः।
९. घ० मा० 'कथचित्' इति पाठो नास्ति।
१०. ग० च० मा० 'शिक्षां' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

राजा हि चौरकुलं मारयन्नपि[1] निर्घृण इति प्रसिद्धानप्यपराधीनः दीक्षयंस्वस्वकार्यनिर्वाहकेभ्यः सुखं प्रयच्छन्न[2] पक्षपातीति ।[3] एवमीश्वरोऽपि तत्तत्कर्मानुसारेण सुखादिकुर्वाणो न पक्षपातित्वादि प्रतिपद्यते । तथा च श्रुतिः 'एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्नीषत' (कौ० ब्रा० उ० ३।८) इत्यादिपुण्यं पुण्येन कर्मणा भवति पापः पापेन च (बृ० ३।२।१३) । इत्याद्यनादित्वाच्च संसारस्य पूर्वकर्मापेक्षत्वमीश्वरस्योपपद्यते । अनादित्वञ्च संसारस्यानेन जीवेनेत्यादिश्रुत्या अवगतम् । जीवत्वस्य प्राणसम्बन्धस्यानादिसिद्धस्य बोधनात् । भूतसम्बन्धस्यास्ति 'अग्निहोत्रहवणिवद्गुण लोकेऽपि'[4] न्यायेन स्वीकार्यत्वात् । अतो न न्यायविरुद्धस्समन्वय इति ।

सर्वधर्मोपपत्त्यधिकरणम्

सर्वधर्मोपपत्तेश्च ॥१३॥

निर्गुणस्य जगदुपादानत्वं वदन्समन्वयो 'यन्निर्गुणं तन्नोपादान' मिति न्यायविरुद्धो नेति संशये

उपादानं गुणाभावे वस्तुनस्स्यात्कदाचन ।
अतो ब्रह्म जगद्योनिर्नैव स्यान्निर्गुणत्वतः ॥

निर्गुणस्य वस्तुनो लोकेऽनुपादानत्वदर्शनेन ब्रह्मणश्च निर्गुणत्वेनोपादानत्वानुपपत्तेः । तद्बोधकस्समन्वयोऽन्यथा नैवेति प्राप्ते ब्रूमः

उत्पत्तिकाले हि घटो निर्गुणोऽपीष्यते परै[5] ।
रूपादिप्रत्युपादानं तथेहापि भविष्यति[6] ।
विवर्तवादस्वीकारान्न दोषोऽत्रानुषज्जते ।
रक्तरूपेऽपि नीलादेरारोपस्योपलब्धितः ॥

नीरुपस्यापि घटस्य रूपादिकं प्रत्याद्यक्षणावच्छिन्नस्योपादनत्वस्वीकारात् । विवर्तवादे दोषाभावाच्च रात्रौ रक्ते नीलभ्रमस्य नैयायिकमतरीत्या शब्दे गुणे द्रव्यभ्रमस्य स्वीकारात् काल्पनिकप्रपञ्चानुसारिगुणानाञ्च ब्रह्मणि स्वीकाराच्च न स्मृतिन्यायविरुद्धस्समन्वय इति ।

इति श्रीमत्स्वयंप्रकाशानन्दस्य कृतिषु वेदान्तनयभूषणे द्वितीयाध्यायस्य प्रथमः पादः[7] ।

---

१. घ० मा० 'मारयन्नपि' इति पाठो नास्ति ।
२. घ० मा० 'प्रयच्छन्पक्षपाति' इति पाठः ।
३. ग० मा० 'प्रसिद्ध' इति पाठो नास्ति ।
४. ग० मा० 'अपीति न्याय' इति पाठः ।
५. परैः वैशेषिकनैयायिकादिभिर्घटादीनामुत्पत्तिकाले' 'क्षणमुत्पन्नं द्रव्यं निर्गुणं निष्क्रियञ्च तिष्ठति' इत्यभ्युपगम्यते ।
६. ग० मा० 'परैरुत्पत्तिकाले हि घटो निर्गुण इष्यते ।
उपादानञ्च रूपादेस्तथेहापि भविष्यति । इति पाठः ।
७. ग० मा० 'श्रीमधा दक्षिणामूर्तये नमः इति बिशेषः पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वितीयाध्याये द्वितीयः पादः

रचनानुपपत्त्यधिकरणम

रचनानुपपत्तेश्च नानुमानम् ॥१॥

पूर्वस्मिन्पादे स्मृतिन्यायविरोधौ वेदान्तसन्वये परिहृतः। अस्मिंश्च पादे सांख्यादिमतस्याभासत्वं व्यवस्थाप्यते।

तत्र सांख्याः जगत्कारणत्वं प्रधानस्य येनानुमानेन[1] वदन्ति तदनुमानस्याभासत्वं व्युत्पाद्यते प्रथमाधिकरणे। यत्कार्यं यदन्वितं प्रतीयते तदुपादानकं यथा मृदन्वितो घटः[2] मृदुपादानकः,[3] सुखदुःखमोहान्वितस्य जगतश्च सुखदुःखमोहात्मकं प्रधानमुपादानम्, तच्च प्रधानचेतनाधिष्ठितं सर्वदै स्वकार्यं करोति। यथा[4] वत्सविवृध्यर्थं क्षीरं प्रवर्तते। इह तु पुरुषस्य भोगापवर्गार्थं प्रवृत्तिसम्भवादिति[5] तन्न

अचेतनमुपादानमनपेक्ष्यैव चेतनम्।
कार्यमुत्पाद्यं यदृष्टं तदभावे कथं भवेत् ॥

मृदादिकं हि घटाद्युत्पादनं तत्कुलालादिचेतनाद्यपेक्षमेव दृष्टम्। अचेतनस्य च प्रधानस्य चेतनाधिष्ठानमन्तरा कार्यंजनकत्वानुपपत्तेरधिष्ठाता चेतनोऽभ्युपगन्तव्यः। न च चेतनस्याप्यसङ्गस्य कथं तत्प्रेरकत्वमिति वाच्यम्। सोपाधिकस्य तदुपपत्तेः वत्सवृध्यर्थञ्च क्षीरादिप्रवृत्तिवत्सचूषणादिप्रयुक्तैवेति तत्रापि चेतनः सिद्धः। परस्परविरुद्धञ्च सांख्यमतं क्वचिद्दशेन्द्रियाण्यनुक्रमन्ते[6], क्वचिदेकादश, अतो हेयमिदं दर्शनमिति।

महद्दीर्घाधिकरणम्

महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् ॥२॥

प्रासङ्गिकमिदमधिकरणञ्चेतनाज्जगदुत्पत्ति वदन्समन्वयः कारणगुणः[7] कार्यं[8] स्वमानजातीयं गुणान्तर-

---

१. असदकरणादुपादानग्रहणात्सर्वसम्भवाभावात्
शक्तस्य शक्यकरणात्कारणभावाच्च सत्कार्यम्। (सांख्यकारिका ९, पृ० १४६)

२. घ० मा० 'मृदुत्वापादानक' इति पाठः।

३. घ० मा० 'मोहान्वितजगत' इति पाठः।

४. द्रष्टव्यम् (सां० का० ५७ पृ० ३०५)।

५. घ० मा० 'मतम्' इति पाठः।

६. घ० मा० 'क्वचित्प्रेद्रियाण्यनुक्रम्यन्ते' इति पाठः।

७. (क) कारणं हि तद्भवति, यस्मिन्सति यद्भवति, यस्मिंश्चासति यन्न भवति (न्या०वा० १, पृ० २४) यस्य कार्यात्पूर्वभावो नियतोऽनन्यथासिद्धश्च तत्कारणम् (त०भा०पृ० २) कार्याव्यवहितपूर्वसमयवर्तित्वतद्वतिव्यापारकत्व एतदन्यतर रूपनियतो धर्मः (न्या०सि०दी० पृ० ७५)। कार्यव्यवहितपूर्वक्षणवृत्तिस्वस्वव्यापारान्यतरकत्वम् (कि०स्मृ० पृ० १८६) कार्याव्यवहितपूर्वक्षणावच्छिन्नकार्याधिकरणदेशनिरूपिताधेयतावदभावप्रतियोगितानवच्छेदकधर्मवत्व। (वाक्य १, पृ० ११)।

(ख) कारणगुणेन कार्ये ये गुणा उत्पद्यन्ते ते कारणगुणपूर्वकाः रूपादय उपलक्ष्यन्ते। (मु०गु० पृ० १९३)।

८. प्रागभावप्रतियोगित्वम् (त०सं० पृ० ११) यथा घटपटादिकार्यजातं सर्वं प्रागभावाभिन्नमनित्यजातं कार्यं भवति। स्वकारणे समवायः प्रागसतः सत्तासमवायो वा कार्यत्वमित्येके। तदयुक्तम्। प्रध्वंसे तदभावात्। तस्मात्कारणाधीनः स्वात्मलाभः कार्यत्वमिति लक्षणम् (न्या० क० १८)।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मारभत इति न्यायेन विरुध्यते नेति सन्देहे। शुक्लैस्तन्तुभिराब्धे शुक्लरूप[1]दर्शनात्। चेतनारभ्यता[2] चेत्स्या-ज्जगच्चेतनमापद्यत[3]। शुक्लस्तन्तुभिररभ्यमाणस्य पटस्य शुल्करूपोपलम्भेन कारणगतगुणानां कार्यगतगुणारम्भ-कत्वनियमा चेतनस्य ब्रह्मण उपादानत्वे चेतनगतगुणस्य चेतन्यस्य स्वजातीयचैतन्यारम्भकत्वप्राप्तौ[4] जगच्चेतनं स्यादिति। प्राप्ते ब्रूमः

परमाणौ स्थितस्यापि द्वेणुके नैव दृश्यते[5]।
गुणस्यारम्भकत्वं तन्नियमो नैव सम्भवि ॥

परमाण्वारब्धद्वयणुके परमाणुगपारिमाण्डल्यपरिमाणस्य स्वजातीयस्य पारिमाण्डल्यार-म्भकत्वात्[6] द्वैणुकगतह्रस्वत्वस्य[7] च स्वारब्धेऽणुके स्वजातीयह्रस्वत्वानारम्भकत्वाच्चोक्तनियमस्य व्यभिचारेण चेतनारब्धेऽपि[8] चैतन्यस्यारम्भकत्वाभावान्न[9] न्यायबाध्यसमन्वयः। न च विशेषगुणविषयोऽयं[10]नियम इति वाच्यम्। विशेषगुणत्वस्यैव निर्वक्तुमशक्यत्वाच्छक्यत्वे वोक्तनियमस्याप्रयोजकत्वाच्चैतन्यस्य प्रपञ्चे-उपपादित-त्वाच्च। अतो[11] ब्रह्मोपादानकत्वे प्रपञ्चस्य न किञ्चिद्बाधकमिति।

परमाणुजगत्कारणत्वाधिकरणम्

उभयथापि न कर्मातस्तदभावः ॥३॥

अधुना परमाणुकारणवादस्य वैशेषिकाद्यभिमतस्याभासत्वं व्युत्पाद्यते। तेषां मते परमाणवस्सम-वायिकारणं[12] परमेश्वरस्य सिसृक्षावशात्परमाणौ क्रिया,[13] तथा च परमाणोस्संयोगस्तदसमवायि-

१. ग० मा० 'पटेशोबलस्य दर्शनात्' इति पाठः।
२. ग० मा० 'चेतनारम्यमेतच्चेज्जगचेतनमापतेत्' इति पाठः।
३. घ० मा० 'घत' इति पाठो नास्ति।
४. ग० मा० 'समान' इति पाठः।
५. ग० मा० 'तन्मते' इति पाठः।
६. ग० मा० 'अनारम्भकत्वात्' इति पाठः।
७. ग० मा० 'द्वयणुकारव्येत्र्यणुके' इति पाठः।
८. घ० मा० 'अपि' इति पाठो नास्ति।
९. ग० मा० 'अनायायात्' इति पाठः।
१०. 'द्रव्याश्रयगुणवान् संयोगविभागेष्वकारणमनपेक्ष' इति गुणलक्षणम् (वै० १।१।२६) तल्लक्षणञ्च गुणत्वमेव। तच्चात्र समवायिकारणवृत्तिनित्यवृत्तिसत्तासाक्षात् व्याप्यजातिमत्वम्, कार्यासमानाधिकरणं वा कर्मावृत्तिजातिमत्वं वा (वै० उ० ७।१।१, पृ० २८१।
११. विशेष गुणाश्च : बुद्ध्याषट्कं स्पर्शान्ताः स्नेहः सांसिद्धिको द्रवः।
अदृष्टभावना शब्दाः अमी वैशेषिकाः गुणाः। —(भाषा परिच्छेद ९०–९१)
१२. यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणम् (त०सं० पृ० ८) यथा तन्तवः पटस्य, पटश्च स्वगतरूपादेः समवायिकारणं भवति। यस्मिन् समवायेन सम्बद्धं सत्कार्यमुत्पद्यते तत्' (न्या० बो० पृ० ९) यद्धर्मावच्छिन्नं यद्धर्मावच्छिन्ने समवायेनो त्पद्यते, तद्धर्मावच्छिन्नं प्रति तद्धर्मावच्छिनं समवायिकारणम् इति' (नील० १, पृ० १७) तन्तुषु समवायेन सम्बद्धं सत्पटात्मकं कार्यमुत्पद्यते। अत एव तन्तवः पटस्य समवायिकारणमिति।
१३. धातूपनीतफलानुकूलसजातीयविजातीयव्यवहारप्रचयः (त० प्र० ख० ४, पृ० ५०) यथा—चैत्रः तण्डुलं पचतीत्यादौ पचनादिक्रिया।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कारणकं[1] द्वैणुकं जन्यते। एवं त्रिभिर्द्व्यणुकैस्त्र्यणुकं तद्गतबहुत्वात्त्र्यणुके महत्त्वं कारणगतरूपादिकञ्च कार्ये तत्सजातीयरूपारम्भकम्। एवं क्रमेण पृथिव्यादीनां चतुर्णां भूतानामुत्पत्तिः। उपादानोपादेययोश्च सम्बन्धस्समवायः[2]। न च कर्मणस्तत्त्वं सम्भवति। कर्मणस्सादित्वेन तस्यापि कारणापेक्षत्वात्। न च प्रयत्नस्तत्र कर्मणः[3] कारणं तदानीं शरीराभावेन ज्ञानाद्यभावे प्रयत्नानुपपत्तेः। नाप्याभिघात तस्यापि कर्मजन्यत्वेनानवस्थापातान्न चान्यदप्यन्यत्सम्भवति, तस्यापि सर्गाद्यकाले सम्भवात्। न चादृष्टवदात्मसंयोगात् कर्मोत्पत्तिस्तस्यापि कर्मजन्यत्वात्। तस्य सदातनत्वे तद्धेतुक[4] कर्मणस्सदातनत्वापत्त्या वारम्भकसंयोगस्यापि सदातनत्वप्रसङ्गात्। एतेन प्रलयवदात्मसंयोगेश्वरस्तथेति[5] परास्तम्।

एवञ्च प्रलयहेत्वनिरूपणात्प्रलयाभावः। किञ्च कार्यकारणयोरसमवायोऽपि निरूपयितुमशक्यस्तत्र प्रमाणाभावात्। न तावत्प्रत्यक्षं तद्ग्राहो प्रत्यक्षानुपलब्धेः। नाप्यनुमानं तथाप्यलिङ्गाभावात्। न च नीलो घट इत्यादिविशिष्टज्ञानं नीलवैशिष्ट्यावगाहिनीलप्रकारत्वात्संयोगेन नीलप्रकारकभ्रमवददतिति वाच्यम्। स्वरूपसम्बन्धमादाय[6] तस्यार्थान्तरग्रस्तत्वात्। अभावेऽपि [7]वैशिष्ट्याख्यस्यातिरिक्तस्य सिद्धयापत्तेः। समवायस्य चैकत्वे रूपवान्वायुरिति[8] प्रमाणत्वापत्तेः। कार्यकारणयोर्मृद्धट इत्यभेदप्रत्ययबलेन तादात्म्यस्यैव सम्बन्धत्वकल्पनान्न समवायाभ्युपगमः। किञ्च समवायस्यासम्बन्धस्य सम्बन्धत्वानुपपत्तेस्सम्बन्धान्तराभ्युपगमेऽनवस्थानाच्च। परमाण्वादिनिराकरणप्रकारश्च विस्तरभयान्नेह लिख्यते। अतः परमाणुकारणवादोऽनुपपन्न इति।

समुदायाधिकरणम्

समुदाय उभयहेतुकेऽपि तदप्राप्ति ॥४॥

इतः परं बौद्धमतं निराक्रियते। तत्र बुद्धाचार्यस्य[9] चत्वारः[10] शिष्याः सौत्रान्तिकवैभाषिकयोगाचार-

१. समवायस्वसमवायिसमवेतत्वैतदन्यतरसम्बन्धेन समवायिकारणवृत्तिकारणत्वम् (ल० व० पृ० ४) समवायसम्बन्धावच्छिन्नकार्यतानिरूपिता या समवायस्वसमवायिसमवेतत्वैतदन्यतरससम्बन्धावच्छिन्ना कारणता तदाश्रयत्वम्' (न्या० वो० प० १, पृ० १०) (वाक्य १, पृ० ११) (वै० उ० १०।२।३) कार्येण कारणेन वा सहैकस्मिन्नर्थे समवेतत्वे सति कारणं यत्तत्, यथा तन्तुसंयोगः पटस्यासमवायिकारणं, तन्तुरूपञ्च पटगतरूपस्यासमवायिकारणम्।

२. ग० मा० 'तयोश्चात्यन्तभेद इति वै पदार्थम्यवास्थितिरतमते सर्गपकाले परमाणुष्वारम्भकः संयोगहेतुः कश्चन वक्तव्यः' बक्तव्यः' इत्यधिकः पाठः।

३. घ० मा० 'कर्मण' इति पाठो नास्ति।

४. क० मा० 'तज्जेतुक' इति पाठः।
ख० मा० 'तद्धेतु कर्मणोऽपि' इति पाठः।

५. घ० मा० 'प्रयत्न' इति पाठः।

६. ग० मा० 'अर्थान्तरत्वाभावेऽपि वैशिष्टस्यातिरिक्तस्य सिद्धयापत्तेः' इत्यधिकः पाठः।

७. घ० मा० 'वैशिष्राख्य' इति पाठः।

८. ग० मा० 'प्रतीतेः' इति पाठः।

९. गुरुणा बुद्धमुनिना भावनाचतुष्टयं बाह्यार्थस्य शून्यत्वञ्चाङ्गीकृतं कथमिति ? पर्यनुयोगस्य कारणात् केषाञ्चिद्योगाचार प्रथा बुद्धमुनिशिष्येषु केषाञ्चिद्वैभाषिक इति सञ्ज्ञा। एषा हि तेषां नाम निरुक्तिः। सत्स्वपि बाह्येषु रूपादिषु स्कन्धेष्वान्तरेषु सुखादिषु च तेष्वनास्थामुत्पादयितुं 'सर्वशून्य' मिति प्राथमिकान् शिष्यानचीकथद्भगवान् बुद्धः। अनन्तरञ्च विज्ञानमात्रग्रहाविष्टान् द्वितीयं विज्ञानमेवैकं सत्' इदमुपदिष्टवान्। अन्यान् तृतीयानुभयमपि सत्यमित्यास्थितान्' 'विज्ञेयमनुमेय' मित्युपदिष्टवान्। सेयं विरुद्धाभाषेति वदन्तीऽये विनेया वैभाषिका इति प्रथिता। काञ्चिच्छिष्यानेवमाह भगवान् गुरुः सूत्रान्तं पृच्छतां भवतां मया तदन्तमेव कथितम्। भवन्तश्च सूत्रस्यान्तमेव पृष्टवन्तः, अतो यूयं सौत्रान्तिका भवत इति भगवताभिहितत्वात्सौत्रान्तिका इति प्रथिताः। क्षणस्वसत्ता सा व्याप्यतया-अस्त्यस्येति क्षणिकः क्षणमात्रास्थायीति यावत्। बहिर्भवः बाह्यः स चासावर्थश्च बाह्यार्थः। बाह्यार्थं क्षणिकमिति वदन्ति ते क्षणिकबाह्यार्थवादिनः। (अ०ब्र०सि०, पृ० ९१)।

१०. घ० मा० 'त्रय शिष्याः' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

माध्यमिकाश्चेति। तत्र तत्तच्छिष्यबुध्यनुसारेण[1] चत्वारस्सिद्धान्ता उक्ताः[2]। तत्र माध्यमिकं प्रति सर्वशून्यवाद उक्तः। योगाचारं प्रति विज्ञानमात्रास्तित्वमुक्तम्। तस्य क्षणिकत्वञ्च सौत्रान्तिकं प्रति बाह्यास्तित्वमुक्तम्। तस्य क्षणिकत्वमतीन्द्रियत्वञ्चोक्तम्। वैभाषिकं प्रति तु यथायोग्यं केषाञ्चित्प्रत्यक्षत्वं केषांचिदिन्द्रियत्वञ्चोक्तम्। तत्रान्त्ययोर्मतयोरस्मिन्नधिकरणे निराकरणमाद्ययोस्त्वग्रिमाधिकरण[3] इति। तत्र सर्वास्तित्वादिनः पृथिव्यादीनि चत्वारि भूतानि भौतिकञ्च रूपादयश्चक्षुरादयश्च। तत्र सर्वत्रापि पृथिव्यादिपरमाणुसंघात एव कार्यं, तथा रूपविज्ञानवेदनासञ्ज्ञासंस्कारसञ्ज्ञिताः शरीररूपेण सहन्यन्त इति मन्यते। तदेतदसमञ्जसम्।

---

१. घ० मा० 'त' इति पाठो नास्ति।

२. वैभाषिक सौत्रान्तिकयोर्मतम्

तथा हि बाह्यसर्वास्तित्ववादिनौ मन्येते द्वौ समुदायौ। बाह्याभ्यन्तरश्चेति। तत्र भूतं भौतिकञ्चाद्यम्। भूतं हि पृथिव्यप्तेजोवाय्वाकाश-धतवः। भौतिकञ्च रूपादिविषयाणि तद्ग्राहकाणि चक्षुरादीन्द्रियाणि च कठिनस्वाभावा पृथिवीपरिमाणवः स्नेहस्वभावा जलपरिमाणवः। उष्णस्वभावास्तैजसाः। चलनस्वभावा वायवीयाः। येषाञ्चतुर्विधानां सर्वकाले संघातेन परमाणुपुञ्जा एवावयवभूताः पृथिव्यादयो जायन्ते। नत्वयवयातिरिक्तोऽवयवी। मानाभावात्। द्विगुणगुरुत्वाद्युपलब्धिप्रसङ्गाच्च।

आभ्यान्तरश्च समुदायश्चित्तचैतात्मकः। तस्य च कारणं स्कन्धपञ्चकम्। रूपस्कन्धः, विज्ञानस्कन्धः, वेदनास्कन्धः, सञ्ज्ञास्कन्धः, संस्कारस्कन्धश्चेति। तत्र रूप्यत एभिरिति रूपमिति व्युत्पत्त्या सविषयाणीन्द्रियाणि रूपस्कन्धः। यद्यपि रूप्यमाणः पृथिव्यादयो बाह्यास्तथापि रूप्यमाणतादशायां कायंस्थत्वादिन्द्रियसम्बन्धाद्वा भवन्त्याध्यात्मिका।।

विज्ञानस्कन्धो द्विविधः। अहमिति प्रत्ययाकार आलयविज्ञानाख्यः। आद्य अयमेवात्मा, 'इदं' इतीन्द्रियादिजन्यो विषयप्रत्ययो दण्डायमानः प्रवृत्तिविज्ञानाख्यः द्वितीय; स चेन्द्रियभेदेन षड्विधः। एतावुभावपि निर्विकल्पकौ क्षणिकौ च सत्वात्। क्षणिकत्वञ्च द्वितीयक्षणवृत्तिध्वंसप्रतियोगित्वम्। तथा च पूर्वपूर्वालयविज्ञानेनोत्तरोत्तरञ्जन्यत इति धानाद्यनन्त प्रवाहः। न च क्षणिकस्यात्मनः कालान्तरभाविभागार्थप्रवृत्त्यनुपपत्तिरिति वाच्यम्, प्रवृत्त्यभावः, किं तत्त्वज्ञानात्प्रागापद्यते। ऊर्ध्वं वा? नाद्यः, क्षणिकत्वभावनां पारिपाकं विना स्थिरत्वगोचरानादिदृढवासनानुच्छेदात्प्रवृत्त्युपपत्तेः। क्षणिस्वभावना च चतुर्विधा। स्वलक्षणभावना, क्षणिकत्वभावना, दुःखभावना शून्नभावना चेति। तत्र शुद्धं वस्तु स्वलक्षणम्। अनेने धर्मधर्मिभावनिरासः। क्षणिकत्वभावनया स्थायित्वनिरासः। नापि द्वितीयः। चतुर्विधक्षणिकत्वभावनापरिपाके तु सोपप्लवालयविज्ञानसन्तानस्योपरमानिरूप्लवसर्वज्ञेश्वरसन्तानान्तर्भावरूपमोक्षप्राप्त्या वा प्रवृत्त्यभावस्येष्टत्वात्। एतेन बन्धमोक्षौ प्रदर्शितो। पूर्वोक्तज्ञानजन्यसुखदुःखादिप्रत्यय वेदनास्कन्धः। 'गौरश्व' इत्यादिशब्दकल्पितप्रत्ययः सविकल्पकः स्कन्धः। एतेषां वासनारूपरागादयः क्लेशा उपक्लेशाश्च मदमानादयो धर्माधर्मो नेति संस्कारस्कन्धः। अत्र विज्ञानस्कन्धश्चित्तम्। इतरे चैत्ताः। चैतत्वं तु रूपस्कन्धादिकञ्चित् प्रवाहान्तरगतमपि चित्तस्य विषयविशेषोपरागे सति भवति। असति नेतीति कादाचित्कत्वाद्वोध्यम्। एषां समुदायः पञ्चस्कन्धी सैवाभ्यन्तरसमुदायहेतुः। तच्च समुदायद्वयं प्रत्यक्षानुमानाभ्यां क्षणिकमेव सिध्यति। प्रत्यक्षेण हि वर्तमानार्थपरिच्छेदिना स्वविषयस्वावर्तमानाद् व्यावृत्तिः क्रियते। यथा नीलपरिच्छेदिना स्वविषयस्यानीलात्। अनुमानञ्च सर्वे भावाः क्षणिकाः अर्थक्रियाकारित्वात् सत्त्वाञ्च ये क्षणिका न भवन्ति न तेऽर्थक्रियाकारिणः सन्तश्च। यथा शशविषाणादयः घटस्यान्त्यक्षणसत्वात्पूर्वपूर्वक्षणविशिष्टसत्त्वानि स्वसत्ताक्षणादुत्तरक्षणे विनाशीनि घटसत्त्वात्, अन्त्यक्षणविशिष्टघटसत्त्ववत्। एवं क्षणिकेष्वपि प्रवाहेष्वविद्यादिनिमित्तो लोकव्यवहारः। अविद्या तु-क्षणिकेषु स्थायिबुद्धिः कार्ये नित्यत्वबुद्धिः, दुःखे सुखबुद्धिः, शून्ये वस्तुबुद्धिः, इति एवञ्च सति समुदायद्वयेन सर्वव्यवस्थोपपत्तेः। किमर्थञ्चेतनात्मा ईश्वरश्चेति स्वीक्रियते। (अ० ब्र० सि०, पृ० ६८)' एतेभ्यः पञ्चस्कन्धेभ्यः पुञ्जीभूतेभ्य आवान्तरसमुदायो जायते। तस्माद्युज्यते समुदायद्वयम्।' (वै० न्या० भा० २।२।१८)।

३. घ० मा० 'मुद्ययोस्त्वग्रिम' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चेतनस्य कस्यचित्तदाभावेन[१] तत्प्रेरणाभावात्। अचेतनस्य प्रेरितस्य कार्यजनकत्वानुपपत्तेः। न च जीवस्य तदानोश्चैतन्यमस्ति। प्रवृत्तिविज्ञानस्य शरीरजन्यत्वादीश्वरस्य सर्वज्ञस्य तैरनङ्गीकारात्। न चैकैकमेव कारणं स्वकार्यञ्जनयति। तस्य च समर्थस्य विलम्बाभावेन चेतनानपेक्षत्वादिति वाच्यम्। एवमपि चेतनं विना संघातानुपपत्तेः, क्षणिकत्वेन परस्परं सहकारित्वानुपपत्तेश्चाकाशस्याभाव इत्यनुपपन्नम्, तस्य द्रव्यरूपत्वेन प्रत्यक्षसिद्धत्वात्, 'इह पक्षी चलति' इत्यनुमानमप्याकाशसद्भावे मानं शब्दस्य गुणत्वेन तदाश्रयत्वेन द्रव्यसिद्धिः। आत्मनः क्षणिकत्वेनानुभवितुर्नष्टत्वेन संस्काराभावेन स्मृत्यनुपपत्तेः। अतो नेदं दर्शनमनुपपन्नमिति।

अभावाधिकरणम्

नाभाव उपलब्धेः ॥५॥

बाह्यार्थाभ्युपगमवादिनो बौद्धस्य मतं निराकृतमिदानीं विज्ञानमेवास्ति न बाह्योऽर्थ इति ये मन्यन्ते ये च शून्यमेवेति मन्यन्ते तेषां[२] मतन्निराक्रियते। तत्र विज्ञानवादिमतमित्थम्[३]। विज्ञानमेव क्षणिकमस्ति न बाह्योऽर्थः। क्षणिकत्वञ्च तस्य सत्त्वात्[४] यत्सत्तत् क्षणिकमिति व्याप्तेः। तत्सत्त्वञ्चार्थक्रियाकारित्वम्[५] बाह्योऽर्थश्च नास्ति, घटपटादिश्च ज्ञानस्यैवाकारः। अतिरिक्ताभ्युपगमे तद्विषयकज्ञानानुपपत्तेर्विषयतायास्तादात्म्यज्ञानातिरिक्ताया निर्वक्तुमशक्यत्वात्, स्वाप्निकपदार्थवत्। न च ज्ञानवैचित्र्यानुपपत्तिः, वासनावशाद्वैचित्र्योपपत्तेः, वासना च तन्मते तत्सन्तानपतितपूर्वज्ञानमेव। तत्र च पूर्वज्ञानसमनन्तरप्रत्ययरूपं[६] मन इत्युच्यते। तस्यैवौपाधिकं प्रमातृत्वादिकं, न च बाह्यविषयमभ्युपगम्य ज्ञानेन सह विषयतासम्बन्धोऽस्त्विति वाच्यम्। विषयताया ज्ञानस्वरूपत्वे विषयविषयिभावानुपपत्तेः। यदाकारो यस्मिन्ज्ञाने स तस्य विषयः इत्यभ्युपगमे ज्ञानाकारेणोपपत्तौ बाह्यार्थकल्पनानर्थिका। तस्माज्ज्ञानमेवैकं क्षणिकं पदार्थ इति।

---

१. ग० मा० 'सर्गादावभावेन' इति पाठः।

२. ग० मा० 'उभयेषां तन्निराक्रियत' इति पाठः।

३. विज्ञानमात्रास्तित्ववादिनो योगाचाराः प्रत्यवतिष्ठन्ते। यदुक्तमर्थवैचित्र्यमिति। (श्रीभा० २।२।२७)।
'विज्ञानमात्रास्तित्ववाद्यभिमतां बाह्यस्याभावः (वे० पा० सां० मा० पृ० १९९)
विचित्रो बाह्यार्थोऽस्तीति भ्रमः क्षणिकं, विचित्रं, विज्ञानं साकारं प्रत्यक्षं चास्ति नीलपीतमिति साकारं विज्ञानमेव प्रकाशते, उक्तञ्च विप्रभिक्षुणा

अप्रत्यक्षोपलम्भस्य नार्थदृष्टिप्रसिध्यति।
अविभागोऽपि बुध्यात्मा विपर्यासितदर्शने॥ इति

तत्र ग्राह्याकारः प्रमेयं, ग्राहकाकारः प्रमाणं, स्वसंवित्तिः फलमिति त्रयमेकस्मिन्विज्ञानेऽवकल्पते। तस्मान्नास्ति बाह्यार्थः (वे० रत्नो० मा० पृ० २००)।

४. ग० मा० 'सिध्यति' इति पाठः।

५. ग० मा० 'व्यवहारयोग्यम्' इति पाठः।

६. ग० मा० 'चान्वितम्' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शून्यवादिमतन्तु[1] विज्ञानस्यापि सत्त्वेनासत्त्वेन वा निर्वक्तुमशक्यत्वाच्छून्यमेवेति, तन्न शून्यत्वे जगदान्ध्यप्रसङ्गान्निरधिष्ठानभ्रमानुपपत्तेश्चातश्चैतन्यमेकमङ्गीकार्यं भवतु, तर्हिविज्ञानवादिमतं तदपि न प्रपञ्चस्योपलभ्यमानस्य निषेधमकृत्वा[2] ज्ञानस्य क्षणिकत्वानुपपत्तेश्च । सत्त्वस्य क्षणिकत्वेऽप्रयोजकत्वात् । न च बाह्यार्थाभ्युपगमे तस्य ज्ञेयत्वानुपपत्तिस्तादात्म्यस्यैवाभ्युपगमात् । न च सर्वदा सर्वस्य भानापत्तिः, आवृतत्त्वेनावरणभङ्गाय वृत्तेरपेक्षितत्वाज्जीव[3] एव जगदुपादानमिति, न तु जीवः तादात्म्यापन्नस्य जगतस्सर्वदा भानप्रसक्तिरविद्यया[4]-वृत्तित्वाभ्युपगमे[5] वृत्त्या आवरणभङ्गे भानाभ्युपगमात् । ब्रह्मैवोपादानमिति मते तु सम्बन्धार्थेश्च(र) वृत्तिर्जीवस्यासङ्गतत्वेन तेन सह सम्बन्धाभावात् । वृत्तौ सत्यां तु स्वप्रतिबिम्बाश्रयत्वस्य स्वप्रतिबिम्बाश्रयावच्छेदकत्वादेव सम्बन्धत्वाभ्युपगमाच्चैतन्यस्य नित्यता चावश्यमङ्गीकार्या । अन्यथा प्रहरमात्रं[6] परमेश्वरं ध्यायतो ध्यानविषयकानुव्यवसायाभावेनैतावन्तं कालं ध्यायन्नासमित्यनुसन्धानानुपपत्तेः[7] । तादात्म्यञ्च[8] (एतेन)तेन सह प्रपञ्चस्य काल्पनिकमिति न विज्ञानवादिमताद्विशेषः, बाह्यपदार्थानुपगमे ज्ञानवैचित्र्यानुपपत्तेश्च । न च वासनावशाद्वैचित्र्यम्, वासनाश्रयस्य स्थायिनोऽनभ्युपगमात्[9] । प्राचीनज्ञानस्य च संस्कारात्मकस्य नष्टत्वेन वैचित्र्यकालिकत्वानुपपत्तेस्स्वप्नादिषु[10] त्वगत्या वासनावैचित्र्यप्रपञ्चोत्पत्तिमभ्युपगम्य ज्ञानवैचित्र्यमुपपादनीयमिति न बौद्धमतमुपपत्तिमदिति ।

---

१. 'न तावद्घटाद्यर्थो ज्ञानाकार एव । तस्य पूर्वं निरासात् । न च बाह्योऽर्थोऽस्ति तस्य परमाणुतत्समूहत्वे विकल्पाऽसहत्वोक्तत्वात् । तथा च न ज्ञानमप्यस्ति । निर्विषयज्ञानायोगात् । नापि कश्चन साक्षी, तस्मिन् प्रमाणाभावात् । साक्ष्ययोर्ज्ञानार्थयोरभावेन तन्निश्चयात् । अत एव 'विज्ञानं क्षणिकं नात्मा विद्युदभ्रनिमेषवत्' 'अन्यस्यानुपलभ्यत्वाच्छून्यम्' अनुमानञ्च' विमतं निस्तत्त्वं तर्कपीड्यत्वात् मरीचिकादावुदकादिबुद्धिवत्' इति । विश्वन्न सद्बाध्यमानत्वात् । नाप्यसदपरोक्षत्वात् । नापि सदसत्, सत्त्वासत्त्वयोरेकत्र विरोधात् । नाप्यनुभयमनिर्वाच्यम् । एकनिषेधस्येतरविधिनन्तरीयकत्वात् । तस्माच्चतुष्कोटिविनिर्मुक्तत्वान्निस्तत्वात् विचारासहत्वलक्षणं शून्यत्वमेव वस्तूनां तत्त्वं व्यवस्थाप्यते । तस्मात् क्षणिकत्वभावनापूर्वकशून्यभावनयैव मोक्षश्चात्महानरूपं सिध्यति । नहि शून्यन्नाम किञ्चित्तत्त्वमस्ति, अपितु निस्तत्वमेव' (अ० ब्र० सि०, पृ० १०३) ।

२. ग० मा० 'निषेद्धुमशक्यत्वात्' इति पाठः ।

३. ग० मा० 'चैतन्यमेव' इति पाठः ।

४. घ० मा० 'भावप्रसक्तावविषया' इति पाठः ।

५. ग० मा० 'अन्तःकरण कृत्यातद्यावरण' इति पाठः ।

६. घ० मा० 'प्रहत्वामात्र' इति पाठः ।

७. घ० मा० 'प्यत्यन्नासमि' इति पाठः ।

८. ग० मा० 'तेन सह' इति पाठः ।

९. ग० मा० 'परैरभ्युपगमात्' इति पाठः ।

१०. ग० मा० 'वैचित्र्यकारित्व' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एकस्मिन्नसम्भवाधिकरणम्

नैकस्मिन्नसम्भवात् ॥६॥

इदानीमार्हतमतन्निराक्रियते। ते हि जीवाजीवौ[1] द्वौ पदार्थावभ्युपगम्य जीवस्याप्यास्रवसम्बरनिर्जरबन्धमोक्षभेदेन[2] भेदमभ्युपगम्य निरन्तरगमनशीलस्यापि जीवस्य घातिकर्मवशाच्छरीरेऽवस्थितिमभ्युपगम्य तस्य चोपरिगमनरूपं मोक्षं स्वीकुर्वन्ति। स[3] च जीवो देहपरिणाम इति, तस्य च सत्त्वासत्त्वादिरूपत्वमपि सर्वो हि घटपटादिस्सत्त्वासत्त्वाश्रयः[4], न च विरोधः संयोगतदभाववदुपपत्तेरिति वदन्ति। तन्मतमयुक्तम्। एकस्मिन्सत्त्वयोरनुपपत्तेः। न चावच्छेदकभेदेन व्यवस्थासंयोगतदभावयोरेवात्र प्रतीत्यभावात्। न च घटः स्वात्मना सन्घ-

१. जीवास्तिकायस्त्रिविधः, कश्चिज्जीवो नित्यसिद्धार्हन् मुख्यः। केचित्साम्प्रतिकमुक्ताः। केचिद्बद्धा इति। पुद्गलास्तिकायः षोढा पृथिव्यादीनि चत्वारि भूतानि स्थावरजङ्गमञ्चेति। प्रवृत्तिस्थितिलिङ्गौ धर्माधर्मायुक्तौ। आकाशास्तिकायो द्विविधः लोकावकाशः सांसारिक, लोकावकाशो मुक्ताश्रय इति। बन्धस्थं कर्माष्टविध चत्वारि घातिकर्माणि, चत्वार्यघातीनि। तत्र तत्र ज्ञानावरणीयं दर्शनावरणीयं मोहनीयमान्तर्याणिचेति घातिकर्माणि 'तत्त्वज्ञानान्नमुक्ति' इति ज्ञानमाद्यं कर्म। 'आर्हततन्त्रश्रवणान्न मुक्तिः' इति ज्ञानं द्वितीयम्। बहुषु तीर्थङ्करप्रदर्शितेषु मोक्षमार्गेषु विशेषानवधारणं मोहनीयम्। मोक्षमार्गप्रवृत्तिविघ्नकरणमान्तर्यम्। इमानि श्रेयो हन्तृत्वात् घातिकर्माणि।

अथाघातिकर्माणि चत्वारि कर्माणि, वेदनीयम्, नाभिकम्, गौत्रिकम्, आयुष्कम्। 'मम वेदितव्यं तत्त्वमस्ति' इत्यभिमानो वेदनीयम्। 'एतन्नामा हमस्मि' इत्यभिमानो नाभिकम्। 'अहमत्र भवतो देशिकस्यार्हतशिष्यवंशे प्रविष्टोऽस्मि' ईत्यभिमानो गौत्रिकम्। शरीरस्थित्यर्थकर्माऽऽयुष्कम्। अथवा शुक्रशोणितमिश्रितमायुष्कम्। तस्य तत्त्वज्ञानानुकूलदेहपरिणामशक्तिर्गौत्रिकम्। शक्तस्य तस्य द्रवीभावानुकूलकललावस्थाबुद्बुदास्थायाश्चारम्भकक्रियाविशेषो नाभिकम्। सक्रियस्य जाठराग्निभ्यामीषद्धनीभावो वेदनीयम्। तत्त्ववेदनानुकूलत्वान्तान्येतानि तत्त्वावेदकशुक्लपुद्गलार्थत्वादघातीनि। तदेतत्कर्माष्टकजन्मार्थत्वाद्बन्ध इति। (रत्नप्रभा, पृ० ७२७), (भामती २।२।३३), (आ० गि० न्या० नि० २।२।३३)।

आर्हतमते घटादेरस्तित्वविषये सप्तभङ्गीन्याय प्रवर्त्तते। तथा हि घटादेर्हि सर्वात्मना सदेकरूपत्वे प्राप्यात्मनाऽपि 'अयमस्त्येव स' इति तत्प्राप्तये यत्नो न स्यात्। अतो घटत्वादिरूपेण कथञ्चिदस्ति प्राप्यत्वादिरूपेण कथञ्चिन्नास्ति, इत्येवमनेकरूपत्वं वस्तुमात्रस्य। तत्र वस्तुनोऽस्तित्ववाञ्छायां 'स्यादस्ति' इत्याद्योभङ्गः। प्रवर्तनास्तित्ववाञ्छायां 'स्यान्नास्ति' इति द्वितीयभङ्गः। क्रमेणोभयवाञ्छायां 'स्यादस्ति नास्ति वा' इति तृतीयोभङ्गः। युगपदुभयवाञ्छायां 'अस्ति नास्ति' इति शब्दद्वयस्य सकृद्वक्तुमशक्यत्वात्स्यादवक्तव्यत्वञ्चतुर्थोभङ्गः। आद्यचतुर्थयोर्वाञ्छायां स्यादस्ति चावक्तव्यश्च इति पञ्चमो भङ्गः। आद्यन्चतुर्थद्वितीयचतुर्थेच्छायां 'स्यान्नास्ति चावक्तव्यञ्चेति' षष्ठो भङ्गः। तृतीयचतुर्थेच्छायां 'स्यादस्ति नास्ति चावक्तव्यश्च' इति सप्तमो भङ्गः (सप्तभं ९ त० पृ० ५)। इति विभागः। एकत्वमनैकत्वं वेति द्वयमादाय स्यादेकः, स्यादनेकः, स्यादेकोऽनेकश्च, स्यादवक्तव्यः, स्यादेकोऽवक्तव्यः स्यादनेकोऽवक्तव्यः, स्यादेकोऽनेकश्चाऽवक्तव्यः, इति तथा स्यान्नित्यः, स्यादनित्यः, इत्याद्यूह्यम्। एवमनेकरूपत्वे न वस्तुनि प्राप्तित्यागादिव्यवहारः संभवति। एकरूपत्वे सर्वं सर्वत्र सर्वदास्त्येवेति व्यवहारविलोपापत्तिः स्यात्। तस्मादनेकान्तं सर्वमित्येकरूपब्रह्मवाद बाध इति। (रत्नप्रभा, पृ० ७२९), (भामती २।२।३३), (न्या० नि० पृ० ७२९) (वै० क० त० पृ० ३००)।

२. शुद्धनिश्चयनयेनादिमध्यान्तवर्जितस्वयंप्रकाशाविनश्वरनिरूपाधिशुद्धचैतन्यलक्षणनिश्चयप्रायेण न यद्यपि जीवति, तथाप्यशुद्धनयनानादिकर्मबन्धवशाच्छुद्रव्यभावप्राणैर्जीवतीति जीवः। (बृहद्द्रव्यसंग्रह पृ० ७)।

३. घ० मा० 'च' इति पाठो नास्ति।

४. ग० मा० 'घटघटादि' इति पाठः।
घ० मा० 'घटपटादि' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

टात्मना असन्निति प्रत्यय एव मानमिति वाच्यम् । तावता[1] च भेदस्य घटे सिद्धेः । किञ्च जीवस्य देहपरिमाणत्वे सत्यत्वप्रसङ्गाद्देहस्य वाव्यवस्थितपरिमाणत्वेन जीवस्याकात्स्र्न्यमाधिक्यञ्चप्रसज्येत । [2]तदिदमनुपपन्नमार्हत-दर्शनमिति ।

पत्यधिकरणम्

पत्युरसामञ्जस्यात् ॥७॥

ईश्वरस्य निमित्तत्वमेव नोपादानत्वमिति ये वदन्ति तन्मतमत्र निराक्रियते । तत्र माहेश्वराः मन्यन्ते[3] कार्यकारणयोगविधिदुःखान्ताः पञ्चपदार्थाः । कार्यं पृथिव्यादीनि पञ्चतत्त्वानि रूपादयः पञ्चगुणाश्चेति दशविधं पञ्चज्ञानेन्द्रियपञ्चकर्मेन्द्रियाणि, मनोबुद्धिरहङ्कारा इति विविधमन्तः करणमिति त्रयोदशविधं कारणम् । योगो ध्यानादिरूपः, धर्मोक्तिको[4] व्यापारो विधिः, दुःखान्तो[5] मोक्षः । पशुर्जीवः, पशुपतिरीश्वरो निमित्तकारणम् पाशो[6] मायादिस्सर्वेश्वरस्वतन्त्रत्वाद्धर्माधर्मावनपेक्ष्य जगत्सृजतीति । तदयुक्तं धर्माधर्मावनपेक्ष्य सुखदुःखादिफल-प्रदत्वे-ईश्वरस्य वैषम्यादिकं प्रसज्येत कर्मानुष्ठानैकवैफल्यञ्च स्यात् । तादृशेश्वरो मानाभावश्च शरीरादिरहितस्य प्रेरकत्वानुपपत्तेश्च श्रुत्यनुसारात्तथाभ्युपगमे यथा श्रुत्यैवोपादानत्वमङ्गीकर्तव्यम् । केलानुमानञ्चेश्वरसम्भावकं[7] शास्त्रयोनित्वसूत्र एव निराकृतम् । अतः केवलनिमित्तत्ववादोऽप्रामाणिक इति ।

उत्पत्त्यसम्भवाधिकरणम्

उत्पत्त्यसम्भवात् ॥८॥

जीवस्य नित्यत्वप्रतिपादकस्समन्वयो जीवोत्पत्तिप्रतिपादकपञ्चरात्रागमेन विरोधे बाध्यते नेति संशये, पूर्वः वक्षः

---

१. घ० मा० 'तावतापचभेद' इति पाठः ।

२. घ० मा० 'त इइद ए' इति पाठः ।

३. माहेश्वरः शैवाः, पाशुपताः, कारुणिकसिद्धान्तिनः कापालिकाश्चेति चत्वारः (रत्नप्रभा पृ० ७३९)
एतेषां स्वगुणितसमये (सिद्धान्ते) (पशुपतिरीश्वरो निमित्तकारणमिति वर्णयन्ति) (शां० भा० २।२।३७) विधिस्त्रिषवणस्नानादिर्गूढ़चर्यावसानः, दुःखान्तो मोक्षः, पशव आत्मानस्तेषां पाशो बन्धनं तद्विमोक्षोदुःखान्तः । एषस्तेषा-मभिसन्धिः चेतनस्य खल्वधिष्ठातुः कुम्भकारादेः कुम्भादिकार्ये निमित्तकारणत्वमात्रन्न तूपादानत्वमपि । तस्मादिहापीश्वरोऽ-धिष्ठाता जगत्कारणानां निमित्तमेव न तूपादानम्' (भामती० पृ० ७४०) उत्तरे च तस्य निमित्तोपादानकारणत्व-प्रतिपादनपरत्वादित्यसकृदावेदितम् । तस्मादनेनास्मिन्नर्थे प्रमाणान्तरमास्थेयमिति (भामती २।2।३७) ईश्वरस्य निमितत्त्वमात्रे मानसिद्धे हेत्वसिद्धिः (आ० गि० न्या० नि० २।२।२७ पृ० ७४०) अस्माकं त्वपौरुयेयतया स्वतः सिद्धप्रमाणभावतया श्रुत्या स्वप्रमेयबोधने दृष्टान्तानपेक्षया भवत्येव लौकिककर्तृविपरीता द्वितीयकर्त्रुपादानात्मकसर्वज्ञ-निर्दोषेश्वरनिर्णयः (र० प्र० पृ० ७४०) ।

४. घ० मा० 'धमोप्यक्तो' इति पाठः ।

५. घ० मा० 'दुःखान्तो दुःख मोक्षः' इति पाठः ।

६. ग० मा० 'मेव' इति पाठः ।

७. ग० मा० 'साधकम्' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पञ्चरात्रागमेनेह जीवानान्नित्यता श्रुतिः[१] ।
विरोधाद्बाध्यते यस्मात्परेशेन[२] कुतो हि सः ॥

पाञ्चरात्रागमे हि[३] भगवानेको वासुदेवो निरञ्जनः ज्ञानस्वरूपः परमार्थसत्वश्चतुर्धात्मानं प्रविभज्य वासुदेव व्यूहरूपेण, सङ्कर्षणव्यूहरूपेण, प्रद्युम्नव्यूहरूपेणानिरुद्धव्यूहरूपेण च वासुदेवः परमात्मेत्युच्यते[४] । सङ्कर्षणो जीवः, प्रद्युम्नो मनः, अनिरुद्धो हङ्कारः, तेषां वासुदेवः पराप्रकृतिः, इतरे[५] कार्यभूता इति प्रतिपाद्यते । अतस्तदनुरोधाज्जीवस्योत्पत्तिप्रतिपादको[६] वेदभागो बाध्यते । न चागमस्यापौरुषेयत्वेन[७] स एव बाध्यतामिति वाच्यम्, जीवेन प्रणीतपौरुषेयाणां भ्रममूलकत्वसम्भावनया वेदबाध्यत्वसम्भवेऽपि सर्वज्ञभगवत्प्रणीतागमस्य मूलभ्रान्त्यभावेन बाधस्य वक्तुमशक्यत्वात् । न[८] च बुद्धिपूर्वकरचितागमस्य निश्वासवदबुद्धिपूर्वकरचितवेदापेक्षया प्राबल्यसम्भवतां[९] बाध्य एव समन्वय इति ।

सिद्धान्तस्तु

आगमस्य च वेदस्य विरोधे वेदमानता ।
स्वीकार्या दोषराहित्य[१०]ादितोऽन्यस्त्याज्य एव हि ॥

वेदागमयोर्विरोधे वेदे दोषरहितत्वेन [११]प्रामाण्यावश्यंभावात्तद्विरोधेन[१२] पाञ्चरात्रागमो हातव्य एव, न च बुद्धिपूर्वकसर्वज्ञभगवत्प्रणीतत्वेन तस्य प्राबल्यम् । बुद्धिपूर्वकसर्वज्ञ[१३] शिवप्रणीतत्वेन शैवागमानामपि[१४] प्राबल्यापत्तेः । न च जीव एव स इति वाच्यम् । वासुदेवस्यापि जीवत्वोपगमात् । अतः परस्परविरोधे श्रुतिरात्मानं लभते

१. ग० मा० श्रुतेः' इति पाठः ।
२. ग० मा० 'परेशान निर्वृते' इति पाठः ।
३. घ० मा० 'हि' इत्यधिकः पाठः ।
४. घ० मा० 'परैमात्मोक्त्य' इति पाठः ।
५. घ० मा० 'परिप्रकातिराप्रकृतिरितरे' इति पाठः ।
६. च० मा० 'निषेधः' इति पाठः ।
७. सम्प्रदायाविच्छेदत्वे सत्यस्मर्यमाणकर्तृकत्वम् ।
८. (क) ग० मा० 'विनिगभकाभावः' इति पाठः ।
   (ख) च० मा० 'विनिगमना विरहः' इति पाठः ।
९. च० मा० 'वादतो' इति पाठः ।
१०. ग० मा० 'असहेयान्यमानता' इति पाठः ।
११. घ० मा० 'व' इति पाठो नास्ति ।
१२. घ० मा० 'त्त' इति पाठो नास्ति ।
१३. ग० मा० 'र्तहि' इति पाठः ।
१४. घ० मा० 'गमान्यपि' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बालाक्यधिकरणन्यायादिति । किञ्चेश्वरस्य सर्वज्ञत्वमागमप्राबल्याच्छ्रुतिप्रामाण्याद्वा आद्येऽन्योऽन्याश्रयः[१], द्वितीये उपजीव्यश्रुत्यनुसारेणागम एवान्यथा नेय इति ।

एतेन जीवान्मनस[२] उत्पत्तिरित्यादिकमपि परास्तम्[३] । अतो वेदान्तानुसारेण पाञ्चरात्रागमो बाध्य इति ।

इति द्वितीयाध्यायस्य द्वितीयः पादः ।

द्वितीयोऽध्याये तृतोयपादः

वियदधिकरणम्

न वियदश्रुतेः ।।१।।

द्वाभ्यां पादाभ्यां स्मृतिन्यायविरोधः परिहृतः[४] । अथेदानीं[५] द्वाभ्यां श्रुतिविरोधःपरिह्रियते । तत्र[६] प्रथमं भूतोत्पत्त्यादिश्रुतिविरोधः परिह्रियते । तत्र छन्दोगशाखायां 'तदैक्षत बहुस्यां प्रजायेय' (छा० ६।२।३) इति तेज आदिका सृष्टिराम्नायते । तैत्तिरोयशाखायान्तु 'तस्माद्वा एतस्मादात्मन आकाश सम्भूत' (तै० उ० २।१) इत्याकाशादिका सृष्टिः, किमियं श्रुतिप्रमाणमुताप्रमाणमिति संशयः । तत्र श्रुत्योः परस्परविरोधादप्रामाण्यमिति पूर्वःपक्षः । न च छन्दोगशाखायामाकाशवायोरुपसंहारान्न विरोध इति वाच्यम्, तथात्वे [७]पाठावगततेजः प्राथम्य मङ्गापत्तेः । तत्र सिद्धान्त्येकदेश्याह—

---

१. स्वापेक्षापेक्षितत्वनिमित्तकोऽनिष्टप्रसङ्गः । अपेक्षा च ज्ञप्तौ, उत्पत्तौ, स्थितौ न ग्राह्या । तत्र ज्ञप्तौ यथा 'घटोऽयं' यद्येतद्घटज्ञानजन्यज्ञानविषयः स्यात्तदेद्घटभिन्नः स्यादिति । तत्र स्वज्ञानस्य स्वज्ञानजन्यत्वेनानिष्टं प्रसज्येत, स्वापेक्षापेक्षितज्ञानत्वात् स्वापेक्षितघटज्ञानविषयस्य तज्जनकज्ञानविषयादभेदरूपमिष्टञ्च प्रसज्येत । अतो घटस्य घटभेदप्रसङ्गोऽनिष्टः । उत्पत्तौ यथा 'घटोऽयं' यद्येतदघटजन्यः स्यात् तदैतद्घटभिन्नः स्यात् एतद्घटस्योत्पत्तौ, एतद्घटजन्यसापेक्षत्वे कारणस्य कार्याद्भेदो नियततया, एतद्घटस्य, एतद्घटभेदरूपोऽनिष्ट प्रसङ्गः । स्थितौ यथा 'घटोऽयं' यद्येतद्घटवृद्घिवृत्तिः स्यात्, तदा तथात्वेनोपलभ्येत । न च तद्योपलभ्यते तथात्वेन घटस्य घटवृत्तित्वापत्तिरनिष्टप्रसज्येतेति । एतेषु ज्ञप्तिविषयतदेव प्रायशोऽऽदिष्टप्रसङ्गः, सर्वत्र तन्मूलकमेव स्वग्रहसापेक्षग्रहसापेक्षग्रहकत्वमन्योऽन्याश्रयत्वं तत्र तत्र व्यवह्रियते । अत एव, परस्परज्ञानसापेक्षज्ञानाश्रयोन्याश्रयः इति । (न्या० को० पृ० ३७) ।

२. घ० मा० 'जीवात्यय स' इति पाठः ।

३. यत्र श्रुतिस्मृत्योर्विरोधस्तत्र श्रुतेः प्राबल्यमीरितम् । तद्वदेवात्रापि श्रुत्यागमयोः परस्परबलाबलविरोधे श्रुतिवाक्यानां प्राबल्यम् । अत एवागमे-उत्पत्त्यादिवाक्यमपि विरोधादन्येथा नेयमिति । तथा च भाष्ये 'न वासुदेवसञ्ज्ञकात्परमात्मनः सङ्कर्षणसञ्ज्ञकस्य जीवस्योत्पत्तिः सम्भवति, अनित्यत्वादिदोषप्रसङ्गात्' इति (शां० भा० २।२।४२) वस्तुतस्तु पाञ्चरात्रागमापेक्षया श्रुतिर्दुर्बलेत्येतदसङ्गतम् । श्रुतौ ह्यपौरुषेयतया वचनादिकर्तृदोषमूलत्वशङ्का नैव सम्भवति । (भा० व्या० २।२।४२) ।

४. ग० मा० 'परपक्षाणा चाभासत्वमुक्तम्' इति पाठः ।

५. घ० मा० 'तत्र प्रथमंभूतोत्पत्यादि श्रुतिः' इति पाठः ।

६. ग० मा० 'तत्र' पाठो नास्ति ।

७. घ० मा० 'पानवगत' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वियतो जन्म नैवास्ति तद्धेतूनामभावतः ।
वेदशब्दाच्च तेनात्र गौणी ह्युत्पत्ति[1] बाधिका ॥
एकस्यापि हि शब्दस्य गौणत्वं मुख्यया च[2] हि ।
स्वीकुर्वन्ति ब्रह्मशब्दे तद्वदत्र भविष्यति ॥

छन्दोगशाखावगततेजः प्राथम्यमेव स्वोक्रियते तैत्तिरीयशाखायां [3]वियदुत्पत्तिश्रुतिस्तु गौणी, तदुत्पादकसमवायिकारणाभावात्[4] । अतः 'वायुश्चान्तरिक्षं वै तदमृतम्, (बृ० २।३।३) इति श्रुत्या [5]विनाशाभावप्रतिपादनेनोत्पत्त्यभावप्रतिपादनस्यावगमितत्वाच्च ।[6] न चैकस्यैव सम्भूतशब्दस्याकाशविषये गौणत्वं तेज आदिविषये मुख्यत्वञ्च कथमुपपद्यत इति वाच्यम् । एकस्यापि सम्भूतपदस्य[7] ब्रह्मशब्दस्यावृत्यान्वयबोधाभ्युपगमेन तत्तत्समभिव्याहृतस्य तस्य क्वचिन्मुख्यत्वस्य क्वचिल्लाक्षणिकत्वस्य च स्वीकारे बाधकाभावात् । तथा ह्येकस्य ब्रह्मशब्दस्यान्नादिसमभिव्याहारे[8] लाक्षणिकत्वमानन्दादिसमभिव्याहारे मुख्यत्वञ्च दृष्टं तथेहाप्युपपत्तेरिति ।

मुख्यसिद्धान्तस्तु

ब्रह्मज्ञानेन सर्वस्य विज्ञानं प्रतिपाद्यते ।
प्रतिज्ञापूर्वकं तच्च [9]गगनस्य जनिं विना ॥
नोपपादयितुं शक्यं तस्मात्तज्जन्मनिश्चयः ।
न च क्रमानुसारेण पदार्थो बाधमर्हति ॥
अतः छन्दोगशाखायां गगनस्योपसंहृतिः ।
स्वीकार्या यस्य चोत्पत्तिरज्ञानादिवशाद्भवेत् ॥
शब्दश्च गौण्या नेतव्यो ह्यमृतत्त्वस्य बोधतः ।
विभक्तत्वाच्च वियतो जन्मावश्यं भविष्यति ॥

वियत उत्पत्तिरवश्यं स्वीकार्या, अन्यथा 'एक विज्ञानेन सर्वविज्ञानं' प्रतिज्ञापूर्वकं व्युत्पादितमनुपपन्नं स्यात्तथा हि 'उत्तमादेशमप्राक्ष्य येन श्रुतं भवत्यमतमविज्ञातं विज्ञातम्, (छा० ६।१।२,३) इत्येकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय 'यथा सौम्यैकेन मृत्पिण्डेन[10] सर्वं मृन्मयं विज्ञातं स्यात्' (छा० ६।१।४) इति व्युत्पादितम् ।

१. ग० मा० 'जन्मश्रुतिर्भवेदिति' इति पाठः ।
२. च० मा० 'ता' इति पाठः ।
३. घ० मा० 'वियत्त' इति पाठः ।
४. घ० मा० 'घ' इति पाठो नास्ति ।
५. घ० मा० 'प्रतिपादमस्य' इत्याधिकः पाठः ।
६. अवगमितत्वन्नाम युक्तिमानाभ्यां ज्ञातत्वम् ।
७. घ० मा० 'पदस्य' इत्यधिकः पाठः ।
८. घ० मा० 'त्र्यादिसम' इति पाठ ।
९. ग० मा० 'वियतो जननं विना' इति पाठः ।
१०. घ० मा० 'मृप्पण्डिने' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न च तद्वियत उत्पत्तिमन्तरोपपद्यते। ब्रह्मणि विदितेऽपि वियतो ब्रह्म कार्यत्वाभावे न [१]तद्वेदनं [२]सम्भवति। अन्यस्मिन्विदितेऽन्यस्य विदितत्वानुपपत्तेः। कार्यत्वे तु कारणैकसत्ताकत्वात्तस्य[३] तस्मिन्विदिते तद्विदितमिति वक्तुं शक्यम्। न चोत्पत्तिकारणाभावः। अज्ञानादीनामेव तत्कारणत्वात्। न च छन्दोगशाखायामनुक्तिदोषायोपसंहारस्य सम्भवात्। '[४]शिष्टापरिग्रहाधिकरण' विरोधापत्तेः। एवञ्च सत्यमृतत्वोक्तिः प्रलयपर्यन्तं विनाशराहित्याभिप्राया व्याख्येयाः। अतो न श्रुतिविरोधो वियदुत्पत्तेः बाधकाभावे सति विभक्तत्वाद्धटवदित्यनुमानेन वियत उत्पत्तिसिद्धेश्चेति।

मातरिश्वाधिकरणम्

एतेन मातरिश्वा व्याख्यातः ॥२॥

छन्दोगश्रुतिर्वायोरुत्पत्तिन्न प्रतिपादयति, तैत्तिरीयकश्रुतिस्तु[५] तां प्रतिपादयति। अतः श्रुत्योर्विरोधादप्रामाण्यमिति पूर्वपक्षे सिद्धान्तैकदेशिमतम् 'द्योतन्ति[६] ह्यन्याः देवताः, [७]नासावायुस्सैषानस्तमिता यद्वायुरिति। अध्यासेन वायोर्नाशप्रतिषेधात्पर्यवगमान्नाशाभावश्रुतिसिद्ध इति तदनुसारेणोत्पत्त्यभावोऽवश्यं स्वीकार्य इति।

सिद्धान्तस्तु, प्रधानवाक्यानुसारेणान्यानि वाक्यानि नेयानि। तथात्रानेन ह्येतत्सर्वं[८] विज्ञानेन सर्वविज्ञानं प्रस्तुत्य तदर्थतया सृष्टिं प्रक्रम्य तत्र प्रसङ्गाद्वायोः किञ्चिदुपासनमप्युक्तम्। अतस्तदन्यथानयनं युक्तं, यथा 'स्वर्गकाम' इति वाक्यानुसारेण 'को हि तद्वेद यद्यमुष्मिल्लोकेऽस्ति वा नवे'ति वाक्यमन्यथा नीयते[९]। तद्वदतो वायोरमृत्वश्रुतिरपि पूर्ववन्नेयेति।

असम्भवाधिकरणम्

असम्भवस्तु सतोऽनुपपत्तेः ॥३॥

सर्वं एत आत्मानो व्युच्चरंत्यविशेषेण सर्वेषामात्मनामुत्पत्तिश्रवणेन ब्रह्मणोप्युत्पत्तिः प्रतीयते[१०], 'न चास्य कश्चिज्जनिता न चाधिप' (श्वे० उ० ६।९) इति श्रुत्या चोत्पत्त्यभावः प्रतीयते[११]। अतः श्रुत्योर्विरोधादप्रामाण्यमिति[१२] पूर्वःपक्षः। (सिद्धान्तस्तु), एकदेशी तु—

---

१. घ० मा० 'तद्वेरनं' इति पाठः।
२. 'च० मा० 'सम्भवात्' इति पाठः।
३. घ० मा० 'तस्य' इत्यधिकः पाठः।
४. क० मा० 'अन्यथा शिष्टाकोपाधिकरणविरोधापत्तेः' इति पाठः।
ख० मा० 'शिष्टाधिकरणपठितानि सूत्राणि तु—' एतेन शिष्टापरिग्रहा अपि व्याख्याताः (ब्र० सू० २।१।१२)
५. घ० मा० 'तां' इति पाठो नास्ति।
६. ग० मा० 'बृहदारण्यके म्योचन्तिण्यन्या देवता' इति पाठः।
घ० मा० 'द्योचन्ति' इति पाठः।
७. घ० मा० 'नसायु इति पाठः।
८. घ० च० मा० 'व्याततवैं वेदेत्येक विज्ञानेन' इति पाठः।
९. घ० मा० 'निमते' इति पाठः।
१०. घ० मा० 'प्रतियते' इति पाठः।
११. घ० मा० 'प्रतियते' इति पाठः।
१२. घ० मा० 'अप्रमाण्यम्' इति पाठ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कारणत्वेन लिङ्गेन सहितोत्पत्तिबोधिका ।
प्रबलो तेन [1]सैवेह स्वार्थहानि न गच्छति ॥

'सर्वं एव आत्मानो व्युच्चरन्ती'ति[2] श्रुतिर्हि यद्यत्कारणं तत्सर्वं कार्यमिति व्याप्तिरपि[3] कारणत्वलिङ्गेन सह कृता ब्रह्मण उत्पत्तिं बोधयति 'न चास्य कश्चित्' (श्वे० उ० ६।९) इति श्रुतिस्तु तादृशतात्पर्यग्राहकप्रमाणराहित्या-द्वियदमृतत्वबोधकश्रुतिवत्कथञ्चिन्नेया । न च ब्रह्मणःकार्यत्वे कारणनिरूपणं कस्यचित्कारणस्यापि कल्पनीयत्वात् । न [4]चानवस्थाप्रामाणिकत्वाद्बीजाङ्कुरवदिति भावः । परमसिद्धान्तस्तु—

ब्रह्मणो [5]जनिमत्त्वे हि कारणन्नैव शक्यते ।
वक्तुं तेन न चेत्यस्या [6]श्रुतेस्तत्त्वार्थनिष्ठता ॥
बहुश्रुतिविरोधात्तु नेया [7]जन्मश्रुतिर्यतः ।
कारणत्वञ्च कार्यत्वे न हेतुस्तर्कवर्जनात् ॥

ब्रह्मणो [8]ह्युत्पत्तिमत्त्वऽङ्गीक्रियमाणे[9] तस्य कारणं किञ्चिद्वक्तव्यम् । न च तन्निरूपयितुं शक्यम् । सतः कार्यत्वे[10] हि तत्सामान्यस्य कारणत्वानुपपत्तिः । अत्यन्तसाजात्ये कार्यकारणभावयोगाद्विशेषस्य[11]-सामान्यं प्रति कारणत्वस्य नवाप्यदर्शनात् । असतश्च सत्कारणत्वस्य विरोधेनायोगादनवस्थापत्तेश्चासति प्रमाणे [12]तस्यान्ध-परम्परायां पर्यवसानात् । अस्मात् 'न चास्य कश्चिज्जनिता[13] न चाधिप' (श्वे० उ० ६।९) इति श्रुतिर्मुख्यार्थैव स्वीकार्या । [14]बहुश्रुतिविरोधाज्जनिश्रुतिरन्यथा[15] नेया, कारणत्वात्कार्यत्वानुमानं त्वप्रयोजकत्वाद्धेयमिति ।

---

१. ग० मा० 'सा नैव····निगच्छति' इति पाठः ।
२. घ० मा० 'ति पाठो नास्ति ।
३. च० मा० 'व्याप्त्युपेत' इति पाठः ।
४. क्लृप्तवस्तुसजातीयवस्तुपरम्पराकल्पनस्य विरामाभावोऽनवस्था । यथा जातौ जात्यन्तरं, तत्रापि जात्यन्तरं, इत्येवं तत्र तत्र जात्यन्तरस्वीकारेऽनवस्था ।
५. घ० मा० 'जनियत्वे' एति पाठः ।
६. ग० मा० 'मुख्यार्थानिष्ठिता' इति पाठः ।
च० मा० 'स्यात्स्वार्थनिष्ठता' इति पाठः ।
७. ग० मा० 'जननश्रुतिः' इति पाठः ।
८. घ० मा० 'ह्यत्तिमत्वे' इति पाठ ।
९. घ० मा० 'अङ्गी' इति पाठो नास्ति ।
१०. ग० च० 'कारणत्वे इति पाठः ।
११. ग० मा० 'च' इति पाठः ।
१२. घ० मा० 'तस्याध' इति पाठः ।
१३. घ० मा० 'कश्चज्ज' इति पाठः ।
१४. 'एकोऽहं बहुस्याम' इति श्रुतिः ।
१५. 'न चास्यकश्चिज्जनिता' इति जवि श्रुतिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तेजोऽधिकरणम्

तेजोऽतस्तथा ह्याह ।।४।।

'तत्तेजोऽसृजत' (छा० ६।२।३) इति श्रुतिस्तेजसो ब्रह्मकार्यत्वमाह 'वायोरग्नि' (तै० उ० २।१) इति तैत्तिरीयश्रुतिस्तु वायोस्सकाशादुत्पत्तिं तेजस आह । अतस्तयोर्विरोधात्प्रामाण्यमिनि पूर्वपक्षे, एकदेशिमतम्—

ब्रह्मैव तेजसो हेतुस्सर्वमित्यादिशास्त्रतः ।
पञ्चमी तु श्रुतौ वायोरग्निरित्यत्र या श्रुता ।।
क्रमार्था सा तु विज्ञेया नापादानत्वबोधिका ।
अतो विरोधात्प्रामाण्यमुभयोरपि सिध्यति ।।

'सर्वं खल्विदं ब्रह्म तज्जलम्' (छा० ३।१४।१) इति श्रुतौ 'स इमाल्लोकानसृजत' इति श्रुतौ 'इदं सर्वमसृजत यदिदं किञ्च, (तै० उ० २।६) इति श्रुतौ च सर्वस्य जगतो ब्रह्मकारणत्वप्रतिपादनाद्ब्रह्मैव कारणं तेजस इति निश्चीयते[1] । वायोरग्निरिति श्रुतौ तु पञ्चम्यानन्तर्यार्था भविष्यति । न चोपपदविभक्त्यपेक्षया [2]कारकविभक्तेर्बलीयस्त्वादपादानार्थकत्वमेव तस्याः स्वीकार्यमिति वाच्यम् । बहुश्रुतिविरोधेन पञ्चम्या अगत्या क्रमार्थत्वस्यैव स्वीकार्यत्वात् । अतः[3] श्रुत्योर्विरोधाभावान्नाप्रामाण्यमिति । सिद्धान्तस्तु

उपादानत्वशक्ता हि पञ्चमी तस्य बोधिका ।
[4]क्रमार्थत्वे तस्या हि शब्दस्याध्याहृतिर्भवेत् ।।
[5]ब्रह्मणश्चापि हेतुत्वं तेजसि श्वसनस्य च ।
अविरोधादतः श्रुत्योः प्रामाण्यमुपपद्यते ।।

'वायोरग्निः' (तै० उ० २।१) इति पञ्चमी-अपादान[6] श्रुत्या प्रतिपादयति । क्रमार्थत्वे त्वनन्तरमिति पदाध्याहारदोषप्रसङ्गात् । न च 'सर्वं खल्विदम्' (छा० ३।१४।१) इत्यादिश्रुतिविरोधादगत्याध्याहाराश्रयणमिति वाच्यम् । ब्रह्मणो वायोश्च[7] तेजः प्रति कारणत्वेन [8]श्रुतिद्वयोपपत्तेः । न चाकाशादेव समुत्पद्यन्त' इति [9]श्रुतावेवकारस्य श्रवणेन ब्रह्मणोऽन्यस्य जगत्कारणत्वप्रतिषेधादिदमयुक्तमिति वाच्यम् । ब्रह्मैव सर्वत्र कारणमिति मतेऽपि मायाया अपि मायान्तु प्रकृतिं विद्यात्' (श्वे० उ० ४।१०) इति श्रुत्यनुसारेण कारणत्वस्याभ्युपगम्यत्वेनैवकारानुपपत्तेस्तुल्यत्वान्मूलकारणान्तरव्यवच्छेदकत्वस्यैव[10] वक्तव्यत्वादतो विरोधात्प्रामाण्यं द्वयोरिति ।

१. घ० मा० 'निश्चयते' इति पाठः ।
२. उपपदविभक्तेः कारकविभक्तिबलीयसी' (म० भा०)
३. घ० मा० 'यत' इति पाठः ।
४. ग० मा० 'अमृतार्थायान्तु' इति पाठः ।
५. ग० मा० 'ब्रह्मवत् श्वसनस्यापि हेतुत्वं तेजसीष्यते' इति पाठः ।
६. च० मा० 'उपादान' इति पाठः ।
७. घ० मा० 'वायोश्च' इत्यधिकः पाठः ।
८. घ० मा० 'श्रुद्वय' इति पाठः ।
९. ग० मा० 'श्रुतावेवकारश्रवणेन' इति पाठः ।
१०. ग० मा० 'मूले इति सप्तमी' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अबधिकरम्

आपः ॥५॥

तैत्तिरीयशाखायां तेजसस्सकाशादपामुत्पत्तिः श्रुता 'अग्नेरापः' (तै० उ० २।१) इति। 'एतस्माज्जायते प्राणमनस्सर्वेन्द्रियाणि च खंवायुज्योत्तिरापः पृथिवी विश्वस्य धारिणी' (कै० उ० १५) इति श्रुतौ चापां ब्रह्मणस्सकाशादुत्पात्तिराम्नाता। अतः श्रुत्योर्विरोधादप्रामाण्यमिति पूर्वंपक्षादिकं पूर्ववदेव[1]। विशेषशङ्का त्वम् तेजसोर्विरोधेन[2] कार्यंकारणभावानुपपत्तिरिति,[3] परिहारस्तु [4]त्रिवृत्कृतानामेव विरोधो नात्रिवृत्कृतानामिति। अतोऽप्तैजसोर्हेतुहेतुमद्भावे[5] नानुपपत्तिरिति।

पृथिव्यधिकाराधिकरणम्

पृथिव्यधिकाररूपशब्दान्तरेभ्यः ॥६॥

'ता अन्नमसृजत' (छा० ६।२।४) इति [6]छन्दोगशाखायामद्भ्यस्सकाशादन्नसृष्टिराम्नाता, [7]तैत्तिरीयशाखायान्त्व(सकाश)द्भ्यःपृथिव्या उत्पत्तिराम्नाता। अतःश्रुत्योर्विरोधादप्रामाण्यमिति पूर्वंपक्षः। अत्र एकदेशितम्। अन्नशब्देन ब्रीह्यादिकं गृह्यते। अन्न[8] शब्दस्य तत्र रूढ़त्वान्न तु पृथिव्यन्नशब्दस्य तत्रासक्तत्वाल्लक्षणायाश्च मानाभावात्। न च 'अद्भ्यः पृथिवी, पृथिव्या ओषधयः, ओशधिभ्योऽन्नम्' (तै० उ० २।१) इति श्रुति विरोधः। छन्दोगशाखायां पृथिव्योषध्योरुपसंहारोपपत्तेः विरोध। इति प्राप्ते ब्रूमः

अन्नशब्दः पृथिव्यादिबोधकोऽधिकृते बलात्।
रूपशब्दोत्तराच्चापि नत्वौषधिपरिग्रहः॥

अन्नशब्दो यद्यपि 'भिस्सारभक्तमन्धोऽन्नम्[9]' इति (निखण्टु) निघण्टुबलादोदने शक्तः। वृद्धप्रचुरप्रयोगाद्व्रीहादावपि, तस्माच्चात्र कर्षति तदेव भूयिष्ठमन्नं भवद्भ्य एव तदघ्रन्नापाञ्जायत' इति श्रुतिबलाच्च, अबजातत्वं[10] ब्रीह्यादीनामेव[11] प्रतीयते[12], न तु पृथिव्याः, नापि[13] महाभूताधिकारिणान्नशब्देन[14] पृथिव्या एव ग्रहणमुचितं

१. घ० मा० पूर्वं चदेव' इति पाठः।
२. ग० मा० परस्परविरुद्धत्वेन' इति पाठः।
३. ग० मा० 'आपो ब्रह्मजावेति' इति पाठः।
४. ग० मा० त्रिवित्कृतयोस्तयोर्विरोधेप्य आपृयोरप्तेजसो' इति पाठः।
५. ग० मा० 'भावे नानुपपत्तिः' इति पाठः।
६. घ० मा० 'मयस्संकाशात्' इति पाठः।
७. घ० मा० 'त्वयस्सकाशात्' इति पाठः।
८. घ० मा० 'च शब्दस्य' इति पाठः।
९. भक्तमन्नं तथान्धश्च क्वचित्कूरश्च कीर्तितम्।
ओदनो स्त्री स्त्रियां भिस्सादी दिवि पुंसि माश्रितः। (भा० प्र० नि० पृ० ७२४) यद्यपि पाठोऽयं मौलविपरीतक्रममनुतिष्ठति। तथाप्यन्नाभिधानपरिगणनात्समुद्ध्रियते।
१०. ग० मा० 'श्रुतिबलाच्छब्जातत्वम्' इति पाठः।
घ० मा० 'अज्जात्वम्' इति पाठः।
११. घ० मा० 'ह्यादीनाम्' इति पाठः।
१२. घ० मा० 'प्रतियते' इति पाठः।
१३. घ० मा० 'तापि' इति पाठः।
१४. घ० मा० 'करेण' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'तथा यत्कृष्णं तदन्नस्येति कृष्णवर्णत्वोक्तेश्च तद्यदपां शर[१] आसीत्तत्समहन्यत सा पृथिव्यभवदिति श्रुतौ स्थूलाभ्योऽपः स्थूलापाः पृथिव्या उत्पत्यवगमेन सूक्ष्मयोरपि[२] तयोहेतुहेतुमद्भावस्य [३]कल्पनीयत्वाच्च। तस्माद्यन्निितिवाक्यमपि पार्थिवाप्ययोहेतुहेतुमद्भावस्य प्रतिपादकमिति नकाप्यनुपपत्तिरिति।

तदभिध्यानाधिकरणम्

तदभिध्यानादेव तु तल्लिङ्गात्सः ।।७।।

'आकाशाद्वायुः वायोरग्निरग्नेरापरद्भ्यः : पृथिवी पृथिव्या औषधय, (तै०उ०१।१) इति तैत्तिरीयशाखायां श्रूयते। तत्रैव 'सोऽकामयत बहुस्यां प्रजायेयेति 'स तपोऽतप्यत' स तपस्तप्त्वा इदं सर्वमसृजत यदिदं किञ्चेति (तै० उ० २।६) तत्र श्रुत्योः परस्परविरोधादप्रामाण्यमिति पूर्वपक्षः। न च श्रुत्योः कथं विरोधः 'वायोरग्निरग्नेरापः' (तै० उ० १।१) इत्यादिश्रुतिः तोयादिकं[४] प्रत्यग्न्यादीनामुपादानत्वं प्रतिपादयति। तच्चोपादानत्वं ब्रह्मण उपादानत्वेत्यविरुद्धमिति वाच्यम्, 'तत्तेज ऐक्षत' ता आप ईक्षते (छा० ६।२।३) इति श्रुत्या तेज आदीनां कर्तृत्वोक्त्या तैत्तीयशाखायामपि तस्योपसंहारेणैकेनैव कार्यसिद्धेः कर्तृद्वयायोगेन विरोधात्। न च 'ता आप ऐक्षत' (छा० ६।२।३) इत्यादावीक्षणस्य गौणत्वमीक्षत्यधिकरण एवोक्तमिति वाच्यम्। तस्यैतदधिकरणमूलकत्वात्। न च पृथिव्यादीनाञ्चेतनत्वापत्तिरिति[५] वाच्यम् इष्टत्वात्। न च 'नान्योऽतोऽस्ति' (छा० उ० ३।७।२-३) इति श्रुतिविरोधस्तस्य जीवब्रह्माभेदपरत्वादतो विरोधादप्रामाण्यमिति। एकदेशी तु

प्राणाऽन्या ब्रह्मणः तत्कर्तृता सम्भवो यतः।
आकाशाद्वायुरित्यादिवाक्यं स्वार्थपरं भवेत्[७] ।।
नियन्तृतापि तस्यैव न तु साक्षात्तथा सति।
श्रुत्योर्नैव विरोधोऽस्ति ह्यप्रामाण्यं कुतस्तयोः[८] ।।

'सोऽकामयत' (तै० उ० २।६) इति श्रुत्या ब्रह्मणस्सर्वकर्तृत्वं प्राणादिकमस्तु[९] वियदादीनां कर्तृत्वं साक्षादस्त्वतो विरोध इत्याह।

परमसिद्धान्तस्त्वाह

व्योमादीनाञ्च भूतानाञ्चैतन्यन्नैव सम्भवि।
मानाभावतया तस्मान्नान्योऽत इति वाक्यतः ।।

---

१. म० मा० 'तद्यवपायीश' इति पाठः।
२. घ० मा० 'सूक्ष्योरपि' इति पाठः।
३. घ० मा० 'कल्पनिय' इति पाठः।
४. घ० मा० 'श्रुतिर्थणादीना' इति पाठः।
५. ग० मा० 'न च तेज आदीनां चेतनत्वापत्तिरिति वाच्यम्' इति पाठः।
६. ग० मा० 'प्रभा''''''ब्रह्मणस्सर्वकर्तृत्वं सम्भवेद्यतः' इति पाठः।
७. ग० मा० 'कर्तृपरं भवेत्' इति पाठः।
८. ग० मा० 'श्रुत्यो विरोधविरहादप्रामाण्यं कुतस्तयो' इति पाठः।
९. ग० मा० 'अन्तर्यामिब्राह्मणसिद्धं सर्वनियन्तृत्वञ्च प्राणादिनामौपचारिकमस्तु वियदादीनामुत्तरोत्तरभूतकर्तृत्वादिकञ्च साक्षादस्तु, अतो न विरोधः' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निषेधाच्चापि तेषां खल्वीक्षणं गौणमिष्यते ।
चैतन्यसम्भवे वापि द्वयोः कर्तृत्वमिष्यताम् ।।

अन्तर्यमनवाक्येन साक्षात्सर्वनियन्तृता ।
श्रुता यतस्ततस्तस्य न स्याद्यमनकर्तृता ।।

अन्तर्यामिब्राह्मणो हि 'यः पृथिव्यां तिष्ठन्' इत्यादि (बृ० उ० ३।७।३) सर्वेषां पृथिव्यादिभूतानामन्तर्यामित्वेन परमात्मा प्रतिपादितः । अतस्सर्वनियन्तृत्वं साक्षादेवास्य गम्यते । न च पृथिव्यादीनां[1] भूतानाञ्चैतन्ये मानमस्ति[2] 'नान्योऽतोऽस्ति' (बृ० ३।७।२३) इति श्रुत्या विरोधात्तत्कार्यञ्चैतन्यानुपलब्धेश्च । अतस्तदीक्षणं[3] गौणमेव[4] । सत्यपि वा चैतन्ये द्वयोरपि कर्तृत्वोपपत्तेः श्रुतिकल्पेऽर्थेऽपेक्षाया अनुपयोगात् 'तस्माद्वाकाशाद्वायुः' (तै० उ० २।१) इत्यादिश्रुतिरपादानत्वमात्रभूते कर्तृत्वस्यापि बोधनेन वा नानुपपत्तिरिति ।

विपर्ययाधिकरणम्

विपर्ययेण तु क्रमोऽत उपपद्यते च ।।८।।

उत्पत्तिक्रमो निरूपितः भूतानाम् । प्रलयक्रमोऽधुना निरूप्यते । तत्र किं प्रलयेऽनियतक्रमः[5] क्रमापेक्षायामुपस्थितत्वादुत्पत्तिक्रम[6] एव स्वीक्रियते । प्रश्नोत्तरस्य प्रत्यासन्नत्वादिति ।

सिद्धान्तस्तु—

उपादानस्य नाशे हि न कार्यं स्थातुमर्हति ।
अतः कार्यविनाशो हि प्रथमञ्जायते ततः ।।
उपादानस्य तेनात्र सृष्टिक्रमविपर्ययः ।
सदेवेत्यादिवाक्यं खल्वैवं सत्युपपद्यते ।।

सृष्टिक्रमाद्विपरीतक्रमः प्रलये स्वीकार्यः । अन्यथा कारणनाशानन्तरं कार्यस्य स्थित्यापत्त्या निराश्रयकार्य्यस्थितेरनुभवविरुद्धत्वात् । एवञ्च सति प्रलयकाले 'सदेव सौम्येदमग्र आसीत्' (छा० ६।२।१) इति श्रुत्या कारणमात्रपरिशेषव्युत्पादनमुपपद्यते । प्रलयस्य ध्वंसरूपस्य कारणरूपत्वात् । तदुक्तम्—

---

१. ग० मा० 'आकाशादिभूतानान्' इति पाठः ।
२. घ० मा० 'म' इति पाठो नास्ति ।
३. घ० मा० 'अतस्ततदिक्षणम्' इति पाठः ।
४. घ० मा० 'च' इत्यधिकः पाठः ।
५. ग० मा० 'उक्तोत्पत्तिक्रमेणैव ततो विपरीत क्रमोदेति संशये पूर्वःपक्षः, नियमे कारणाभावान्न लये नियतः क्रमः ।' उत्पत्तौ वा श्रुतत्वेन संग्राह्यो (नासाद्विपर्यया) इति च नियमकारिणशशास्त्रस्याभावात्प्रलये युगपदेव तन्तुपटादेर्दाहेन नाशदर्शनाच्च न नियतक्रमः । अथवा क्रमापेक्षायामुपस्थितत्वादुत्पत्तिक्रम एव स्वीक्रियते । न तद्विपरीतक्रमः कल्प्यते' श्रौतस्य प्रत्यासन्नत्वादित्यधिकः पाठः ।
६. घ० मा० 'क्रमापेक्षायाम्' इत्यधिकः पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जगत्प्रतिष्ठा देवर्षे पृथिव्यप्सु प्रलीयते[1] ।
ज्योतिष्यापः प्रलीयन्ते ज्योतिर्वायौ प्रलीयते ॥
वायुश्च लीयते व्योम्नि तच्चाव्यक्ते प्रलीयते ।
अव्यक्तं पुरुषे ब्रह्मन्निष्कले सम्प्रलीयते ॥
पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गतिः ।
(म० भा० शा० प० १२८, ९३-९५)

अन्तराविज्ञानाधिकरणम्

अन्तरविज्ञानमनसी क्रमेण तल्लिङ्गादिति चेन्नाविशेषात् ॥६॥

तैत्तिरीयशाखायां 'तस्माद्वा एतस्मादात्मन आकाश सम्भूत' (तै० उ० २।१) इत्याकाशप्राथम्यमुक्तम्[2] । आथर्वणोपनिषदि तु 'एतस्माज्जायते प्राणमनसर्वेन्द्रियाणि च खं वायुज्योतिरापः पृथिवी विश्वस्य धारिणी' इत्यस्यामृचि प्राणादिका सृष्टिराम्नाता । अतः श्रुत्योर्विरोधादप्रामाण्यमिति पूर्वपक्षे, एकदेशिमतम्

तैत्तिरीयकशाखायां प्राणादीनां तु संहृतिः ।
स्वीकार्या न विरोधोऽस्ति श्रुत्योः प्रामाण्यमिष्यते ॥

'वियदधिकरणन्यायेन' प्राणादीनां तैतिरीयशाखायामुपसंहार एव स्वीकार्यः । न च भौतिकत्वात्तेषां भूतानन्तरमेव निवेशो युक्त इति वाच्यम् । भौतिकत्वे मानाभावात्, 'न चान्नमयं हि सौम्य मनः' (छा० ६।५।४) इत्यादिश्रुतिरेव मानमिति वाच्यम्, 'अन्नमशितं त्रिधा विधीयते' (छा० ६।५।१) इति वाक्यमशितस्यान्नस्य त्रेधाविभापूर्वक्रम-निष्ठस्य मनो रूपत्वं व्युत्पाद्य 'अन्नमयं हि सौम्य मनः' (छा० ६.५।६) इति प्रतिपादयति । न च पूर्वं मनस्यसति[3]-अन्नाशनं सम्भवति । अतो मनस्सकायां प्राक्सिद्धायामन्नकार्यत्वानुपपत्त्या[4] तन्मयत्वं तदाप्यायितत्वमेव[5] वक्तव्यम् । न च भौतिकत्वे यत्किञ्चित्प्रमाणमस्ति । अत उपसंहार एव प्रमाणानामिति[6] ।

---

१. (क) प्रलयो नाम 'त्रलोक्यनाशः । स च चतुर्विधः—नित्यः, प्राकृतः, नैमित्तिकः, आत्यन्तिश्केति । तत्र नित्यप्रलय सुषुप्ति-काले सकले विलीने' (कै० उ० १।१२) श्रुतिमानात् (वे० प० पृ० ३६४) ।
(ख) कार्यब्रह्मविनाशनिमित्तकस्सकलकार्यनाशः प्राकृतः प्रलयः, एवञ्च स्वर्लोकवासिभिस्सह कार्ये ब्रह्मणि मुच्यमाने तदधि-ष्ठितब्रह्माण्डतदन्तर्वर्तिनिखिललोक तदन्तर्वर्तिस्थावरादीनां भूतानां भौतिकानाञ्च प्रकृतौ मायायां च लयः, न तु ब्रह्मणि बाधरूपविनाशस्यैव ब्रह्मनिष्ठत्वात् । अतः प्राकृत इत्युच्यते । (वे० प० पृ० ३६८) ।
(ग) कार्यब्रह्मणो दिवसावसाननिमित्तिकत्रैलोक्यमात्रप्रलयः नैमित्तिकप्रलयः । ब्रह्मसाक्षात्कारनिमित्तकस्सर्वमोक्षाऽऽत्यन्तिक-प्रलयः (वे० प० पृ० ३७१) तथा चोत्पत्तिविपरीतक्रमेण पृथिव्या अप्सु, अपां तेजसो वायौ, वायोराकाशे, आकाशस्य जीवाहङ्कारे, तस्य हिरण्यगर्भाहङ्कारे, तस्य चाविद्यायामित्येवं रूपा प्रलयाः भवन्ति (वे० प० पृ० ३७४) ।

२. ग० मा० 'सृष्टावाकाश' इति पाठः ।
३. ग० मा० 'पुरुषस्य' इति पाठः ।
४. घ० मा० 'प्रसिद्धायां' इति पाठः ।
५. घ० मा० 'तदाप्यपितत्वम्' इति पाठः ।
६. ख० मा० 'दीनाम्' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सिद्धान्तस्तु—

प्राणस्य चेन्द्रियाणाञ्च भौतिकत्वेन हेतुना ।
भूतजन्युत्तरे काले जन्म स्यान्न तु पूर्वतः ॥

'अन्नमयं हि सौम्य मनः' (छा० ६।५।४) इति श्रुत्या ह्यन्नोपचितत्वोक्त्यान्नकार्यत्वे तदुपचिते[२] मनसि ह्यनुचितस्यापि[३]-कारणत्वाकाङ्क्षायां[४] पृथिव्येव कारणत्वेन कल्प्यते। एवं वाचापि 'तेजोमयी वाग्' (छा० ६।५।४) इति श्रुतिस्वारस्यात्तेजोविकारत्वं 'यः प्राणः स वायुः' इति श्रुत्यन्तरानुसारेण वायुविकारत्वं प्राणस्यात एतेषां भौतिकत्वे स्थालीपुलाक' न्यायेनेतरेषामपीन्द्रियाणां भौतिकत्वं कल्प्यते। ततश्च भूतोत्पत्तेः प्राक् प्राणादीनां सृष्ट्यनुपपत्त्या आथर्वणिकक्रमोऽध्ययनार्थं एव सम्पद्यते। अत एव प्रश्नोपनिषदि भूतसृष्ट्यनन्तरमिन्द्रियसृष्टिराम्नाता 'खं वायुर्ज्योतिरापः पृथिवीन्द्रियं' इति। तत्रापि प्राणसृष्टिक्रमोऽविवक्षित[५] एव। तस्मात्तैतरीयशाखायां नोपसंहार इति।

चराचरव्यपाश्रयाधिकरणम्

चराचरव्यपाश्रयस्तु स्यात्तद् व्यपदेशो भाक्तस्तद्भावभावित्वात् ॥१०॥

इतः परमापादपरिसमाप्तेः जीवस्य ब्रह्मैक्यप्रतिपादकश्रुतिविरोधः परिह्रियते। तत्र जीवस्य जातकर्मादिशास्त्रमुत्पत्त्यादिकं प्रतिपादयति, 'न जायत' इति वाक्यात्तु[६] तद्भावम्, अतो विरोधादप्रामाण्यमिति पूर्वपक्षे एकदेशिमते[७] 'जातो देवदत्त मृतो देवदत्त' इति प्रत्यक्षोपोद्बलितजातकर्मश्रुतेः प्राबल्यात्तदनुसारेण[८] 'न जायत' इति श्रुतिः कथञ्चिन्नोपेयमिति[९]। सिद्धान्तस्तु [१०]जीवस्योत्पत्तिविनाश(व)त्वेऽअङ्गीकियमाणे[११] कृतविप्रणाशाकृताभ्यागमप्रसङ्गेन शरीरोपाधिकादेवोत्पत्तिविनाशौ जातकर्मादिनिमित्तम्। अत एव 'जीवापेतं वावकिलेदं म्रियते' (छा० ६।११।३) इति श्रुतिः[१२] 'स ह्ययं पुरुषः जायमानः शरीरमभिसम्पद्यमानः पाप्पभिः समसृज्यत[१३] स उत्तक्राम-म्रियमाणः पाप्पनो विजहाति' इति श्रुतिः शरीरोपाधिकमेवोत्पत्त्यादिकं दर्शयति, न तु मुख्यमिति न शरीराद्युत्पत्तिसमये जीवोत्पत्तिरिति।

१. ग० मा० 'इत्युत्तरे' इति पाठः।
२. घ० मा० 'तदुप' इति पाठो नास्ति।
३. ग० मा० 'प्राविसद्धस्य' इति पाठः।
४. घ० मा० 'कारणाकांक्षायाम्' इति पाठः।
५. ग० मा० 'न विवक्षित एवेति मन्तव्यम्' इति पाठः।
६. ग० मा० 'इत्यादि शास्त्रन्तु तस्य' इति पाठः।
७. च० मा० 'वाक्यान्तु' इति पाठः।
च० मा० 'मतम्' इति पाठः।
८. घ० मा० 'तदनुसारेण जायत' इति पाठः।
९. ग० मा० 'नेया' इति पाठः।
१० घ० मा० 'जीवद्रेत्य' इति पाठः।
११. घ० मा० 'अंगी' इति पाठो नास्ति।
१२. घ० मा० 'श्रुतिः' इनि पाठो नास्ति।
१३. घ० मा० 'समसृज्यते' इति पाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आत्माधिकरणम्

नात्मा श्रुतेर्नित्यत्वाच्च ताभ्यः ॥११॥

'सर्वं एत आत्मनोव्युत्पत्तिरिति'[1] श्रुतिर्जीवानामुत्पत्तिं प्रतिपादयति। 'अनेन जीवेनात्मनो तु प्रविश्य 'तत्त्वमसि' (छा० ६।११।३) इत्यादिश्रुतयो जीवस्य ब्रह्माभेदं बोधयन्त्यो जीवनित्यातायां पर्यवस्यन्ति। अतः श्रुत्योरप्रामाण्यमिति[2] पूर्वपक्षे सिद्धान्तैकदेशिमतम्।

एकज्ञानेन सर्वस्य ज्ञप्त्या[3]-चोत्पत्तिरिष्यते।
विभक्तत्वाच्च जीवानामभेदस्य तु बोधिका॥
श्रुतिर्नेया विकारत्वमुपादाय कथञ्चन।
सर्गादावाकाशवज्जीव सर्गादावुद्भविष्यति[4]॥

देहोत्पत्तिकाले जीवस्योत्पत्त्यभ्युपगमे तन्नाशकाले नाशस्य च विधिप्रतिषेधानर्थक्यं स्यात्। सर्गादौ वियदादिवत्पत्त्युपगतौ[5] न तद्बाधकमस्ति। अतः 'एक विज्ञानेन सर्वविज्ञानं' सिद्धयर्थञ्जीवानामुत्पत्तिः स्वीकार्या। विभक्तत्वादपि ब्रह्मभेदप्रतिपादनन्तु ब्रह्मविकारत्वादप्युपपन्नम्। अतो जीवानामुत्पत्तिरिति।

सिद्धान्तस्तु

जीवस्योत्पत्तिमत्वे हि विनाशोऽपि भवेद्ध्रुवम्।
कृतस्य हानमेवं स्यादकृतस्यापि चागमः॥
प्रसज्येत ततो जीवो नोत्पत्तिं प्राप्तुमर्हति।
जीवब्रह्मैक्यतश्चैव ज्ञानमप्युपपद्यते॥

जीवब्रह्मणोरेकत्वेन ब्रह्मणि ज्ञाते[6] ज्ञातत्वोपपत्त्या विभागस्य च सति बाधके[7] उत्पत्तिसाधकत्वाभावात्सर्गकाल उत्पत्तौ स्वीक्रियमाणायां प्रलये विनाशस्याप्यापत्त्या[8] प्रलयात्प्रागनुष्ठितानां कर्मणां वैफल्यापत्त्या प्रलयानन्तरमुत्पद्यमानानाञ्जीवानां[9] सुखः-दुःखहेतुकर्माभावेन तद्वैचित्र्यानिर्वाहाज्जीवनित्यत्वमेष्टव्यम्। एवञ्चोत्पत्तिश्रुतिरौपाधिकीति[10] न तस्य ब्रह्मभेदानुपपत्तिरिति।

---

१. घ० मा० 'व्युच्चुतिरीति' इति पाठः।
२. ग० मा० 'विरोधात्' इति पाठः।
३. ग० मा० 'ज्ञानादुत्पत्तिरिष्यत' इति पाठः।
४. ग० च० मा० 'तस्मादाकाशवज्जीवस्स्वर्गादावुद्भविष्यति' इति पाठः।
५. घ० च० मा० 'दुत्पत्ता' इति पाठः।
६. ग० मा० 'जीवस्य' इति पाठः।
७. घ० मा० 'सनिवाद्यकै' इति पाठः।
८. घ० मा० 'स्यापिप्यायत्या' इति पाठः।
९. घ० मा० 'जीवानां' इति पाठो नास्ति।
१०. ग० मा० 'एवञ्चोत्पत्तिश्रुविरौपाधिकोत्पत्तिविषया इति न देधाम्' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्ञाधिकरणम्

ज्ञोऽत एव ॥१२॥

'विज्ञानात्मा पुरुष' इति विज्ञानरूपताम्नायते[1]। ज्ञानस्वरूपब्रह्माभेदश्रुतेश्च ज्ञानस्वरूपतावगम्यते 'एषो हि द्रष्टा श्रोता' (मु० उ० ४।९) इत्यादिजीवस्य श्रुतिवचनैर्ज्ञानाश्रयतापि गम्यते। अतः श्रुतीनां परस्परविरोधादप्रामाण्यमिति पूर्वपक्षे सिद्धान्त्येकदेशिमतम्।

जीवो ज्ञानाश्रयस्तस्य मनोयोगात्तु[2] सम्भवः।
तस्य ज्ञानस्वरूपत्वे गुणता हि प्रसज्येत ॥
ज्ञानस्वरूपतायां[3] हि सुप्त्यभाव प्रसज्यते।
ब्रह्मणोऽपि हि न ज्ञानरूपत्वमुपपद्यते ॥
'यस्सर्वज्ञ' इति ह्यस्माज्ज्ञानवत्त्वप्रतीतितः[4]।
एवञ्च ज्ञानशब्दोऽपि ह्यर्श आदिर्भविष्यति ॥

'एषः हि द्रष्टा' (प्र० उ० ४।९) इत्यादिश्रुतिपर्यालोचनया जीवो ज्ञानवानेव, तच्च [5]ज्ञानमात्मनो[6] मनोयोगादिनोत्पद्यते, नित्यज्ञानस्वरूपत्वे गुणत्वप्रसङ्गान्नित्यज्ञानाश्रयत्वे च सुषुप्त्यभावप्रसङ्गात्सर्वज्ञानोपरमस्यैव सुषुप्तिभावरूपत्वादीश्वरस्यापि न ज्ञानरूपत्वं, किन्तु ज्ञानवत्त्वमेव, तच्च ज्ञानन्नित्यमित्येतावान्भेदः। न च 'सत्यं ज्ञानम्' (तै० उ० २।१) इति श्रुतिपर्यालोचनया ज्ञानरूपत्वं ब्रह्मणोऽधिगतम्। तदभेदात् 'विज्ञानात्मा पुरुष, इति श्रुतिबलाच्च[7] ज्ञानत्वमेव जीवस्य स्वीकार्यम्। ततश्चोक्ताः दोषाः परिहरणीया इति वाच्यम्. 'यस्सर्वज्ञः', इति श्रुतिपर्यालोचनया[8] श्रुत्यनुसारेण ब्रह्मणो ज्ञानत्वे सिद्धे 'सत्यं ज्ञानम्, (तै० उ० २।१) इत्यत्र ज्ञानशब्दस्य[9] 'अर्श आदिषु' पाठमभ्युपगम्याजन्तत्वकल्पनस्यैव न्याय्यत्वादन्यथान्तोदात्तत्वानुपपत्तेः। ल्युडन्तत्वे हि लित्स्वरेण ज्ञाधात्वाकारस्योदात्वेन अन्त[10] स्वरितत्वमेव स्यादजन्तत्वे तु चित्त्वादन्तोदात्तत्वं सम्भवति[11]। एवमेव 'नित्यं विज्ञानम्' इत्यादावपि द्रष्टव्यम्। अतो[12] जीवब्रह्मणोः ज्ञानरूपत्वमिति।

---

१. ग० मा० 'जीवस्य' इति पाठः।
२. घ० मा० 'योगादिनोद्भवः' इति पाठः।
३. घ० मा० 'मनोयोगात्' इति पाठः।
४. ग० मा० नित्यज्ञानाश्रयत्वे च' इति पाठः।
५. घ० मा० 'अज्ञानवत् प्रतीयते' इति पाठः।
६. घ० मा० 'मनो' इति पाठो नास्ति।
७. घ० मा० 'श्रुतिः' इति पाठः।
८. घ० मा० 'श्रुतिपर्यालोचनया' इति पाठो नास्ति।
९. घ० मा० 'स्पार्शं आदिक्षुपातुमभ्युगम्य' इति पाठः।
१०. घ० मा० 'अन्तः' इति पाठो नास्ति।
११. ग० मा० 'भविष्यति' इति पाठः।
१२. घ० मा० 'न' इत्यधिकः पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सिद्धान्तस्तु

बहुश्रुत्यनुसारेण ज्ञानरूपत्वमात्मनः।
ज्ञानात्मकब्रह्मणोश्च भेदाभावादिहेष्यताम् ॥
'सर्वज्ञ' इति शब्दश्च ज्ञानस्य[1] प्रतिपादकः।
प्रसिध्या ज्ञानशब्दोऽपि ज्ञानस्यैवावबोधकः[2] ॥
अजन्यता कल्पनन्तु न कथञ्चित् प्रसिध्यति।
गुणतादिप्रसक्तिश्च[3] न दोषांऽत्र प्रसज्यते ॥

जीवो ज्ञानरूप एवाङ्गीकर्तव्यः, अत्र 'अयं पुरुषः स्वयञ्ज्योतिः' (बृ० ४।३।९) न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते (बृ० ४।३।२३) 'अथ यो वेदं जिघ्राणीति स आत्मा' (छा० ८।१२।४) 'असुप्तस्सुप्तानभिचाकशीं' इत्यादिबहुश्रुतिपर्यालोचनया ज्ञानरूपत्वावगमात्।

न च गुणतापत्ति[4] शङ्का। गुणत्वजातौ[5] मानाभावान्नित्यज्ञानेनैव सुप्तोत्थितस्य 'न किञ्चिदवेदिषमि' ति परामर्शस्य वक्तव्यत्वेन स्वापेऽपि नित्यज्ञानावश्यंभावाच्च, सुषुप्तिस्तु बृत्तिज्ञानोपरम एव, तत्प्रयुक्तश्च[6] दृष्टत्वादिव्यवहारः। अत एव स्वापकाले 'न हि द्रष्टुर्दृष्टेर्विपरीलोपो विद्यत' (बृ० ४।३।२३) इत्यादिना ज्ञानस्य नाशाभावः प्रतिपादितः। अतो ज्ञापरूप एव जीवः। ब्रह्मणि ज्ञानरूपमेव। न च 'सर्वत्र' इत्यादिश्रुत्या ज्ञानाश्रयत्वप्रतीतिरिति वाच्यम्। औपाधिभेदमाश्रित्याश्रयाश्रयिभावस्य[7] घञर्थ विधानमिति (वाच्यम्) [8]भावप्रत्ययान्ततत्वस्यैवाश्रयणीयत्वात्। अन्यथा 'सत्यं ज्ञानं' 'नित्यं विज्ञानम्' इत्यादिश्रुतिभिर्ज्ञानरूपत्वप्रतिपादनमनुपपन्नं स्यात्। न च तत्राप्यर्श आद्यजन्तत्वकल्पनया ज्ञानवत्वमेव प्रतिपाद्यत इत्युक्तमिति वाच्यम्। तथात्वे ज्ञानपदस्य भावबोधकत्वं प्रसिध्यति। क्रमस्य प्रत्ययद्वयकल्पनायाश्चापत्तेः। आत्मनो धर्मिणः कल्पनं [9]तयोर्नित्यत्वादिकल्पनमित्यादिदोषापत्तेश्च। न चान्तोदात्तत्वानुपपत्तिरिति वाच्यम्, औणादिकप्रत्ययेन[10] ज्ञानशब्दव्युत्पादनेन प्रत्ययस्वरेणान्तोदात्तत्वस्याप्युपपतेश्च[11]। अत[12] उभयोर्ज्ञानरूपत्वादेकत्वयोग्यतास्तीति।

---

१. ग० मा० 'ज्ञानरूपेश तत्परः' इति पाठः।
२. ग० 'ज्ञप्तिमात्रावबोधकः' इति पाठः।
३. ग० मा० 'प्रसंगश्च' इति पाठः।
४. ग० मा० 'दोष' इति पाठः।
५. घ० मा० 'जावौ' इति पाठः।
६. ग० मा० 'एव चात्मनि' इति पाठः।
७. ग० मा० 'आश्रियभावस्य घर्थक' इति पाठो नास्ति!
८. घ० मा० 'त्वस्य वाश्रयणीय' इति पाठः।
९. ग० मा० 'धर्मधर्मिणो' इति पाठः।
१०. ग० मा० 'न प्रत्ययेन' इति पाठः।
११. ग० मा० 'उदात्तत्व' इति पाठः।
१२. 'लिपि' (पा० ६।१।१९३) प्रत्ययात्पूर्वमनुदात्ते भवतीति नियमात् ल्युटि' 'ज्ञान' शब्दे धात्वंशस्योदात्तत्वं प्राप्नोति, औण्यादिक 'न' प्रत्यये कृते च 'आद्युदात्तश्च' (पा० ३।१।३) सूत्रेण प्रत्ययस्याद्युदात्तत्वविधानात् पदान्तभूतस्य प्रत्ययांशस्योदात्तत्वमिति विवेकः।

द. नं. 90386

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उत्क्रान्तिगत्यधिकरणम्

उत्क्रान्तिगत्यागतीनाम् ॥१३॥

'एषोऽणुरात्मा चेतसा वेदितव्यो यस्मिन्[१] प्राणे' (मु० उ० ३।१।९) इति श्रुतिर्जीवस्याणुत्वं[२] प्रतिपादयति। 'अङ्गुष्ठमात्रो रवितुल्यरूपः' (श्वे० उ ५।८) इत्यङ्गुष्ठपरिमाणत्वं, [३]क्वचिच्छ्रुतिः प्रतिपादयति 'स वा एष महाजन आत्मा' इत्यादिश्रुतिस्तु महत्त्वम्। अतः श्रुतीनां विरोधादप्रामाण्यं सिद्धान्तैकदेशिमतम्

जीवात्मनोर्विभुत्वञ्चेदुत्क्रात्यादिर्न सिध्यति।
मध्यमे परिमाणे च स्वीकृते नित्यता भवेत् ॥
अतोऽणुपरिमाणत्वं तस्यापेयं तथा सति।
सर्वाङ्गिणः सुखादिश्च व्यापिज्ञाने न सिध्यति ॥

जीवस्य हि विभुत्वेऽङ्गीक्रियमाणे देहानिर्गमनं परलोकगमनं पुनरागमनोपत्त्यादिकं सिध्येत्। विभोराकाशस्यैव गमनादेरनुपपत्तेः। मध्यमपरिमाणत्वे चानित्यत्वप्रसङ्गः। अतोऽणुपरिमाणत्वमेव स्वीकार्यम्। एवञ्च 'एषोऽणुरात्मा चेतसा वेदितव्यः' (मु० उ० ३।१।९) 'बालाग्रसतभागस्य शतधा कल्पितस्य च भागो जीवः' (श्वे० उ० ५।९) इति श्रुतिश्चोपपद्यते। महत्त्वश्रुतिस्तु परमेश्वरपरा क्वचिज्जीवे तत्तदुक्तिस्तु[४] जडभेदेनोपास्त्यर्थेति न विरोधः। न च सर्वाङ्गिणः शैत्याद्यनुपलब्धिप्रसङ्गः [५]आत्मनोऽणुत्वादिति वाच्यम्। तदज्ञानस्य प्रभावात्सङ्कोचविकासाभ्युपगमने व्यापित्वेन सर्वाङ्गिणः शैत्याद्युपपत्तेः गुणस्य गन्धादिवद्गुणिनं[६] विहाय बहिर्निर्गमनोपपत्तेश्चेति।

सिद्धान्तस्तु

अणुत्वं यदि जीवस्य स्वीकर्तव्यं तथा सति।
सर्वाङ्गीणतया[७] भानं सुखादेर्नैव सिद्ध्यति ॥
गुणस्य व्यापिता चापि न लोकान्नापि शास्त्रतः।
सिद्धा[८] तस्मान्मनस्सत्तामुपादाय भुजिक्रिया ॥
स्वीकार्योपाधिकश्चापि गम्यादिरुपपद्यते।
स्वभावतो महत्त्वञ्चेतस्सर्वं समञ्जस्सम् ॥

---

१. ग० मा० 'यस्मिन् प्राण' इति पाठो नास्ति।

२. (क) अणुत्वपन्नाम परिमाणविशेषः। स च परमाणो द्वयणुके च तिष्ठति। परमाणुतोऽपि भूयस्त्वेन सूक्ष्म आत्मा-जीवात्मेति।
(ख) परिमाणत्वजातिमत्। मानव्यवहारासाधारणकारणमिति (वै० वि० ७।१।८) मानव्यवहारश्च हस्तवितस्त्यादिव्यवहारः, न तु पलसंख्यादिव्यवहारः (वै० उ० ७।१।८) मानं परिमितिः, तस्य यो व्यवहारः, इदं महत्, अयमणुः इत्याद्यात्मकः (सि० च० १ पृ० १७) मानव्यवहारः 'अणुत्वादिर्गुणः' इति व्यवहारः (वाक्य १।पृ० ७) तच्च श्रुतौ जीवस्यांगुष्ठपरिमाणत्वमिति श्रुतिः।

३. च० मा० 'काचित्' इति पाठः।

४. ग० मा० 'तद्भेदेनोपारत्यर्थेति' इति पाठः।

५. ग० मा० 'जीवस्य' इति पाठः।

६. घ० मा० 'गन्थादिवरणिनं' इति पाठः।

७. घ० मा० 'सर्वाङ्गिण सुखादि हि तरां नैवोपपद्यते' इति पाठः।

८. ग० मा० 'सिद्ध' तस्मान्मनस्संगमुपादायास्य कर्तृता' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आत्मनो ह्यणुत्वेऽङ्गीक्रियमाणे[१] सर्वाङ्गिणशैत्यादिकज्ञाह्लवीह्रदनिमग्नस्य[२] न स्यात्। यत्प्रदेशावच्छेदेनात्मनि चन्दनसंयोगः कंटकसंयोगो[३] वा तत्प्रदेशावच्छेदेनैवात्मनि सुखदुःखयोरनुभवादणुप्रदेशावच्छेदेनैव शैत्यानुभवस्स्यान्न च ज्ञानस्य व्यापित्वात्तदुपपत्तिस्तस्य सावयवत्वद्रव्यत्वेन गुणत्वानुपपत्तेर्निरवयवत्वे च सार्वज्ञ[४] प्रसङ्गात्।

आवृतत्वे चावरणभङ्गार्थं जन्यज्ञानकल्पने[५] तस्यैवात्मत्वोपपत्त्याण्वात्मकल्पस्य व्यर्थत्वाद्गुणस्य गुणिनं[६] विहाय गमनस्य वेदे लोके चादृष्टत्वात्[७] 'एषोऽणुरात्मा चेतसा वैदितव्य, (मु० उ० ३।१।९) इति श्रुतावणुशब्दोऽप्यौपाधिकाणुत्वपरः[८]। अत एव मन्त्रान्तेऽपि भवत्येव 'आत्मा' (मु० उ० ३।१।९) इति विभुत्वमुपसन्धीयते। अतस्स्वाभाविकमात्मनो विभुत्वमौपाधिकं त्वणुत्वादि, स चोपाधिरन्तः करणादिस्तत्प्रयुक्तमेव जीवस्य कर्तृत्वमुत्क्रान्तिगत्यादिरपि तदायत्त एव जीवस्यातो न कोऽपि दोष इति।

कर्त्रधिकरणम्

कर्ता शास्त्रार्थवत्त्वात् ॥१४॥

'असङ्गो ह्ययं पुरुषः' (बृ० ४।३।१५) 'बोद्धा कर्ता' इति श्रुत्योः परस्परविरोधादप्रामाण्यमिति पूर्वपक्षे, एकदेशिकतम्

आत्मनो निष्क्रियत्वेन कर्तृता नोपपद्यते।
असङ्गतैव जीवस्य मुख्येत्यध्यवसीयताम् ॥
कर्तादिशब्दो भाक्तो[९] हि चैत्रे सिंहादिशब्दवत्।
अतः श्रुत्योर्विरोध नैत्येवं प्राप्ते ब्रवीम्यहम्[१०] ॥
जीवस्य कर्तृताभावे विधिशास्त्रमनर्थकम्।
अतः कर्तृत्वमेष्टव्यञ्जीवानामिति[११] निर्णयः ॥

तक्षाधिकरणम्

यथा च तक्षोभयथा ॥१५॥

पूर्वोदाहृतयोरेव श्रुत्योरप्रामाण्यपूर्वपक्षे कर्तृत्वश्रुतिर्मुख्यविधिशास्त्रप्रामाण्यादसङ्गत्वन्तु[१२] स्यात्तत्सत्तावकमित्येकदेशिमतम्। निर्व्यापारस्यात्मनः कर्तृत्वानुपपत्तेरौपाधिकमेव कर्तृत्वं स्वीकार्यम्। स्वाभाविकं त्वसङ्गत्वं, श्रुतिषूपक्रमोपसंहारपूर्वकं तस्यैव व्युत्पादनादिति सिद्धान्तः।

---

१. घ० मा० 'अंगिक्रियते' इति पाठः।
२. घ० मा० 'हृदनिमग्न' इति पाठः।
३. ग० मा० 'कटक संयोगः' इति पाठो नास्ति।
४. घ० मा० 'सतवंज्ञ' इति पाठः।
५. ग० मा० 'सत्यव्रतव्यापकज्ञानस्यैव' इति पाठः।
६. ग० मा० 'सत' इति पाठः।
७. घ० मा० 'दृ' इति पाठो नास्ति।
८. ग० मा० 'बुध्युपाधिकाणुत्वपरो त' इति पाठः।
९. ग० मा० 'भाक्तो त्र' इति पाठः।
१०. घ० मा० पाठस्त्रुटितः।
११. ग० मा० 'क्रत्वमेष्टव्यमात्मनी मुख्यवृत्तितः' इति पाठः।
१२. ग० मा० 'अंगत्वं तु स्तावकम्' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परायत्ताधिकरणम्

परात्तु तच्छ्रुतेः ॥१६॥

'ज्योतिष्टोमेन स्वर्गकामो यजेत' (मा० श्रौ० सू० ९।३।१।११) इति श्रुतिर्जीवस्य ज्योतिष्टोमाद्यनुकूलचिकीर्षादिरूपं कर्तृत्वं शोधयति,[1] 'य आत्मानमन्तरो यमयति (बृ० ३।७।१) इति[2] परमेश्वरस्य प्रेरकत्वं प्रतिपादयति। न चैतदुभयं युज्यते, प्रेरकत्वे जीवस्य तदिच्छाद्यनपेक्षिततया तस्य कर्तृत्वानुपपत्तेरतो विरोधादप्रामाण्यमिति पूर्वपक्ष एकदेशितम्।

बहुश्रुत्यनुसारेण ह्येकस्य नयनं भवेत्।
अतः प्रेरकतेशस्य कथञ्चिदुपपाद्यताम् ॥

बहूनां 'यजेत'इत्यादिवाक्यानामर्थवत्त्वानुसारेण जीवस्य कर्मकर्तृत्वाभावे[3] पुण्यपापयोरनिष्पत्त्या-ईश्वरायत्त एव भोगोऽभ्युपगन्तव्य इति परमेश्वरस्य वैषम्यादिप्रसक्त्या चान्तर्यामितासहकारितामात्रमिति व्याख्येयमिति।

सिद्धान्तस्तु

कर्तृत्वस्यापि[4] सद्भावे प्रेरकत्वस्य सम्भवात्।
उभयोश्चार्थवत्त्वे[5] च तेनेकस्यापि(हि)बाधनम् ॥

लोके हि प्रेरको द्विविधः:—एको वाय्वादिरिच्छासहितं[6] प्रेरयति। अन्यस्तूपाध्याद्यादिरुत्कटेच्छाद्वारा[7] चेतनं प्रेरयति। तत्र प्रथमप्रकारे-इच्छानपेक्षत्वेऽपि द्वितीयप्रकारे-इच्छापेक्षत्वेन तदीयकर्तृताया उपपन्नत्वेन सर्ववाक्यसामञ्जस्येनान्तर्यामित्वप्रतिपादकं[8] वाक्यमन्येथा नेयम्! इच्छावत्त्वेन[9] जीवस्य यागाद्यनुष्ठातृत्वसम्भवात्। तदपेक्ष्येश्वरस्य [10]प्रेरकत्वफलदातृत्वादुपपत्तेश्च नेश्वरस्य[11] वैषम्याद्युपपत्तिः। अतो न कोऽपि दोष इति।

अंशाधिकरणम्

अंशो नानाव्यपदेशादन्यथा चापि दासकितवादित्वमधीयत एके ॥१७॥

'तत्त्वमसि' (छा० ६।११।३) 'अहं ब्रह्मास्मि' (बृ० १।४।१०) इत्यादीनामभेदप्रतिपादकानामात्मनि तिष्ठन्नात्मनोऽन्तर इत्यादीनां नियन्तृतव्यभावेन भेदसूचकानां वचनानां विरोधात्प्रामाण्यमिति पूर्वपक्षे सिद्धान्त्येकदेशितम्

---

१. च० मा० 'बोधयति' इति पाठः।
२. ग० मा० श्रुतिश्च तस्य' इति पाठः।
३. ग० मा० 'कर्म' इति पाठो नास्ति।
४. ग० मा० कर्तृस्सतोऽपि जीवस्य ब्रह्मप्रेयत्व सम्भवात्' इति पाठः।
५. ग० मा० 'उभयोरर्थवत्वे च नहि स्यादेक साधनम्' इति पाठः।
६. घ० मा० 'वायदिरिछा' इति पाठः।
७. घ० मा० 'रूत टेच्छो द्वारा' इति पाठः।
८. ग० मा० 'सति' इति पाठः।
९. घ० मा० 'व' इति पाठो नास्ति।
१०. घ० मा० 'दुपपत्तेः' इति पाठः।
११. घ० मा० 'नैश्वरस्य' इत्यधिकः पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भेदाभेदो विरोधेन नैकतैतौ भविष्यतः ।
अतोऽन्यतरसन्त्यागे प्रसक्ते भेद एव हि ॥
सन्त्याज्योऽध्यक्षयोगित्वाद्भेदो ग्राह्यो विपश्चिता ।
अभेदे बोधकं वाक्यमुपास्त्यर्थे भविष्यति ॥

भेदाभेदयोर्विरोधे नैकत्रासम्भवेऽन्यतरस्य त्यागे प्रसक्तेऽभेदस्यैव त्यागो युक्तः, न तु भेदस्य 'नाहं सर्वत्र' इत्यादि-प्रत्यक्षोपोद्वलितश्रुतिप्रतिपाद्यत्वात् । अभेदश्रुतिस्तु वासनार्थतया[1] कथञ्चिन्नेयेति[2] ।

सिद्धान्तस्तु

प्रत्यक्षस्य तु दौर्बल्यं श्रुतितः प्रतिपादितम् ।
अभेदबोधकानान्तु[3] तात्पर्यपेततोऽपि च ॥
अतस्तदनुसारेण भेदवाक्यन्तु नीयताम् ।
बिम्बतेशस्य[4] जीवानां प्रतिबिम्बत्वमिष्यताम्[5] ॥

भेदश्रुत्यभेदश्रुत्योर्विरोधेऽभेदश्रुतीनां तात्पयापेतत्वस्य प्राबल्यहेतोर्निसेवितत्वात् । प्रत्यक्षदौर्बल्यस्य चाभिहितत्वात्[6] । अतोऽभेदश्रुतय एव स्वार्थपरा[7] भेदश्रुवयस्तु बिम्बप्रतिबिम्भावेन भेदमादायोपपादनीयाः[8] । एवञ्चेश्वरस्य जीवाभेदे जीवागतदुःखादिमत्वं स्यात् । ततश्च ब्रह्मप्राप्नुवतां सर्वजीवदुःखवत्वं स्यात् । ततश्च मोक्षे संसारापेक्षया-अधिकदुःखित्वमिति परास्तम् । उपाधेः प्रतिबिम्बपक्षपातित्वेनोपाधितत्प्रयुक्तदुःखानां[9] बिम्बेश्वरेऽसम्भवेन[10] तत्प्राप्ते नानर्थहेतुत्वाभावात्[11] ।

सर्वगतात्मबादिनां[12] त्वेकस्योत्पद्यमानं दुःखमपरस्मिन्नात्मनि कुतो न जन्येत, कटकसम्बन्धः देहसम्बन्धेश्वरस्या॰विशेषात् । तस्य देहस्य साधारणत्वाददृष्टादीनाञ्चाविशेषादित्यास्तां तावत् ।

इति श्रीमत्परमहंसपरिव्राजकाचार्यसर्वतन्त्रस्वतन्त्र श्रीमदद्वैतानन्दसरस्वतीचरणारविन्दभृङ्गायमानस्य स्वयंप्रकाशानन्दस्य कृतिषु वेदान्तनयभूषणे द्वितीयाध्यायस्य तृतीयः पादः ।

---

१. च० मा० 'उपासना' इति पाठः ।
२. घ० मा० 'नेयमिति' इति पाठः ।
३. ग० मा० 'तात्पर्यञ्च तथा पुरा' इति पाठः ।
४. उपाध्यनन्तर्गतत्वे सत्युपाध्यन्तर्गतरूपाभिन्नबहिः स्थितत्वं बिम्बत्वम्' (सि० वि० न्य० र० पृ०)
५. दर्पणाद्युपाध्यन्तर्गतत्वे सत्यौपाधिकपरिच्छेदशून्यत्वे च सति बहिः स्थितस्वरूपकत्वं प्रतिबिम्बत्वम् (सि०वि०न्या०र०पृ०) ।
६. घ० मा० 'अभिहितत्वात्' इति पाठो नास्ति ।
७. ग० मा० 'स्वार्थप्रसितिहेतवः' इति पाठः ।
८. घ० मा० 'उपपादनीयः' इति पाठ :
९. घ० मा० 'तत्' इति पाठः ।
१०. ग० मा० 'बिम्मभूतेश्वरे' इति पाठः ।
११. ग० मा० 'तत्प्राप्तेरनर्थहेतुत्वाभावात्' इति पाठः ।
१२. घ० मा० 'चाछशां' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वितीयाध्याये चतुर्थपादः

प्राणोत्पत्त्यधिकरणम् ॥

तथा प्राणः ॥१॥

पूर्वस्मिन् पादे भूतोत्पत्तिविषयश्रुतिविरोधः परिहृतः। अस्मिंस्तु पादे प्राणोत्पत्तिविषयश्रुतिविरोधः परिह्रियते। क्वचित्तावत्प्राणानामुत्पत्त्यभाव आम्नात[1] 'असद्वा इदमग्र आसीत्तदाहुः' (तै० २।७) किं 'तदसदासीत् ऋषयो वाव तेऽग्रे सदासीत्तदाहुः के त ऋषय इति प्राणा वाव ऋषयः' इति प्रागुत्पत्तेः प्राणानां सद्भावश्रवणात्। अन्यत्र चोत्पत्तिराम्नाता 'एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि' (मु० उ० २।१।३) चेति तथान्यत्रापि 'एतस्मादात्मनस्सर्वे प्राणा व्युच्चरन्ति च (बृ० उ० १।२।२०) इति तत्र संशयः किमासां श्रुतीनां प्रामाण्यमस्ति नेति तत्र पूर्वपक्षः। विरोधात्प्रामाण्यमिति; न च 'प्राणा वा ऋषय' इत्यत्रोत्कृष्टज्ञानवाचिना ऋषिशब्दसामानाधिकरण्यात्प्राणशब्दो ब्रह्मपर इति नेन्द्रियाणामुत्पत्त्यभावोऽनया श्रुत्या प्रतिपाद्यत इति न[3] विरोध इति वाच्यम्। बहुवचनद्वयस्य प्राणशब्दस्य चानुरोधेन[4]-इन्द्रियपरत्वे निर्णीते[5]-एकस्यर्षिपदस्यान्यथा नेतव्यत्वादतो विरोध इति।

प्रलयेष्विन्द्रियाणां सद्भावः प्रतिपाद्यते।
तत्काले विद्यमानानां नोत्पत्तिरवकल्पते॥
अतो जीवात्माव(त) प्राणा नोत्पत्तिं प्राप्नुवन्ति हि।
अतः[6] प्राणजनिश्रुत्या गौणत्वमुपपद्यताम्॥

अतो विरोधाभावान्नाप्रामाण्यमिति सिद्धान्तैकदेशिमतम्। परमसिद्धान्तस्त्वाह—

इन्द्रियाणामजन्यत्वे[7] ब्रह्मज्ञानात्कथं भवेत्।
सर्वज्ञानमतस्तेषामुत्पत्तिरवगम्यताम्॥
प्रलये प्राणसद्भाव प्रतिपादकता तु या।
श्रुतेस्सा[8] हैरण्यगर्भे नेयातो न विरुध्यते॥

एक विज्ञानेन सर्वविज्ञानप्रतिपादनं हि 'कस्मिन्नुभगवो विज्ञाते सर्वमिदं विज्ञातं भवति, (मु० उ० १।१।३) इति प्रतिज्ञाय तदुपादानाय 'एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि च खम्वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी' (के० उ० १।१५) इति श्रुत्या जगदुपादानत्वेन प्रतिपादितम्। न चेन्द्रियाणामनुत्पत्तौ तदुपपादयितुं शक्यम्।

१. ग० मा० 'समधिगत' इति पाठः।
२. ग० मा० 'उत्कृष्टं ज्ञानं वा' इति पाठः।
३. ग० मा० 'न' विरोध इति' इति पाठो नास्ति।
४. ग० मा० 'प्राणपदस्य' इति पाठः।
५. ग० मा० 'एक' इति पाठो नास्ति।
६. ग० मा० 'प्राणजन्मश्रुतेस्माद्गौणत्वमुपपद्यताम्' इति पाठः।
७. ग० मा० 'इन्द्रियाणामनुत्पत्तौ ब्रह्मविज्ञानतः कथम्' इति पाठः।
८. ग० मा० 'हिरण्यगर्भप्राणस्य सत्तामाश्रित्य नीयताम्' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जीवस्य ब्रह्माभिन्नत्वेन ब्रह्मज्ञानेन ज्ञातत्वं तदनुत्पत्तावपि वक्तुं शक्यत इति वैषम्यम् 'ऋषयो वाव तेऽग्रे सदासीत्' इति वचनञ्च शर्कराणां सृष्टिं वक्तुं प्रवृत्तत्वादवान्तरप्रलये हिरण्यगर्भसद्भावेन तदीयप्राणाभिप्रायं व्याख्येयम्। अतो न विरोध इति।

सप्तगत्यधिकरणम्

सप्तगतेर्विशेषितत्वाच्च ॥२॥

इन्द्रियाणामुत्पत्तिविषयश्रुतिविरोधः परिहृतः। इदानीं संख्याविषय श्रुतिविरोधः परिह्रियते। क्वचिच्छ्रूयते 'सप्तशीर्षण्याः प्राणाः' (कृ० य० तै० ब्रा० १।२।३) इति क्वचिच्छ्रूयते 'हस्तौ वे ग्रह' (बृ० ३।२।८) इत्यादिना क्वचिन्न 'न वा सप्त वै शीर्षण्याः प्राणाः[1] वाव वसवः' क्वचिद्दश 'नव वै पुरुषे प्राणाः नाभिर्दशमी'ति (तै० ब्रा० १।६।७) क्वचिदेकादशः 'दशैव मैव पुरुषे प्राणा आत्मैकादश' (बृ० उ० ३।९।४) इति क्वचिद्द्वादशैकहायनप्रक्रियायां क्वचिच्चतुर्दश चक्षुश्च द्रष्टव्यं चेत्यत्र। अतोऽत्र श्रुतीनां विरोधादप्रामाण्यमित्यप्रामाण्ये-एकदेशितम्—

सप्तेन्द्रियाणि स्युस्तावतां कीर्तनात्क्वचित्।
मूर्द्धन्यानां हि सप्तानां प्राणत्वप्रतिपादनात् ॥
अष्टत्वादिकसंख्या तु नेया वै वृत्तिभेदतः।
अतो विरोधो नात्रास्ति तस्मात्प्रामाण्यमिष्यताम् ॥

श्रुतीनां विरोधे ह्येकानुसारेणापरस्य नेतव्यत्वे क्वचित्सप्तत्वसंख्याया श्रवणेन तदनुसारेणेतरसंख्याया वृत्तिभेदेन नेयत्वात्। एवं सति लाघवं भवति। इतरथा हि गौरवं स्यात्। किञ्च 'ये शीर्षण्यास्ते प्राणा' इत्यशीर्षण्याणां प्राणत्वाभावप्रतिपादनेनेन्द्रियाणां सप्ततत्वसिद्धेः। अतो विरोधाभावात्प्रामाण्यमुपपद्यत इति।

सिद्धान्तस्तु—

कार्येण कल्प्यमानेषु यथा कार्यंप्रकल्पनम्।
एकादश च कार्याणि दृश्यन्ते तेन[2] तान्यपि ॥
तावन्त्येव भविष्यन्ति शेषा[3] नेया कथञ्चन।
अधिका वृत्तिभेदेन श्रुतास्तु[4] ततोऽभवत् ॥

इन्द्रियाणि हि कार्यानुसारेण कल्प्यन्ते। कार्याणि[5] च चाक्षुषादीन्येकादशोपलभ्यन्ते। अतस्तत्कारणान्यप्येकादशः द्वादशत्वादिकीर्त्तनं तु मनस एव वृत्तिभेदाभिप्रायेण नेयम्, सप्तत्वादिकीर्तनन्तु क्वचित्स्तुत्यर्थं[6] क्वचिदितरोपलक्षणार्थमिति द्रष्टव्यम्। एवं वा एकादशेन्द्रियाण्यभ्युपगम्य सर्वेषामेव जीवेन[7] सहोत्क्रान्तिर्व्यवस्थाप्यते[8]। तत्र

१. घ० मा० 'प्राणा द्वावं तौरति' इति पाठः।
२. ग० मा० 'कारणान्यपि' इति पाठः।
३. ग० मा० 'शिष्टा' इति पाठः।
४. ग० मा० 'न्यूना स्तुत्यादिनापि च' इति पाठः।
५. घ० मा० 'मपि' न्यूनास्तु स्तुतये भवत्' इति पाठः।
६. घ० मा० 'कार्याणि चैकादशोपपत्तेः' इति पाठः।
७. घ० मा० 'मुच्छुत्यर्थं' इति पाठः।
८. घ० मा० 'जीवेन इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्वचिच्चक्षुरादीनि सप्तेन्द्रियाण्यनुक्रामन्तं प्राणोऽनुत्क्रामति [1]'प्राणमनुत्क्रामन्तं सर्वे प्राणा अनुत्क्रामन्तीति सप्ताना- मिन्द्रियाणामुत्क्रान्तिराम्नाता। सर्वशब्दस्य सन्निहितपरत्वात्, 'दशेमे पुरुषे प्राणा आत्मैकादशस्ते' 'यदास्माच्छरी- रान्मर्त्य दुत्क्रामन्त्यथ रोदयन्ति' इति श्रुतावेकादशानामुत्क्रान्तिराम्नाता, तयोर्विरोधादप्रामाण्यमिति—

पूर्वपक्षेः—

सप्तानामेव गमनं लाघवात्कल्पते न तु।
हस्तादीनां गतिस्तत्र जनिस्तेषां भविष्यति॥

लाघवात्सप्तानामेवेन्द्रियाणां गमनं स्वीक्रियते। न च तथा सति हस्तादीनामभावेनादानादिव्यवहारानुपपत्तिरिति वाच्यम्, अभिनवानामेव तत्रोत्पत्तेस्तेषामभ्युपगमादिति[2]। सिद्धान्तस्तुः

हस्तादीनां ग्रहत्वेन ह्यामोक्षमनुवर्तनम्।
न्याय्यं[3] श्रुतिप्रसिध्या च तेषामुत्क्रान्तिरिष्यते॥

'हस्तं वै ग्रह' इत्यादिश्रुत्या हस्तादीनां ग्रहत्वं बन्धकत्वाद्वक्तव्यम्, तच्चामोक्षमनुवर्तमानत्व एव घटते[4] नान्यथेति। तेषामपि जीवेन सह गमनमावश्यकञ्च, 'पुर्यष्टकेन लिङ्गेन प्राणाद्येन स युज्यते। तेन बद्धस्य[5] वै ह्यमोक्षो मुक्तस्य तेन वा'[6] इतिस्मृत्या चेन्द्रियैरेकादशभिस्सहागमनम्।[7] अतः सप्तेन्द्रियगतिश्रुतिरुपलक्षपरतया व्याख्येयेति।

प्राणाणुत्वाधिकरणम्

अणवश्च ॥३॥

अधुना प्राणानां परिमाणविषये श्रुतिविरोधः परिह्रियते। तत्र प्राणानामुत्क्रान्तिश्रुत्या विभुत्वाभावोऽवगम्यते। 'त एते सर्व एव समानास्सर्वेऽनन्ता, इति श्रुत्या च विभुत्वम् (प्रतिपाद्यते)। अतो विरोधादप्रामाण्ये सांख्यस्मृतित्युपोद्वेलित महत्त्वश्रुतिरुत्क्रान्तिश्रुतेश्च स्व कार्यक्षमतार्थकतान्नयत्यतोऽविरोध इत्येकदेशिमते

उत्क्रान्तिर्बहुदेशेषु श्रूयते तेन सा कथम्।
अन्यथा क्रियते तस्मादानन्त्यन्नेयमन्यथा॥
न विभुत्वञ्चेन्द्रियाणामुपपत्तिमदिष्यते।
वृत्तिलाभे च तासां स्यात्कार्यं प्रति समर्थता॥

---

१. घ० मा० 'प्यवस्याप्यते' इति पाठः।
२. ग० मा० 'करिष्यदिति' इति पाठः।
३. ग० मा० 'आर्षः' इति पाठः।
४. ग० मा० 'स्वरसम्' इति पाठः।
५. ग० मा० 'संयोगः' इति पाठः।
घ० मा० 'बद्धस्य वैष' इति पाठः।
६. ग० मा० 'इति ऋषिवचनम्' इति पाठः।
७. ग० मा० 'एष्टव्यम्' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नहीन्द्रियाणां विभुत्वमङ्गीकर्तुं युक्तमनुभवविरोधात्। नहि व्यापिनीन्द्रियाणि, सर्वत्र कार्योपलब्धिप्रसङ्गात्। न च क्वचिद्वृत्तिलाभान्नायं दोष इति वाच्यम्। तथात्वे वृत्तीनामेवेन्द्रियकार्य्यकारित्वोपपत्तौ वृत्तीन्द्रियाणां[1] विभुत्वकल्पनम्। अत उत्क्रान्तेर्बहुषु स्थलेषु श्रवणाच्च मध्यमपरिमाणत्वमतीन्द्रियत्वानिर्गच्छतामिन्द्रियाणामनुपलम्भः। आनन्त्यश्रवणं तूपास्त्यभिप्रायं व्याख्येयमिति।

प्राणश्रैष्ठ्याधिकरणम्

श्रेष्ठश्च ॥४॥

नासदीये सूक्ते प्रलयव्युत्पादकवाक्ये 'आनीत्' (ऋ० १०।१२९।२) इति प्राणचेष्टा श्रूयते। अतः प्राणसत्त्वं प्रलयेऽवगम्यते 'एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि, (कें० उ० १।१५) इति श्रुतौ प्राणस्योत्पत्तिः श्रूयते। अतः श्रुत्योर्विरोधादप्रामाण्ये प्राप्ते एकदेशिमतम्।

परमसिद्धान्तश्च प्रथमाधिकरणवदेव, विशेषशङ्का तु नासदीयीसूक्ते 'नासदासीन्नोसदासी (ऋ० १०।१२९।१) इत्यादिना सर्वकार्यनिषेधावगमेन महाप्रलयत्वावगमात्तत्र च प्राणस्थित्या नित्यत्वावगमादिति। परिहारस्त्ववातमिति विशेषेण 'आनीत्' (ऋ० १०।१२९।२) इति पदेन ब्रह्मसत्ताया एवोक्तेरतो न प्राणस्थितिरिति।

---

१. ग० मा० 'अथेन्द्रियाणां विभुत्वकल्पनम्' इति पाठः।

न मृत्युरासीदमृतं न तर्हि न रात्र्या अह्न आसीत्प्रकेत।
आनीद वातं स्वधया तदेकं तस्माद्धान्यन्न परः किञ्चनास ॥

ननूक्तस्य प्रतिसंहारस्य संहर्त्रपेक्षत्वात् स एव संहर्ता मृत्युर्विद्यत इत्यत आह न मृत्युरासीदिति। ननु यदि स नासीत्तर्हि तद्भावकृतमकृतमरणं प्राणिनामवस्थानं तदानीमपि स्यात्तत्राह। अमृतं तर्हि इति। तर्हि तस्मिन् प्रतिहारसमये। अयं भावः। सर्वेषां प्राणिनां परिपक्वं भोगहेतुभूतं सर्वं कर्म यदोपभुक्तमासीत्तदा भोगाभावान्निष्प्रयोजनमिदञ्जगदिति परमेश्वरस्य मनसि सञ्जिहीर्षा जायते। तथैव स मृत्युः सर्वजगत्संहरत इति किमनेन मृत्युना संहर्त्रा तदभावकृतं वा कथं स्मरणं स्यादिति। एतदेवाभिप्रेत्य कठैराम्नायते—

यस्य ब्रह्म च क्षत्रञ्चोभे भवत ओदनम्।
मृत्युर्यस्योपसेचनं क इत्था वेद यत्र स ॥ (क० उ० १।२।२५) इति।

नन्वेतस्य सर्वस्याधिकरणभूतः कालो विद्यत इत्यत आह न रात्र्या इति। रात्र्याः अह्नः च प्रकेतः प्रज्ञानं नासीत्। तद्धेतुभूतयोस्सूर्याचन्द्रमसोरभावात्। एतेनाहोरात्रनिषेधेन तदात्मको मासर्तुसंवत्सरप्रभृतिकस्सर्वः कालः प्रत्याख्यातः। कथं तर्हि नो सदासीत्तदानीमिति प्रत्ययः। उपचारादिति ब्रूमः। यथेदानीन्तननिषेधस्य कालोऽवच्छेदकस्तथा मायापि तदवच्छेदहेतुरित्यवच्छेदकत्वसाम्येनाकालेऽपि कालवाची प्रत्ययः। यदवोचाम ब्रह्मणः परमार्थतत्त्वमग्रे वक्ष्यत इति यदिदानीं दर्शयत्यानीदिति। तत्सकलवेदान्तप्रसिद्धं ब्रह्मतत्त्वम् 'आनीत्' प्राणितवत्। नन्वेनं प्राण न कर्तुः, अभावापन्नस्यैव ब्रह्मणः सत्त्वं स्यात्, न विवक्षितस्य निरूपाधिकस्य ब्रह्मणः 'अप्राणो ह्यमनः शुद्धः' इति तस्य प्राणसम्बन्धाभावात्तथाह 'आनीद वात' मिति। अयमाशयः 'आनी' दित्यत्र धात्वर्थक्रिया तत्कर्ता तस्य च भूतकालसम्बन्ध इति त्रयोऽर्थाः प्रतीयन्ते। तत्तु समुदायो न विधीयते, यथाग्नेयोऽष्टकपाल इति येन ब्रह्मणः सत्त्वन्न स्यात्, किं तह्यर्यनेन कर्तृत्वमनुष्यभूतकालसत्तालक्षणो गुणो विधीयते दध्ना, जुहोतीति वाक्यान्तरविहिताग्निहोत्रानुवादेन तत्र गुणविधानम्। तत्राप्यनेन। कर्तृत्वविशिष्टस्य न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूर्वकालसत्ता विधीयते तन्निषेधानुपपत्तिप्रसङ्गात्, अतो तेन कर्तृत्वेनेदानीन्तेनेनोपलक्षितं यन्निरूपाधिकं परं ब्रह्म तस्यैव भूतकालसत्ता विधीयत इति न कश्चिद्दोषः। नन्वीदृशस्य ब्रह्मणो मायया सह सम्बन्धासम्भवात्सांख्याभिमता स्वतन्त्रा सद्रूपा सत्त्वरजस्तमोगुणात्मिका मूलप्रकृतिरेवाभिमतेति कथं 'नो सदि' ति निषेधः। तत्राह स्वधया इति। स्वस्मिन् धीयते ध्रियत आश्रित्य वर्तत इति स्वधा माया। तया दुब्रह्मैकमविभागापन्नमासीत्। 'सहयुक्तेऽप्रधाने' (पा० सू० २।३।१९) इति तृतीया सह शब्दयोगाभावेऽपि सहार्थयोगे भवति 'वृद्धो यूना' (पा० सू० १।२।६५) इति निपातनाल्लिङ्गात्। अत्र प्रकृतिप्रत्ययाभ्यां तस्याः स्वातन्त्र्यं निवार्यते। यद्यप्यसङ्गस्य ब्रह्मणस्तया सह सम्बन्धो न सम्भवति, तथापि तस्मिन्विषया-तत्स्वरूपमिव सम्बन्धोप्यध्यस्यते यथा - शुक्तिकायां रजतस्य। एतेन सद्रूपत्वमपि तस्याः प्रत्याख्यातम्। ननु यदि माया ब्रह्मणा सहाविभागापन्ना तर्हि तस्या अनिर्वाच्यत्वाद्ब्रह्मणोऽपि तत्प्रसङ्ग इति कथं तस्य सत्त्वमुक्तम् 'आनीदवात'मिति। ब्रह्मणो वा सत्त्वात्तस्या अपि सत्त्वप्रसङ्ग इति कथं 'नो सदासीदि'ति सत्त्वप्रतिषेधो भवेत्। अयुक्तिदृष्टयैक्यावभासेऽपि युक्त्या विविध(च्य) मायांशस्यानिर्वाच्यत्वं ब्रह्मण सत्त्वञ्च प्रतिपादितम्। ननु तादृश्याविति द्वावेव पदार्थौ 'आनीदवातं स्वधये तौ' तौ चेदङ्गीक्रियेते तत्किमपरमवशिष्यते 'यन्नासीद्रजः' इत्यादिना प्रतिषिध्येत। तत्राह तस्मादिति, तस्मात्खलु पूर्वोक्तान्मायासहिताद्ब्रह्मण, अन्यत् किञ्चन किमपि वस्तु भूतभौतिकात्मकञ्जगन्नास न बभूव। (ऋ० १०।१२९।२ सा० भा०)

नासदासीन्नो सदासीत्तदानीं नासीद्रजो नो व्योमा परोयत्
किमावरीवः कुह कस्य शर्मन्नम्भः कियासीद्गहनगम्भीरम्।

अत्र सायणः 'तपसस्तन्महिमा जायतैकम्' इत्यादिना सृष्टिः प्रतिपादयिष्यते।

अधुना ततः प्रागवस्था निरस्तसमस्तप्रपञ्चा या प्रलयावस्था सा निरूप्यते। तदानीं प्रलयदशायामवस्थितं यदस्य जगतो मूलकारणं तदसच्छशविषाणवन्निरूपाख्यं नासीत्। न हि तादृशात्कारणादस्य सतो जगत उत्पत्तिः सम्भवति। तथा नो सत् नैव सदात्मवत् सत्त्वेन निर्वाच्यमासीत्। यद्यपि सदसदात्मकं प्रत्येकं विलक्षणं भवति, तथापि भावाभावयोः सहावस्थानमपि सम्भवति। कुतस्तयोस्तादात्म्यमिति, उभयविलक्षणमनिर्वाच्यमेवासीदित्यर्थः। ननु नो सदिति पारमार्थिकसत्त्व निषेधः। तर्ह्यात्मनोऽप्यनिर्वाच्यत्वप्रसङ्गः। अथोच्यते न आनीदवातमिति तस्य सत्त्वमग्रे वक्ष्यते परिशेषान्मायाया एवात्र सत्त्वन्निषिध्यत इति। एवमपि तदानीमिति विशेषणानर्थक्यं व्यवहारदशायामपि तस्याः पारमार्थिकसत्त्वाभावात्। अथ व्यवहारिकसतां पृथिव्यादीनां भावानाम्। विद्यमानत्वात् कथं नो सदिति निषेधः। तत्राह 'नासीद्रज' इत्यादि। 'लोका-रजांस्युच्यन्ते, (नि० ४।१९) इति यास्कः। अत्र च सामान्यापेक्षमेकैकवचनम्। व्योम्नो वक्ष्यमाणत्वात्तस्याधस्तना: पातालादयः पृथिव्यन्ता नासन्नित्यर्थः। तथा व्योम अन्तरिक्षं तदपि नो नैवासीत्। पर इति एकारान्तं परस्तादित्यर्थे वर्तते। परशब्दाच्छान्दसोऽस्तात्तेरर्थेऽसि प्रत्ययः। परः व्योम्नः परस्तादुपरिदेशे द्युलोकप्रभृतिसत्यलोकान्तं यदस्ति तदपि नासीदित्यर्थः। अनेन चतुर्दशभुवनगर्भब्रह्माण्डं स्वरूपेण निषिद्धं भवति, अथ तदावरकत्वेन पुराणेषु प्रसिद्धानि यानि विपदादिभूतानि तेषामवस्थानप्रदेशं तदावरणनिमित्तं चाक्षेपमुखेन क्रमेण निषेधयति किमावरीव इति। किमावरणी तत्त्वमावरकभूतजातम् आवरीवः। अत्यन्तमावृणुयात्। आवार्याभावात्तदावरकमपि नासीदित्यर्थः। वृणोतेर्यङ्-लुगन्ता-च्छान्दसि लङि तिपि रुपमेतत्। यद्वा किमिति प्रथमैव, किं तत्त्वमावरकमावृणुयात्। आव्रियमाणत्वात्तदपि स्वरूपेण नासीदित्यर्थः, आवृण्वत तत्त्वं कुह कुत्र देशेऽवस्थायावृणोति। आधारभूतस्तादृशदेशेऽपि नासीदित्यर्थः। किं शब्दात्सप्तम्यर्थे हप्रत्ययः। (कु तिहोः पा० सू० ७।२।१०४) इति प्रकृते 'कु' आदेशः कस्य शर्मन् कस्य वा भोक्तुर्जीवस्य शर्मणि सुखदुःखसाक्षात्कारलक्षणे भोग निमित्तभूते सति तदावरकं तत्त्वमावृणुयात्। जीवानामुपभोगार्था हि सृष्टिः। तस्यां हि सत्यां ब्रह्माण्डस्य भूतैरावरणनं प्रलयदशायाञ्च भोक्तारो जीवा उपाधिविलयात् प्रलीना इति कस्य कश्चिदपि भोक्ता न सम्भवतीत्यावरणस्य निमित्ताभावादपि तन्न घटत इत्यर्थः। एतेन भोग्यप्रपञ्चवद्भोक्तृप्रपञ्चोऽपि तदानीन्नासीदित्युक्तं भवति। (सा० भा० क० १०।१२९।१)।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वायुक्रियाधिकरणम्

न वायुक्रिये पृथगुपदेशात् ।।५।।

यः प्राणस्स वायुरित्यभेदव्यपदेशाद्वायुप्राणयोरभेदः[1] प्रतीयते । 'एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि च खम्वायुर्ज्योतिः' (क० उ० १।१५) इत्यादिना वायोः पृथगुत्पत्ति व्यपदेशाद्भेदोऽपि, अतः श्रुत्योर्विरोधादप्रामाण्ये प्राप्ते लाघवादभेद एवेत्येकदेशिमतम् । अथवा सांख्यस्मृत्या इन्द्रियाणां क्रियैव प्राण इति प्रतीतेर्भेद एवास्त्वभेदस्त्वौपचारिक इति ।

सिद्धान्तस्तु

न प्राणो वायुरेव स्याद्भेदस्य व्यदेशनात् ।
नापीन्द्रियक्रिया प्राण उत्क्रमे भेददर्शनात् ।।
प्राणस्येन्द्रियवृत्तित्वे सर्वश्रेष्ठत्ववर्णनम् ।
न स्यात्सम्वर्जनादिश्च[2] व्यापारोऽक्षाधिकान् प्रति ।।

प्राणस्य वायुना सहात्यन्ताभेदे प्राणा एव ब्रह्मणश्चतुर्थपादः । (तथच) 'स वायुना ज्योतिषा भाति तपति च' इति भेदव्यपदेशो न स्यात् । अतो वायु विकारत्वमेव प्राणस्यातो मृद्घट इतिवत्सामानाधिकरण्यं 'वायुः प्राण' इति । एवं प्राणस्येन्द्रिय क्रियात्वे 'एतस्माजायते प्राणः' (क० उ० १।१५) इति प्राणस्येन्द्रियापेक्षया पृथगुत्पत्तिर्न श्रूयते । न च वृत्तिमतो भेदस्यापि सत्त्वात्तदादाय भेदव्यपदेश उपपद्यत इति वाच्यम् । एवमप्युत्क्रान्तिवाक्ये 'तमुत्क्रान्तं प्राणस्तूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति (बृ० उ० ४ । ४ । २) इति पृथग् प्राणस्योत्क्रांत्यभिधानं व्यर्थमेव स्यात् । किञ्च 'प्राणो वाव ज्येष्ठश्च श्रेष्ठश्च, (बृ० ६।१।१) इति प्राणस्येन्द्रियाद्यपेक्षया श्रेष्ठत्वं स्वापे च प्राणे सर्वेषामिन्द्रियाणां लयं इति चानुपपन्नं स्यात् । क्रियायामाश्रयस्य लयानूपपत्तेः । अतः प्राणो वायुविकार एव । न चैवमिन्द्रियापेक्षया प्राणस्य श्रेष्ठत्वेऽस्मिञ्चशरीरे भोक्तृत्वापत्तिरिति[3] वाच्यम् । इन्द्रियापेक्षया श्रेष्ठत्वेऽपि जीवोपकरणप्रायपाठेन राजामात्यवत्प्राणस्य जीवोपकरणत्वोपपत्तेः । तस्य च प्राणादिव्यापार इति नेन्द्रियवृत्तिः प्राणो न वा वायुस्वरूप[4] इति ।

श्रेष्ठाणुत्वाधिकरणम्

अणुश्च ।।६।।

प्राणं प्रस्तुत्य 'समो मशकेन समो नागेन सम' एभिस्त्रिभिर्लोकैस्समोऽनेन सर्वेण (बृ० १।३।२२) इत्यनेकधा परिमाणप्रतिपादकवाक्यानां विरोधादप्रमाण्ये-एकदेशिमतम् ।

स्वाभाविकं महत्त्वञ्च स्वल्पता[5] चाप्युपाधितः ।
प्राणस्य गगनस्येव न विरोधोऽस्ति कश्चन ।।

---

१. ग० मा० 'सामानाधिकरय' इति पाठः ।
२. ग० मा० 'न स्यात्सम्बर्जणं प्राणे चक्षुरादेश्चसुप्तगे' इति पाठः ।
३. घ० मा० 'भोगत्व' इति पाठः ।
४. ग० मा० 'साक्षात्' इति पाठः ।
५. ग० मा० 'स्यादुपाधेरल्पमानता' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आकाशस्येव स्वाभाविकं महत्त्वमौपाधिकञ्चाणुत्वमतो न विरोध इति ।

सिद्धान्तस्तु

उपसनार्थमानन्त्यं परिच्छेदस्वभावतः ।
अन्यथोत्क्रमणं स्यात्प्राणस्य[1] श्रुतिचोदितम् ॥

अधिदैविकाभिप्रायं वा महत्त्वमतो न कोऽपि दोष इति ।

ज्योतिराद्यधिकरणम्

ज्योतिराद्यधिष्ठानं तु तथा (दा) मननात् ॥७॥

'अग्निर्वाग्भूत्वा[2] मुखं प्राविशत्' (ऐ० उ० २।४) इत्यादिना-उपाध्यधिष्ठितत्वं[3] वागादीनां[4] प्रतिपाद्यते । यदि वाचाभिव्याहृतमित्यादिना तु निरपेक्षाणां[5] स्व स्व कार्यंकरत्वं प्रतिपाद्यते । अतो विरोधादप्रामाण्यमिति पूर्वपक्षे-एकदेशिमतम्

इन्द्रियाणां[6] समर्थत्वादत एव क्रियां प्रति ।
नापेक्षन्ते प्रेरकान् हि भोगस्तेषां तथा सति ॥
स्यात्तेन[7] देव वा वाक्यमुपास्तिपरमिष्यताम् ।
अतः श्रुत्योः प्रमाणत्वन्न हातव्यं विपश्चिता ॥

इन्द्रियाणि हि स्व स्व कार्ये स्वत एव समर्थानि[8] प्रेरकमपेक्षन्ते, तथा चेतनानां प्रेरकापेक्षानियतेति[9] वाक्यम् । ईश्वरमादायैव तदुपपत्तेः प्रेरकाभ्युपगमे च तस्यैवास्मिञ्छरीरे भोक्तृत्वापत्त्या[10] प्रेरकनियतेति[11] वाच्यम्, ईश्वर-मायैकत्वानुपपत्तेः । ईश्वरातिरिक्तस्य प्रेरकस्य तदभोक्तृत्वनियमात्[12] 'अग्निर्वाग्भूत्वा मुखं प्राविशत्' (ऐ० उ० २।४) इत्यादिवाक्यन्तूपासनार्थं कथञ्चिन्नेयमिति नाप्रामाण्यं द्वयोरिति ।

१. घ० मा० 'प्राणस्यातो ल्पतेप्येत' इति पाठः ।
२. घ० मा० 'अग्निवात्युत्वा' इति पाठः ।
३. घ० मा० 'उपायधिष्ठित' इति पाठः ।
४. घ० मा० 'वागादिनां' इति पाठः ।
५. ग० मा० 'एव तेषां' इति पाठः ।
६. ग० मा० 'इन्द्रियाणि स्मर्कत्वात्स्वकार्यं प्रति न क्वचित्
प्रवर्तकानपेक्षन्ते भोगस्तेषां तथा सति' इति पाठः ।
७. ग० मा० 'स्यादतो देवता वाक्यम्' इति पाठः ।
८. घ० मा० 'न इति च' इति पाठः ।
घ० मा० 'समर्पकानिप्रेरक' इति पाठः ।
९. घ० मा० 'नियूतेति' इति पाठः ।
१०. घ० मा० 'भोत्कृत्वा' इति पाठः ।
११. घ० मा० 'प्रेरकानुपपत्तेः' इति पाठः ।
१२. घ० मा० 'भोक्तृत्वा' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सिद्धान्तस्तु

अग्निरित्यादिवाक्यं हि नोपास्तिपरमिष्यते ।
अश्रुतत्वादुपास्तेर्हि कुतस्सम्भावना भवेत् ॥
चेतनानीन्द्रियाणीह ह्यपेक्षन्ते प्रवर्तकान् ।
न च भोगप्रसक्तिश्च तद्देहस्वाम्यवर्जनात् ॥

इन्द्रियाणामचेतनत्वेन प्रेरकापेक्षायाम् 'अग्निर्वाक् भूत्व' इति श्रुतिपर्यालोचनया-अग्न्यादीनामेव प्रेरकत्वकल्पनात् । न चेश्वरेणैवापेक्षाशान्तेर्देवताकल्पनन्न[1] युक्तमिति वाच्यम्[2] । अनुमानेन देवता कल्पने ह्यपेक्षानियामिका न चाग्न्या दीनां तत्र भोक्तृत्वापत्तिः[3] । तद्देहस्वामिन एव तत्र भोक्तृत्वमितरेषां[4] तदनुग्राहकत्वमात्रमिति । 'अथ यत्रैतदा-काशमनुविषण्[5] चक्षुषः पुरुषदर्शनाय[6] चक्षुः' इति श्रुतिबलादवगम्यते । अतो देवतानुगृहीतानामेवेन्द्रियाणां स्वस्य कार्ये प्रवृत्तिरिति ।

इन्द्रियाधिकरणम्

त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात् ॥८॥

'हन्तास्यैव सर्वे रूपमकामेति त एतस्यैव सर्वे रूपक भवति[7] (बृ० १।५।२९) इति श्रुतिः प्राणवृत्तिता-मिन्द्रियाणां प्रतिपादयति 'एतस्माज्जयते प्राणो मनस्सर्वेन्द्रियाणि' (कै० उ० १।१५) (मु० २।१।३) चेति श्रुतिः प्राणोत्पत्तिव्यतिरेकेणेन्द्रियाणामुत्पत्तिं प्रतिपादयन्ती च भेदं प्रतिपादयति । अतो विरोधादप्रामाण्ये प्राप्त[9]– एकदेशिमतम् ।

अक्षाणां प्राणवृत्तित्वं तद्रूपभवनाद्भवेत् ।
उत्पत्तौ व्यपदेशश्च गोबलीवर्दवद्भवेत् ॥

प्राणवृत्तयो हीन्द्रियाणि 'एतस्यैव सर्वे रूपमभवत्' इति तेषां प्राणाभावप्रतिपादनात् । न चोत्पत्ति-प्रतिपादकवाक्ये प्रमाणायेक्षणेन्द्रियाणां[10] भेदव्यपदेशानुपपत्तिरिति वाच्यम् । 'गोवलीवर्दन्यायेन' तदुपपत्तेरिति ।

सिद्धान्तस्तु

प्राणस्य चेन्द्रियाणाञ्च भेदोऽवश्यं प्रतीयताम् ।
उत्क्रान्तौ भेदनिर्देशाद्वैधर्म्यस्य च दर्शनात् ॥

---

१. ग० मा० 'आकांक्षा' इति पाठः ।
२. ग० मा० 'अनुमानेन''''नियामिका' इत्यन्तः पाठो नास्ति ।
३. घ० मा० 'भोक्तृत्वा' इति पाठः ।
४. घ० मा० 'भोक्तृत्वा' इति पाठः ।
५. घ० मा० 'विषणं' इति पाठः ।
६. घ० मा० 'पुरु दर्शनाय' इति पाठः ।
७. घ० मा० 'विष्ठाव्' इति पाठः ।
८. घ० मा० 'अभवन्वीति' इति पाठः ।
९. ग० मा० 'तावत्' इति पाठः ।
१०. घ० मा० 'प्राणाः' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विभिन्नप्रक्रियात्वाच्च सर्वे 'सर्वं' रूपमिति श्रुतिः ।
कथञ्चिदुपपन्नत्वान्न विरोधोऽस्ति कश्चनः ॥

उत्पत्तिप्रतिपादकवाक्ये प्राणस्य चेन्द्रियाणाञ्च पृथगुपादानेन सुषुप्तौ प्राणस्य जागरूकतेन्द्रियाणां विलीनत्वमित्यादिवैधर्म्यदर्शनेन, 'ते ह वाचमूचुः, (छा० १।३।३) इत्यादिनेन्द्रियाणां पृथक्प्रकरणेन च प्राणस्येन्द्रियाणाञ्च तत्त्वान्तरत्वसिद्धेः 'एतस्यैव सर्वे रूपमभवत्' इति वाक्यं कथञ्चिद्योज्यम् । प्राणशब्दोऽपि गौण्या वृत्त्येन्द्रियेषु[1] प्रवर्तेत इति न नानार्थत्वापत्तिस्तस्येति ।

सञ्ज्ञामूर्तिक्लृप्त्यधिकरणम्

सञ्ज्ञा[2]मूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात् ॥६॥

'छन्दोगशाखायां 'सेयं तदैक्षत हन्ताहमिमास्तिस्रो देवता अनेनैव जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि तासां त्रिवृतं त्रिवतमेकैकं करवाणि, (छा० ६।३।२) इति' श्रूयते । अत्र च नामरूपाकरणं जीवकर्तृकं प्रतीयते[3] । 'तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यामेव व्याक्रियते' इति ब्रह्मकर्तृकम्, अतो विरोधादप्रामाण्यमिति पूर्वपक्षः । ननु विरोध एव नास्ति कुतः प्रामाण्यम् व्याकरवाणीति श्रुतिर्देवताया एव व्याकरणकर्तृत्वं प्रतिपादयति, न तु जीवस्य, देवताया कर्तृनैराकांक्ष्येण जीवस्य कर्तृत्वेनानन्वयात् । देवदत्तेन पाचयति यज्ञदत्त इत्यादौ तु णिजन्तस्थले प्रकृतिप्रत्ययाभ्यां [4]व्यापारद्वयौपादान[5] सम्भवात् । प्रकृते च जीवस्य कर्तृत्वेव्याताभिहितत्वेन तस्य तृतीयानुपपत्तेः । अतः परमेश्वरस्यैव नामरूपव्याकर्तृत्वं छन्दोगशाखायामपि प्रतीयत इति चेन्न जीवेनेत्यस्य करणे तृतीयान्तत्वेन करणत्वस्य प्रयोज्यत्वपर्यवसानात् । यथा चारेण परसैन्यं [6]सङ्कलयामीति चारस्य करणत्वं तद्वत् । न चागतं[7] सैन्याकलनकर्तृत्वं राज्ञ्युपचर्यते न तु वक्तृतात्पर्यानुसारात्[8] । न चेह जीवगतकर्तृत्वारोपतात्पर्यग्राहकं प्रकृतेऽस्तीति[9] वाच्यम्, 'अनेन जीवेने, (छा० ६।३।२) इत्यादिपदवैयर्थ्यस्यैव तात्पर्यग्राहकत्वादतो जीवगतमेव नामरूपव्याकर्तृत्वमित्यस्ति[10] विरोधस्ततश्चाप्रामाण्यमित्येकदेशो त्वाह ।

जीवकर्तृता[11] वाक्यं हि न नेतुं शक्यतेऽन्यथा ।
ब्रह्मणो बोधकं तत्तु [12]प्राणाद्यप्युपपद्यते ॥

---

१. घ० मा० 'वृत्तेरिन्द्रियेषु' इति पाठः ।
२. घ० मा० 'सञ्ज्ञामति' इति पाठः ।
३. घ० मा० 'प्रतिपाद्यते' इति पाठः ।
४. घ० मा० 'व्यापार' इति पाठः ।
५. ग० मा० 'कर्तृद्वयोपादानं संभवपि इति पाठः ।
६. ग० मा० 'संकलनीयानिति चारगतकरणत्वस्य तथा पर्यवसाव दर्शनात्' इति अधिकः पाठः ।
७. ग० मा० 'द्वारगतम्' इति पाठः ।
८. घ० मा० 'कर्तृतात्पर्यानुसाराद्' इति पाठः ।
९. घ० मा० 'ति' इति पाठो नास्ति ।
१०. घ० मा० 'नामरूप' इति पाठो नास्ति ।
११. घ० मा० 'व्याकर्तृता' इति पाठः ।
१२. घ० मा० 'प्राणाद्यायुपपद्यते' इति पाठः ।

वाल्मीकि विद्यापीठ-पुस्तकालय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जीवे ह्यूच्यमानं नामरूपव्याकर्तृत्वमन्यथा नेतुमशक्यमिति स्वाभाविकं तत्स्वीक्रियते। ब्रह्मणस्तु नामरूपव्याकर्तृत्वं प्राणाद्या उपपादयन्ति[1]। न च जीवस्य[2] कथं नामरूपव्याकर्तृत्वमिति वाच्यम्। अत्रिवृत्कृतेषु जीवानां कर्तृत्वानुपपत्तावपि त्रिवृत्कृतेषु चन्द्रादिषु हिरण्यगर्भादेश्शकटादिषु वाधुनिकजीवादेः सम्भावदिति।

परमसिद्धान्तस्तु

छान्दोग्येऽपि श्रुतानामरूपयोर्व्याकृतिस्तु या।
सा[3] परेशस्य युक्ता [4]स्यादाख्यातेनापृथक्श्रुतेः॥
जीवेनेति तृतीया तु करणत्वेन दुष्यति।
अभेदार्थकता वा स्यात्तृतीयाया इह श्रुतौ॥

छान्दोग्येऽपि श्रुतन्नामरूपव्याकर्तृत्वं ब्रह्मण्येव स्वीकार्यम्। [5]अनामरूपेणोपपत्तावारोपकल्पनाया अन्याय्यत्वात्। न चानेन जीवेनेत्यस्य वैयर्थ्यम्। करणार्थकतृतीयान्तस्वीकारेण [6]तूक्तदृष्टान्तेनारोप एव पर्यवसानमिति वाच्यम्। करणकतृतीया (तु) 'अध्ययनेन वसति' इत्यादिवच्छरीरेण[7] ह्यन्तीत्यत्रैव जीवादृष्टोपयोगेन करणत्वोपपत्तेः।

एवञ्च जीवेनेत्यस्य करवाणीत्यनेनान्वयः[8]। अथवा प्रविश्येत्यनेनान्यवः। जीवरूपेणेत्यभेदे तृतीयायां परमेश्वरस्य व्यापकस्य प्रवेशः कथमिति शङ्कायां जीवात्मनेति तन्निवारणार्थं प्रतिपादनस्यावश्यकत्वात्[9]। प्रागुपक्रान्तस्योपसहरिष्यमाणस्य[10] चैतन्यस्योपयुक्तत्वेनाभेदप्रतिपादनस्यापेक्षितत्वात्स[11] एवार्थो न्याय्य इति कृत्वा भाष्यकृता-अभेदार्थकत्वमेव[12] तृतीयाया उक्तम्। न च व्याकरणक्रियाकर्तृत्वशतैरभिहितत्वेऽपि प्रवेशनक्रियाकर्तृत्वशतैरभिधानानां तृतीयया स्यादिति वाच्यम्। प्रधानक्रि(या)यान्वपरस्यैवाभ्यर्हितत्वेन[13] प्रतीत्यानेनान्वयाभावतृतीया[14] अप्रसक्तेः। किञ्च गिरिसमुद्रादिनामरूपव्याकरणेऽनीश्वरस्य सामर्थ्याभावादीश्वरः कर्ता घटपटादिष्वर्पितस्य[15] कर्तृत्वमस्तीति परमेश्वर एव सर्वनामरूपव्याकर्तेति श्रुतीनामविरोधादुपपद्यते प्रामाण्यमिति।

---

१. घ० मा० 'उपपादनीम्' इति पाठः।
२. ग० मा० 'न चाशक्तस्य' इति पाठः।
३. घ० मा० 'सावरमेशस्य' इति पाठः।
४. ग० मा० 'अभिधानतः' इति पाठः।
५. घ० मा० 'अनारोपेण' इति पाठः।
६. घ० मा० 'त्वक्त' इति पाठः।
७. घ० मा० 'वच्छरेण' इति पाठः।
८. घ० मा० 'करवाणीति' इति पाठः।
९. घ० मा० 'प्रतिपादमस्य' इति पाठः।
१०. घ० मा० 'उपक्रान्तस्य' इति पाठः।
११. घ० मा० 'चैत्वस्य' इति पाठः।
१२. घ० मा० 'अभेदकत्वम्' इति पाठः।
१३. घ० मा० 'प्रधान' इति पाठः।
१४. ग० मा० 'प्रविश्य' इति पाठः।
१५. घ० मा० 'घटपटादिष्वपि' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्मृतिन्यायविरोधोऽत्र वेदान्तानां समन्वये ।
श्रुतीनां कपिलाद्युक्त पक्षश्चापि निराकृतः ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यसर्वतन्त्रस्वतन्त्र श्रीमदद्वैतानन्दसरस्वतीचरणारविन्दभृङ्गायमानस्य स्वयम्प्रकाशानन्दस्य कृतिषु वेदान्तनयभूषणे द्वितीयायाध्यायस्य चतुर्थपादः[1] ।

तृतीयाध्याये प्रथमः पादः

तदन्तरप्रतिपत्तौ रंहति सम्परिष्वक्तः प्रश्ननिरुपणाभ्याम् ॥१॥

अविरोधेन सत्ता[2] हि वेदान्तानां समन्वये ।
निरूपिते साधनस्य चिन्ताध्याऽयेऽत्र प्रवर्तते ॥

प्रथमेऽध्याये समन्वये, वेदान्तानां ब्रह्मणि निरूपिते, द्वितीये स्मृतिन्यायाविरोधे व्युत्पादिते, तृतीयेऽध्याये-आत्मज्ञानं मोक्षसाधनं ससन्न्यासं[3] निरूप्यते । प्रथमे पादे वैराग्यन्निरूप्यते[4] । द्वितीये तत्त्वंपदार्थविवेकादि । तृतीये वाक्यार्थ-ज्ञानोपयुक्तगुणोपसंहारः । चतुर्थे सन्न्यासस्यात्मज्ञानस्य मोक्षसाधनत्वन्निरूप्यते । प्रसङ्गागतञ्च किञ्चित्तत्र जीवस्य परलोकगमनावसरे भूतपरिष्वङ्गोऽस्ति नेति चिन्त्यते । जीवो हि परलोकं यियासुरिन्द्रियप्राणादिकं गृहीत्वा हृदय-देशमागत्य ततो निष्क्रामतीति श्रुति सिद्धम् । ततो निष्क्रामनस्वर्गभोगसाधन-शरीरारम्भकभूतसूक्ष्मपरिवेष्टितो भवत्युतं नेति । तत्र पूर्वपक्षे न परिवेष्टितो गच्छति मानाभावात् ।

दक्षिणायनमार्गस्य प्रतिपादकवाक्यतः ।
न गम्येत परिष्वेङ्गो भूतसूक्ष्मैरिहात्मनः ॥
पञ्चाग्निविद्यावाक्यन्तु[5] तद्ध्यानपरमिष्यते ।
अन्यथाप्युपपन्नत्वाद्भोगदेहस्य[6] जन्मनः[7] ॥
न भूतस्य परिष्वङ्गे प्रमाणं विद्यते परम् ।
अतः केवल एवात्मा स्वर्गलोकं प्रसर्पति ॥

---

१. ग० करकृतमपराधं क्षन्तुमर्हन्तिसन्तः इति । तत्पश्चात् श्रीव्ययसंवत्सर माघकृष्णप्रथनाया सम्पूर्णम् शुभमस्तु । विष्णुपुरम् । शि-चन्द्रशेखरशास्त्री' इति लिखित्वा पुनः कर्तितमस्ति ।

२. ग० मा० 'सर्वेषां' इति पाठः ।
 च० भा० च 'सत्रा हि' इति पाठः ।

३. ग० मा० 'ससाधनम्' इति पाठः ।

४. तत्र प्रथमे तावत्पादे पञ्चाग्निविद्यामाश्रित्य संसारगतिप्रभेदः प्रदर्श्यंते वैराग्यहेतोः (शां० भा० ३।१।१) साक्षात्कार-साधनं वैराग्यञ्जीवस्य गत्यागतिप्रपञ्चपरेण प्रथमपादेन समर्थ्यंते (भा० न्या० पृ० ५७८) ।

५. ग० मा० 'पंचाग्निध्यानबोधकम्' इति पाठः ।

६. ग० मा० 'प्युपन्न' इति पाठो नास्ति ।

७. ग० मा० 'सम्भव' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भूतपरिष्वङ्गरहितो जीवः परलोकं गच्छति, भूतपरिष्वङ्गबोधकप्रमाणाभावात् । तथा हि न तावच्छ्रुतिप्रमाणम् । दक्षिणमार्गप्रतिपादकवाक्ये 'अथ य इमे ग्राम इष्टापूर्ते[1] दत्तकित्युपासते ते धूममभिसम्भवन्ति' (छा० ५।१०।३) इति वाक्यस्य भूतपरिष्वङ्गप्रतिपादकत्वात् । न च पञ्चाग्निविद्योपक्रमे 'वेत्थ[2] यथासौ पञ्चाम्याहुता वापः पुरुषवचसो भवन्ति' (छा० ५।३।३) इति प्रश्नानुसारेणेति तु 'पञ्चम्यामाहुता वापः पुरुषवचसो[3] भवन्ति' (छा० ५।३।३) इति प्रतिवचनानुसरेण वा परिवेष्टितस्य गमनावगमाद्भूतपरिष्वङ्गोऽवगम्यत इति वाच्यम् । तस्य वाक्यस्याविध्यानप्रतिपादनपरत्वाज्जीवस्य तत्राश्रुतत्वाच्च ।

न च परलोकगतस्य देहारम्भानुपपत्त्या तदारम्भकभूतपरिष्वङ्गः कल्पत इति वाच्यम् । सर्वत्र भूतानां सुलभत्वान्मानान्तरस्य चाभावाद्भूतापरिष्वक्त एव गच्छन्तीति ।

सिद्धान्तस्तु—

देहान्तरस्य सम्प्राप्तौ भूतसूक्ष्मैरयं वृतः[4] ।
गच्छतीत्य च गन्तव्यं वेत्थेत्यादिश्रुतेर्बलात् ॥
सोपासनं ब्रुवाणैव[5] पुरोवादमपेक्षते ।
दक्षिणायनमार्गस्य बोधकोऽसौ भविष्यति ॥

स्वर्गलोकादिभोगसाधनदेहारम्भकभूतसूक्ष्म एव गच्छतीति गम्यते । पञ्चाग्निविद्यायां 'वेत्थ[6] यथासौ पञ्चाम्यामाहुनावापः पुरुषवचसो सम्भवन्ति' (छा० ५।३।३) इति तु पञ्चाम्यामाहुता वापः पुरुषवचसो भवन्ति (छा० ५।३।३) इति प्रतिवचने चापां कीर्तनेन परिवेष्टितस्य जीवस्य प्रतिपादनात् । न चात्रापामेव गमनं प्रतिपाद्यते । नत्विष्टादिकारिणो जीवस्योपासनपरञ्चेदं वाक्यं, न तु जीवस्य परलोकगनप्रतिपादनपरं दक्षिणमार्गप्रतिपादनपरवाक्यैर्जीवस्य श्रवणेऽ[7]पि न तत्रापां[8] परिवेष्टनं गम्यते । अतः कथमभिसम्भवन्तीति[9] परिवेष्टित-

१. 'इष्टापूर्ते-इष्टमग्निहोत्रादिवैदिकं कर्म, पूर्तं वापीकूपतडागारामादिकरणम्, दत्तं बहिर्वेदि यथाशक्त्य येभ्यो द्रव्यसंविभागो दत्तम् इत्येवं विधं परिचरणपरित्राणाद्युपासते' (छा० उ० शां भा० ५।१०।३) ।

२. घ० मा० 'वेह' इति पाठः ।

३. घ० मा० 'वत्यस्ते' इति पाठः ।

४. ग० मा० 'व्रतः' इति पाठः ।

५. घ० मा० 'वर्णिव' इति पाठः ।

६. घ० मा० 'वे ह व' इति पाठः ।

७. जोवो मुख्यप्राणसचिवस्सेन्द्रियस्समनस्को विद्याकर्मपूर्वप्रज्ञापरिग्रहः पूर्वदेहं विहाय देहान्तरं प्रतिपद्यत (शां० भा० ३।१।१) एतस्य वाक्यस्य स्पष्टीकरणावसरे भाष्यव्याख्यानकारः दृष्टान्तमिदमुदाहरति' तथा राजानं ग्रामात् ग्रामान्तरं-जिगमिषुं भृत्या अनुगच्छन्ति, एवमेव ते प्राणा जीवस्य मरणकालागतमोहान्तरं लोकान्तरं जिगमिषन्तस्तमनुगता एव भवन्ति (भा० व्या० पृ० ५७९) पूर्वप्रज्ञाशब्दव्याख्याने दृष्टान्तमिदं व्याचष्टे' यथा तृणजलूका एकस्य तृणस्याग्रभागमागत्यान्यदाक्रमणं स्थानं तृणमासाद्य पूर्वस्मात्तृणादात्मानमुपसंहरति एवमेव जीवः पूर्वशरीरं विमुक्तप्राणमचेतनमाषाद्यान्यदाक्रमणस्थानं शरीरमासादयति । तदनन्तरं यथा सुवर्णकारः किञ्चित्सुवर्णमादाय समीचीनमाभरणमुत्पादयति, एवमेवायमात्मान्यन्नवतरं कल्याणतरं रूपं शरीरं कुरुते (ब्र० वि० ३।१।१) ।

८. घ० मा० 'तत्राषपरि' इति पाठः ।

९. घ० मा० 'कथम्' इति अधिकः पाठः ;

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गमनं[1] श्रुतिबलादवगम्यत इति वाच्यम्, पञ्चाग्निविद्यावाक्यं ह्यन्यतः प्राप्तं स्वर्गलोकादिगमनूद्य तत्राग्न्याद्युपासनं विद्यते[2]। तस्य पुरोवादाकांक्षायां 'तद्य इमे ग्राम' (छा० ५।१०।३) इति जीवस्य परलोकगमनागमबोधक वाक्यमेव पुरोवादतत्वेन निश्चीयते 'आशाशश्चन्द्रमस[3] सोमो राजेति' (छा० ५।१०।४) कीर्तनेन पञ्चाग्निविद्या-वाक्येऽपि 'तस्मिन्नेतस्मिन्नग्नौ देवा श्रद्धां जुह्वति[4] तस्या आहुतेस्सोमो राजा सम्भवति (छा० ५।४।२) इति सोमराजत्वकीर्तनेन च प्रत्यभिज्ञानात्। न च शब्दसाम्ये धीष्टादिकारिणां परलोकप्रतिपादकवाक्ये सोमराजशब्देन चन्द्रस्यैव प्रतिपादनात्। इष्टादिकारिणाञ्च ते धूममिति बहुवचनान्तेन प्रस्तुतानां 'एषः सोमो राजा' (छा० ५।१०।४) (एकवचनान्तेन) परामर्शानुपपत्तेरर्थभेदात्प्रत्यभिज्ञाविच्छेदः 'देवान्नत्वञ्च चन्द्रस्य प्रथमां (?) पिवते वन्हिरिति शास्त्र-बलादूपपद्यते इति वाच्यम्, तथापि वाजसनेयकशाखायां 'चन्द्रप्राप्यान्नं भवतीतीष्टादिकारिणामेवान्नत्वोक्त्या तदेकार्थकछन्दोवाक्यस्यापीष्टादिकारिप्रतिपादकत्वस्य 'एषः सोमो राजा' (छा० ५।१०।४) इत्यस्य वक्तव्यत्वेनैक-वचनस्य कथञ्चिदुपपादनीयत्वेन प्रत्यभिज्ञानाविच्छेदात्, पञ्चाग्निविद्यायां 'पर्जन्याग्नौ सोमं राजानं जुह्वति तस्य आहुते वर्षासम्भवतीत्यनेन मेघो भूत्वा प्रवर्षती'तीष्टादिकारिणामवरोहप्रतिपादकवाक्यस्यार्थैक्येन प्रत्यभिज्ञानाच्च परलोकगमनादिप्रतिपादकवाक्यस्य पुरोवादत्वनिर्णयात्।

एवञ्चोभयोरेकार्थत्वे मार्गप्रतिपादकवाक्ये[5] अपां पञ्चाग्निविद्यावाक्ये चेष्टादिकारिणां प्रतीतेरावश्यकत्वे-नापरिवेष्टितस्तस्य गमनासिद्धेः। न चैवमपि-अपामेव गमनं सिद्ध्येन्नेतरेषां भूतानामिति वाच्यम्।आसामपां पञ्चीकृतत्वेन पृथिव्यादिभूतानामपि गमनसिद्धेश्शरीरस्य पञ्चभूतविकारत्वं पृथिवीमय (यं) इत्यादिश्रुतिसिद्धम्। आपश्चात्रा-ग्निहोत्रादिसम्बन्धिन्यः 'ते वा एते आहुति हुते' इत्यादिषड्प्रश्ननिर्णयवाक्यादवगन्तव्यः[6] प्राणानाञ्च निराश्रयाणां गमनानुपपत्तेर्भूतपरिष्वङ्गासिद्धिः। तस्माज्जीवाः देहारम्भकभूतसूक्ष्मपरिष्वक्ता एव गच्छन्तीति सिद्धम्।

कृतात्ययाधिकरणम्

कृतात्ययेऽनुशयवान् दृष्टस्मृतिभ्यां यथेतमनेवञ्च[7] ॥२॥

चन्द्रमण्डले स्वर्गमनुभूयावरतन्तो[8] जीवाः किं कर्मयुक्ता उत कर्मरहिता इति संशयः, किं प्राप्तम्। कर्म-रहिता इति। कुतः

तस्मिन्यावदितिश्रुत्या यत्किञ्चेहेति च श्रुतेः।
सर्वकर्मफलस्यापि भोगस्तत्र प्रतीयते ॥

१. ग० मा० 'परिवेषितगमनम्' इति पाठः।
२. च० मा० 'विघते' इति पाठः!
३. घ० मा० 'चन्द्रमसे' इति पाठः।
४. (क) 'श्राह्वलुम्हति' इति घ
(ख) ततस्ताः श्रद्धापूर्वककर्मसम्बायिन्य आहुतिमय्य अपोऽपूर्वरूपाः सत्यस्तानिष्टादिकारिणो जीवान्परिवेष्ट्यामुं लोकं फलदानाय नयन्तीति। (शा० भा० ३।१।६)
५. ग० मा० 'मार्गप्रतिपादकवाक्ये' इति पाठः।
६. ग० मा० 'प्रश्नत्वनिर्णयवाक्यादवगन्तव्या' इति पाठः।
७. घ० मा० 'अनेचंच' इति पाठः।
८. च० मा० 'अवरोहन्त' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'रमणीये' त्यादिनाचारस्य प्रबोधकम्[1]।
शरीरहेतुता तस्य वचनादेव गम्यते ॥

'तस्मिन् यावत्सम्पातमुषित्वा (छा० ५।१०।५) इति वाक्यपर्यालोचनया 'यत्किञ्चेह करोत्ययमिति वाक्यपर्यालोचनया च सर्वकर्मणां तत्र फलभोग प्रतीतेः कर्मरहितानामवरोहणम् । न च 'तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन्नथ य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरन्[2] (छा० ५।१०।७) इति वाक्यपर्यालोचनेन कर्मणां सद्भावावगमेन कृत्स्नकर्मफलोपभोगसम्भवादिति वाच्यम् । यावत्किञ्चिच्छब्दपर्यालोचनया कृत्स्नकर्मफलभोगस्य स्वर्गलोके जातत्वावगमेन [3]'रमणीयचरणा' (छा० ५।१०।७) इति वाक्यास्याचारपरत्वेन व्याख्येयत्वादाचारवैचित्र्यस्यैव सुखदुःख वैचित्र्यस्य शरीरारम्भस्य चोपपत्तेरिति प्राप्तेऽभिधीयते ।

स्वर्गार्थं यत्कृतं कर्म फलं तस्योपयुज्यते ।
स्वर्लोकन्न तदन्येषां फलानां मुक्तिसम्भः ॥
न हि मानुषदेहेन भोक्तव्यं यत्फलं भवेत् ।
न तद्दैवेन देहेन भुज्यन्तेऽपि कदाचन ॥
यावच्छब्दस्य सङ्कोच एवं (हि) सम्भविष्यति ।
'रमणीय' श्रुतिश्चापि कर्मणां सत्त्वबोधिका ॥
उपपन्नतरा[4] स्मृतिर्वाक्यं शेषस्य बोधकम् ।
भोगवैचित्र्याय सर्वमुपपन्नं भविष्यति ॥

'अथ य इमे इष्टापूर्ते दत्तमित्युपासते ते धूममभिम्भवन्ति' (छा० ५।१०।३) इति वाक्यं स्वर्गार्थंकृतानां कर्मणां धूमादिमार्गेण स्वर्गलोकप्राप्तिपूर्वकं फलप्रतिपादकमतस्तेषामेव फलं तत्र भुज्यते नान्येषामतः कर्म सद्भावः[5] कथं स्यात् । किञ्च मानुषादिदेहेन यत्फलं भोक्तव्यन्न तद्दैवेन देहेन भोक्तुं शक्यते स्वर्गेऽतः कर्मशेषस्य सद्भाव-

---

१. घ० मा० 'एव च चरणश्रुत्या शीलसत्त्वैव बोध्यते' इति पाठः ।

२. (तुलनीयम्) क—तत्तदत्र तेष्वनुशयिनां य इह लोके रमणीयं शोभनं चरणं शीलं येषां ते रमणीयचरणा रमणीयचरणोपलक्षितः, शोभनोऽनुशयः पुण्यं कर्म येषां ते रमणीयचरणा उच्यन्ते । क्रौर्यानृतमायावर्जितानां हि शक्य उपलक्षयितुं शुभानुशयसद्भावः । तेनानुशयेन पुण्येन कर्मणा चन्द्रमण्डले मुक्तशेषेणाभ्यारोहे क्षिप्रमेव, यदिति क्रियाविशेषणम्, ते रमणीयां क्रौर्यादिवर्जितां योनिमापद्येरन्प्राप्नुयुर्ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वा स्वकर्मानुरूपेण (छा० उ० भा० ५।१०।७)

ख—"तेष्वनुशयिषु मध्ये-इह लोके ये पूर्वं रमणीयचरणावन्त आसन् ते तदनुरूपां ब्राह्मणादियोनिं शरीरमापद्येरन्निति यत्तदभ्यासः क्षिप्रम् अवश्यमेवेत्यर्थः । योनिशब्दः स्थानवचनः कपूयचरणाः कुत्सिताचरणाः । वर्णा वर्णिनः आश्रमा आश्रमिणः' (वे० क० त० ३।१।२) ।

३. घ० मा० 'जंतत्वावगमेन' इति पाठः ।

४. ग० मा० 'स्मृतिश्च कर्मशेषस्य सद्भावे मानमर्हति' इति पाठः

५. घ० मा० 'त्राष्याभाव' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सिद्धिः। एवञ्च 'यावत्सम्पातमुषित्वा'[1] (छा० ५।१०।५) इति श्रुतौ 'यत्किञ्चेह करोत्ययम्' इति श्रुतौ च यावद्यत्किञ्चिद्वेति शब्दौ यत्कर्मफलभोगाय स्वर्गंगतस्तत्कात्स्न्यंपरौ, न तु सर्वकर्मणां तत्रोपभोगं प्रतिपादयतः।

किञ्च 'य इह रमणीयचरणाः' (छा० ५।१०।७) इति श्रुतिरवरोहतां पुण्यवतां बोधयन्ती कर्मसद्भावं दर्शयति। न चेयं श्रुतिः क्रमगतयावच्छब्दानुरोधादाचारपरा वा दुर्वासनापरा वेति[2] वाच्यम्। उपक्रमागत यावच्छब्दस्य सङ्कोचसहिष्णुतायाः प्रागेव दर्शितत्वेन चरणशब्दस्य कर्मपरत्वस्य वक्तव्यत्वात्। वर्णाश्रमाश्च [3]'स्वकर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय ततश्शेषेण विशिष्टदेशकुलजातिकुलरूपायुः श्रुतवृत्तवीर्यसुखमेधसोजन्मप्रतिपद्यते' इति स्मृतिबलादविशेषसद्भावसिद्धेश्च। किञ्च कर्मशेषाभावे सुखादिवैचित्र्यमवरोहोत्तरकाले जीवानान्न स्यात्। स चाचारात्कर्म[4] वासना वा पुत्रादिकृतकर्मणो वा सुखादिवैचित्र्योपपत्तिरिति वाच्यम्। आचारस्य कर्माङ्गतया फलजनकत्वानुपपत्तेर्वासनायास्तु तदनाशक्यमेव। अन्यकृतकर्मणामपि स्वकृतकर्मवत्फलप्रदत्वस्य स्वर्गे स्वीकार्यत्वादिति कथं ततो वैचित्र्यं भवेत्। अतः शेषसद्भावसिद्धिः। केचित्तु स्वर्गार्थं कृतस्य फलं निःशेषं भुक्त्वावरोहन्तीति पूर्वपक्षं कृत्वा स्वावशेषा अवरोहन्तीति सिद्धान्तयन्ति। तेषां कपूयचरणा इत्यनुपपन्नं स्यात्। पुण्यशेषेणैवावरोहाभ्युपगमात्। अत उक्त प्रकार एव सम्यगिति।

अनिष्टादिकार्यधिकरणम्

अनिष्टादिकारिणामपि[5] च [6]श्रुतम्॥१२॥

पापिनाञ्चन्द्रमण्डले[7] गमनं समस्ति नेति संशये पूर्वः पक्षः, गमनमस्तीति। कुतः

चन्द्रमसं सर्वे गच्छन्तीति श्रुतेर्बलात्।
पञ्चम्यादिश्रुतेश्चैवमुपपत्तिर्भविष्यति[8]॥

'येवैके चास्माल्लोकात्प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति' (कौ० ब्रा० उ० १।२) इति श्रुत्यनुसारेण सर्वेषामविशेषेण चन्द्रमण्डलगमनप्रतिपाद्यमानानामपि चन्द्रगमनं स्वीकार्यञ्च। पञ्चम्यामाहुतायां पुरुषवचस्त्वनुरोधादपि चन्द्रगमनं स्वीकार्यम्। अन्यथा—आहुतिसम्पत्तेरभावाच्छरीरप्राप्तेरभावप्रसङ्गात्। न च पापिनाञ्चन्द्रगमनाभ्युपगमे पापपुण्ययोरविशेषेण विवेकिनामपि पापे प्रवृत्त्यापत्तिरिति वाच्यम्। तत्र गत्वा भोगं विनैवावरोहः पापिनामित्यभ्युपगमात्। पुण्यवताञ्च तत्र भोगाभ्युपगमात्। अतस्सर्वे चन्द्रं गच्छन्तीति।

---

१. सम्पातशब्देनात्र कर्माशय उच्यते सम्पतन्त्यनेनास्माल्लोकादमुं लोकं फलोपभोगायेति, यावत्सम्पातमुषित्वेति च कृत्स्नस्य तस्य कृतस्य तत्रैव मुक्ततां दर्शयति (शा० भा० ३।१।८) स्वर्गस्थे हि जीवे सञ्चितानि विचित्राणि कर्माणि सन्ति, कानिचित्तस्मिन्नेव काले स्वर्गोपभोगयोग्यानि, कानिचित्तु कालान्तरे, अन्यानि मनुष्यादिशरीरोपभोगयोग्यानि, कर्मणां नानायोनिफलारम्भप्रतिपादकशास्त्रादयमर्थोऽवगम्यते (भा० व्या० पृ० ५८९)।

२. ग० मा० 'कर्मवासना' इति पाठः।

३. घ० मा० 'स्वर्मनिष्ठाः' इति पाठः।

४. घ० मा० 'न चावा सत्कर्म' इति पाठः।

५. घ० मा० 'कारणमपि' इति पाठः।

६. घ० मा० 'चाश्रुतम्' इति पाठः।

७. घ० मा० 'यामिनाम्' इति पाठः।

८. घ० मा० 'हुवे' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सिद्धान्तस्तु

पापिनाञ्चन्द्रसम्प्राप्तौ पुण्यस्य करणं वृथा ।
आहुतेः पञ्चसंख्याया नियमश्चापि नेष्यते ॥
यतस्संयमने[1] गत्वा यातना अनुभूय हि ।
लोकमेतं समुद्दिश्य निवर्तन्त[2] इतीष्यते ॥
एवञ्च सर्वशब्दोऽपि पुण्यकृद्विषयो भवेत् ।
लोकास्सम्भूतिर्वचनमेव सत्युपपद्यते ॥

पापिनामपि चन्द्रप्राप्त्यभ्युपगमे श्रमेण पुण्यानुष्ठानं वृथैव स्यात् । न च तेषां तत्र भोगाभावान्नोक्तदोष इति वाच्यम् । तथासत्यारोह वैयर्थ्यात् ।

न च 'पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति' (छा० ५।३।३) इति वचनानुसारेणाहुतिसंख्यानियमार्थमेव चन्द्रगमनमिति वाच्यम् । आहुतिसंख्यां विनापि धृष्टद्युम्नादीनां[3] देहारम्भादतो यमसमीपङ्गत्वा नरकयातनामनुभूय पुनरस्मिंल्लोके समायान्तीति युज्यते । तथा च श्रुतिः, पापिनां यमवश्यतां दर्शयति 'वैवस्वत सङ्गमनजनानां यमराजानं हविषा [4]द्रुवस्य नेति । किञ्चैवमद्य एतयोः पथो र्न कतरेण च न [5]'तानीमानित्युक्तिपूर्वकं (छा० ५।१०।८) जायस्व म्रियस्वेत्येत्तृतीयं स्थानं तेनासौ लोको न सम्भूयत' (छा० ५।१०।८) इति वचनमुपपद्यते । पापिनामपि चन्द्रमण्डलप्राप्त्यभ्युपगमेऽपूरणोक्तिरनुपपन्ना स्यात् ।

न चावरोहणादेव पूरणाभाव उपपन्न इति वाच्यम् । जायस्वम्रियस्वेत्येतत्तृतीयं स्थानं तेनासौ लोको न सम्पूर्यत' (छा० ५।१०।८) इति तृतीयस्थानप्राप्तेर्हेतुत्वाभिधानस्यासङ्गत्यापत्तेः, अवरोहणान्न पूर्यत इति वक्तव्यं स्यात्; अतो न पापिनश्चन्द्रमण्डलप्राप्तिः । चन्द्रमसमेव ते सर्वे गच्छन्तीत्यत्र (कौ० ब्रा० उ० १।२) सर्वशब्दोऽपि सुकृतिविषयो बोध्यः ।

साभाव्यापत्त्यधिकरणम् ।

[6]तत्साभाव्यापत्तिरुपपत्तेः ॥४॥

चन्द्रमण्डलादवरोहतां 'यदेतमाकाशमाकाशाद्वायुं वायुर्भूत्वा धूमो भवति' (छा० ५।१०।५) इति धूमाभावापत्तिः[7] श्रूयते । तत्र किमाकाशादिस्वरूपापत्तिरुत तत्संश्लेषमात्रमिति ।

१. घ० मा० 'सापभने' इति पाठः ।
२. ग० मा० 'निबर्तदेहिपापिनः' इति पाठः ।
३. घ० मा० 'हेयष्टधुम्न' इति पाठः ।
४. ग० भा० 'दवस्पतेति' इति पाठः ।
५. ग० मा० 'तानीमानि क्षुद्राण्यसकृदावर्तीनि भूतानि भवन्ति' इति पाठः ।
६. क —समानो भावो रूपं येषां ते सभावास्तेषां भाव साभाव्यं-सारूप्यं-सादृश्यमिति (भामती पृ० ९२९)
ख—स्वाभाव्यापत्तिरिति पाठे स्वसमो भावो येषां ते स्वभावास्तेषां भावः स्वाभाव्यमिति समपदाध्याहारः स्यादतः साभाव्यापत्तिरिति युक्तपाठः' (वे० क० त० ३।१।४) ।
७. (तुलनीय) निवृताश्चानुशयिनः कर्मान्ते द्रुतदेहा आकाशङ्गताः, आकाशसदृशा भवन्ति । आकाशसादृश्यान्तरं पिण्डीकृतातिसूक्ष्मलिङ्गोपहितवायुर्नेता ततश्च नीयमाना वायुसमा भवन्ति । सानुशयः सद्यः वायुसमोभूत्वा धूमङ्गतः तत्समो भूत्वा-नभ्रसमो भवति । अपो बिभर्तीत्यभ्रम् । मेहति सिञ्चतीति वृष्टिकर्ता मेघः तत्समो भूत्वा वर्षाधाराद्वारा पृथिवीं प्रविश्य व्रीहियवादिरूपो भवतीति सिद्धान्तगत्या श्रुत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संशये

संदिग्धप्रक्रमस्थो हि वाक्यशेष्य(स्य) दर्शनात् ।
निर्णेतव्यस्तथा चेह वायुर्भूत्वेति दर्शनात् ॥
प्रक्रमस्थं द्वितीयान्तन्नेदं तद्भाव बोधने ।
आकाशरूपतां तेन प्रप्नोत्यनुशयी ततः ॥

उपक्रमे संदिग्धमुपसंहारेण निर्णीयते । यथा वासः परिधत्ते[1] शर्करा युक्ता उपदध्यादित्युपक्रमश्श्रुत वासः [2]पदार्थस्याञ्जनसाधनत्वेनाक्षिप्तस्य द्रवद्रव्यसामान्यस्य चानुष्ठानवेलायां विशेषणापेक्षितत्वादपेक्षितविशेषबोधको वाक्यशेष 'एतद्वै [3]सर्वंदेबत्यं यत्क्षौममिति' तेजोघृतमिति च तद्वत्प्रक्रमतेऽप्याकाशाद्वायुरिति न वायुस्वरूपापत्तिरुत वायुसम्बन्धमात्रमिति संशये वायुर्भूत्वा धूमो भवति' (छा० ५।१०।५) इति वाक्यशेषानुसारात्तद्भावापत्तिरितिनिर्णीयते । न चान्यस्यान्यभावानुपपत्तिरिति वचनानुसारेणास्यार्थस्याङ्गीकार्यत्वादिति प्राप्तेऽभिधीयते ।

अन्यस्यानन्यतापत्तिः सहस्रवचनैरपि ।
शक्यं कल्पयितुं तस्मात्संश्लेषस्तावदिष्यते ॥

नात्र मुख्या तद्भावापत्तिरुपपद्यते । अन्यस्यान्यभावानुपपत्तेः वचनस्य तत्संश्लेषमात्रेणाप्युपपत्तेः । अतो वाक्यादिषु संश्लेषमात्रमनुशयिनामित्येव सिद्धान्तः ।

नातिचिराधिकरणम्

नातिचिरेण विशेषात् ॥५॥

'यथैतमाकाशमाकाशाद्वायु वायुर्भूत्वा धूमो भवति धूमोभूत्वाभ्रं भवत्यभ्रं भूत्वा मेघो भवति मेघो भूत्वा प्रवर्षति' (छा० ५।१०।५)। 'त इह ब्रीहि[4] [5]यवा ओषधादिवनस्पतयस्तिमाषा इति जायन्ते अतो वै खलु दुर्निष्प्रपतम् (छा० ५।१०।६) इति श्रूयते । तच संशयः । किं ब्रीह्यादिभावात्प्राचीनेषु चिरमचिरं वा—अनुशयी तिष्ठत्युताचिरमेवेति तत्र नियमकाभावादनियम इति प्राप्तम् । न च 'अतो वै खलु दुर्निष्प्रपतरम् (छा० ५।१०।६) इति वाक्येन ब्रीह्यादिभ्यो निर्गमनस्य विलम्बोक्त्या पूर्वेभ्यो निर्गमनमविलम्बेन गम्यत इति वाच्यम् । तस्य वाक्यस्यात एव विलम्बो, न तु पूर्वेभ्य इत्यर्थकत्वाभावेन ततोऽस्यार्थस्यालाभात् । अपि तु ततो नियमनिवृत्तेरेव लाभेन नियमस्य पूर्वेषु स्थितत्वात् । न च तदयमतिशयस्य प्रतिपादनादतिशयस्य च निरूपकत्वं पूर्वोक्तानामेव सम्बन्धात्ततो विलम्बेनैव निर्गमनप्रतीतेरिदमयुक्तमिति वाच्यम्[6] । तकारस्याधिकस्य श्रवणापत्त्या द्विवचनान्तविभक्त्योमपदाभावेन च तरपोऽसम्भवात्, रेफस्यैवोपसर्जनस्य[7] छान्दस्या प्रक्रियया स्वीकारात् । तस्मादनियम एव युक्त इति । एवं प्राप्ते ब्रूमः ।

---

१. घ० मा० 'परिद्यते' इति पाठः ।
२. घ० मा० 'स्यांजनसाद्यत्वेन' इति पाठः ।
३. घ० मा० 'सदेवत्यंयते ऐक्षममित्व' इति पाठः ।
४. घ० मा० त इह यवादीषधि' इति पाठः ।
५. घ० मा० 'ओ' इति पाठो नास्ति ।
६. घ० मा० 'निर्गमनषतीते' इति पाठः ।
७. घ० मा० 'रेफस्यैवोपजंनस्य' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रेफस्यार्थहीनस्य कल्पना नैव युज्यते ।
अर्थवत्त्वे तु सत्यर्थराहित्यन्नोपपत्तिमत् ॥

अध्ययनविधिबलाद्धि-अधीतस्य सर्वस्यापि प्रयोजनवत्त्वेन भवितव्यं, तच्च दृष्टे सम्भवति नादृष्टकल्प्यम्। तथा च प्रकृतेऽतिरिक्तस्य रेफस्य तस्यानर्थक्यापत्त्या तरपं प्रकल्प्यत तस्य, तकारलोपकल्पनमेव युक्तमर्थवत्त्वस्य सम्भवात्। द्विवचनान्तविभक्तिव्योमपदप्रयोगाभावेऽपि 'तदेव वीर्यवत्तरं भवती' त्यत्र तरपो दर्शनादिहापि तरप उपपत्तेरतोऽतिशयनिरूपकत्वेन ब्रीह्यादिप्राचीनानामेव प्रतीतेः प्राचीनेभ्यो निर्गमनमचिरादेवेति गम्यत इत्यविलम्ब एव युक्त । न वातश्शब्देन सर्वेषामेव परामर्शोऽस्त्विति[2] वाच्यम्। तथा सत्यतिशयविरूपकलाभप्रसङ्गात् सन्निहितत्वाच्च ब्रीह्यादीनामेव परामर्शो युक्त[3] इति ।

अन्याधिष्ठिताधिकरणम्

अन्याधिष्ठितेषु पूर्ववदभिलापात् ॥ ६ ॥

'त इह ब्रीहियवा ओषधिवनस्पतयस्तिलमाषा इति जायन्ते' (छा० ५।१०।६) इत्यत्र विचार्यते, ब्रीह्यादिभावस्त एवं रूपापत्तिरुत संश्लेषमात्रमिति संशये पूर्वः पक्षः ।

जनिधातोर्हि मुख्यत्वे लक्षणा नैव युज्यते ।
अतो ब्रीह्यादिभावोऽत्र मुख्य एव भविष्यति ॥
हिंसादियोगाद्यागादेर्[4]दृष्टफल नेष्यते ।
तत इष्टश्च चाधिक्यात्प्रवृत्तिरुपपद्यते ॥

यदेतमिति पूर्वं गगनस्य सिध्यतावगमात्संश्लेषमात्रमनुशयिनां स्वीकृतमिह तु ब्रीह्यादिषु जीवस्य भोक्तृरपेक्षितत्वादोषधीनाञ्चाधुनैवोत्पत्तेर्मुख्यश्च[5] सम्भवति गुणकल्पनाया अन्यायत्वात्। मुख्य एवात्रानुशायिनां ब्रीह्यादिभावः[6] । न चानुशयिनां देहजनिविवक्षायां तत्साधनकर्मकीर्तनमावश्यकं किमिति यथा 'रमणीयचरणा'

१. ग० मा० 'सम्भाविते अर्थत्वे स्यात्स्वः परिकल्पनात्' इति पाठः ।

२. घ० मा० 'परामशो युक्तस्त्विति' इति पाठः ।

३. सुखदुःखवाविशेषश्चायन्निष्प्रपतनस्य कालाल्पत्वदीर्घत्वनिमित्तः । तस्मिन्नवधौ शरीरानिष्पत्तेरुपभोगासम्भवात् । तस्माब्रीह्यादिभावापत्तेः प्रागल्पेनैव कालेनावरोहः स्यादिति (शा० भा० ३।१।५) बिना स्थूलशरीरन्न सूक्ष्मशरीरे दुःखभागीति दुर्निष्प्रपतम् विलम्बं लक्षयतीति सिद्धान्तः (भामती ३।१।२३) अनुशयिनामाकाशादिप्रवर्षणान्तसादृश्यं चिरभावि-अनुशयिसादृश्यरूपत्वात् ब्रीह्यादिसादृश्यवदित्यनुमानस्य प्रागुक्तश्रुतार्थापत्त्या बाधार्थमधिकरणान्तरारम्भोपपत्तेरिति' (वे० क० त० ३।१।२३) ब्रीह्यादिषु चिरावस्थानश्रुतिबलादाकाशादिष्वचिरावस्थानलाभादित्याशंक्य टीकाकारैस्तदुपपादनं कृतम् । दुर्निष्प्रपतरशब्दो न विचारावस्थानवाचकः, किन्तु दुःखनिष्क्रमणवाचकः । अतस्तद्वशादाकाशादिभ्यः सुखनिष्क्रमणं लभ्यते, न तु चिरावस्थानमिति । एवं पूर्वपक्षोपपादनमपि न युक्तम्, ब्रीह्यादिभावेऽनुशयिनां दुःखसद्भावस्यानन्तराधिकरणे निषेत्स्यमानतया दुर्निष्प्रपतरमित्यस्य लक्षणया विलम्बपरत्वादित्यपरितोषादाचार्यः सामान्यतो दृष्टावलम्बनपूर्वपक्षं प्रदर्श्य तस्य श्रुतार्थापवादः सिद्धान्ते वर्णितः (वे० क० त० प० म० ३।१।२३) ।

४. ग० मा० 'रनिष्टफलतामि च' इति पाठः ।

५. घ० मा० 'वोत्पत्तेमुखे' इति पाठः ।

६. ग० मा० 'मुख्य एवात्र''''भाव' इत्यन्त पाठो नास्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति (छा० ५।१०।७) इति प्रकृते कर्मणो निर्देशगौणत्वमेव युक्तमिति वाच्यम् तादृशनियमे मानाभावात्। किञ्च 'अथ य इमे ग्रामा' इष्टापूर्तिदत्तमित्युपासते ते धूममभिसम्भवन्ति (छा० ५।१०।३) इतीष्टादिकर्मणामेव कीर्तनात्तादृशनियमेऽपि बाधकाभावः। न चेष्टादिकर्मणाञ्च-अभावानुपपत्तिस्तस्यानिष्टकर्मफलत्वादिति वाच्यम्। हिंसादियोगेन यागस्याप्यनिष्टफलसाधनत्वावगमात्, 'न हिंस्यात्, इति हिंसासामान्यस्य प्रतिषेधात्, प्रतिषेधस्य चानिष्टसाधनतापर्यवसानात्। न चानारभ्याधीतस्य[1] हिंसाप्रतिषेधस्य पुरुषार्थत्वाप्रतिषेध्यस्यापि[2] पुरुषार्थत्वमेव युक्तम्। तथा च क्रत्वर्थहिंसायाः प्रतिषेधाविषयत्वान्न तस्यानिष्टसाधनत्वमिति। न च तस्य युक्तः स्थावरभाव इति वाच्यम्, 'दीक्षितो न ददाति न जुह्वोति न पचति, इत्यत्र पुरुषार्थानामपि होमादीनां निषेधस्य क्रत्वर्थत्वादुक्तनियमस्याभावाद्भावे वा पुरुषार्थत्वम्, पुरुषं प्रति साक्षात्परम्परया वोपकारकत्वरूपस्य यागीयहिंसाया अपि सत्त्वेन तस्या अपि निषेधत्वेनेष्टसाधनत्वावगमात्। अन्यथा 'ब्राह्मणाय नापगुरेत्' इत्यस्यापि निषेधस्य पुरुषार्थत्वेन क्रत्वपगुरणे[3] दोषानापत्तेः। न च ततोऽप्यनिष्टफलजनने तत्र प्रवृत्त्यनापत्तिरिति वाच्यम्। अनिष्टस्येष्टापेक्षयाल्पत्वेन प्रवृत्त्युपपत्तेः। न च पशुसञ्ज्ञपनं[4] न हिंसा, पश्वनुग्राहकत्वात्, तत्त्वञ्च हिरण्यशृंग ऊर्ध्वस्वर्गलोकमेति' इति वचनसिद्धमिति वाच्यम्, तथापि प्राणवियोगानुकूलव्यापारत्वेन हिंसात्वानपायात् 'न[5] वा (उवे)तन्म्रियते न रिष्यति (य० वे० ४।६।९) इति स्तावकम्। न च पशुहिंसायां[6] यो दीक्षित' इति वाक्येन विहितत्वानिषेधस्तद्यतिरिक्तया इति वाच्यम्। विधिबलेनेष्टसाधनत्वे बलवदनिष्टाननुबन्धित्वेन विशिष्टबोधिते निषेधे न तद्भावो बोध्यमानो विशेष्यवति विशेषणाभावमादाय पर्यवस्यतीति। तथा[7] च[8] दैक्षपशुयागाविधेरङ्गविधित्वेनाननुष्ठापकत्वेनानुष्ठापकत्वं प्रयुक्तं बलवदनिष्ठाननुबन्धित्वबोधकत्वस्याभावान्निषेधेन[9] बलवदनिष्ठसाधनत्वबाधने बाधकाभावात्। अस्य विधेर्बलवदनिष्ठसाधनत्वबोधकत्व एवास्य विशेषत्वन्निषेधस्य सामान्यविषयत्वमिति बाध्यबाधकतोभयोर्भवेत्। न चेदस्तीत्युक्तं तस्मान्मुख्य एव व्रीह्यादिभाव इति।

सिद्धान्तस्तु

जनिश्रुतेर्हि मुख्यत्वे व्रीह्यादेः खण्डनादिषु।
तज्जीवस्य प्रवासं स्या (त्प्रेत) संयोगिता नहि ॥
कर्मणः कीर्तनस्यापि राहित्यान्न [10]जनिश्रुतिः।
मुख्या स्वीकर्तुमुचिता वेद्यत्वान्न निषिध्यते ॥

---

१. घ० मा० 'अनारम्यादितस्य' इति पाठः।

२. ग० मा० 'हिंसाया अपि' इति पाठः।

३. ग० मा० 'क्रत्वघ्यायगोरणे' इति पाठः।

४ संज्ञपनन्नाम = प्राणवियोगानुकूलव्यापारः मारणमित्यर्थः। संज्ञपयान्वगन्नित्येव ब्रूयात्' (का० श्रौ० सू० प० ६।५।२०) एवमेव प्रैषं ब्रूयात्, न जहि मारयेत्यादिकम्। अमुं पशुं संज्ञपय मारय। अयं संज्ञप्त सन् देवाननुगच्छेदिति प्रेषार्थः (का० श्रौ० सू० बृ० ६।५।२०)।

५. घ० मा० 'न वा उपेनपसेनरिष्यति' इति पाठः।

६. घ० मा० 'पशुहिंसायायोदिक्षित' इति पाठः।

७. घ० मा० 'इति' पाठो नास्ति।

८. घ० मा० 'तथायदैक्षपशुश' इति पाठः।

९. घ० मा० 'क' इति पाठो नास्ति।

१०. घ० मा० 'ग्लानि' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हिंसा तेनास्य[1] जीवस्य स्थावरत्वान्न युज्यते ।
अतः पूर्ववदत्रापि[2] संश्लेषस्तु भविष्यति ॥

यदि व्रीह्यादिजन्ममुख्यं स्यात्ततो व्रीह्यादिषु लूयमानेष्वनुशयी प्रवसेत् । ततश्चानुशयिनो रेतस्सिग्भ्यो न भवेत् । अतः संश्लेषमात्रमनुशयिनः[3] । किञ्चात्र कर्मकीर्तनाभावेनाकाशादिभाववदेव संस्लेषमात्रमेव युक्तम् । न चात्रापीष्टादिकमेव[4] कीर्तितमिति वाच्यम्, 'शरीरजैः कर्मदोषैर्याति स्थावरतां नर' इत्यादि स्मृत्यनुसारेण स्थावरादिभावः प्राप्तिहेतुत्वात् । न[5] च हिंसादियोगादिष्टादिकर्मकारिणोऽशुद्धिरिति[6] वाच्यम्, विधिना बलवदनिष्टाननुबन्धित्वस्य बोधनेन हिंसान्तरे तदभावबोधनेनावकाशस्य निषेधवाक्यस्य तद्भावबोधनाक्षमत्वात् । न चाङ्गविधीनां तादृगनिष्ठसाधनताबोधकत्वाभावः[7] प्रधानविधेरेव सांङ्गप्रधानस्य तदबोधकत्वात्तद्बलादेव लब्धस्य तस्य निषेद्धुं शक्यत्वात् । न चैवं श्येनादीनामपि निषिध्यत्वन्न स्यादिति वाच्यम्; 'श्येनेनाभिचरन् यजेत' इत्यादिविधिना प्रायश्चित्ताम्नायबलादिष्टसाधनमात्रस्य बोधनात् । तथा चानाम्नातप्रायश्चित्तविहितेतरहिंसानिषेधकत्वात् 'न हिंस्या' दिति वाक्यस्य स्वीक्रियते । किञ्च 'अहिंसेत्सर्वभूतान्यन्यत्र तीर्थभ्यः' इत्यत्रान्यत्र तीर्थेभ्य इत्युक्त्या कर्माङ्गहिंसाया निषेधानवगमान्न पापीय[8] हिंसाया निषिद्धत्वप्रयुक्तं स्थावरादिजन्म, तस्मादत्रापि[9] संश्लेषमनुशयिन इति ।

इति वेदान्तनयभूषणे

तृतीयाध्यायस्य

प्रथमः पादः

---

१. ग० मा० 'नानुशयिन' इति पाठः ।

२. घ० मा० 'पूर्वपदन्नापि' इति पाठः ।

३. घ० मा० 'अतः सुश्लेषमात्र' इति पाठः ।

४. घ० मा० 'न चात्रादिष्टादिकम्' इति पाठः ।

५. घ० मा० 'इत्थं हिंसा' इति पाठः ।

६. घ० मा० 'कर्मरिणो' इति पाठः ।

७. घ० मा० 'तादृशोऽनिष्ट' इति पाठः ।

८. ग० च० मा० 'यागीय' इति पाठः ।

९. तस्मादप्यवगम्यते नावरोहे व्रीह्यादिभावावसरे तच्छरीरमेव सुखदुःखान्वितं भवतीति । तस्माद्व्रीह्यादिसंश्लेषमात्रमनुशयिनां तज्जन्मेति सिद्धम् । (शां० भा० ३।१।२७) स्वर्गादवरोहतां व्रीह्यादो संश्लेषमात्रमिति स्थितम्' (वे० न्या० मा० ३।१।६) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तृतीयाध्याये द्वितीयः पादः

सन्ध्याधिकरणम्

सन्ध्ये सृष्टिराह हि ॥१॥

पूर्वत्र पादे वैराग्यं प्रतिपादितमत्र वै।
तत्त्वंपदार्थयोः शोधः प्रसादश्चेश्वरस्य हि ॥
साधनं ब्रह्मविज्ञाने पादे व्युत्पाद्यतेऽधुना।

तत्राद्यैश्चतुर्भिरधिकरणैस्तत्त्वंपदार्थशोधः क्रियते। तत्राद्याधिकरणे[१] स्वप्नावस्थां प्रस्तुत्य 'न तत्र रथा न रथयोगा न पन्थानो भवंत्यथ रथान्न पथयोगान्पथः सृजत, (बृ० ४।३।११) इति श्रूयते। तत्र सन्देह। किं स्वाप्निकाः पदार्थास्रथादयस्सत्या उत मिथ्याभूता इति। तत्र यद्यपि सर्वस्य प्रपञ्चस्य मिथ्यात्वमारम्भणाधिकरण-एवोक्तं[२] तथापि तद्घटादिवद्व्यावहारिकत्वे[३] पर्यवस्यत्युत शुक्तिरजतादिवत्प्रातिभासिकत्व इति[४]। तत्र पूर्वः पक्षः

स्वाप्निकास्सत्यभूतास्तु सृजिधातु (श्रुते) सृजेर्बलात्।
ईश स्रष्टृ(कतुरुक्तेश्च)(...)कतोक्तेश्च न[५] तु मिथ्यात्वमिष्यते ॥

नहि मिथ्याभूतस्य शुक्तिरूप्यादेः सृजिकर्मता[६] कुत्रापि श्रूयते। स्वाप्निकानान्तु 'रथान्न रथयोगान्पथः सृजत' (छा० ४।३।११) इति सृजिकर्मता श्रूयते। अतस्तथैव स्वीकार्या। न च तत्र रथा इत्यभावस्य भवन्तीत्यनेन वर्तमानोक्तिपूर्वकं रथान्सृजत इति रथस्यापि तत्काले[७] सत्त्वोक्त्या [८]स्वसमानाधिकरणात्यन्ताभाव-प्रतियोगित्वरूपमिथ्यात्वस्य तथैव[९] श्रुत्या प्रतिपादनात्कथं सत्त्वं[१०] स्वाप्निकस्येति वाच्यम्। व्यवहारिकत्वेऽपि तस्याः श्रुतेरुपपत्तेः, प्रातिभासिकत्वे मानाभावात्। किञ्च 'य एष सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाण, (क० उ० ५।८) इति श्रुत्या कामशब्दितानां पुत्रादीनां स्वाप्निकानां निर्मातृत्वेनेश्वरस्य श्रुत्या प्रतिपादनादीश्वर-सृष्टानां वियदादीनां सत्यत्वदर्शनेन स्वाप्निकानामपि सत्यत्वमावश्यकमतो न स्वाप्निकानां मिथ्यात्वमिति। अत्राधिभीयते

१. ग० मा० 'वृहदारण्यकें' इति पाठः।
२. तदन्यत्वमारम्भणशब्दादिभ्यः (ब्र० सू० २।१।१४)। 'समस्तस्य प्रपञ्चस्य मायामात्रत्वम्' (शां भा० पृ० ९४७)।
३. ग० मा० 'स्वप्नपदार्थविषये' इति पाठः।
४. ग० मा० 'चिन्ता न गतार्था' इति पाठः।
५. ग० मा० 'न मायामात्रतेष्यते' इति पाठः।
६. घ० मा० 'सृष्टिकर्मता' इति पाठः।
७. घ० मा० 'तत्क्रोक्रासत्वोक्त्या' इति पाठः।
८. लक्षणमिदं व्यासतीर्थस्य 'न्यायामृते' अंशित्वहेतुविचारे (न्या० अ० पृ० ८७) दृश्यते। तत्रैवानुसन्धेयमास्ति कुतस्त्यं लक्षणमिति।
९. घ० मा० 'तर्यव' इति पाठः।
१०. घ० मा० 'सत्यत्वम्' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मायिकस्तु रथादि[1] स्याद्दार्वादेरुचितस्य वै ।
कारणादेरभावेन बाधनाश्चेति निश्चयः ।।
सृष्टिश्रुतिश्च नेतव्या[2] व्याप्यभूतेऽपि वस्तुनि ।
परेशकर्तृकत्वञ्च तत्र नैव विरुध्यते ।।

स्वाप्निकानां रथादीनां हि दार्वादीनि कारणानि । न च तानि स्वप्नदशायामुपलभ्यन्ते । न च प्रातीतिक एव रथस्तत्रोपलभ्यते । यत्र रथो दृश्यते, तत्र तद्भावस्य प्राणे निश्चितत्वात् । न च देशान्तरस्थरथादिस्तत्रोपलभ्यते निद्रारूपदोषवशादिति वाच्यम् । अन्यथाख्यातेः प्रागेव निरस्तत्वात् । न च परमेश्वरानुग्रहवशाद्रथादय उत्पद्यन्त इति वाच्यम् । एतादृशकल्पनायाः मिथ्यात्व एव पर्यवसानात् । अस्थितस्य[3] बाधोपपत्तेश्च । अतः प्रातिभासिकतैव युक्ता ।

किञ्च शरीरमध्ये स्वाप्किानां रथगजादीनामुपलब्ध्यनुपपत्तिः, महतां रथगजादीनां स्वल्पे स्वे शरीरेऽस्तीत्यनुपपत्तिः 'स्वे शरीरे यथा कामं परिवर्तनम्, (बृ० उ० २।१।१८) इति श्रुतिः स्वाप्निकानां स्वे शरीरे स्थितिः दर्शयति, मिथ्याभूतानामपीश्वरकर्तृकत्वसृजिकर्मत्वयोरविरोधः । विस्तरस्त्वाकरे द्रष्टव्यः । अतः[4] स्वाप्निकानां प्रातिभासिकत्वमिति । एवञ्च स्वाप्निकव्यवहारस्यात्मचैतन्यमात्रापन्नत्वादादित्यादीनाञ्ज्योतिषां[5] तदानीमभावादतस्त्वंपदार्थस्य स्वप्रकाशत्वं सिध्यतीति प्रयोजनं द्रष्टव्यम् ।

तद्भावाधिकरणम्

तदभावो नाडीषु तच्छ्रुतेरात्मनि च ।।२।।

स्वप्नावस्थापरीक्षिता सुषुप्त्यवस्थेदानीं परीक्ष्यते । तत्र जीवस्य स्वापः कस्याञ्चिच्छाखायान्नाडीषु श्रूयते 'आसु तदा नाडीषु सुप्तो भवतीति, कस्याञ्चित्पुरीतति 'ताभि प्रत्यवसृप्य पुरीतति शेते, (बृ० उ० २।१।१९) इति कस्याञ्चिद्ब्रह्मणि 'एषोऽन्तरहृदय आकाशस्तस्मिञ्छेत, (बृ० २।१।१७) इति तत्र संशयः[6] किन्नाभिपुरीततब्रह्मणां विकल्प उत समुच्चय इति किं प्राप्तं विकल्प इति । कुतः

सप्तम्याः[7] श्रूयमाणत्वान्नाभिब्रह्मपुरीतताम्[8] ।
प्रतिपादकशब्देभ्यस्तेन न स्यात्समुच्चयः ।।

---

१. ग० म० 'दार्वादिवर्जनात् ...प्रबोधबाधितत्वाच्च न सत्य इति निश्चयः' इति पाठः ।

२. ग० मा० 'प्रातिभासिक' इति पाठः ।

३. च० मा० 'उत्थितस्य' इति पाठः ।

४. अत्र सिद्धान्ते स्वप्नस्य मिथ्यात्वसिद्धौ तदानीन्तनैः शरीरेन्द्रियादिभिरसंस्पृष्टत्वञ्जीवस्य सिद्धयति तद्दृष्टान्तेन जाग्रत्यपि तस्य तदसंस्पृष्टत्वं सिध्यतीति त्वंपदार्थशोधनोपयोग्यविचारः । (अ० म० पृ० ६१०) ।

५. च० मा० 'आपत्तत्वादादित्यादीनाम्' इति पाठः ।

६. च० मा० 'नाडी पुरितत' इति पाठः ।

७. च० मा० 'सत्यम्याम्' इति पाठः ।

८. च० मा० 'पुरिततम्' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तथा हि' व्रीहियवयोर्विकल्पेन यागसाधनत्वमाश्रीयते। एवमिहापि नाडीपुरीततब्रह्मणां सप्तम्या स्वापाधिकरणत्वस्य[1] प्रतिपादनाद्विकल्पः। विभक्तिविधाने हि सामर्थ्यमपेक्षितं 'समर्थः पद विधि (अ० २।१।१) इति शास्त्रात्। सामर्थ्यंञ्च सापेक्षत्वे तेन[2] सम्भवति, सापेक्षमसमर्थमित्युक्तेस्ततश्च नैरपेक्ष्यावगमेन समुच्चये तस्याङ्ग[3]प्रसङ्गात्। पदविधित्वञ्च विभक्तिविधेः 'कर्मणि द्वितीया, (पा० अ० २।३।२) इत्यादिनियमार्थत्वादुपपद्यते। उक्तञ्च भगवता पतञ्जलिना 'विभक्तिविधानं पराङ्गवच्च, (म० भा० २।१।१) इति व्याख्याक्तञ्चैवमेव कैयटेन। तस्मात्समुच्चयानुपपत्तेः विकल्प एवेति प्राप्तेऽभिधीयते

समुच्चयं त्रयाणां स्यान्नाडीषु[4] ब्रह्मपुरीतताम्।
विभक्त्यैकत्वमात्रेण विकल्पश्चापि नेष्यते ॥
तथा[5] च बहुदोषस्स्यादाप्तादौ गत्यभावतः।
समाश्रितो विकल्पो हि नत्वत्र गतिसम्भवात् ॥

तथा हि प्रासादे शेते पर्यङ्के[6] शेत इत्यादिषु समुच्चयः प्रासादपर्यङ्कयोरङ्गीक्रियते, लोके यथा वा वेदे र्वर्हिषि हविष्यासादयति वेद्यां हविष्यासादयतीति समुच्चयो वेदिर्बर्हिषोरङ्गीक्रियते द्वारभेदात्तथा नाडीनाङ्गमनमार्गत्वात्पुरीततः प्राकारस्यानीयत्वाद्ब्रह्मपर्यङ्कस्यानीयत्वञ्च समुच्चयोऽङ्गीक्रियते।

न नु विकल्पस्तथात्वे बहबो दोषाः स्युः। तथा हि यदा नाड्याञ्जीवस्य शयनं तदा पुरीतच्छास्त्रे[7] प्रामाण्यपरित्यागोऽप्रामाण्यस्वीकारश्चेति दोषद्वयम्। एवं ब्रह्मशास्त्रेऽपीति चत्वारो दोषाः, यदा पुनः पुरीततिशयनं[8] तदा नाडीशास्त्रेऽपि दोषद्वयम्। पुरीतच्छास्त्रे[9] च स्वीकृताप्रामाण्यपरित्यागः परित्यक्तप्रामाण्यस्वीकारश्चेति दोषद्वयम्। एवं ब्रह्मणि स्वापेऽप्यंन्तिमं दोषद्वयम्। पुनश्चतुर्थे पर्याये नाड्यां स्वापतद्वयमिति द्वादशदोषाः स्युः। विकल्पप्रतिपादकशास्त्रेषु-एकैकस्मिश्चत्वारो दोषाः। व्रीहियवस्थले[10] त्वगत्याष्टदोषदुष्टोऽपि विकल्प [11]आश्रीयते। प्रकृते तु गतिरस्ति द्वारभेदादित्युक्तमतः समुच्य एव त्रयाणामिति युक्तम्। किञ्च जोवस्य स्वापो नामोपाधिलयः। तच्च न ब्रह्मणोऽन्यास्मिन्सम्भवति। ततोऽपि ब्रह्मण एव स्वापाधारत्वं वा पुरोततोऽस्तु प्राकारस्थानीयत्वमिति सिद्धम्।

---

१. घ० मा० 'सप्रम्याक्षास्व' इति पाठः।
२. घ० मा० 'तेन' इत्यधिकः पाठः।
३. घ० मा० 'तद्‌भंगप्रसङ्गात्' इति पाठः।
   घ० मा० 'एव तत्प्राप्तप्रसङ्गात्' इति पाठः।
४. च० मा० 'नाडीब्रह्मपुरीतनाम्' इति पाठः।
५. ग० मा० 'विकल्पेबहुदोषः स्यात्' इति पाठः।
६. घ० भा० 'प्रासादेशेतेयुर्य केशवे इति पाठः।
७. घ० मा० 'पुरितत्' इति पाठः।
८. घ० मा० 'पुरितति' इति पाठः।
९. घ० मा० 'पुरितत्' इति पाठः।
१०. घ० मा० 'हियवस्थले' इति पाठः।
११. घ० मा० 'आश्रियते' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कर्मानुस्मृतिशब्दविध्यधिकरणम्

स एव तु कर्मानुस्मृतिशब्दविधिभ्यः ॥३॥

पूर्वाधिकरणे ब्रह्मण्येव स्वापाधिकरणत्वं[1] व्युत्पादितम्, तदेव नोपपद्यत इत्याक्षिप्यते। तत्र 'य एव सुप्तो जीवः[2]' स एव पुनरुत्तिष्ठते उतान्यो वेति संशये पूर्वपक्षस्येवेति नास्ति नियमः। कुतः

ब्रह्मभूतो हि मुक्तस्यान्नोत्थानं तस्य युज्यते।
मुक्तानां पुनरुत्थाने मोक्षस्यानित्यता भवेत् ॥

नहि स्वापे ब्रह्मणा सहैकीभावाभ्युपगमे पुनरुत्थानं सम्भवति, स्वापकाले मोक्ष इव सर्वद्वैतनाशाभ्युपगमात्। अन्यथा मुक्तानां पुनरुत्थानं स्यात्तथा सति मोक्षस्यानियत्वं प्रसज्येत, तस्मादन्यस्यैवोत्थानं वाच्यम्। न च स एवोत्तिष्ठतीति लोकप्रवादविरोधः शंक्यस्तदनुसारेण ब्रह्मण्येव स्वाप इत्यस्यानुपपत्तेः। ततश्च ब्रह्मणि स्वापेऽन्य उत्तिष्ठति नास्यादौ तु स एव उत्तिष्ठति व्यवस्थेति।

सिद्धान्तस्तु

स्वापेन[3] ज्ञाननाशोऽस्ति तत्सद्भावस्य बोधनात्।
नहि[4] खल्विति-अस्मीति वाक्येन तद्धेतुविरहादपि ॥
'मुक्ता' त्वज्ञाननाशस्स्याच्छ्रुत्यादिभिरुदीरणात्।
तद्धेतुज्ञानसद्भावान्नापरावर्तनं ततः ॥

मुक्तिदशायामज्ञानस्य नाशो 'योऽस्माकमविद्यायाः परं पारं तारयति, (प्र० उ० ६।८) इति श्रुत्या "तरत्यविद्यां विततां हृदि यस्मिन्निविशत' इत्यादिस्मृत्या च प्रतिपादित इति मुक्तिसाधनीभूतज्ञानस्य सद्भावाच्च, न मुक्तस्य पुनरुत्थानम्। स्वापे तु नाज्ञाननाशहेतुर्ज्ञानमस्ति। अतो नाज्ञानस्यापि 'नाहं खल्वयमेव सम्प्रत्यात्मानञ्जानात्ययमहमस्मीति' (छा० ८।११।१) इति श्रुत्या अज्ञानसद्भावस्य प्रतिपादितत्वात्। अतस्सुप्तस्यैव पुनरुत्थानम्। एवञ्च सति कर्मानुस्मृतिशब्दविधयोऽप्युपन्नतरा भवन्तीति सिद्धो ब्रह्मण्येव स्वापः। एवञ्च सङ्गत्वञ्जीवस्य सिद्धम्।

मुग्धाधिकरणम्

मुग्धे[5]ऽर्द्धसम्पत्तिः परिशेषात् ॥४॥

इदानीन्मूर्च्छावस्था[6] परीक्ष्यते। सा किं स्वापादतिरिच्यते नेति सन्देह। स्वापादभेदकामनाभावेन तत्रैवान्तर्भाव इति प्राप्ते विकृतमुखत्वाविकृतमुखत्वादिवैलक्षण्येन भेदकेन स्वापाद्भेद एव मूर्च्छाया इति सिद्धान्तः।

---

१. ग० मा० 'ब्रह्ममयेव' इति पाठ।
२. ग० मा० 'य एव सुप्तोजीव' इति पाठः।
घ० मा० 'सुप्तोजीवः' इति पाठो नास्ति।
३. ग० मा० 'स्वापे नाज्ञाननाशो स्ति' इति पाठः।
४. घ० मा० 'खस्त्विति' इति पाठः।
५. घ० मा० 'मुक्तेऽर्थं इति पाठः।
६. घ० मा० 'परिक्ष्यते' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उभयलिङ्गाधिकरणम्

न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि ॥५॥

ब्रह्मणः 'सत्यकामस्सत्यसङ्कल्प' इत्यादिश्रुतयस्सविशेषत्वं[1] प्रतिपादयन्ति । 'अस्थूल, इत्यादिश्रुतयो निर्विशेषत्वं तदुभयमपि स्वाभाविकमुतैकं स्वाभाविकमपरं त्वौपाधिकम् । यदाप्येकं स्वाभाविकं तदा सविशेषत्वं निर्विशेषत्वं वेति तत्र

श्रुतिद्वयानुग्रहाय ह्युभयं तु स्वभावतः ।
नैतदेवं विरुद्धत्वादेकं स्वाभाविकं भवेत् ॥
अन्यत्वौपाधिकं तच्च सत्यमित्यवधार्यताम् ।
चूर्णयोगहरिद्रायां रक्तिम्नस्सत्यता यथा ॥

उभयोः स्वाभाविकत्वेऽङ्गीक्रियमाणे विरोधः स्यात् । न चैकस्यैव वस्तुनस्सविशेषत्वन्निर्विशेषत्वञ्च सम्भवति, विरोधात् । अत एवमौपाधिकमङ्गीकार्यम् । तत्रापि न[2] निर्विशेषत्वमौपाधिकं सविशेषत्वं स्वाभाविकमिति युक्तम् । तदुपाधेरनिरूपणात् । अतस्सविशेषत्वमेवौपाधिकं, तच्च मिथ्याभूतमेव, सविशेषश्रुतिरन्यथा नेयत्वात् । न चैवं वस्तु सविशेषत्वस्य मिथ्यात्वमित्येवन्न सम्भवति । औपाधिकस्यापि[3] चूर्णसंयुक्तवर्णस्य रक्तहरिद्रायां रक्तिम्न इव सत्यत्वोपपत्तेः । अस्थूलादिवाक्यन्तु स्वाभाविकस्थौल्यनिराकरणपरमिति चेन्न ! तथा सत्यव्याहारप्रङ्गेन[4] स्फटिकारुणिमादिवदौपाधिकस्य द्विविधत्वेऽपि मिथ्यात्वस्यैव स्त्रोकार्यत्वात् । न च सविशेषवाक्यस्य सार्थक्याया-ध्याहारमेवाङ्गी[5]कृत्यौपाधिकस्य सत्यत्वमेवाङ्गीकार्यमिति वाच्यम् । तासां श्रुतीनामन्यपरत्वेन कर्तुमशक्यत्वाच्छेषवाक्यानामुपासनाशेषत्वम्[6] । न च विनिगमनाविरहतात्पर्येऽपि[7] तत्त्वेन निर्विशेषवाक्यानां[8] बहुशः प्रतिपादितत्वात् । शेषवाक्यानामुपासनाशेषत्वस्य[9] स्पष्टं प्रतीतेः । अतः प्रपञ्चमिथ्यात्वमेवाङ्गीकृत्य सविशेषत्वमौपाधिकन्निर्विशेषत्वं[10] स्वाभाविकमङ्गीकार्यमिति ।[11]

---

१. घ० मा० 'इत्यादि' इति पाठो नास्ति ।
२. ग० मा० 'न' इति पाठो नास्ति ।
३. घ० मा० 'चूर्णसंयुक्त' इति पाठो नास्ति ।
४. घ० मा० 'एवटिकारुणिमा' इति पाठः ।
५. घ० मा० 'अध्याहारमेवाकृत्य' इति पाठः ।
६. घ० मा० 'त्वात्रशोष' इति पाठः ।
७. घ० मा० 'तात्पये एपि' इति पाठः ।
८. च० मा० 'च मातृकया सह पाठ व्यतिक्रमो वर्तते ।
९. घ० मा० 'शेषत्वच्य' इति पाठः ।
१०. घ० मा० 'भाविकमंगीकायंम्' इति पाठः ।
११. ग० मा० 'अस्याधिकरणस्यावशिष्ट सूत्राणामियं प्रक्षिः' इति लिखितमस्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रकृतैनावत्त्वाधिकरणम्

प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः ॥६॥

'बृहदारण्यके द्वे वाव ब्रह्मणो रूपे मूर्तञ्चामूर्तञ्च' (बृ० २।३।१) इति भूतपञ्चकस्य द्वैराश्येन विभागपूर्वकं प्रपञ्च[1] व्युत्पादनं कृत्वा पुनराम्नायते 'अथात आदेशो नेति नेति नह्येतस्मादिति[2] नेत्यन्यपरमस्त्यथ नामधेयं (यत् ?) सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्यमिति, (बृ० २।३।६) अत्र संशयः। किमियं ब्रह्मणो रूपस्य प्रतिषेधः उत ब्रह्मण एवोत रूपस्यैवेति।

रूपयोः रूपिणश्चैव प्रतिषेधोऽत्र युज्यते[3]।
प्रत्यासत्त्यविशेषेण रूपिणो वा निषेधनम् ॥
न प्रपञ्चनिषेद्धव्यस्सर्वप्रत्ययबाधनात्।
ब्रह्मणो बाध्यतायां[4] (हि) स्वल्पप्रत्ययबाधनम् ॥

'नेति नेति' (बृ० २।३।६) अत्रेतिशब्दो रूपवतो ब्रह्मणो रूपयोर्मूर्तामूर्तयोः परामर्शकस्सन्निधानादिशेषादतस्त्रयाणां निषेधः। न च निषेध्यत्वे ब्रह्मव्युत्पादनं व्यर्थं, प्रपञ्चव्युत्पादनवत्तस्यापि निषेधार्थत्वेनोपपत्तेः। यदि च निरधिष्ठाननिषेधानुपपत्तिस्ततः प्रपञ्चस्यैव परिशेषोऽस्तु ब्रह्मैव निषिध्यतां द्विरुक्तिरादरार्था भविष्यति। न तु प्रपञ्चनिषेधस्तथा सति प्रपञ्चविषयाणां प्रत्ययानामप्रामाण्यप्रसङ्गाद्ब्रह्मबाधने तु स्वल्पानामिति पूर्वं पक्षः।

सिद्धान्तस्तु—

वेदान्तेषु हि सर्वं (त्र) ब्रह्मणः प्रतिपादनम्[5]।
प्रपञ्चस्य निषेधेन क्रियते प्रकृतेऽपि च ॥
ब्रह्मणः प्रक्रमाच्चैव न ब्रह्म प्रतिषेधनम्।
अतो रूपनिषेधोऽत्र स्वीकर्तव्य इति स्थितिः ॥

सर्वेषु हि वेदान्तेषु ब्रह्मव्युत्पादनं प्रपञ्चनिषेधेन क्रियते। अतस्तदैकरूप्याय प्रकृतेऽपि रूपनिषेध्य एव स्वीकार्यः न ब्रह्म निषेधः। किञ्च 'ब्रह्म ते ब्रवाणीति' (कौ० ब्रा० उ० ४।१) उपक्रमानुसारेण ब्रह्मणः प्रतिपादयितत्वेन तन्निषेधानुपपत्त्या प्रपञ्च एव निषेध्यः। तत्र चैके नेतिशब्देन स्थूलस्यापरेण सूक्ष्मस्य च निषेधः। अथ मूर्तामूर्तनिरूपणानन्तरम्[6] 'आदेश उपदेश नेति नेति' (बृ० २।३।६) आदेशार्थं स्वयमेवाह श्रुतिः नह्येतस्मादिति एतस्मान्नेति नेतीत्यादिष्टादन्यात्परं यतो नास्तीति श्रुत्यर्थः। न चैवं योजनायामन्यपरशब्दयोरन्यतरवैयर्थ्यापत्त्या परशब्दस्योत्कृष्टपरत्वं स्वीकृत्य ब्रह्मणोऽन्यदुत्कृष्टं नास्तीति योजनया ब्रह्मणस्सर्वोत्कृष्टत्वं प्रतिपादितमिति वाच्यम्। तथा सति ब्रह्मपदाध्याहारादिदोषप्रसङ्गात्। अतोऽन्यदन्यत्वेन भासमानं परं जगदिति पौनरुक्त्या परिहारायाश्रयणीय इति न कोऽपि दोषः। न च यदि निष्प्रपञ्चं ब्रह्म तर्हि कुतस्सर्वैर्नोपलभ्यत इति वाच्यम्। [7]भक्तिश्रवणादिपूर्वकं वेदान्तजनितवृत्त्याऽज्ञाने निवृत्तेः तदभिव्यक्तेरुपगमादिति।

१. घ० मा० 'व्युत्पादनं कृत्वा' इति पाठः।
२. ग० मा० 'नेत्यन्यत्परमस्ति अथ नामध्येयं सत्सइ' इति पाठः।
३. ग० मा० 'भवेदयं' इति पाठः।
४. ग० मा० 'स्यादल्प' इति पाठः।
५. ग० मा० 'प्रतिबाधनम्' इति पाठः।
६. ग० मा० 'ब्रह्मणः' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पराधिकरणम्

परमतः सेतून्मानसम्बन्धभेदव्यपदेशेभ्यः[1] ॥७॥

ब्रह्मणोऽन्यदपि तत्त्वान्तरमस्ति नेति चिन्त्यते। यद्यपि पूर्वोक्तैरधिकरणैर्ब्रह्मातिरिक्तं वस्तु नास्तीत्येतत्सिद्धम्। तथापि कानिचिच्छ्रुतिवाक्यानि दृष्ट्वा मन्दानां भ्रान्तिर्जायते तन्निराकरणार्थमिदमधिकरणम् 'एष सेतुरिति' (बृ० ४।४।२१) ब्रह्मणि सेतुत्वश्रुतेः 'तदेतद्ब्रह्म चतुष्पादष्टाशापं षोडशकलं' इत्युन्मानव्यपदेशात्' 'सता सौम्य तदा सम्पन्नो भवति' (छा० ६।८।१) इति सम्बन्धव्यपदेशात्। 'अथ य एषोऽन्तरादित्ये हिरण्मय पुरुषः, (छा० १।६।६) इति च भेदव्यपदेशाच्च भेदं मन्यमानस्योत्तरं सेतुत्वं विधारकत्वं विधारकत्वादुपपन्नमुन्मानश्चोपासनार्थमुक्तं, सम्बन्धभेदव्यपदेशौ स्त्वौपाधिकभेदमादायोपपन्नाविति न वस्त्वन्तरसिद्धिरिति।

फलाधिकरणम्

फलमत उपपत्तेः ॥८॥

किं यागादिभ्यः फलञ्जायमानमीश्वरप्रसादमपेक्ष्यते नेति सन्देहे पूर्वः पक्षः।

यागादिकर्मणस्तावत्फलहेतुत्वमिष्यते।
नेश्वरत्वे[2]ऽपि तेषान्तु धर्मादिर्द्वारमिष्यताम्॥

'यजेत स्वर्गकामः' (ता० म० ब्रा० १६।३।४) इत्यादिशब्दभावना प्रतीयमानास्वभाव्यप्रवृत्तैरिष्टसाधनत्वमन्तरा-[3] अनुपपद्यमाना इष्टसाधनत्वं तस्यातः कल्पयति। तच्चेष्टं कामनाविषयत्वेनोपात्तस्वर्गाद्येव कल्प्यते। तस्या च धात्वर्थो न यागादेः करणत्वेनान्वेति। तस्य चाशुतरविनाशिः कालान्तरभाविफलजनकत्वानुपपत्त्याऽपूर्वद्वारत्वेन कल्पनेश्वरप्रसादकल्पनागौरवाादति।

सिद्धान्तस्तु

ईश्वरस्य प्रक्लृप्तत्वात्प्रसादस्यापि शास्त्रतः।
न प्रकल्पमानतोऽपूर्वमीश्वरोऽतः फलप्रदम्॥

यागस्य हि द्वाराकांक्षायां नापूर्वद्वारत्वेन कल्प्यते, श्रुतिषु सर्वत्रेश्वरस्य फलप्रदत्वेन क्लृप्तत्वात्तत्प्रसादस्य[4] च द्वारत्वसम्भवात्। क्लृप्तेनैवोपपत्तावपूर्वककल्पनायां मानाभावादतः परमेश्वरादेव [5]यागारादितफलमिति सिद्धम्।

इति श्रीमत्परमहंसपरिव्राजकाचार्यसर्वतन्त्रस्वतन्त्र श्रीमदद्वैतानन्द-सरस्वतीचरणारविन्दभृङ्गायमानस्य स्वयम्प्रकाशानन्दस्य कृतिषु वेदान्तनयभूषणे तृतीयाध्यायस्य द्वितीय पादः

---

१. घ० मा० 'केतून्मान' इति पाठः।
२. ग० मा० 'तेषामाशु विनाशोऽपि धर्माख्यं द्वारभिष्यताम्' इति पाठः।
३. घ० मा० 'दृष्टं' इति पाठः।
४. ग० मा० 'प्रसिद्धत्वात्' इति पाठः।
५. ग० मा० 'कर्माराधितात्' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तृतीयाध्याये तृतीयः पादः

सर्ववेदान्तप्रत्ययाधिकरणम्

सर्ववेदान्तप्रत्ययञ्चोदनाद्यविशेषात् ॥१॥

पूर्वस्मिन्पादे तत्त्वपदार्थौ निरूपितौ। इह तु वाक्यार्थोपयुक्ततया गुणोपसंहारो निरूप्यते। तदर्थतया विद्याभेदाभेदोऽपि[1] निरूप्यते[2]। तत्र शाखाभेदेन किं विद्यानां भेद उताभेद इति सन्देहे पूर्वःपक्षः।

तैत्तिरीयकनामादेर्भेदकस्येह[3] सम्भवात् ॥
विद्यानां भेद एष्टव्यो गुणास्तेन व्यवस्थिताः ॥

तैत्तिरीयकं[4] वाजसनेयकमित्यादिनामभेदाद्विद्यानां भेदस्तावदङ्गीकार्यः। यद्यपि तैत्तिरीयकशब्दस्तित्तिरिणा प्रोक्तमित्यर्थे 'तित्तिरिवतंरतुखण्डिकोस्वाच्छाण्' इति (पा० अ० सि० कौ० ४।३।१०२) इति छण्प्रत्यये तदनन्तरमध्येतु वेदितृप्रत्यये 'प्रोक्ताल्लुगिति' (पा० अ० ४।२।६४) तस्य लुकि तैत्तिरीयाणां समाम्नाय इत्यर्थे 'गोत्रचरणाद्वुञ् (पा० अ० ४।३।१२६) इति वुञि निष्पन्नः समाम्नायपरो न तु विद्यापरः।

'चरणाद्धर्माम्नाययोः' (सि० कौ० ३२१) इति वार्तिकानुसारेण धर्मेऽपि तस्य शब्दस्य व्युत्पादितत्वेन[5] विद्याबोधकत्वस्यापि सम्भवात्। एवं वाजसनेयकादिशब्दानामपि, तथा च 'अथैष ज्योतिः' इत्यादौ[6] यथा सञ्ज्ञाभेदात्कर्म भेदः, एवमिहापि, किञ्च रूपभेदादपि भेदः। यथा[7] कर्मकाण्डे द्रव्यदेवादिरूपभेदाभेदः[8]। तप्ते[9] पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनम्' इत्यत्र, एवमिहापि विषयरूपभेदाद्भेदः[10]। यथा पञ्चाग्निविद्यायां कस्याञ्चिच्छाखायां पञ्चाग्नयो[11] परत्र तु षडग्नय (पञ्चाग्निपरं) इति। एवं 'यो ह वै श्रेष्ठञ्च वेदः' (छा० ५।१।१) इति शाखाभेदेनाविशेषे पुनः श्रवणरूपाभ्यासादपि 'समिधो यजति' (तै० सं० २।६।१) इत्यादौ कर्मभेदस्तथा विद्याविभेद[12] इति। तथा धर्मभेदादपि भेदः स्वीकार्यंस्तेषामेवैतां ब्रह्मविद्यां वदेच्छिरोव्रतं विधिवद्यैस्तु चीर्णम्' (मु० उ० ३।२।१०) इति श्रुत्या शिरस्यङ्गारपात्रधारणरूपशिर[13]व्रतयुक्तैरेवेयं विद्या सम्पादनीयेत्युक्त्या तद्रहितानामियं विद्या न भवतीति प्रतीतेः। न च तदध्ययनाङ्गमवेति वाच्यम्, 'तेषामवैतां ब्रह्मविद्या' (मु० उ० ३।२।१०) इति विद्याङ्गत्वस्यापि प्रतीयमानत्वात्। अतो धर्मभेदाद्विद्याभेद इति।

१. च० मा० 'नामभेदाद्विधानां भेदः सिद्धार्थः कुत' इति पाठः।
२. घ० मा० 'नीरुप्यत' इत्याधिकः पाठः।
३, ग० मा० 'शाखाभेदेन विद्यानां भेद सिद्धार्थः कुत' इति पाठः।
४. घ० मा० 'तैतिरीयकं वाजसनेयकम्' इत्याधिकः पाठः।
५. घ० मा० 'व्युत्सादित' इतिः पाठः।
६. घ० मा० 'इत्यादौ' इति पाठः।
७. ग० मा० 'यथा कर्मकाण्डे ....' इत्यन्त पाठो नास्ति।
८. घ० मा० 'भेदाभेदः' इति पाठः।
९. घ० मा० 'तै य सिद्धध्यानमति' इति पाठः।
१०. ग० मा० 'लक्षणम्' इति पाठः।
११. ग० मा० 'आम्नाता' इति पाठः।
१२. घ० मा० 'तयाविद्याभेद' इति पाठः।
१३. ग० मा० 'युक्तरेवेयम्' इत्यन्तः पाठो नास्ति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सिद्धान्तस्तु

विधायकस्य शब्दस्य फलस्याप्यविशेषतः ।
विषयैक्याच्च विद्यैक्यं शाखाभेद इहेष्यते[1] ॥
नामादिकन्तु नैवेह विद्यायां भेदकं भवेत् ।
शाखानामत्वमेतेषां पूर्वतन्त्रे यतः[2] स्थितम् ॥

यथैव हि-एकस्यां शाखायां 'यो ह वै ज्येष्ठं श्रेष्ठञ्च वेद' (छा० ५।१।१) इति श्रुतं तथैवापरस्यां शाखायां श्रुतम् । अतश्चोदनैकरूप्याद्विद्यैक्यम् 'ज्येष्ठश्च ह वै श्रेष्ठश्च भवति य[3] एवं वेद' (बृ० ६।१।२) इति फलैकरूप्यादपि विद्यैक्यमेव, तथा विषयस्याप्यैक्याद्विद्यैक्यं[4], प्राणश्रेष्ठत्वादीनां विषयत्वात् । ननु विषयैक्यं क्वचिन्न विद्यते, छन्दोगशाखायां प्राणविद्यायां प्राण चक्षुः[5] श्रोत्रमनसामुपास्यत्वश्रवणात्[6] । वाजसनेयशाखायान्तु 'रेतो वै प्रजापति' इत्यादिनाऽधिकस्याप्याम्नानादतो न विद्यैक्यम् । एवञ्चाग्निविद्यायामपि द्युलोकादयः पञ्चाग्नयः श्रूयन्ते । वाजसनेयके[7] तु षष्ठोऽग्निरुपसंहार्य इति वाच्यम् । 'य एतानेवं पञ्चाग्नोवेद' (छा० ५।१०।१०) इति पञ्चत्व-संख्याविरोधादिति चेन्न बहुसाम्येन प्रत्यभिज्ञया विद्यैक्ये सिद्धे छन्दोगशाखायामश्रुतस्य षष्ठाग्न्यादेरुपसंहार-सम्भवात् । न च 'पञ्चत्वसंख्याविरोधः[8], विकल्पभोत्योपसंहारस्यावश्यकत्वे पञ्चत्वसंख्यायाः संपादकान्याभिप्रायेण नेतव्यत्वात् । अतो विद्यैक्यम् शाखाभेदोऽपि तैत्तिरीयकादीनान्तु शाखाया एव, न तु विद्याया, विद्यायान्तु प्रयोगो गौण्या उपभेदस्स तु परिहृत एव ।

अभ्यासस्तु तत्तच्छाखाध्यायिनं प्रत्येवेति न काचिदनुपपत्तिः । धर्मभेदोप्यध्ययनाङ्गमेव 'नैतच्चीर्णव्रतोऽधीते' (मु० उ० ३।२।११) इति श्रुतेः, 'तेषामेवैतां ब्रह्मविद्यां वदेत्' (मु० उ० ३।२।१०) इत्यत्रैतच्छब्द एतच्छाखाजन्य-विद्यापरः[1] । अत एव वेदव्रतबोधके समाचाराख्ये ग्रन्थे-इदमपि पठ्यते । तस्माच्छाखाभेदेऽपि न विद्याभेद[2] इति ।

१. ग० मा० 'प्युपेयते' इति पाठः ।
२. घ० मा० 'यतः' इत्याधिकः पाठः ।
३. घ० मा० 'यः' इत्याधिकः पाठः ।
४. च० मा० 'प्यैरुप्यम्' इति पाठः ।
५. घ० मा० 'चाक्षुः' इति पाठः ।
६. च० मा० 'श्रुतमिति' इति पाठः ।
७. घ० मा० 'वाजसनेय शाखायान्तु' इत्याधिकः पाठः ।
८. घ० मा० 'पंचसंख्या' इत्याधिकः पाठः ।
९. ग० मा० 'प्रत्यभिज्ञाबलेन विद्यकै सिद्धे' इति पाठः ।
१०. ग० मा० 'सन् शाखाधर्मतामेवास्य गमयति' इति पाठः ।
११. यद्यपि षष्ठस्याग्नेरुपसंहारो न सम्भवति तथापि द्युप्रभृतीनां पञ्चानामग्नीनामुभयत्र प्रत्यभिज्ञायमानत्वान्न विद्याभेदो भवितुमर्हति' (शां० भा० ३।३।१) पञ्चैव सम्पादिका अग्नयो वाजसनेयिनामपि छन्दोगानामिव विधीयन्ते । षष्ठाग्निः सम्पद्व्यतिरेकायानूद्यते न तु विधीयते । वैश्वदेव्यां तूत्पत्तौ गुणो विधीयत इति भवतु भेदः । अथवा छान्दोगानामपि षष्ठोऽग्नि पठ्यत एव । अथवा भवतु वाजसनेयिनां षष्ठाग्निविधानं मा च भूच्छन्दोगानां तथापि पञ्चत्वसंख्याया अविद्यानान्नोत्पत्ति-शिष्टत्वं संख्यायाः, किन्तूत्पन्नेष्वग्निषु प्रचयशिष्टा संख्यानूद्यते साम्पादिकानग्नीनवच्छेत्तुं, तेन येषामुत्पत्तिस्तेषां प्रत्यभि-ज्ञानात् । अप्रत्यभिज्ञायमानायाश्च संख्याया अनुवाद्यत्वेनानुत्पत्तेर्विधीयमानस्य चाधिकस्य षोडशिग्रहणवद्विकल्पसम्भवान्न शाखान्तरे ज्ञानभेदः (भामती ३।३।१) अग्नयस्तु पञ्चशाखाद्वयेऽप्यविशेषेणोपास्यतया विधीयन्ते, अधिकस्तु षष्ठोऽग्नि-विकल्प्य इति' (वे० क० त० पृ० ३९८) यद्यपि षष्ठोऽग्निश्छान्दोग्येऽप्युपसंहार्य इति वक्तुमुचितं, विरोधाभवेऽपि भाष्येऽपि तथैवोक्तं विरोधमभ्युपगम्य षोडशिग्रहणन्यायेन विकल्पो भविष्यतीति भाष्ये यः पक्ष उक्त स इह दर्शितः । (वे० क० त० य० पृ० ५३९) बहुतरांशभेदप्रत्यभिज्ञानादल्पतरांशभेदेऽपि प्रत्यभिज्ञाविरोधान्न विद्याभेदः' (आ० गि० ३।३।१) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उपसंहाराधिकरणम्

उपसंहारोऽर्थाभेदाद्विधिशेषवत्समाने च ॥२॥

अविद्यैक्ये गुणानामुपसंहारोऽस्ति नेति संशये पूर्वः पक्षः

एकत्रोक्ता गुणा नैव प्रक्षेप्या अपरत्र हि।
एकत्र कीर्तितास्तावदपरत्र यतः श्रुताः ॥

विद्यैक्येऽपि गुणानान्नोपसंहारः केषाञ्चिद्गुणानामुभयत्रापि कीर्तनादुपसंहारादिना (रे पि) तेषां पुनः कोर्तनं (वि ?) फलमेव स्यादिति।

सिद्धान्तस्तु

विद्यैक्यादुपसंहारो गुणानामुपपद्यते।
पुनः पाठस्तु केषाञ्चिदैक्यज्ञानस्य सिद्धये ॥

विद्यैक्ये तावदुपसंहारो गुणानां स्वीकार्यः। अन्यथैकस्या एव विद्यायाः कैश्चिद्गुणैरुपकृतत्वानुपकृतत्वयोरनुपपत्तेः। षोडशिग्रहस्थले त्वगत्या तथा कल्पनम्। प्रकृते च तथा कल्पने प्रमाणाभावः। केषाञ्चिद्गुणानां पुनः कीर्तनं त्वेकत्वज्ञानार्थमिति न काचिदनुपपत्तिः। अतो विद्यैक्ये गुणोपसंहार इति।

अन्यथात्वाधिकरणम

अन्यत्वं शब्दादिति चेन्नाविशेषात् ॥३॥

छान्दोगास्समामनन्ति 'देवासुरा ह वै यत्र संयेतिर उभये प्राजापत्यास्तद्ध देवा[१] उद्गीथमाजहुरनेनैनानभिभविष्याम [छा० १।२।१] इत्युपक्रम्य' अथ ह य[२] एवायं मुख्यः प्राणस्तमुद्गीथमुपासाञ्चक्रिरे तं हासुरा ऋत्वा[३] विदध्वंसुर्यथाऽश्मानमाखणमृत्वा विध्वंसेत, (छा० १।२।७) इत्यादि। तथा वाजसनेयिनः समामनन्ति 'द्वयाह प्राजापत्या देवाश्चासुराश्चेतनः कनीयसा एव देवा ज्यायसा असुरास्त एषु लोकेषु स्पर्द्धन्त ते ह देवा उचुर्हन्ता सुरान् यज्ञ उद्गीथनात्ययामेति ते ह वाचमुचुस्त्वं न उद्गायतीइत्युपक्रम्य (बृ० उ० १।३।१, २) 'अथ हेममासन्यं प्राणमुचुस्त्वं न उद्गायति तथेति तेभ्य एष प्राण उद्गायन्ते विदुरनेन वै नउद्गात्रात्येष्यन्तीति तमभिद्रुत्य[४] पाप्मना विव्यत्सन्त यथाऽश्मानमृत्वा लोष्ठो[५] विध्वंसेत्तैवं हैव विध्वंसमाना विष्वञ्चो[६] विनेशुस्ततो देवा अभवन् परासुराभवत्यात्मना परास्य द्विषन् भ्रातृव्यो भवति य एवं वेद, (बृ० १।३।७) इति तत्र संशयः किं छन्दोगवाजसनेयकयोरेका विद्या प्रतिपाद्यत उत नेति। तत्र पूर्वपक्षः

१. ष० मा० 'तद्देवा' इति पाठः।
२. ष० मा० 'यः' इति पाठो नास्ति।
३. ष० मा० 'कृत्वाविदघसुर्यथा माणमारवण' इति पाठः।
४. ष० मा० 'तिहुत्या' इति पाठः।
५. ष० मा० 'त्वाविधंस' इति पाठः।
६. ष० मा० 'विष्यञ्चो' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रक्रमस्यैकरूपत्वाद्विद्यैक्यमुभयोरपि ।
निदर्शनस्य त्वात्मादेर्द्वयोस्साम्येन दर्शनात् ॥
उपास्तिर्विषयस्यापि प्राणस्यात्र च साम्यतः ।
उद्गीथकीर्तनञ्चैव ह्ययुभयत्रापि दृश्यते ॥
अतो विद्यैक्यमेवात्र स्वीकार्यमुभयोरपि ।
गुणानामुपसंहारस्तस्माच्छाखाद्वयोरपि ॥

छन्दोगशाखायां वाजसनेयशाखायाञ्चैकैव विद्या स्वीकार्या, प्राजापत्यानामिन्द्रियाणां देवासुररूपत्व-कल्पनया संग्रामव्युत्पादनपूर्वकं देवानां पराजये प्रसक्ते उद्गीथोपासनाव्यपाश्रयेण प्रवृत्तिरूपोपक्रमस्य तुल्यत्वात्। यथा 'अश्मानमारवण[1] मृत्व' (छा० १।२।७) इत्यादिदर्शनस्य चोभयत्र तौल्यात्। न चोपास्यभेदाद्विद्याभेद आवश्यकः। छन्दोगशाखायां हि 'अथ ह य एवायं मुख्यः प्राणस्तमुद्गीथमुपासाञ्चक्रिरे' (छा० १।२।७) इत्युद्गीथस्योपास्यता प्रतीयमानत्वन्नोद्गायेति वाजसनेयक[2] उद्गातुरुपास्यता, अतो विद्याभेदोऽवश्यक इति वाच्यम्। उभयत्रापि प्राणस्यैवोपास्यत्वात्। वाजसनेयशाखायामपि 'हन्तासुरान्यज्ञ उद्गीथेनात्ययामेति' (बृ० १।३।१) उपक्रमे-उद्गीथशब्दस्य कीर्तनात् 'एष ह वा उद्गीथ' (बृ० १।३।२३) इति मध्येऽपि कीर्तनादतो वेद्यैक्याद्विद्यैक्यम्। तथा च गुणानामुपसंहार इति।

सिद्धान्तस्तु

अर्थवादांशसाम्येऽपि वेद्यभेदेन भिन्नता ।
शाखाद्वयेऽपि विद्याया प्राणो ह्यत्रोपसर्जनः ॥
काण्वशाखागते वाक्य उपास्तिं प्रति कर्मता ।
उद्गायत्वन्नेत्येवमुद्गातुः कीर्तनाद्भवेत् ॥
छन्दोगानां समाम्नाय उद्गीथोपास्तिरिष्यते ।
उद्गीथोपासनस्यैव श्रवणं तत्र दृश्यते ॥

न हि वाक्यच्छायैकतामात्रेण विद्येक्यमिष्यते, किन्तूपास्यैव[3] स्यात्, प्रकृते चैकत्रोद्गीथस्योपास्यता 'उद्गीथमुपासाञ्चक्रिरे' ,(छा० १।२।७) इति श्रवणादन्यत्र तूद्गातुरुपास्यत्वं 'न उद्गाये' (बृ० १।३।१) इत्युद्गातुः कीर्तनान्न चोभयत्रापि प्राणस्यैवोपास्यत्वं शङ्कनीयम्।

प्राणदृष्ट्या गायत्र्युद्गीथयोरुपास्यत्वावगमात्[4] प्राणस्योपसर्जनत्वञ्च 'आदित्यादिमतयश्चाङ्ग उपपत्तेश्च, इत्यत्र वक्ष्यते। (ब्र० सू० ४।१।६) न च 'हन्ता सुरान्यज्ञ उद्गीथेनात्ययामेति (बृ० १।३।१) इत्युपक्रम उद्गी-थस्य कीर्तनात् 'एष उ वा उद्गीथ' (बृ० १।३।२३) इति मध्येऽपि तस्यैव कीर्तनादुद्गीथस्यैवोपास्यत्वं प्रतीयत

१. घ० मा० 'श्माण' इति पाठः।
२. घ० मा० 'उद्गा' इति पाठो नास्ति।
३. च० मा० 'उपास्यैक्य स्यादिति' इति पाठः।
४. ग० मा० 'तथा च' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति वाच्यम्। एवमप्यग्रिमाधिकरणन्यायेनोङ्कारस्योद्गीथावयवस्योपास्यत्वं[1] छन्दोगशाखायां स्वीक्रियते। वाजसनेयिशाखायान्तु कृत्स्नाया उद्गीथमेवेति वेद्यभेदस्यावश्यकत्वात् 'एष उ वा उद्गीथ (बृ० १.३।२३) इत्यत्रोद्गीथशब्दस्योद्गातर्युपास्यमान प्राण एव बृहस्पतिशब्दवत्प्रयोगोपपत्तेश्च। तस्मादत्र[2] वाक्यच्छायासाम्यमात्रेण वेद्यभेदोऽपि विद्यैक्यं सिध्यति। अत एवाऽभ्युदयवाक्यपशुकामवाक्ययोर्वाक्यच्छायासाम्येऽपि-एकत्र देवतान्तरापनयादिविधि[3], इत्यत्र कार्यान्तरविधिरिति व्यवस्थापितं पूर्वतन्त्रे।

न चोद्गीथेति नामैक्याद्विद्यैक्यं स्यादिति वाच्यम्। तथात्वे-अन्तरादित्यविद्याया[4] आकाशविद्यायाश्चा-[5]भेदापत्तेस्तत्राप्युक्तनाम्न[6] एकत्वात्। न च 'ओमित्येतदक्षरमुद्गीथमुपासीत' (छा० १।१।७) इति वाक्यस्यैवोत्पत्तिविधिरूपत्वात्तदिष्टमेवेति वाच्यम्। तथात्वे 'खल्वेतस्यैवाक्षरस्योपव्याख्यानं भवति, (छा० १।१।१०) इति वाक्यस्य वैयर्थ्यापत्तेस्तस्माद्वेद्यभेदाद्विद्याभेदे गुणोनुपसंहार इति सिद्धम्।

व्याप्त्यधिकरणम्

व्याप्तेश्च समञ्जसम् ।।४।।

'ओमित्येतदक्षरमुद्गीथमुपासीत' (छा० १।२।१) इत्यत्रोद्गीथाक्षरशब्दयोस्सामानाधिकरण्ये न भवति विचारः।

अध्यासो वापवादो वा किमेकत्वमथेष्यते।
विशेषणविशेषत्वमथवात्र भविष्यति ।।
इत्यत्र पूर्वपक्षश्च नाध्यासादिः प्रतीयते।
मनो ब्रह्मेतिवदत्र सामानाधिकण्यतः ।।
अध्यास एव युज्येत युक्तन्नैतत् प्रतीयते।
इति शब्दशिरस्कत्वं फलञ्चात्र न विद्यते ।।
एवं तर्ह्यपि वादोऽस्तु योऽयमित्यादिवाक्यवत्।
योऽयं स्थाणुः पुमानेष इत्यादिवचसां खलु ।।
अपवादकता दृष्टा साप्ययुक्तेह दृश्यताम्।
अपोद्यं वस्तुनो ज्ञानाच्छक्यार्थं त्यागतश्च हि ।।
एवं तर्हिभवेदैक्यमक्षरोद्गीथवस्तुनः।
द्विजोत्तमो भूसुरोऽप्ययमित्यत्रैवं प्रतीतिः ।।

१. घ० मा० 'अवयवस्योपस्यत्वम्' इति पाठः।
२. घ० मा० 'तस्माद्वाक्यच्छाया' इति पाठः।
३. घ० मा० 'यशु' इति पाठः।
४. घ० मा० 'तथात्वेतरा विद्या' इति पाठः।
५. घ० मा० 'भेदायन्तेः' इति पाठः।
६. घ० मा० 'नाच्य' इति पाठः।
७. घ० मा० 'अपभेद्य' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सङ्गतिग्राहकाद्वाक्यात्सहान्यत्राप्रयोगतः ।
पर्यायाणामतस्तावन्न सम्यक्तदपीष्यते ॥

सिद्धान्तः

एवं प्राप्ते वदामोऽत्र विशेषणविशेष्यताम्[1] ।
नीलोत्पलादिवत्तस्मादोङ्कारोऽत्र विशेष्यते ॥
एवञ्चोद्गीथशब्दोऽयमेकदेशस्य[2] बोधकः ।
गौणीतो लक्षणायाश्च युक्तत्वमिति हि स्थितः ॥
व्यापी सर्वेषु वेदेषु ह्योङ्कारोऽतो विशेष्यते ।
उद्गीथवाक्यवत्त्वेन तेन पक्षोऽन्तिमः स्थितः ॥

सर्वाभेदोऽधिकरणम्

सर्वाभेदादन्यत्र चेमे ॥५॥

छान्दोग्यबृहदारण्यकयोः प्राणविद्या समाम्नायते 'यो वै ज्येष्ठः श्रेष्ठश्च वेद, (बृ० ६।१।१,१४) इति । तत्र वाचो वसिष्ठत्वञ्चक्षुषः[3] प्रतिष्ठात्वं श्रोत्रस्य संयमत्वं[4] मनस आयतनत्वञ्चोक्त्वा[5] पुनः प्राणे तत्प्रत्यर्पितम् । 'यदहं वसिष्टोऽस्मि त्वं तद्वसिष्ठोऽसि' (बृ० ६।१।१४) इत्यादिना बृहदारण्यके तु प्रजापतित्वमधिको गुण उक्तः । कौषीतकिशाखायान्तु ज्येष्ठत्वश्रेष्ठत्वगुणयोरेवोक्तिर्न[6] तु वसिष्ठत्वादीनां कीर्तनम् । तत्र संशयः । किं छन्दोगवाजसनेयकयोरुक्तानां वसिष्टत्वादीनामुपसंहारः कौषीतकिशाखायामस्ति नेति । तत्र पूर्वःपक्षः ।

कौंण्वादिशाखग ये तु[7] वसिष्टत्वादयो गुणाः ।
न तेषामुपसंहारः कौषीतक्यां कथञ्चन ॥
एवं शब्दस्य[8] पूर्वोक्तबोधकत्वस्वभावतः ।
अन्यथा तस्य शब्दस्य ह्यानर्थक्यं प्रसज्यते ॥

बृहदारण्यके छान्दोग्ये चोक्ता वसिष्टत्वादयो गुणा नोपसंहर्तव्याः[9] कौषीतकिशाखायाम् 'य एवं वेद' (बृ० ६।१।५) इत्येवं शब्देन पूर्वोक्तस्यैव परामर्शात् । न च कौषीतकीशाखावाक्यस्य छन्दोगवाक्येन सहैकवाक्य-

१. घ० मा० 'विशेषण' इत्यधिकः पाठः ।
२. घ० मा० 'अयमेकदेशस्य' इत्यधिकः पाठः ।
३. घ० मा० 'त्व' इति पाठो नास्ति ।
४. घ० मा० 'संयतत्वं' इति पाठः ।
५. घ० मा० 'आन्यतनत्वं' इति पाठः ।
६. घ० मा० 'गुण' इति पाठो नास्ति ।
७. ग० मा० 'काण्वशाखादिक गा ये तु' इति पाठः ।
८. घ० मा० 'एवं कस्य पूर्वोक्त बोधकत्व स्वभावतः' इति पाठः ।
९. घ० मा० 'गुणः' इति पाठो नास्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वाद्वसिष्टत्वादयो गुणाः प्रस्तुता एवेति वाच्यम्। तथा सत्येवं शब्दवैयर्थ्यापत्तेः। एवं शब्दं विनापि 'यो वेदे' त्युक्त्यैव[1] प्रकृतानां गुणानां वेदनीयत्वसिद्धेः। न च दहरशाण्डिल्यादिविद्यास्वप्येवं[2] शब्दस्य विद्यमानत्वेन गुणानुपसंहारापत्तिरिति वाच्यम्। इष्टापत्तेः। अत एतादृशस्थले[3] गुणानामनुपसंहार इति।

सिद्धान्तस्तु

शाखाभेदेऽपि विषाया एकत्वस्य व्यवस्थितेः।
वसिष्टत्वप्रतिष्ठात्वे गुणादेरुपसंहृतिः॥
एवं शब्दस्य पूर्वोक्तबोधकत्वेऽपि युज्यते।
तस्यानुवादकत्वं हि स्वीक्रियेत कदाचन॥

काण्वादिशाखागतायाः कौषीतक्यादिगतायाश्च[4] विद्याया एकत्वात्। वसिष्ठत्वप्रतिष्ठात्वादिगुणानामुपसंहारः। एवं शब्दस्य पूर्वप्रस्तुतपरामर्शकत्वेऽपि स्वीकार्यः। सर्वासां शाखानामेकवाक्यत्वेन सर्वेषां गुणानां पूर्वप्रस्तुत्वाविशेषात्। न चैवं शब्दस्य वैयर्थ्यभयात्परिसंख्यापकत्वं स्वीकार्यमिति वाच्यम्। तथात्वे वाक्यभेदापत्तेः, इदं हि वाक्यं फलबोधकम्। अस्य च परिसंख्यार्थकत्वेऽर्थद्वयपरत्वात्। फलबोधकवाक्यान्तराभावाच्च। तस्मादेवं शब्दोऽनुवादक एव, तथा च गुणानामुपसंहारः[5]। यथा (अत एव) च कौषीतकिशाखागतप्राणविद्यायाः छन्दोगशाखागत विद्यायाश्चैक्यं तथा व्युत्पादितमाकरे[6]।

आनन्दाद्यधिकरणम्

आनन्दादयः[7] प्रधानस्य।६॥

'सत्यं ज्ञानमनन्तं नित्यं विज्ञानम्' (तै० उ० १।१) इत्युक्ता ये गुणास्तेषामेकत्रोक्तानामपरत्रोपसंहारोऽस्ति नेति संशये[8]

---

१. घ० मा० 'त्युत्यैव' इति पाठः।
२. घ० मा० 'स्वषेप्येवं' इति पाठः।
३. घ० मा० 'एतादृस्थले' इति पाठः।
४. ग० मा० 'प्राण' इति पाठः।
५. ग० मा० 'सिद्धिः' इति पाठः।
६. (क) एकस्यामपि शाखायां श्रुता गुणाः श्रुता एव सर्वत्र भवन्ति। गुणतो भेदाभावात्। नहि देवदत्तः शौर्यादिगुणत्वेन स्वदेशे प्रसिद्धो देशान्तरगतस्तद्देशस्थैरविभावितशौर्यादिगुणोऽप्यतद्गुणो भवति। यथा च तत्र परिचयविशेषाद्देशान्तरेऽपि देवदत्तगुणा विभाव्यन्ते। एवमभियोगविशेषाच्छाखान्तरेऽप्युपास्या गुणाः शाखान्तरेऽप्युपास्येरन्। तस्मादेकप्रधानसम्बद्धा धर्मा एकत्राप्युच्यमानाः सर्वत्रैवोपसंहर्तव्या इति (शा० भा० ३।३।५)।
   (ख) उपास्यफलप्रत्यभिज्ञानात्तदव्यभिचारिणः प्रकारभेदस्येहानुक्तस्यापि बुद्धौ सन्निधानात् प्रकृतपरामर्शेनैवंकारेण परामर्शो युक्त इति सिद्धं कौषीतकिब्राह्मणगतेन तावदेवंकारेण शक्यते परामृष्टुम् (भामती ३।३।५)।
   (ग) अयमत्र सिद्धान्ताभिप्रायः, यद्यपि शाखान्तरगतं गुणजातं शाखाद्वयैकवाक्यतानुसन्धानेनैव एवं पदपरामर्शयोग्यम्। स्वशाखाम्नातन्तु तदनपेक्षमेवैवंपदेन परामृष्टुं शक्यम्, तथापि प्रकृतपरामर्शिन एवं शब्दस्यैतादृशं वैषम्यम्किञ्चित्करम्। अन्यथा स्वशाखाम्नातस्यापि दूरस्थस्य परामर्शो न भवेत्' (अ० म० पृ० ६५८)।
७. घ० मा० 'आनन्दाय' इति पाठः।
८. घ० मा० 'पूर्वः पक्षः' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आनन्दादिगुणास्तावन्नोपसंहारभागिनः ।
पदेनैकेन लब्धत्वादन्यस्य स्यादपार्थता[1] ॥

ब्रह्मणो विषयस्यैक्याद्यदि[2] संहार इष्यते ।
शाण्डिल्यदहरादीनां गुणानां[3] र्तहि सङ्करः ॥

निर्विशेषविद्यायामेकत्रोक्ता आनन्दादयो नापरत्रोपसंहर्तव्याः प्रयोजनाभावात्। पदानां ह्यखण्डार्थतया शुद्धं ब्रह्मबोधनमेव प्रयोजनमिष्यते। तच्चैकेन पदेन लब्धमिति पदान्तरानर्थक्यम्। न [4]चैकपदमात्राद्विरोधस्फूर्त्यां लक्षणा न भवति। अतः पदान्दरावश्यकेनेति वाच्यम्। तावतापि पदद्वयेनैव लक्षणोपपत्तेरुपसंहारो व्यर्थः। न च सर्वत्र ब्रह्मण ऐक्याद्गुणानामुपसंहार इति वाच्यम्। एवं हि दहरशाण्डिल्यादिविद्यानामपि ब्रह्माभेदादुपसंहृतगुणविषयकत्वापत्तरिति पूर्वपक्षः।

सिद्धान्तस्तु

आनन्दादिगुणास्तादुपसंहारयोगिनः ।
दुःखित्वादिभ्रमस्तस्मान्नान्यथा विनिवर्तते ॥
उपासना पूर्वभेदाच्छाण्डिल्यदहरादिषु[5] ।
गुणानां नोपसंहारो[6] दर्शसोमादिवद्भवेत् ॥

निर्विशेषविद्यायामपि गुणानामेकत्रोक्तानामन्यत्रोपसंहारस्तत्प्रयोजनस्य सम्भवात्। यद्यपि द्वाभ्यामेव (पद्भ्यां) विवक्षितार्थस्याखण्डरूपस्य सिद्धिर्भवति। तथापि सत्यपदाभावे सत्यत्वभ्रमोऽज्ञानपदाद्यभावे जडत्वादिभ्रमश्च न निवर्तते। अतस्सर्वेषामुपलक्षणानां सर्वत्रोपसंहार आवश्यकः। न च ब्रह्मण ऐक्येन दहरशाण्डिल्यादिविद्यास्वपि गुणानां परस्परमुपसंहारापत्तिरिति वाच्यम्। तत्रोपासनापूर्वभेदेन धर्माणामपि तदर्थानां तत्प्रकरणपठितानां व्यवस्थितत्त्वस्य 'सप्तमाद्य न्याय' सिद्धत्वात्। अत एव दर्शपूर्णमासज्योतिष्टोमधर्माणामसङ्करः। अत आनन्दादीनामुपसंहार[7] इति।

१. ग० मा० 'स्यादपार्थता' इति पाठः।
घ० मा० 'अन्यसिद्धस्यानर्थकः' इति पाठः।

२. ग० मा० उपसंहारकल्पने' इति पाठः।

३. च मा० 'गुणानांतर्हि संकरः' इति पाठो नास्ति।

४. च मा० 'गुणाभुपसंहार' इति पाठः।

५. 'दहरमल्पं पुण्डरीकं पुण्डरीकसदृशं''''दहरोऽल्पतरोऽस्मिन् दहरे वेश्मनि' (छा० उ० शां० भा० ८।१।१, पृ० ७८२)।

६. घ० मा० 'दर्शमदि' इति पाठः।

७. (क) राद्धातस्तु वास्तवविधेययोर्वस्तुधर्मतया चानुष्ठेयतया चाव्यवस्थाव्यवस्थे व्यवतिष्ठेते। वस्तुधर्मो हि यावद्वस्तु व्यवतिष्ठते। नासावेकत्रोक्तोऽन्यत्रानुक्तो नास्तीति शक्यं वक्तुम्। विधेयस्तु पुरुषतन्त्रः पुरुषप्रयत्नश्च यत्र यावदगुणविशिष्टे ब्रह्मणि चोदितः, स तावत्येवावतिष्ठते नाविहितमपि गुणं गोचरीकर्तुमर्हति। तस्य विधितन्त्रत्वाद्विधेश्च व्यवस्थापनात्। तस्मादानन्दविज्ञानादयो ब्रह्मतत्त्वात्मतयोक्ता यत्र यत्र श्रूयते तत्र तत्रोक्ता अपि लभ्यन्ते। संयद्वामादयश्चोपासनप्रयत्नविधिविषया यथा विध्यवतिष्ठन्ते न तु यथा वस्त्विति सिद्धम्।' (भामती ३।३।११)।

(ख) यद्यपि निर्विशेषं ब्रह्म परमार्थतः, तथापि तत्रासत्त्वानानन्दत्वञ्जडत्वादिभ्रान्तयस्तेषु तेषु पुरुषेषु सम्भवन्ति तादृक्भ्रान्तिनिवृत्तिश्च सामग्रीविशेषजननादेव, ब्रह्मस्वरूपावबोधाद्भवति। तत्र लक्ष्येऽखण्डे वस्तुनि यद्यपि विशेषणानि न सन्ति, तथापि लक्षके वाच्ये वाक्यार्थे नानन्दत्वादिविरुद्धानन्दत्वादिधर्मानुसन्धानात् सा शङ्का निवृत्ता भवतीति वाच्यार्थकोटावारोपितानामानन्दत्वादिधर्माणामुपसंहारोऽपेक्षित इति ध्यानकालेऽपि तत्तदाशङ्कानिवृत्त्युपयोगिधर्मानुसन्धानपूर्वकमेव निर्विशेषे लक्ष्ये मनो निधातव्यमिति निर्विशेषोपासनायामपि गुणोपसंहारः सार्थकः' (ब्र० वि० भ० ३।३।११)।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आध्यानाधिकरणम्

आध्यानाय प्रयोजनाभावात् ॥७॥

विद्याभेदाभेदप्रसङ्गाद्वाक्यभेदाभेदविचारः क्रियते ।

इन्द्रियेभ्यः पराह्यर्था अर्थेभ्यश्च परं मनः ।
मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः ॥
महतः परमव्यक्तमव्यन्तात्पुरुष परः ।
पुरुषान्न परं किञ्चित्साकाष्ठा सा परागतिः ॥

(क० उ० १।३।११) इति श्रूयते । तत्र संशयः । किमिन्द्रियाद्यपेक्षयार्थादीनां परत्वेन ध्यानमिह विधीयते-उत[1] सर्वापेक्षया पुरुषस्य श्रेष्ठत्वं प्रतिपाद्यत इति । तत्र पूर्वः पक्षः

अर्थादीनां परत्वं यदिन्द्रियादिभ्य उच्यते ।
उपास्त्यर्थन्तु तज्ज्ञेयं नामादेर्ब्रह्मणोक्तिवत् ॥
वाक्यमर्थवदेव स्यादन्यथा स्यादनर्थकम् ।
एवञ्च सति सर्वत्र स्मृत्युक्तफलसङ्गतिः ॥

'इन्द्रियेभ्यः पराह्यर्थाः' (क० उ० १।३।१०) इति वाक्यमिन्द्रियाद्यपेक्षयाऽर्थादीनां परत्वं बोधयदुपास्तिपरं भवति । अन्यथा हि तद्वाक्यमनर्थकं स्यात् । [2]आत्मा सर्वोत्कर्षस्य[3] 'पुरुषान्न परं किञ्चित्' (क० उ० १।३।११) इत्यनेनैव सिद्धत्वात् । न च वाक्यभेदापत्तिरिष्टत्वाद्यथा[4] भूमविद्याप्रकरणे नामादीनां[5] ब्रह्मत्वोक्तिस्तदुपास्त्यर्थातद्वत् ।[6] न चार्थादिपरत्वध्यानस्य फलालाभः शंक्यः । 'दशमन्वन्तराणीह तिष्ठन्तीन्द्रियचिन्तकः,[7] इत्यादि स्मृतिपर्यालोचनया-इन्द्रियाद्युपासनाया अपि फलबोधनादत' उपासनार्थं वाक्यभेद इति ।

सिद्धान्तस्तु

अर्थादीनां परत्वं (यन्नो) पास्त्यर्थं तदीरितम् ।
आख्यातस्य फलस्यापि न चेह श्रवणं यतः ॥
मा[8] अस्तु ब्रह्मता दृष्टिस्तयोः श्रुतिबलाद्भवेत् ।
शङ्काशूकविनिर्मुक्तपरत्वज्ञानसिद्धये[9] ॥

---

१. च० मा० 'उत' इति पाठो नास्ति ।

२. ग० मा० 'प्रत्यगात्मनि इति पाठः ।

३. च० मा० 'आत्मा सर्वात्कृष्टं ति द्रिय चिन्तका इत्यादि स्मृत्या । इन्द्रियाद्युवासनाया अपिल बोधनात् । अतः उपासनार्थ वाक्यभेदः इति पाठः ।

४. घ० मा० 'भोदायत्तिरिष्कृत्वात्' इति पाठः ।

५. घ० मा० 'नामाचीनाम्' इति पाठः ।

६. घ० मा० 'अर्थादि' इत्यधिकः पाठः ।

७. घ० मा० 'खिन्ताका' इति पाठः ।

८. ग० मा० 'नामादां ब्रह्मदृष्टिस्तुतयोरश्रुतिबलाद्भवेत' इति पाठः ।
च० मा० 'नमस्ता' इति पाठः ।

९. घ० मा० 'शंकाषु कवि' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वाक्यञ्चार्थवदेवञ्च वाक्यभेदोऽपि नेष्यते ।
स्मृतिमात्रोपासनस्य फलमाह न चास्य तत्[1] ॥

'इन्द्रियेभ्यः परा' (क० उ० १।३।१०) इति वाक्यं पुरुषपरत्वं व्युत्पादनपरमेव । न तूपासनापरः'[2] 'स यो नाम ब्रह्मेत्युपास्ते यावन्नाम्नो गतं तत्रास्य यथा कामाचारो भवति' (छा० ७।१।५) इति भूमविद्याप्रकरणे फलाख्यातयोश्श्रवणेनोपासनाङ्गीकारेऽपीह तयोश्च[3] श्रवणेनोपासनानुपपत्तेः ।[4] वाक्यञ्च सर्वापेक्षया पर इत्यनुक्त्वा 'इन्द्रियेभ्यः परा' इत्येवं रूपेण प्रवृत्तिश्शङ्कालेशरहितसर्वपरत्वज्ञानाय 'दशमन्वन्तराणि' इत्यादिस्मृतिवचनन्तु स्मार्तस्योपासनस्य फलं ब्रूते न त्वस्य, ततश्च सर्वमिदमेकं वाक्यं ब्रह्मपरत्वप्रतिपादनपरमिति ।

आत्मगृहीत्यधिकरणम्

आत्मगृहीतिरितरवदुत्तरात् ॥८॥

'सदेव साम्य' (छा० ६।२।१) इत्यादिछन्दोगशाखाप्रतिपाद्यविद्याया 'आत्मा वा इदमेक एवाग्र आसीत्, (ऐ० उ० १।१) इत्याद्यैतस्य वाक्यप्रतिपाद्यविद्यायाश्चैक्यमेवेति संशयः । तदर्थञ्च किमैतरेयकवाक्यं हि हिरण्यगर्भम् प्रतिपादयत्युत परमात्मानमिति तत्र पूर्वः पक्षः

ग्राह्यो हिरण्यगर्भोऽत्र लोकसृष्टिश्रुतेर्बलात् ।
परमात्मविवक्षायां वियदादिश्रुतिर्भवेत्[5] ॥
ताभ्यो[6] गामिति वाक्येन देहि व्यापारबोधनात् ।
देहो हिरण्यगर्भस्य गम्यते स्मृतिवाक्यतः ॥
अथातोरेतसस्सृष्टिरिति पूर्वत्र च श्रुतेः ।
एवमेवेति शब्दश्च स्वकार्यापेक्षया भवेत् ॥

'आत्मा वा इदमेक एवाग्र आसीत्, (ऐ० उ० १।१) इति वाक्यं हिरण्यगर्भपरमेवाङ्गीकायन्न तु परमात्मापरम् 'लोकानुसृजा' (ऐ० उ० १।३) इत्यारभ्य लोकसृष्टिप्रतिपादनात् । परमात्मापरिग्रहे हि वियदादिकमारभ्य सृष्टिर्वक्तव्या[7] स्यात् । लोकसृष्टेश्व 'आत्मैवदेमग्र आसीत्पुरुषविधः, (बृ० १।४।१) इति ब्राह्मणे हिरण्यगर्भस्यैव कर्तृत्वोक्तेः । अपि च ताभ्यो गामानय ताभ्योऽश्वमानयेत्यादि[8]शरीरव्यापारस्य बहुलमुपलम्भाद्धिरण्यगर्भ एव ग्राह्य-

१. घ० मा० 'ततः' इति पाठः ।
२. घ० मा० 'उपासनापरयोः' इति पाठः ।
३. घ० मा० 'तयोरश्च' इति पाठः ।
४. घ० मा० 'वास्य च' इति पाठः ।
५. ग० मा० 'सृजिर्भवेत्' इति पाठः ।
६. घ० मा० 'ताम्य''''भवेत्' इत्यन्त पाठो नास्ति ।
७. घ० मा० 'सृष्टिवर्तव्या स्यात्' इति पाठः ।
८. घ० मा० 'आनयदित्यादि' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्तस्यैव शरीरत्वप्रसिद्धेः । 'स वै शरीरी प्रथम सर्वे पुरुष उच्यते'[१] इति स्मृतेः पूर्ववाक्ये 'अद्भ्योऽतो रेतसः'[२] सृष्टिरिति प्रजापतिकर्तृकायाः सृष्टेरभिमानाच्चेदमपि वाक्यं हिरण्यगर्भपरमेवेत्यवधार्यते 'आत्मा वा इदमेक एवाग्र आसीत्, (ऐ० उ० १।१) इत्येकत्वमवधारणञ्च हिरण्यगर्भपरत्वे निर्णीते स्वकार्यापेक्षं द्रष्टव्यम् । सद्विद्या तु परमात्मपर एवेति विद्याभेद एव । इत्यत्राभिधीयते

परमात्मनो गृहीतिस्स्यादात्मशब्दानुरोधतः ।
एकमेवेति निर्देशादैक्यतात्पर्यतोऽपि च ॥
लोकसृष्टिः परेशेऽपि ह्युपपन्नतरा भवेत् ।
ऐतरेयकविद्यायास्सद्विद्यैक्यमतः स्थितम् ॥

'आत्मा वा इदमेक एवाग्र आसीत्' (ऐ० उ० १।१) इत्यत्रात्मशब्दो हि योगरूढिभ्यां प्रत्यगभिन्नपरमात्मानमेव प्रतिपादति । अतश्चात्र[३] परमात्मा परिग्रह एव न हिरण्यगर्भ परिग्रहः । एकमेवैत्येकनामावधारणञ्च परमात्मपक्षे घटते, प्रकरणञ्चेदं प्रत्यगभिन्नब्रह्मपरमित्यवगम्यते । उपक्रमे 'आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किञ्चनमिषत्, (ऐ० उ० १।१) यद्वै ततो उक्तेः 'स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यते, (ऐ० उ० ३।१२) इति मध्ये श्रवणाद् 'प्रज्ञानं ब्रह्म' (ऐ० उ० ५।३) इत्युपसंहाराच्च । जीवस्य द्रष्टृत्वादयस्सर्वे धर्मा काल्पनिका इति । यदि वाचाभिव्याहृतमित्यादिनावगमात । अतो नेह हिरण्यगर्भ परिग्रहः, 'आत्मैवेदमग्र आसीत्, (बृ० १।४।१) इत्यत्र तु सर्वपाप्मप्रदाहत्वलिङ्गात्तदभयपरित्यागे[५]श्रवणाच्च[६] हिरण्यगर्भपरत्वं निश्चीयते । ताभ्यो गामानयदित्यादिव्यवहारश्चासदर्थरूपत्वादप्रयोजनत्वाच्च । अविवक्षित इति नैतावता हिरण्यगर्भ निर्णयः । 'अथातो रेतसः' इत्यादिपूर्ववाक्यन्तु परमेश्वरपरत्वे नियामकाभाद्धिरण्यगर्भपरमेत्र । अतस्तद्विद्याया ऐतरेयकविद्यायाश्चैक्यमिति सिद्धम् । एवं वा बृहदारण्यके 'कतम आत्मेति योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषम्, (बृ० ४।३।७) इति जीवं प्रस्तुत्य तस्योपसंहारे ब्रह्मत्वं बोधितम् 'स वा एष महाजन आत्माजरोऽमरोऽमृतोऽभयो ब्रह्मेति' छन्दोगशाखायां तु 'सदेव सौम्येदमग्र आसीत्, (छा० ६।२।१) इति सच्छब्देनोपक्रम्य तस्य 'तत्त्वमसि, इति जीवतोपसंहृता[७] । तत्रोभयत्र विद्यैक्यमुत विद्याभेद इति संशये

सत्तासामान्यवचनस्सच्छब्दोऽत्र प्रयुज्यते ।
आकृतेश्शब्दवाच्यत्वं पूर्वतन्त्रे स्थितं यतः ॥
तत्त्वमस्यादिवाक्यञ्च सम्पत्तेः प्रतिपादकम् ।
उपक्रमानुसारेण तस्मान्नैक्यं तयोर्भवेत् ॥

१. ग० मा० 'कर्ता स भूतानां ब्रह्माग्रे समवर्तते' इति पाठः ।
२. च० मा० 'अभ्यो' इति पाठः ।
३. घ० मा० 'अतश्चापरमात्मा' इति पाठः ।
४. घ० मा० 'प्रक्रम' इति पाठः ।
५. घ० मा० 'स यत्पूर्वा स्मात्सर्वस्मात्सर्वापाप्मन औषत्' (बृ० १।४।१) ।
६. घ० मा० 'तमपरित्याश्रवणाच्च' इति पाठः ।
७. घ० मा० 'जोवतोयसंहृता' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'सदेव सौम्येदमग्र आसीत्' (छा० ६।२।१) इत्यत्र सत्पदं सत्तासामान्यपरम्। आकृत्याधिकरणन्यायतो न ब्रह्मपरं तत्र शक्तेरभावात्। न चेक्षणमनुपपन्नमिति वाच्यम्। प्रायपाठेन गौणेक्षणोपपत्तेः। सच्छब्दस्य जडपरत्वे निर्णीति प्रायपाठानुसारेण गौणत्वस्यैव युक्तत्वात्, 'एकमेवाद्वितीयम्, (छा० ६।२।१) इति जात्यन्तरानभिव्यक्तिपरं[1] कथञ्चिन्नेयम्। तेज आदिस्रष्टृत्वञ्च स्वस्य तेज [2]आदिसमवायाभिप्रायम्, 'तत्त्वमसि, (छा० ६।१५।३) इति वाक्यमपि सत्तायाञ्जीव-दृष्टिपरम्।

बृहदारण्यकवाक्यन्तु प्रत्यगभिन्नब्रह्मपरमित्यनयोर्विद्ययोर्भेद इति प्राप्तेऽभिधीयते

सन्दिग्धोपक्रमं तावद्वाक्यशेषबलाद्भवेत्।
निर्णीतार्थमतोऽत्रापि वाक्यशेषश्रुतेर्बलात्॥
सामान्यबोधकः शब्दो विशेषस्थाप्यते यतः।
अतो विद्यैक्यमेव स्यादुभयोरेकरूपतः॥
सच्छब्दो यौगिकश्चेह न सामान्यस्य बोधकः।
धातोरसेर्लटो रूपं शतर्येतद्विजायते[3] (?)॥

'सदेव साम्येदमग्र आसीत्' (छा० ६।२।१) इत्यत्र सच्छब्दो यौगिकत्वात्सामान्यं न बोधयति। सर्वत्र यौगिके[4]श्शब्दैर्द्रव्यमेवाभिधीयते[2] इत्युक्तेस्तच्च द्रव्यं किमित्याकाङ्क्षायां 'ओम् तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृत' (गी० १७।२३) इति स्मृत्यनुसारेण ब्रह्मैवेति निर्णीयते[5]।

किञ्च सच्छब्दस्य सत्तासामान्यपरत्वेऽपि तस्याश्रयाकाङ्क्षायां किं ग्राह्यमिति विशये[6], शर्करा[7] अक्ता उपदध्यात्तेजो[8] वै घृतम्', इति वाक्यशेषानुसारेण [9]घृतस्याञ्जनसाधनत्ववत्तत्सत्यं 'स आत्मातत्त्वमसि श्वेतकेतो' (छा० ६।१५।३) इति वाक्यशेषानुसाराद्ब्रह्मैव निर्धार्यते। किञ्च सच्छब्दस्सत्ये साधौ च सच्छब्दत्यभिधाना-नुसारेण सच्छब्दार्थद्वयपरत्वेन सन्दिग्धे 'वासः परिधत्ते एतद्वै सर्वदैवत्यं यत्क्षौमम्' इतिवत्तत्सदित्यत्र[10] वाक्यशेषेण निर्देशात्सत्यपरमेव निर्धार्यत। सत्यञ्चावाध्यत्वात्परमेव ब्रह्मेति निर्णयता सत्तापक्षेप्यबाध्यत्वरूपत्वात्तस्याः ब्रह्माक्षेपकत्वमेव, न तु व्यक्ततराक्षेपकत्वम्। एवञ्च सतीक्षणं[11] तत्स्रष्टृत्वं जीवात्मना प्रवेशः 'तत्त्वमसि (छा०

१. च० मा० 'सनादानभिव्यक्ति' इति पाठः।
२. घ० मा० 'समवायप्रायम्' इति पाठः।
३. ग० मा० 'शतश्चेत् बृद्धि जायत' इति पाठः।
४. घ० मा० 'अतः' इत्याधिकः पाठः।
५. घ० मा० 'निर्णीयले' इति पाठः।
६. घ० मा० 'चिशये' इति पाठः।
७. घ० मा० 'शर्कश' इति पाठः।
८. घ० मा० 'तेजो घृतेति' इति पाठः।
९. घ० मा० 'सानत्व' इति पाठः।
१०. घ० मा० 'तत्सत्यत्र' इति पाठः।
११. ग० मा० 'सतिक्षणम्' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

६।१५।३) इति प्रतिपाद्यजीवाभेदश्च सम्यगुपपद्यते। इतरथा सर्वमेतदसमञ्जसं स्यात्। तस्मादुभयोर्बृहदारण्यक छन्दोगवाक्ययोरेकरूपत्वाद्विद्यैक्यमिति[१] सिद्धम्[२]। एवञ्च परस्परमुपकार्योपकारभाव इति ध्येयम्[३]।

कार्याख्यानाधिकरणम्

कार्याख्यानादपूर्वम् ॥६॥

छान्दोगशाखायां प्राणसंवादे 'प्राण श्रेष्ठं' इति[४] स्पष्टतया निर्धारणे कृते 'किं मेऽन्नं भविष्यति' (छा० ५।२।१) इति प्राणेन[५] पृष्टे इन्द्रियैः 'यत्किञ्चिदिदमाश्वभ्य आशकुनिभ्य, (छा० ५।२।१) इत्युत्तरिते 'स होवाच किं मे वासो भविष्यति, (छा० ५।२।२) इति प्राणस्य प्रश्ने 'आप[६] इति होचुस्तस्माद्वा एतदशिष्यन्तः पुरस्ताच्चोपरिष्टाच्चाद्भिः परिदधति[७] लम्भुको ह वासो भवत्यनग्नो प्राह भवति, (छा० ५।२।२) इति समाम्नायते। वाजसनेयके तु काण्वैस्तस्य 'मे किमन्नं किं[८] वास, (बृ० ६।१।१४) इति प्राणप्रश्नमवतार्य 'यदिदं[९] किञ्चाश्वभ्यः आकृमिभ्य[१०] आकीटपतङ्गेभ्यस्तत्तेऽन्नमापो वास' इति, न दृष्टा 'अस्यानन्नं[११] जग्धं भवति, [१२]नानन्नं परिगृहीतं य

१. घ० छान्दोग्य 'इत्यधिकः' पाठ ?।

२. क—वाजिवाक्ये त्वमर्थस्य तदर्थंपर्यन्तस्य लक्ष्यस्य प्रतिपादनं, छान्दोग्यवाक्ये तु तदर्थस्य त्वमर्थपर्यन्तस्य प्रतिपादनमिति प्रकारभेदेऽपि वाक्यार्थैक्याद्विद्यैक्यमिति (र० प्र० पृ० ७००)।

ख—अत्र पूर्वस्मिन् पक्षे हिरण्यगर्भोपासना, सिद्धान्ते तु ब्रह्मभावेनेति' (भामती—३।३ १७)।

ग—तथा च वाजसनेयिवाक्यं त्वमर्थ तदर्थपर्यन्तं लक्षयति, छान्दोग्यवाक्यन्तु तदर्थत्वमर्थपर्यन्तं लक्षयत्यर्थैक्याद्विद्यैक्यमिति' (वे० क० त० पृ० ४१३)।

घ—क्वचिद्ब्रह्मणो जीवैक्यप्रतिपादनमित्यत्र जीवस्य ब्रह्मैक्यप्रतिपादनञ्चोपसंहारार्थमुपकर्तुर्ब्रह्मणो जीवपर्यन्ताया जीवस्य ब्रह्मपर्यन्तायाश्चोपक्रमे प्रतिपादनस्य छान्दोग्यवाजसनेयकयोरेव सद्भावात्पूर्वपक्षे सत्तासामान्यविषयतया छान्दोग्यवाजसनेयकयोरिव जीवविशेषजीवसामान्यविषयतयैतरेयकवाजसनेयकयोर्विद्याभेदस्योपपादयितुमशक्यत्वाच्च जीवविशेषे जीवसामान्यविषयतया वचनानामुपसंहारेण विद्यैक्योपपत्तेः'। (वे० क० त० प० म० पृ० ५६३)।

३. घ० मा० 'घ्येयम्' इति पाठः।

४. घ० मा० 'श्रेष्ठस्पष्टया' इति पाठः।

५. घ० मा० 'पृष्टेनिन्द्रियः' इति पाठः।

च० मा० 'सृष्टेरिन्द्रियः' इति पाठः।

६. घ० मा० 'प्रश्ने आत्य' इति पाठः।

७. घ० मा० 'परिदयति' इति पाठः।

८. घ० मा० 'भवत्यनग्न' इति पाठः।

घ० मा० 'किमुवास' इति पाठः।

९. घ० मा० 'यत्किञ्च' इति पाठः।

१०. घ० मा० 'आशकुनिभ्य' इत्यधिकपाठः।

११. च० मा० 'तस्यानन्नजग्धं' इति पाठः।

१२. घ० मा० 'नान्नम्' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवमेतदनस्यान्नं[1] वेद' भवति[2] तद्विद्वांस श्रोत्रियाः अशिष्यन्त आचामन्त्यशित्वाचामन्त्येतमेव[3] तदनमनग्नं कुर्वन्तो मन्यते[4] (बृ० ६।१।१४) इति समाम्नायते। माध्यन्दिनस्तु 'तस्मादेवं विद शिष्यन्नाचामेदशित्वा वाचमेतमेव तदनमनग्न कुर्वन्तः, (बृ० ६।१।१४) इति च[5] 'तत्रान्नमापो वास' (बृ० ६।१।१५) इत्यत्र वासोदृष्टिर्विधीयते' परिदधति-आचामन्ति 'आचामेत्' इत्यत्र [6]चाचमनमुतानाचमनमेव विधीयते, आहोस्विद्वासो दृष्टिरेवेति संशये पूर्वः पक्षः

तस्याचमनस्यापि वासो दृष्टेः विधेयता।
प्रतीतेरथवाचान्ते[7] लिङ्गश्रवणतो भवेत्॥
अन्यथा[8] व्यर्थमेतत्स्याद्वासो वाक्यं स्तुतिर्भवेत्।
अतः प्रमाणविदस्तावत्[9] द्विराचमनमिष्यते[10] (?)॥

अत्र छन्दोगशाखायां वाजसनेयशाखायाञ्च 'आपो वास' इत्यनेन वासोदृष्टिर्विधातव्या। अर्थवादानुसारेण विधेयत्वप्रतीतेः। पुरस्ताच्चोपरिष्टाच्चाद्भिः परिदधातीत्याचमनविधिः प्रतीयते। छन्दोगशाखायामशिष्यन्त आचामन्तीति, काण्वशाखायामाचमनस्य विधेयता प्रतीयते, तस्मादेवं विद शिष्या अत्राचामेदिति माध्यन्दिनानां स्पष्टलिङ्गश्रवणात्। अतो विधेयत्वमाचमनस्योत, उभयं विधेयम्,—अथवा आचमनमेव विधेयं स्पष्टलिङ्गादिश्रवणात्। न च (प्रायत्यर्थतया)[11] प्रत्ययार्थतया-आचमनस्य स्मृतित एव प्राप्तेस्तद्विधानं व्यर्थमिति वाच्यम्। तथा सति वाक्यवैयर्थ्यापतेः। तस्मात्प्रायत्यर्था (प्रत्ययार्थ) आचमनाददृष्टार्थमन्यमाचमनमित्यतः, प्रत्ययार्थमाचम्य पुनरदृष्टार्थमाचमनान्तरं कर्तव्यम्।

'आपो वास' इति वाक्यं त्वर्थवाद इति पूर्वः पक्षः।

सिद्धान्तस्तु

वाक्यभेदप्रसङ्गेन[12] ह्येकस्यैव विधिर्भवेत्।
यत आचमनं प्राप्तं वासो दृष्टेरतो विधिः॥

---

१. घ० मा० 'य एवं स्यादन्नं वेद' इत्यन्तः पाठो नास्ति।
२. घ० मा० 'भवति' इत्यधिकः पाठः।
३ घ० मा० 'त्वाचाचामेन्त' इति पाठः।
४. घ० मा० 'मन्यन्ते' इति पाठो नास्ति।
५. ग० मा० 'अधिकमामनन्ति' इति पाठः।
६. घ० मा० 'च आचमनमु उत' इति पाठः।
७. घ० मा० 'लिंगा' इति पाठः।
८. ग० मा० 'अन्यथायार्थमेतत्स्यात्' इति पाठः।
९. घ० मा० 'प्राणविदः' इति पाठः।
१०. ग० मा० 'पुनराचमन' इति पाठः।
११. घ० मा० 'प्रत्ययार्थतया' इति पाठः।
१२. घ० मा० 'भेद' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वाक्यञ्चाश्रयदानार्थमन्यथाप्युपपत्तितः ।
लिङ्ग[1]प्रत्यये तेनात्र वासो[2] दृष्टिर्विधिर्भवेत् ॥

नात्रोपासनमाचमनञ्चेत्यर्थद्वयं[3] विधेयं, वाक्यभेदप्रसङ्गात् । तत्रापि वासो दृष्टिरेव विधेया, प्राप्तत्वादाचमनन्तु न विधेयं स्मृतित एव (प्रायत्यर्थं) प्रत्ययार्थस्य प्राप्तत्वाद्विभिन्नविषयत्वाच्च श्रुतिस्मृत्योर्न मूलाभावस्सम्भवति[4] । न च वाक्यवैयर्थ्यापत्त्या अपूर्वार्थमाचमनान्तरं विधेयमिति वाच्यम् । वासो दृष्टराचमनीय स्वकर्तव्यत्वेनाश्रयदानार्थत्वेन सार्थक्याल्लिङ्गप्रत्यययोरप्येवं विध्युपात्तविधानार्थत्वेनोपपन्नः ।[5] अत्र[6] दृष्टिविधानप्रायपाठाच्च वासो दृष्टिरेव विधेयेति ।

समानाधिकरणम्

समान एवञ्चाभेदात् ॥१०॥

वाजसनेयके बृहदारण्यके च शाण्डिल्यनामाङ्किता विद्याऽऽम्नाता 'मनोमयोऽयं पुरुषो भाः[7] सत्यः तस्मिन्नन्तर्हृदयं' (बृ० ५।६।१) इति तत्रैवाग्निरहस्ये 'स आत्मानमुपासीत मनोमयं प्राणशरीरं भारूपम्' । इत्यादि तत्र संशयः । किमुभयत्रापि विद्याभेद उस तदैक्यमिति किं प्राप्तम् । विद्याभेद इति । कुतः

पौनरुक्तेन भेदो हि पूर्वतन्त्रे स्थितो[8] यतः ।
अतो भेद इहापि स्याद्वाक्यसार्थक्यसिद्धये ॥

'समिधो यजति तनूनपातं यजति, [तै० सं० १।१।२] इत्यभ्यासात्कर्मभेदः स्वीकृतः । एवमिहाप्येकस्यां शाखायां[9] वारद्वयमाम्नायानर्थक्यापत्त्या विद्याभेद आवश्यकः । न चैकत्र[10] गुणार्थमाम्नातमपरत्र विद्यार्थमिति वाच्यम् । तथासत्येकत्रोक्तानां पुनराम्नातवैयर्थ्यात्, प्राप्ते कर्मण्यनेक गुणविधाने वाक्यभेदापत्तेश्च । अतो विद्याभेद इति प्राप्ते ब्रूमः ।

प्रत्यभिज्ञावलादत्र विद्यैकत्वं प्रतीयते ।
विधिरेकत्र विद्याया गुणानामपरत्र च ॥
गुणानां पुनरुक्तिस्तु प्रत्यभिज्ञानसिद्धये ।
वाक्याभेदोऽपि नास्त्यत्र क्रमस्यैव विधानतः ॥

---

१. ग० मा० 'लिंगी' इति पाठः ।
२. घ० ब० मा० 'ह्युपासनम्' इति पाठः ।
३. घ० मा० 'मचनञ्च' इति पाठः ।
४. घ० मा० 'मूलामूलिभावः' इति पाठः ।
५. घ० मा० 'विदित्यु' इति पाठः ।
६. ग० मा० 'अन्नमे' इति पाठः ।
घ० मा० 'अत्त' इति पाठः ।
७. ग० मा० 'मास्सत्यश्चेत्तसीमानं तत्' इति पाठः ।
घ० मा० 'भारनत्य' इति पाठः ।
८. ग० मा० 'व्यवस्थित' इति पाठः ।
९. घ० मा० 'कस्योषा एव खायाम्' इति पाठः ।
१०. ब० मा० 'कै' इति पाठो नास्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बृहदारण्यकाग्निरहस्ययोरेकविद्यात्वमेवाभ्युपगतव्यम् प्रत्यभिज्ञानान्न च वाक्यान्तरवैयर्थ्यं शक्यमेकस्य विद्याविधायकत्वेनापरस्य गुणविधायकत्वेनोपपत्तेः। न च विनिगमनाविरहः, यत्र बहूनां गुणानामाम्नातं तत्रैव भूयस्त्वेनोभयश्रुतीतिन्यायेन विद्याविधायकत्वोपपत्तेः। एकत्रोक्तानां गुणानामपरत्र पुनः कीर्तिनन्तु प्रत्यभिज्ञासिध्यर्थमेव, क्रमस्यैकस्य विधानाच्च न वाक्य भेदः। क्रमे च विधीयमाने तद्विशेषणतया गुणा प्राथ्यन्ते सर्वताया(?) इव पृष्टानामतो विद्यैकत्वं बृहदारण्यकाग्निरहस्योरिति।

सम्बन्धाधिकरणम्

सम्बन्धादेवमन्यत्रापि ॥ ११ ॥

बृहदारण्यके सप्तमप्रपाठके 'स यो हैतन्महद्यक्षं प्रथमजं वेद सत्यं ब्रह्म (बृ० ४।४।१) इति हिरण्यगर्भोपासनां विधाय तस्य हिरण्यगर्भस्योत्पत्तिं निरूप्य 'तद्यत्तत्सत्यमसौ स आदित्यो य एष एतस्मिन्मण्डले[1] पुरुषो यश्चायं दक्षिणेऽक्षन्पुरुषः[2], (बृ० ५।५।२) इत्यादित्यमण्डलाक्षिस्थाने-उपासनाङ्गतया विधायादित्यमण्डलस्थं पुरुषं तस्येत्यनुकृष्याहर्नामोपासनाङ्गत्वेन विहितान्तस्योपनिषदहमिति[3]। अक्षिस्थं पुरुषं प्रस्तुत्य तस्योपनिषदहमित्यहन्नामोपासनाङ्गत्वेन[4] विहितम्। तत्र संशय[5]। नामद्वयमुभयत्रोपासनीयमुत व्यवस्थादित्यमण्डलस्थस्याहर्नामित्वेनोपासनं कर्त्तव्यम्। अक्षिस्थस्याहन्नामत्वेनेति।

तत्रोत्पादकविधेरैक्यात्प्रतिषङ्गेन[6] पाठतः।
उपास्तेरेकता तस्मान्नाम्ने स्यादव्यवस्थितिः॥

उत्पत्तिविधिस्तावच्चेत्सत्यं[7] ब्रह्मेत्येकोऽवगम्यते ससंख्याद्यसमभिव्याहृतकर्मैक्यप्रयोजक[8] इत्युपासनैक्यमेव स्वीकार्यम्। किञ्च व्यतिसक्ततयापि[9] पाठो वर्तते, तस्यैवादित्यमण्डलस्थानमुक्त्वा[10] पुनरक्षिस्थानमुक्त्वा पुनर्मण्डलस्थस्य व्याहृतिशरीरत्वञ्चोक्त्वा-अक्षिस्थापि पुनरतदुक्त्वा पुनर्मण्डलस्थस्याहर्नामत्वमुक्त्वा-अहन्नामत्वमक्षिस्थं[11] प्रस्तुत्योक्त, अतो [12]विद्यक्यमेवावगम्यते। [13]विद्यैक्याच्चोभयानाम्नोरुभयत्र[14] सङ्गा एव। न चादित्यमण्डलस्थं

---

१. घ० मा० 'ए' इति पाठो नास्ति।
२. घ० मा० 'अदान्पुरुष इति पाठः।
३. घ० मा० 'उपनिषदुनिति' इति पाठः।
४. घ० मा० 'उपनिषद्दहमि' इति पाठः।
५. घ० मा० त्यशय' इति पाठः।
६. ग० मा० 'व्यतिषंगेन' इति पाठः।
७. घ० मा० 'तावद्वदमत्तत्यंब्रह्म' इति पाठः।
८. घ० मा० 'ससम्बाय' इति पाठः।
ग० मा० 'स च संख्याद्य' इति पाठः।
९. घ० मा० 'व्यतिषित्ततयापि' इति पाठः।
१०. घ० मा० 'मुक्त्वा 'इति पाठः।
११. घ० मा० 'अक्षिस्थानं' इति पाठः।
१२. घ० मा० 'विचेक्यम्' इति पाठः।
१३. घ० मा० 'विचेक्यम्' इति पाठः।
१४. घ० मा० 'प्योबस्यैव' इत्यधिकः पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रस्तुत्याहर्नाम्नोऽक्षिस्थं [१]प्रस्तुत्याहर्नाम्नश्चोक्तेर्व्यस्थानिर्देबलाद् व्यवस्थैव युक्तेति वाच्यम्। तस्येति सर्वनाम्नः पूर्वप्रस्तुतपरामर्शकत्वेन पूर्वञ्च[२] हिरण्यगर्भस्योपास्यस्य प्रस्तुतत्वेन तस्यैवोभयधर्मवत्त्वेनोपासनस्य वक्तव्यत्वादिति प्राप्ते ब्रूमः

उपासनैकता तावत्स्वक्तोक्तोपपत्तितः ।
व्यवस्थितोपदेशेन धर्माणान्तु व्यवस्थितिः ॥

पूर्वोक्तयुक्त्योपासनैकैवेति सत्यम्, तथापि नाम्नो नैव सङ्करः स्थानभेदेन प्रयोगभेदाभ्युपगमात्। [३]एकस्यैवाग्निहोत्रस्य सायङ्कालादिभेदेन प्रयोगभेदवत्। तथा च प्रयोगभेदेन नाम्नो व्यवस्थितिः व्यवस्थानिर्देशाद्रथन्तरे[४] प्रस्तूयमाने सम्मीलयेद्बृहति प्रस्तूयमाने 'समुद्रम् मनसाध्यायेदि'[५] त्यत्रेव। न च तत्रापूर्वभेदव्यवस्थोपपत्तिः, अत्राप्युत्पत्त्यपूर्वभेदस्यावश्यकत्वादपूर्वभेदाभावेऽपि [?] **'प्रतूर्भवांजिवाजिन्नाद्ववेत्स्वमभिदधाति[६] युंजाथि रासभं युमर्मिति यद्दृभसामीप्यत** (?) 'मन्त्रयोर्व्यवस्थादर्शनाच्च तस्येति च[७] सर्वनाम्नः पूर्वप्रस्तुतरूपेणैव[८] परामर्शकत्वाभ्युपगमेन मण्डलस्थत्वाक्षिस्थत्वपुरस्कारेणैव नाम्नो व्यवस्थितत्वाभ्युपगमात्। तस्मान्नाम्नोर्व्यवस्था। अत एवान्तरादित्यविद्यायामादित्यस्थनामादीनामक्षिस्थेन-अतिदेशे[९] उपपत्तेः[१०] तस्यैतस्येत्यादि (?)।

सम्भृत्यधिकरणम्

सम्भृतिद्युव्याप्त्यपि चातः ॥१२॥

राणायनीयानां[११] खिलेषु पठ्यते[१२] ब्रह्मज्यष्ठा वीर्यासंभृतानि ब्रह्माग्रे ज्येष्ठं दिवमाततानां ब्रह्म देवानां प्रथमोत जज्ञे तेनार्हति ब्रह्मणा स्पर्धितुं[१३]क' इत्यत्र संशयः, किं प्रतीयमानं सम्भृत्यादिशाण्डिल्यविद्यादिषूपसंहर्तव्यमुत तदगुणकमुपासनान्तरं विधीयत इति। तत्र पूर्वः पक्षः

विधिप्रत्ययराहित्यात्समाख्यावशतस्तथा ।
उपसंहार एव स्यादस्य[१४] विद्यारन्तेषु हि ॥

१. घ० मा० 'बलाष्यस्यैव इति पाठः।
२. घ० मा० 'च' इति पाठो नास्ति।
३. घ० मा० 'एकस्य''''प्रयोगभेदनत्' इत्यधिक पाठः ?।
४. घ० मा० 'देशानद्रथन्तरे' इति पाठः।
५. घ० मा० 'त्यत्रोवनच' इति पाठः।
६. ग० मा० 'सूत्रोक्तं वाजिन द्रव्येत्यश्वमभिदधाति' इति पाठः।
७. घ० मा० 'च' इति पाठो नास्वि।
८. घ० घा० 'रूपेणव' इति पाठः :
९. घ० मा० 'अतिदेश' इत्यधिकः पाठः।
१०. घ० मा० 'च' इति पाठो नास्ति।
११. सामशाखाभेदान्तर्गत = राणायणीयनामकः खिलग्रन्थे इत्यर्थः।
१२. घ० मा० 'पटयते' इति पाठः।
१३. घ० मा० 'ब्रह्मणास्यत्रितुं क इति यत्र' इति पाठः।
१४. घ० मा० 'सम्भृत्यादेरुपास्तिपु' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

खिलकाण्डमिति समाख्याबलेनान्यथा[१] शेषत्वावगमात्, स्वस्वतन्त्रविधिविधायक[२]प्रत्ययाभावेनासम्भवाच्च। क्वचिन्निवेशस्यावश्यकत्वे ब्रह्मणः[३] प्रत्यभिज्ञानद्वारेण शाण्डिल्यविद्यादिषूपसंहारः संभृत्यादेः। न च शाण्डिल्यविद्यायामात्मनो हृदयायतनत्वोक्त्या तस्य[४] परिच्छेदप्रतीतेर्व्याप्तिर्न संभवतीति वाच्यम्। औपाधिकपरिच्छेदवतोऽपि स्वाभाविकव्याप्तिमत्त्वस्य तत्र तत्रोक्तत्वादिति प्राप्तेरभिधीयते।

प्रत्यभिज्ञानराहित्यान्नास्य विद्यान्तरेषु वै।
युक्ता संहृतिरेवञ्च विद्यान्तरे[५] विधिर्भवेत्॥
खिलशाखागतपाठो[६] धर्मान्तरविवक्षया।
विधिप्रक्लृप्तिदोषश्च भवतोऽपि समो भवेत्॥

विद्यान्तराणामसाधारणप्रत्यभिज्ञाभावेन तत्रोपसंहारानुपपत्तेर्विद्यान्तरविधिरेव स्वीकार्यः। न च विध्यन्तरकल्पनागौरवम्, गुणविधिपक्षेऽपि विधिकल्पनस्यावश्यकत्वाद्विशिष्टविधिगौरवस्यागत्या सोढव्यत्वात्। खिलशाखापाठस्तु शाखाविशेषप्रयुक्ताध्ययनधर्मप्राप्त्यर्थ इति नोपसंहार इति।

पुरुषविद्याधिकरणम्

पुरुषविद्यायामिव चेतरेषामनाम्नानात् ॥१३॥

ताडिब्राह्मणे[७] पुरुषयज्ञः पठ्यते 'पुरुषो वाव यज्ञः' (छा० उ० ३।३।१६) इति तस्य चावयवस्त्रेधा विभज्यादिमध्यस्य चतुर्विंशतिवर्षात्मकस्य प्रातः सवनत्वञ्चतुश्चत्वारिंशत्संवत्सरात्मकस्य द्वितीयभागस्य माध्यन्दिनसवनत्वमष्टाचत्वारिंशत्संवत्सरात्मकस्य शिष्टस्य तृतीयसवनत्वञ्च प्रतिपाद्याशिषादीनां[८] दीक्षात्वाद्विकल्पनापूर्वकं मरणावभृथत्वमुक्त्वा[९] मन्त्रविशेषाणाञ्जपश्चोक्तः। तैत्तिरीयब्राह्मणे तु 'तस्यैवं विदुषो यज्ञस्यात्म्य'इत्यादिना कश्चिद्यज्ञं प्रकल्पयत्तस्यायं प्रातर्मध्यन्दिनञ्च तानि सवनानीति सवनत्रयप्रकल्पयन्मरणान्तादवभृथ[१०] इति मरणस्यावभृथत्वमुक्तम्[११]। अन्ये च पुनस्तत्र तत्र कीर्तितास्तत्र विचार्यते, किमनयोर्विद्यैकत्वमुत नेति तदर्थञ्च तैत्तिरीयकशाखायां विदुषो यज्ञस्येति सामानाधिकरण्येनान्वय उत[१२] वैय्यधिकरण्येनेति।

---

१. ग० मा० 'अस्यान्यथा' इति पाठः।
२. घ० मा० 'स्व' इत्यधिकः पाठः।
३. ग० च० मा० 'उपास्य' इति पाठः।
४. ग० मा० 'तस्य' इति पाठो नास्ति।
५. घ० मा० 'विद्यान्वर' इति पाठः।
६. ग० मा० 'खिलयागगतः' इति पाठः।
७. (क) छान्दोग्यशाखाविशेषे इति (वे० क० त० ३।३।२४)।
(ख) छान्दोग्यब्राह्मणे।
८. घ० मा० 'अशि' इत्यधिकः पाठः।
९. घ० मा० 'मुत्वा' इति पाठः।
१०. घ० मा० 'सवनत्रन' इति पाठः।
११. घ० मा० 'भूयत्व' इति पाठः।
१२. घ० मा० 'ननु' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्र पूर्वः पक्षः

सामानाधिकरण्यस्य[1] सम्भवेनोपपद्यते ।
अन्यथा कल्पनं तस्माद्विदुषो यज्ञत[2] भवेत् ॥
प्रधानैक्यादतो विद्या ह्यभिन्नैव प्रतीयताम् ।
विरुद्धानां विकल्पोऽत्र इतरेषान्तु संहृतिः ॥

सम्भवति सामानाधिकरण्ये[3] वैय्यधिकरणस्यान्यायत्वाद्विदुषो यज्ञस्येति विदुष एव यज्ञत्वावगमात् 'पुरुषो वाव यज्ञ' इत्यत्रापि पुरुषस्य यज्ञत्वावगमादुपास्यैक्यावगमान्मरणावभृथत्वादिसाम्याच्च[4] विद्यैक्यम् । एवञ्च सति विरुद्धानां दीक्षादीनां विकल्पोऽविरुद्धानान्तूपसंहार इति पूर्वपक्षः ।

सिद्धान्तस्तु

गुणानां भूयसां यस्माद्विरोधोऽत्र प्रतीयते ।
प्रत्यभिज्ञानविच्छेदान्न विद्यैक्यं भविष्यति ॥
सामानाधिकरण्यञ्च नोपपत्तिक्षमं भवेत् ।
वाक्यशेषविरोधेन यज्ञत्वन्नैव कल्प्यते ॥
तैत्तिरीयकवाक्यं हि विद्यायास्तावकं मतम् ।
ताण्डिब्राह्मणवाक्यन्तु विद्याविधिपरं भवेत् ॥

बहूनां गुणानां तत्र तत्र च विरुद्धानामुपलम्भात्प्रत्यभिज्ञाविच्छेदेन[7] विद्यैक्यानुपपत्तेः । किञ्च विदुषो यज्ञस्येति न सामानाधिकरणषष्ठ्यौ[8] 'यज्ञस्यात्मा यजमान' इत्यन्वयापत्तेः[9] । न ह्यभेदेकर्तृक्रियान्वयः[10] सम्भवति । अतस्तैत्तिरीयकशाखायां विद्या न विवक्षिता, किन्त्वोमित्यात्मानं युञ्जीतेति ससन्न्यासस्यात्मज्ञानस्य पूर्वं प्रस्तुतत्वेन तच्छेषोऽयमर्थवादः, छन्दोगशाखायान्तूपासनाविधिरतो न विद्यैक्यमिति ।

---

१. ग० मा० 'सामाधिकरण्यस्य' इत्यन्तः पाठो नास्ति ।

२. घ० मा० 'विदुषो यज्ञतः' इति पाठः ।

३. एकाधिकरणवृत्तित्वं यथा पर्वतो वह्निमान्धूमादित्यत्र वह्निधूमयोः सामानाधिकरण्यम्—एकाधिकरणवृत्तित्वमस्ति' व्यधिकरणन्तु तदनधिकरणवृत्तित्वमिति ।

४. घ० मा० 'मरणषभृथ' इति पाठः ।

५. ग० मा० 'त्वदुक्तन्नैव सम्भवि' इति पाठः ।

६. ग० मा० 'भाम्नानमर्थवादस्ततां भवेद्' इति पाठः ।

७. घ० मा० 'प्रत्यभिज्ञनविच्छेदः' इति पाठः ।

८. घ० मा० 'षष्ठि' इति पाठः ।

९. ग० मा० 'वाक्यशेषान्वयः' इति पाठः ।

१०. ग० मा० 'न ह्यभेदकतृतीयान्वयस्सम्भवति' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वेधाद्यधिकरणम्

वेधाद्यर्थभेदात् ॥१४॥

तैत्तिरीयशाखायां ब्रह्मविद्योपक्रमे 'शन्नो मित्रः' (तै० उ० १।१।१) इत्यादिमन्त्रः पठ्यते । वाजसनेयके प्रवर्ग्यः कौषीतकिब्राह्मणे[1] विद्योपक्रमे 'अग्निष्टोमः' पठ्यते । एवमन्यत्रापि सर्वविद्योत्पत्त्यादयो मन्त्राः पठ्यन्ते, तत्र संशयः । किमेषां ब्रह्मविद्याङ्गत्वमुत नेति तदर्थञ्च किं सन्निधानं लिङ्गादिभिस्समबलमुत दुर्बलमिति, यदापि दुर्बलं तदापि[2] किं लिङ्गादिकं सन्निधानस्य बाधकमुत नेति । तत्र पूर्वःपक्षः

सन्निधेश्शाब्दबोधे[3] हि हेतुत्वं सर्वसम्मतम् ।
लिङ्गादीनामपि त्वेतदुभयं तुल्यमिष्यते ॥
सन्निधेर्दुर्बलत्वेऽपि बाधस्तस्येह नोचितः ।
अविरोधादतस्तावद्विद्याशेषत्वमिष्यते ॥
मन्त्राणां कर्मणाञ्चापि सामर्थ्यस्यापि सम्भवात् ।
'शन्न' इत्यादिमन्त्राणां विज्ञानेऽपि कथञ्चन ॥

'शन्न' (तै० उ० १।१।१) इत्यादयो मन्त्राः प्रवर्ग्यादीनि च कर्माणि[4] विद्या शेष्याण्यापि स्युः सन्निधिबलात् । न च सन्निधेर्दौर्बल्यम्, शाब्दबोधे तस्यापि हेतुत्वात् । नहि सन्निधेरपेक्षाः शब्दाः शाब्दबोधजनयन्तीति कैश्चिदिष्यते । अतस्सन्निधिशामर्थ्ययोस्तुल्यत्वेन मन्त्राणामुभयत्र विनियोग एव न्याय्यः । प्रवर्ग्यादिकर्मणान्तु पुरस्तादुपसंहारः 'प्रवर्ग्येण प्रचरन्ति'इति वाक्येनानारभ्याधीतेन प्रसूतिभूतज्योतिष्टोमार्थतया विनियोगेऽपि सन्निधिना ब्रह्मविद्यार्थत्वमर्थः ।

न च 'शन्न' (तै० उ० १।१।१) इत्यादिमन्त्राणां ब्रह्मविद्यायाः प्रकाशकत्वाभावादध्ययनप्रकाशकत्वाच्चाध्ययनाङ्गत्वमेव युक्तं, न तु विद्याङ्गत्वमिति वाच्यम् । सन्निधिबलेन विद्याङ्गत्वे सिद्धे 'शन्न' इत्यादिमन्त्राणां कथञ्चिद्विद्याप्रकाशकत्वस्यैव वक्तव्यत्वात् । यथा च विद्याप्रकाशकत्वं तथोपपादितं ब्रह्मविद्याभरणे । सन्निधेर्दौर्बल्येऽपि विरोधाभावेन सन्निधिबलाद्विद्यायामपि विनियोगोऽस्तु । न चान्यत्र विनियुक्तानां प्रवर्ग्यादीनां कथं विद्यायां विनियोग इति वाच्यम् । बृहस्पतिसवस्य पुरोधादिफलार्थतया विनियुक्तस्यापि वाजपेयाङ्गतया विनियोगदर्शनाद्वाजपेयाङ्गभूतबृहस्पतिसवस्य यथा न कर्मान्तिरत्वं तथोपपादितमाकरे । अतो मन्त्राणां कर्मणाञ्च विद्याङ्गत्वमिति । सिद्धान्तस्तु

'शन्न' इत्यादिमन्त्राणां लिङ्गादध्ययनार्थता ।
कर्मणश्च प्रवर्ग्यादेर्वाक्यात् क्रत्वर्थता भवेत् ॥
लिङ्गवाक्यादितश्चापि सन्निधेर्दुर्बलत्वतः ।
तेन विद्यार्थता तेषान्न न्याय्या मूलहानतः ॥

१. घ० मा० 'कौषीतको ब्राह्मणे' इति पाठः ।
२. घ० मा० तदा किं' इति पाठः ।
३. ग० मा० 'शाब्द प्रत्ययहेतुत्वं सन्निधेस्सर्व सम्मतम्' इति पाठः ।
४. ग० मा० 'प्रवर्ग्यादीनि च कर्माणि' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'शन्न' इत्यादिमन्त्राणां 'ब्रह्म वदिष्यमि' इत्यादिलिङ्गेनाध्ययनार्थत्वस्यावगम्यमानत्वन[1] कर्मणां प्रवर्ग्यादीनामपि[2] पुरस्तादुपपादिते[3] 'प्रवर्ग्येण' इति वाक्येन ज्योतिष्टोमार्थत्वावगमेन च न विद्यार्थत्वम्। न च सन्निधाना-द्विद्यार्थत्वमपि स्यादिति वाच्यम्। सन्निधेर्लिङ्गापेक्षया दुर्बलत्वेन विद्यायामविनियोजकत्वात्। न च सन्निधेर्दुर्ब-लत्वेऽपि न[4] बाध्यत्वं लिङ्गादेर्विरोधाभावादिति वाच्यम्।[5] सन्निधिर्हि न स्वयमेव विनियोजकस्सविद्याया-आकाङ्क्षामुत्थाय तेन सहैकवाक्यतां सामर्थ्यश्रुतिञ्च[6] कल्पयित्वा विनियोजकः स्यात्।[7] स च न सम्भवति मन्त्राम्नातस्यालिङ्गेन श्रुतिं कल्पयित्वा-अध्ययने[8] विनियोगादेवाकाङ्क्षायाः शान्तत्वात्। तथा च सन्निधेश्श्रु-तिकल्पकत्वाभावेन विनियोजकत्वात्। अत एव 'इमामगृभ्णन्' (वा० सं० २२।२। इत्यादिमन्त्राणां श्रुत्या-अश्वरसनादाने विनियुक्तत्वात्। न लिङ्गागर्द्दभरसनादाने[9] विनियोग इति पूर्वतन्त्रे व्यवस्थापितम्। तथा च[10] सर्वप्रविध्येत्यादिमन्त्राणां विद्यासन्निधिपठितानामपि न विद्यार्थत्वमत्यन्तासामर्थ्यात्।[11] न च विद्यासन्निध्याम्नान वैयर्थ्यमिति वाच्यम्। अरण्याध्ययनादिधर्मप्राप्त्यर्थत्वात्। तस्मात् 'शन्न' इत्यादिमन्त्राणान्न विद्यार्थत्वमिति।

हान्यधिकरणम्

हानौ तूपायनशब्दशेषत्वात्कुशाच्छन्दस्तुत्युपगानवत्तदुक्तम् ॥१५॥

छन्दोगास्समामनन्ति 'अश्व इव रोमाणि विधूय पापञ्चन्द्र[12] इव राहोर्मुखात्प्रमुच्य धूत्वा शरीरमकृतं कृतात्मा[13] ब्रह्मज्ञो लोकमभिसम्भवामि' (छा० ८।१३।१) इति। तथा कौषीतकिनस्समामनन्ति 'तत्सुकृतदुष्कृते विधूनुते तस्य प्रिया ज्ञातयः सुकृतमुपयन्त्यप्रिया दुष्कृतम्' (कौ० ब्रा० उ० १।४) इति पुण्यपापयोर्हानमुपादानञ्च[14]। [15]शाट्यायनिनस्तु[16] 'तस्य पुत्रदायमुपयन्ति[17] सुहृदस्साधूकृत्यं द्विषन्तः पापकृत्यम्' इत्यामनन्ति। तत्र विचार्यते

---

१. घ० मा० 'व' इति पाठो नास्ति।
२. घ० मा० 'पुरस्हादुपतय्पदा' इति पाठः।
३. ग० मा० 'प्रवग्येणेति' इति पाठोनास्ति।
४. ग० मा० 'साध्यत्वम्' इति पाठः।
५. ग० मा० 'मूलोच्छेदात्' इति पाठः।
६. घ० मा० 'काल्पाद्वत्व' इति पाठः।
७. ग० मा० 'तच्च' इति पाठः।
८. घ० मा० 'कल्परत्वां' इति पाठः।
९. घ० मा० 'गर्धद्दम' इति पाठः।
१०. घ० मा० प्रविध्येत्यादि' इति पाठः।
११. घ० मा० 'भवघ्वत्यन्त' इति पाठः।
१२. घ० मा० 'इव राहो' इत्यधिकः पाठः।
१३. घ० मा० 'ब्रह्मलोक' इति पाठः।
१४. च० मा० 'उपासन च' इपि पाठः।
१५. च० मा० 'श····निन' इति पाठः।
१६. घ० मा० 'तु' इति पाठो नास्ति।
१७. घ० मा० 'सुहृद' इत्यधिकः पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हानमात्रं यत्र छन्दोगशाखायां श्रुतं तत्रोपायनमुपसंहर्तव्यमुत[1] नेति[2]। तत्र [3]श्रुतेनैवोपपन्नेऽर्थेनाश्रुतं कल्पनाक्षमम्। अतो[4] हानश्रुतौ तावदुपायस्य न सङ्गतिः।[5] शाट्यायनिशाखायां तु केवलोपायनं श्रूयमाणं हानमन्तरा नोपपद्यत इति। तत्र हानस्योपसंहारोऽस्तु[6] नाम, हानन्तु केवलं[7] श्रूयमाणं नोपायनमनपेक्षते तद्विनापि पर्यवसानसम्भवात्। ननूपायनं श्रुतमपि हानमन्तरोपपद्यत एव, न [8]ह्यत्रान्येन त्यक्तानामन्येन स्वीकरणरूपोपायनं[9] विवक्षितं [10]पुण्यपापयोर्विद्वदन्तः[11]करणनिष्ठयोरन्योन्योपभोगजनकत्वस्यैव[12] प्रकृते स्वीकृतत्वेन तस्य च विद्वद्गतत्वेऽप्युपपत्तेरिति चेन्न, 'तस्य पुत्रा दायमुपसंयन्ति[13] सुहृदस्साधूकृत्य द्विषतः[14] पापकृत्यम्' इति वाक्यस्वारस्यानुसारेण [15]विद्वत्स्वामित्वनिवृत्तिपूर्वकं [16]परस्वामिकत्वादानस्यैव प्रतीयमानत्वेनोपायनश्रवणे हानस्योपसंहार[17] आवश्यक[18] एव, हानश्रवणन्तु नोपायनमपेक्षत इति, श्रुतौ नोपायनस्योपसंहार इति प्राप्तेऽभिधीयते।

पुण्यपापप्रहाणं वा श्रूयते यत्र केवलम्।
तत्राप्युपायनं तावत्संहर्तव्यं प्रयत्नतः[19]॥

स्तुतिप्रकर्षलाभाय स्तावकापेक्षणं यतः।
दृश्यतेऽन्यत्र तेनापि ह्युपसंहार इष्यते॥

यत्र हानमात्रं श्रुतं तत्राप्युपायमुपसंह्रियते। न चान्यविधायामुक्तस्यान्यत्रोपसंहारानुपपत्तिः, स्तुतिप्रकर्ष-

---

१. घ० मा० 'मुत' इत्यधिकः पाठः।
२. ग० मा० 'तत्र पूर्व पक्षः' इति पाठः।
३. ग मा० 'श्रुतेनैवोपपन्नार्थे नाश्रुतं कल्पनास्पदम्' इति पाठः।
४. घ० मा० 'अतो आ हान' इति पाठः।
५. घ० च० मा० : 'शाघायनि' इति पाठः।
६. घ० मा० 'रो वस्तुनाम' इति पाठः।
७. घ० मा० 'केवलं' इति पाठोनास्ति।
८. घ० मा० 'त्यक्तानामन्येन' इति पाठः।
९. घ० मा० 'रूपो' इति पाठो नास्ति।
१०. ग० मा० 'किन्तु' इति पाठः।
११ घ० मा० 'विद्वदत्तः' इति पाठः।
१२. च० मा० 'गतयो' इति पाठः।
१३. च० मा० 'उपसन्ति' इति पाठः।
१४. ग० मा० 'द्विषन्तः पापकृत्यामिति' इत्यन्तः पाठो नास्ति।
१५. ग० मा० 'स्वामिक' इति पाठः।
१६. घ० मा० 'क' इति पाठो नास्ति।
१७. घ० मा० 'संहारमावश्यक' इति पाठः।
१८. ग० मा० 'त्वात्' इति पाठः।
१९. घ० मा० 'प्रचयतः' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लाभार्थं तदुपसंहारस्य[1] कामादित्यधिकरेण व्यवस्थापयिष्यमाणत्वादेर्विंशो वादतोऽसावादित्य[2] इत्यादि द्वादश-मासा इत्याद्यर्थवादापेक्षणाच्च। तस्मादुपायनोपसंहारे[3] न काचिदनुपपत्तिः[4]।

एवं 'वा अश्व इव रोमाणि' (छा० ८।१३।१) किं विधूननं कर्मणां किञ्चित्कालं फलप्रतिबन्ध उत विनाश इति संशयः। तत्र पूर्वः पक्षः

तत्र विधूननं कम्पनं स्यात्स्मरणाच्च प्रयोगतः।
किञ्चित्कालन्तु विदुषः फलाजनकमिष्यते॥

धूञ्कम्पन[5] इति स्मरणाद्दोधूयन्ते ध्वजाग्राणीति लोकप्रयोगाच्च विधूननं कम्पनमेव। तच्च मुख्यं बाधि-तमिति कश्चित्कालं फलजनकतायां प्रतिबन्ध एव कर्मणाङ्गीकार्यः।

सिद्धान्तस्तु

न हि हानं विनान्यस्य तत्स्वामित्वं प्रकल्प्यते।
विधूवनमता हानं द्रष्टव्यन्न तु कम्पनम्।

न हि विदुषा-अत्यन्तयोः पुण्यपापयोरन्येन ग्रहणं सम्भवति। अतो विधूननं हानमेव स्वीकार्यम्। तच्च विद्वत्स्वा-मिकत्वाभावरूपन्न तु मुख्यम्। अन्तःकरणधर्मयोः पुण्यपापयोस्त्यागासम्भवादतोऽन्यत्र स्मृतिप्रयोगानुसारेण कम्पनार्थकत्वेऽपीह हानमेवार्थ इति।

---

१. मामादी तरत्र तत्र चायतनादिभ्यः (ब्र० सू० ३।३।२५)
२. ग० मा० 'वा इतो स्यावादित्य' इति पाठः।
३. घ० मा० 'उपसंहारो न' इति पाठः।
४. ग० मा० 'इति प्रथमवर्णकं इति पाठः।
५. 'पाणिनेः धातुपाठः।' नहि हानं विधूननमित्यभिधीयते। धूञ् कम्पने इति स्मरणात्। दोधूयन्ते ध्वजाग्राणीति च वायुना चाल्यमानेषु ध्वजाग्रेषु प्रयोगदर्शनात्। तस्माच्चालनं विधूननमविधीयते (शा० भा० ३।२।२६) 'ननु चालने मुख्यो विधूनशब्दस्त्यागे तु गौण इति नेत्याह प्राचुर्येणेति। 'अवधूत' इत्यादौ त्यागे धुनोतेः प्रयोगदर्शनादित्यर्थः। अश्वो यथा जीर्णानि रोमाणि विधूनुते त्यज्यत्येवं पापं विधूय यथा चन्द्रो राहोर्मुखात्प्रमुच्च्य भास्वरो भवति एवं धूत्वा शरीरं स्वच्छो भूत्वा ब्रह्मलोकमभिसंभवामि प्राप्नोमीत्यन्वयः' (वै० क० त० ३।३।२६) 'अबधूतेति, लोके त्यक्तसकलकर्माणमवधूत-माहुस्तत्र धूननस्य त्यागार्थत्वं प्रसिद्धम्। यथाप्यवधूनशब्दस्योक्तार्थपरतायामवधूतकर्मेति प्रयोक्तव्यं तथापि विभक्तधनेषु भातृषु विभक्ता भ्रातर इतिवद्गम्यमानत्वादुत्तरपदस्याप्रयोगः। धातूनान्निर्दिष्टार्थंव्यतिरेकेणाप्यर्थान्तरसद्भावे शाब्दिका ज्ञापकमाहुः' (वै० क० त० ख० पृ० ५८९) यद्यपि किञ्चिद् व्यत्ययेन शक्तिभाष्येऽपि व्यक्तीकृतम्। 'नात्र चालने धु धातोः प्रयोगः। किन्तु त्यागे सम्बन्धत्यागे, अत्यन्तोच्छेदे—इति फलितम्, धातूनामनेकार्थतया स्वयं श्रुत्यैव तद्विवरणात्।' (शक्तिभाष्यम्, पृ० २९१)।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

साम्परायाधिकरणम्

साम्पराये[1] तर्त्तव्याभावात्तथा ह्यन्ये ॥१६॥

कौषीतकिनोऽर्चिरादिमार्गं प्रस्तुत्य 'स आगच्छति विरजां नदीं तां मनसाऽत्येति तत्सुकृतदुष्कृते विधूनुते तस्य प्रिया ज्ञातयः सुकृतमुपयन्त्यप्रिया दुष्कृतम् (कौ० ब्रा० उ० १।४) इति समामनन्ति[2] । तत्र पर्यङ्कब्रह्मोपासकस्य विरजानद्यतिक्रमणोत्तरं पापनिवृत्तिं प्रतिपादयति तद्वाक्यमुत नेति । संशये पूर्वपक्षः

पर्यङ्कब्रह्मविदुषो विरजानद्यतिक्रमात् ।
अनन्तरं पुण्यपापक्षयस्तद्धेतुकत्वतः ॥

पर्यङ्कोपासकस्य विरजानद्यतिक्रमणान्तरमेव पुण्यपापक्षयस्तदनन्तरमेव तत्कीर्तनात् । न च अश्व इव रोमाणि विधूय पापम्, (छा० ८।१३।१) इति छन्दोगवाक्येन शरीरात्प्राणोत्क्रान्तेः पूर्वमेव [3]पापनिवृत्तिरुक्तेस्तस्यापि प्रागेवोत्क्रान्तेः पापनिवृत्तिरस्त्विति वाच्यम् । तस्य वाक्यस्य [4]विद्यान्तरविषयत्वात् । न च तथापि विद्याफलप्रतिबन्धकीभूतपापादिक्षयस्य प्रागेवोत्क्रान्तेरपेक्षितत्वात् । सामर्थ्यानुसारात्पाठक्रमं बाधित्वा प्रागेव पुण्यपापक्षयः कल्प्यत इति वाच्यम्, 'सुकृतदुष्कृते विधूनुते'[5] (कौ ब्रा० उ० १।४) इति वाक्ये तच्छब्दस्य [6]तस्मादित्यर्थकस्य सर्वनाम्नः पूर्वप्रस्तुतविरजानद्यातिक्रमणपरामर्शकत्वेन तद्धेतुकत्वबाधनेन चन्द्रसंवादादिनिर्वाहाय शरीरपरिग्रहस्यावश्यकत्वेन चार्थिकमपि क्रमं बाधित्वानन्तरमेव पुण्यपापक्षयकल्पनात् । तस्माद्धि नैव[7] पापक्षय इति ।

सिद्धान्तस्तु

तच्छब्दो हि प्रधानत्वाद्विद्यायाः प्रतिपादकः ।
अतश्चार्थक्रमेणैव पापस्यापीह बाधनम्[8] ॥

विद्याफलस्य पापक्षयापेक्षितत्वेन सामर्थ्यानुसारेण पाठक्रमस्य बाधपूर्वकमुत्क्रान्तेः प्रागेव पुण्यपापक्षयः प्रकल्प्य 'तत्सुकृतदुष्कृते' (कौ० ब्रा० उ० १।४) इति वाक्यस्थ तत्पदमपि विद्यायाः प्रधानत्वेन विद्यामेव परामर्शति नत्वयम्[9] । ततश्चाश्रौतक्रमाभावः । चन्द्रसंवादादिकन्तु पर्यङ्कस्थं ब्रह्मसंवादादिवदुपपन्नम् । अतः प्रागेवोत्क्रान्तेः पुण्यपापक्षय इति ।

---

१. सम्यक् परस्य पुरुषोत्तमस्याऽयो ज्ञानं येन सम्परायो भक्तिमार्गः तस्मिन् प्राप्तव्ये सति तर्तव्यस्य पापस्याभावाज्ज्ञानेनैव, भक्त्या न पापनाशः, नराणां क्षीणपापानामिति वाक्यात्पूर्वमेव नष्टत्वात् । (ब्र० सू० बृ० मरीचिका पृ० १२६) 'साम्पराये परशिवब्रह्मलोकप्राप्तिहेतुभूतदेवयानमार्गे विरजानद्यतिक्रमणानन्तरं शैवदीक्षावतां दिव्योपासकानां सुकृतदुष्कृतक्षयो भवति' (श्रीमद् भा० ३।३।२७) 'साम्परायः = मरणसमयस्तस्मिन् सुकृतदुष्कृतहानं भवति विद्यसामर्थ्यात्' (शक्तिभाष्यम्, पृ० २९३) ।

२. घ० मा० 'स सामनन्ति' इति पाठः ।

३. घ० मा० 'निवृत्तिरुक्तैः' इत्यधिकः पाठः ।

४. घ० मा० 'विद्याफल' इत्याधिकः पाठः ।

५. 'धुनुते' इत्यौनिषत्कः पाठः ।

६. घ० मा० 'तद्धेतुत्वाबोधनेन' इति पाठः ।

७. ग० मा० 'तस्माद्यध्वन्येव' इति पाठः ।

८. ग० मा० 'पापस्यापबाधनम्' इति पाठः ।

९. ग० मा० 'न तु सन्निहितमपि' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गतेरर्थवत्त्वाधिकरणम्

गतेरर्थवत्त्वमुभयथान्यथा हि विरोधः ॥१७॥

अर्चिरादिमार्गः श्रूयमाणो निर्गुणब्रह्मविद्यायामस्त्युत नेति संशये पूर्वपक्षः ।

निर्गुणब्रह्मविद्यायां गतेरस्त्युपसंहृतिः ।
'ये चमेति' इति वाक्ये तस्या सर्वत्र बोधनात् ॥

'ये चमेऽरण्ये श्रद्धातपः इत्युपासत' (छा० ५।१०।१) इति वाक्येन सर्वस्यामि ब्रह्मविद्यासु मार्गबोधनेन निर्विशेष-ब्रह्मविदोऽपि मार्गः स्वीकार्यः । अत एव निर्विशेषविद्याप्रकरणे काठके 'शतञ्चैका हृदयस्य नाड्यः' (छा० ८।६।६) इत्ययं मन्त्रः पठ्यते[१] । तथा च ब्रह्मलोकं प्राप्यैव मुच्यत इति । सिद्धान्तस्तु

बहुश्रुत्यनुरोधेन त्विह मोक्षस्य निर्णयात् ।
'ये चेमे' इति वाक्यं हि सगुणे गतिबोधकम्[२] ॥

'ब्रह्म वेद ब्रह्मैव भवति' (मु० उ० ३।२।९) 'न[३] तस्य प्राणा उत्क्रामन्ति' (बृ० ४।४।६) 'अत्र ब्रह्म समश्नुत' (बृ० ४।४।७, कठ० १।३।१४) इत्यादिशास्त्रपर्यालोचनया मोक्षस्यैहिकत्वावगमेन तत्र गतेरनुपयोगः 'ये चेमे' (छा० ५।१०।१) इति वाक्यन्तु सगुणब्रह्मविद्यायामेव सर्वत्र गतिबोकन्न तु निर्गुणविद्यायामपि 'शतञ्चैका च' (छा० ८।६।६) इति वाक्यन्तु श्रावकमिति निर्गुणविद्यायां गत्युपसंहारः ।

अनियमाधिकरणम्

अनियमः सर्वासामविरोधश्शब्दानुमानाभ्याम् ॥१८॥

सगुणब्रह्मविद्यायामपि[५] यत्र गतिः श्रूयते तत्रेव सा[६], उतान्यत्रापीति विशये पूर्वः पक्षः

सगुणासु च सर्वासु गतिर्नैवोपपद्यते ।
यत्राम्नाता तु सर्वासु अन्यथा स्यादनर्थकम् ॥
यदुच नार्चि तत्रैव ह्यन्यथा स्यादनर्थकम् ।
उपकौसलविद्यास्थमथेत्यादि भवेद्ध्रुवम् ॥

---

१. घ० मा० 'यष्पते' इति पाठः ।
२. च० मा० 'बन्धकम्' इति पाठः ।
३. म० मा० 'न' इति पाठो नास्ति ।
४. घ० मा० 'सर्वेषां' इति पाठः ।
५. घ० मा० 'ब्रह्म' इत्यधिकः पाठः ।
६. घ० मा० 'सा' इत्यधिकः पाठः ।
७. घ० मा० 'सगुणा सं च ह्य वार्ख' इति पाठः ।
८. ग० मा० 'अभ्युपेयते' इति पाठः ।
९. ग० मा० 'स्यादनर्थकम्' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सगुणब्रह्मविद्यास्वपि यत्र गतिश्श्रूयते तत्रैव, न तु सर्वासु, अन्यथा 'यदु चैवास्मिञ्छव्यं कुर्वन्ति यदु च नार्चिषमेवाभिसम्भवन्ति' (छा० ४।१५।५) इति वाक्यवैय्यर्थापत्तेः। 'ये चेमे (छा० ५।१०।१) इति वाक्यन्तु स्तावकत्वेन कथञ्चन नेयमिति। सिद्धान्तस्तु

'ये चेमे' इति वाक्येन गतेस्सर्वत्र बोधनात्।
अन्यथानर्थकं तत्स्यादतत्सर्वासु सा भवेत्॥
सर्वं कर्मानपेक्षत्वमथेत्यादि ब्रवीति हि।

यदि हि न सर्वासु सगुणब्रह्मविद्यास्वर्चिरादिमार्गो नाभ्युपगम्यते तदा 'ये चेमे' इति वाक्यमप्राप्तार्थत्वेनानुवादार्थत्वेनानुपपत्तेरनर्थकमेव स्यादतो (यासु) सगुणब्रह्मविद्यासु मार्गप्रतिपादकमित्यङ्गीकार्यम्। अत एव वाजसनेयिनः 'श्रद्धा सत्य' इति ब्रह्मार्थकसत्यशब्दं पठन्ति। किञ्च सगुणब्रह्मविदां सर्वेषां 'तत्क्रतु न्यायेन' ब्रह्मलोक प्राप्तेरावश्यकत्वेन तत्रार्चिरादिमार्गं विहाय मार्गान्तरस्याभावेनार्चिरादिमार्ग आवश्यकः। अत एव मार्गद्वयभ्रष्टानां कीटादिभावस्तत्रोच्यते। उपकोसलविद्यास्थवाक्यन्तु शवकर्मादिकं विनैवार्चिरादिमार्गप्राप्तिर्भवति विदुष इति प्रतिपादनायेति सर्वमनवद्यम्।

यावदधिकाराधिकरणम्

यावदधिकारमवस्थितिराधिकारिणाम् ॥१६॥

ब्रह्मविद्याया मोक्षहेतुत्वमस्ति न वेति संशये पूर्वःपक्षः

ब्रह्मविद्या न मोक्षस्य हेतुस्तस्याश्च जन्मनः।
दर्शनाद्धि वसिष्ठादेः प्रारब्धक्षेणेऽपि वै॥

ब्रह्मविद्या न मोक्षसाधनं तस्यां सत्यामपि वसिष्ठादेर्मैत्रावरुणाभ्याञ्जन्मदर्शनात्। न च प्रारब्धवशाद्देहान्तरोत्पत्तिरिति वाच्यम्। प्रारब्धं हि कर्म एतद्देहारम्भकमेतद्देहे उपपत्ते[3] तन्नष्टमिति सञ्चितकर्मण एव देहारम्भकत्वस्याभ्युपगन्तव्यत्वेन ब्रह्मविद्यायाः फलसाधनत्वानुपपत्तेरिति।

सिद्धान्तस्तु

एकस्य कर्मणस्तावद्बहुदेहेषु हेतुता।
शास्त्रेषु बहुशो ज्ञाता तेन प्रारब्धकर्मणा॥
देहान्तरगृहीतिस्स्यात्सत्यपि ब्रह्मदर्शने।
एवञ्च ब्रम्हविद्येति वाक्यं यन्मोक्षहेतुता॥
बोधयद्ब्रम्हविद्यायाः दृष्टं तदपि युज्यते।
ततश्च ब्रम्हविज्ञानं मोक्षहेतुरितिस्थितम्॥

---

१. घ० मा० 'शव' इति पाठः।
२. च० मा० 'क्षपणेऽपि' इति पाठः।
३. घ० मा० 'देहे पपत्तेः' इति पाठः।
४. घ० मा० 'शास्त्रानि न जोवेश्वराशश्वरस्य पासकर्त्रत्वानुपपत्ते। अगो द्वणि''''''ज्ञात तेन ब्रारब्व कर्मणा॥
५. ग० मा० 'वेदेति' पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ब्रह्मविद्या मोक्षं प्रति हेतुरेव वशिष्ठादिजन्मनोऽपि प्रारब्धादेवोपपत्तेः प्रारब्धं हि कर्मं यत्फलदानाय[1] प्रक्रान्तमेकस्य च कर्मणोऽनेकजन्महेतुत्वे श्वसूकरखरोष्ट्राणामित्यादिवचनादवगतेस्सत्यपि ब्रह्मज्ञानेऽनेकदेहारम्भकत्वोपपत्तेः, 'ब्रह्म वेद ब्रह्मैव भवति' (मु० उ० ३।२।९) इति शास्त्रं ब्रह्मज्ञानसमकालं मोक्षं दर्शयदुपपन्नतरं भवति। तस्माद्ब्रह्मज्ञानं[2] मोक्षहेतुरिति सिद्धम्।

अक्षराधिकरणम्

अक्षरधियां त्ववरोधस्सामान्यतद्भावाभ्यामौपसदवत्तदुक्तम्।

अस्थूलमण्वादयो निषेधास्सर्वब्रह्मविद्यायामुपसंहर्तव्या नेति संशये पूर्वपक्षः

स्थूलत्वादिधर्माणां[3] संहृति नैव विद्यते।
सत्यादिगुणयोगेन ब्रह्मावगतिसम्भवात्॥

अस्थूलत्वादिधर्मा नोपसंहर्तव्यास्तेषां ब्रह्मस्वरूपानन्तर्गतत्वात्। न च तेषामप्यभावरूपत्वेनाधिष्ठानरूपत्वाद्ब्रह्मरूपत्वमस्तीति वाच्यम्। सत्यादिपदेन तादृशाधिष्ठानलाभेनास्थूलादिशब्देन तद्बाधनवैयर्थ्यात्। न च सृष्ट्यादिवाक्यं ब्रह्मणस्सप्रपञ्चावगमात्तन्निषेध आवश्यक इति वाच्यम्। एवमप्यनन्तपदेन 'अथात[4] आदेशो नेति तीत्यनेन च सर्वद्वैतनिषेधसिद्धरस्थूलत्वात् ह्युपसंहारो व्यर्थ इति।

सिद्धान्तस्तु

जीवब्रह्मैक्यविज्ञानात्प्रतिबन्धकनुत्तये।
अस्थूलत्वादिधर्माणामुपसंहार इष्यते॥

ईश्वरस्य जगदुपादानत्वेन सप्रपञ्चतायामवगतायां स्थूलोऽहमन्धोऽहमित्यादिप्रतीत्या जीवस्य देहेन्द्रियादिधर्मवत्तायामवगतायां तयोरैक्यज्ञानन्न सम्भवतीत्यतः स्थौल्यादिधर्माणां मिथ्यात्वज्ञापनायास्थूलमनण्वित्यादिभिर्वायुनाकाशमित्यादिभिश्च निषेध आवश्यक इति सिद्धमुपसंहार इति।

इयदधिकरणम्

इयदामननात् ॥२१॥

'ऋतं पिबन्तौ सुकृतस्य लोक' (क० उ० १।३।१) इति कठवल्यां पठ्यते 'द्वा सुपर्णा सयुजा सखाया' (मु० उ० ३।१।१) इति मुण्डकादौ पठ्यते। उभयत्रापि किमेकविद्यात्वमुत विद्याभेद इति संशये पूर्वः पक्षः

'ऋतमित्यादिवाक्यं हि संसारद्वयबोधकम्।
'द्वा सुपर्णेति' वाक्यन्तु जीवेशप्रतिपादकम्॥

---

१. ग० मा० 'प्रवृत्तं तत्फलं जनयित्वैव नश्यति' इति पाठः।
घ० मा० यांच पाठानां विपरीत क्रमो दृश्यते।
२. घ० मा० 'तस्मा ब्रह्मज्ञानं' इति पाठः।
३. ग० मा० 'नास्थूलत्वादि' इति पाठः।
च० मा० 'अस्थूलत्वादि' इति पाठः।
४. घ० मा० 'अथात आद शानेति' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अतो विषयभेदेन भिन्ना विद्या तयोर्भवेत् ।
तस्मादेकत्र पठिता नापरत्र[1] भवन्ति वै ॥

ऋतं पिबन्तौ' (क० उ० १।३।१) इति वाक्ये प्रतिपाद्यमानौ पिबन्तौ न जीवेशावीश्वरस्य पानकर्तृत्वानुपपत्तेरतो 'द्वौ जीवौ ग्राह्यौ' द्वासुपर्णौ' (मु० उ० ३।१।१) इति मन्त्रे त्वेकस्य कर्मफलाशनमुच्यतेऽन्यस्य त्वनशनमतस्तत्र[2] प्रतिपाद्यमानौ जीवेशावतो[3] वेद्यभेदाद्विधाऽभेदोऽतो न[4] परस्परं गुणोपसंहारः । न च पिबन्तावित्यत्रच्छत्रिन्यायेन पिबदपिबतोर्लक्षणाया प्रतिपादनं युक्तं लक्षणाया एव दोषत्वात् । न च सोऽपि[5] प्रकरणानुसारादङ्गीकार्येति वाच्चम् । प्रकरणापेक्षया श्रुतिर्बलीयस्त्वादिति । अत्राभिधीयते

आम्नायस्य सरूपत्वात् द्वयोर्जीवेशबोधनम् ।
एष्टव्यं लक्षणावृत्त्या पिबच्छब्दः कन्वन ॥
तयोस्तौ[6] विषयैक्येन विद्यैकत्वस्य निर्णयः ।
ततश्चैकत्र पठिता गुणा अन्यत्र यान्ति वै ।

'ऋतं पिबन्ता' (क० उ० १।३।१) वित्यत्र पिबच्छब्दप्रकरणाद्यनुसारेण लक्षणया जीवेशयोः प्रतिपादकः न[7] तु जीवयोः प्रतिपादकस्तात्पर्योपेतप्रकरणानुसारित्वाल्लक्षणापि न दोषाय । किञ्चाम्नायसारुप्येण द्वयोरप्येकार्थत्वमेव स्वीकार्यमतो वेद्यैक्याद्विद्यैक्यं गुणोपसंहारश्चेति सिद्धम् ।

अन्तरत्वाधिकरणम्

अन्तरा भूतग्रामवत्स्वात्मनः ॥ २२ ॥

उषस्तिब्राह्मणे 'यत्साक्षादपरोक्षाद्ब्रह्म, (बृ० ३।५।१),' य आत्मा सर्वान्तरस्तमेव[8] व्याचक्ष्व (बृ० ३।५।१) इति प्रस्तुत्य 'यः प्राणेन प्राणति बृ० ३।४।१) इत्यादि पठ्यते । कहोलब्राह्मणेऽपि' यदेव साक्षादपरोक्षाद्ब्रह्मे' (बृ० ३।५।१) त्युपक्रम्य' योऽशनायापिपासे शोकंमोहं जरांमृत्युंमत्येति (बृ० ३।५।१) इत्यादि पठ्यते[9] । तत्र संशयः किमुभयत्राप्येकविद्याप्रतिपादनमुत भिन्नविद्याप्रतिपादनमिति । [10]तत्सिद्धार्थमेतच्चिन्तनीयं[11] किमेकत्र जोवः प्रतिपाद्यते परत्र ब्रह्म उतोभयत्रापि प्रत्यगभिन्नं ब्रह्मेति । यदाप्युभयत्र प्रत्यगभिन्नं ब्रह्म प्रतिपाद्यते तदाप्येक शङ्काविशेषनिवृत्त्यर्थत्वं लभ्यये नेति । तत्र पूर्वः पक्षः

---

१. च० मा० 'अपरत्र' इति पाठः ।
२. घ० मा० 'त्वशनमतः' इति पाठः ।
३. घ० मा० 'जीवेशा अतो' इति पाठः ।
४. घ० मा० 'भेदे अतो न' इति पाठः ।
५. घ० मा० 'सापि' इति पाठः ।
६. ग० मा० 'ने मोती' इति पाठः ।
७. घ० मा० 'ननु' इति पाठः ।
८. घ० मा० 'तमेत्र' इति पाठः ।
९. घ० मा० 'पठयते' इति पाठः ।
१०. घ० मा० 'ततत्सिद्ध' इति पाठः ।
११. घ० मा० 'चिन्तन यं' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उषस्तिब्राह्मणं तावज्जीवस्य प्रतिपादकम् ।
प्रमाणादेर्जीवलिङ्गात् दृष्टत्वादेश्च कीर्तनात् ॥
अशनायादिराहित्यं लिङ्गाद्ब्रह्म प्रबोधकम् ।
कहोलब्राह्मणं तस्माद्गुणानां पोपसंहृतिः ॥
द्वयोर्ब्रह्मात्मबोधित्वप्यभ्यासन्यायतो भवेत् ।
विद्याभेदोऽन्यथा हि स्याद् द्विराम्नानमनर्थकम् ॥

उषस्तिब्राह्मणे कहोलब्राह्मणे च विद्याभेद एव स्वीकार्यो वेद्यभेदात्तथा हि, उषस्तिब्राह्मणे तावत् 'कतम आत्मा सर्वान्तर' (बृ० ३।५।१) इत्युषस्तिना पृष्टो याज्ञवल्क्यः 'यः प्राणेन प्राणिति स आत्मा सर्वन्तिर' (बृ० ३।४।१) इत्युत्तरं दत्तवान् । तदनन्तरञ्च पुनरुषस्तिना परोक्षतयेवात्मानं प्रदर्शयति, भवानतः प्रत्यक्षं मे दर्शयत्विति पृष्टो याज्ञवल्क्येन 'द्रष्टारं पश्येत् । (बृ० ३।४।२) इत्यादिनोत्तरमुक्तवान् । न हि प्राणनं द्रष्टृत्वञ्च जीवादन्यस्य सम्भवति । अत उषास्तिब्राह्मणे जीव एव प्रतिपाद्यः । न च 'यत्साक्षादपरोक्षाद्ब्रह्म (बृ० ३।४।१) इत्युपक्रम बाक्येन ब्रह्मशब्दस्वारस्यानुसारेणोपसंहारस्थप्राणितीत्यादिशब्दानां लक्षणादिभिः कथञ्चिन्नेयं ब्रह्मपरतयोचितमिति बाच्चम् । [1]साक्षादपरोक्षत्वप्रष्टुरुषस्त्यात्मत्वप्राणनादिबहुजीवलिङ्गानुसारेणेदं ब्रह्म यातीतिवदेकस्यैव ब्रह्मपदस्यान्यथा नेयत्वात् विप्रतिषिद्धधर्माणामिति न्यायादत उषस्तिब्रह्मणजीवपरमेव कहोलब्राह्मणन्तु ब्रह्मपरमैवाशनायाद्यन्यलिङ्गात् । अतो वेद्यभेदाद्विद्याभेदे गुणानुपसंहारः । यदि चोभयत्रापि प्रत्यगभिन्नब्रह्मैव बोध्यत इति स्वीक्रियते तदापि विद्याभेद एवाभ्यासन्यायादन्यथा द्विराम्नानमनर्थकं स्यादिति ।

अत्रोच्यते

आम्नायस्यैकरूपेण जीवाभिन्नपरात्मनः ।
प्रतिपादनमत्रेष्टन्न जीवपरमात्मनोः ॥
शङ्काविशेषनुत्यर्थं पुनः पाठो भविष्यति ।
तत्त्वमस्यादिवत्तस्माद्गुणानामुपसंहृतिः ॥

उषस्तिकहोलब्राह्मणयोः 'यत्साक्षादपरोक्षाद् ब्रह्मेति (बृ० ३।४।१) यदेव साक्षादपरोक्षा द ब्रह्म' (बृ० ३।५।१) इति चैकरूपेण प्रतिपादनादुभयत्रापि प्रत्यगभिन्नं ब्रह्मैव प्रतिपाद्यते । न तूषस्तिब्राह्मणो जीवः कहोलब्राह्मणे च ब्रह्मेति । द्विराम्नातं[2] तु-अशनायादिमतो जीवस्य ब्रह्मणैक्यं कथमिति शङ्काया जीवस्याप्यशनायादिकं कल्पितमिति प्रतिपादनार्थं 'तत्त्वमसि (छा० ६।१३।३) इति नवकृत्वोऽभ्यासवत् । अतो विद्यैक्याद्गुणोपसंहार इति ।

व्यतिहाराधिकरणम्

व्यतिहारो विशिषन्ति होतरवत् ॥२३॥

'तद्योऽसौ[3] सोऽहं तेऽसौ योऽहं त्वं वाहमस्मि भगवो देवते अहं वै त्वमसि' इत्यादिसमाम्नातारः समामनन्ति, तत्र संशयः । किञ्जीवे ब्रह्मदृष्टिः कर्तव्या उत यथाम्नानमुभयत्रोभय दृष्टिरिति ।

---

१. घ० मा० 'प्रष्टरुष' इति पाठः ।
२. घ० मा० 'द्विराम्नानम' इति पाठः ।
३. घ० मा० 'तद्योहं सो' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

किं प्राप्तञ्जीव एव ब्रह्म दृष्टिरिति। कुतः

जीवात्मना यदि ब्रह्म ध्यातव्यं स्यात्तथा सति।
निकृष्टजीवरूपत्वं ब्रह्मण्यापादितं भवेत् ॥
तथा चानर्थ एव स्याल्लौकिकव्यवहारवत्।
द्विराम्नानन्तु[1] दार्ढ्यार्थं ब्रह्मदृष्टिरतस्थिता ॥

'तद्योऽहं सोऽसौ' इत्यादौ जीव एव ब्रह्मदृष्टिकर्तव्या न तु ब्रह्मणि जीवदृष्टिः। तथात्वे जीवगत-संसारादीनामपि ब्रह्मण्यापादनेन ब्रह्मणि निकृष्टत्वबुद्धिप्रसङ्गेनेश्वरस्य कोपप्रसक्त्यानर्थप्रसङ्ग एवोपासकस्याथ लोकेऽयं राजामात्य मृत्य इति व्यवहारस्य राजकोपद्वारा निष्ठापातः। द्विराम्नानन्तु जीवब्रह्माभेद दार्ढ्यर्थमिति। प्राप्तेऽभिधीयते—

व्यत्यासाम्नानतस्तावद्द्विरूपा[2] दृष्टिरिष्यते।
चैतन्यांशं पुरस्कृत्य ब्रह्मजीवात्मना यदि ॥
दृश्यते कस्तदा दोषो येन सा[3] त्यक्ष्यते त्वया।
तस्मादाम्नायसिध्यर्थं दृष्टिद्वयमिहेष्यते ॥

यदि ह्येकरूपैव दृष्टिरिष्येत तर्हि व्यतिहारेणोपदेशो न क्रियेत, (तदा) दार्ढ्यस्याभ्यासेनापि सम्भवादतो व्यत्ययाम्नानबलादुभयथा दृष्टिः स्वोकार्या। न च जीवात्मादर्शनान्निष्कर्षापत्तिः। जीवचैतन्यस्य[4] दृश्यमानत्वेन दोषाभावादहंग्रहोपासनेषु सर्वत्रेयमेव रीतिः।[5] तस्मादुभयथा[6] दर्शनमन्याय्यमिति।

सत्याद्यधिकरणम्

सैव हि सत्यादयः ॥२४॥

बृहदारण्यके 'स यो हैतन्महद्यक्ष प्रथमजं वेद सत्त्वं ब्रहेति जयतीमाल्लोकान्' (बृ० ५।४।१) इत्यादिना सत्यविद्यामुपक्रम्य पुनराम्नायते [7]'तद्यत्तत्सत्यमसौ स आदित्यो य एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेऽक्षन्पुरुष' (बृ० ५।५।२) इति। तत्र संशयः। किं तद्यत्सत्यमिति वाक्यप्रतिपाद्यविद्याया'स य [8]'एतम् (छा० ४।५।३) इति वाक्यप्रतिपाद्यविद्यातो भेद उतैक्यमिति।

---

२. घ० मा० 'दाप्यार्थ' इति पाठः।
१. ग० मा० 'न सामर्थ्यं' इति पाठः।
२. ग० मा० 'त्यागमर्हति' इति पाठः।
३. घ० मा० 'दृश्यपमान' इति पाठः।
४. ग० मा० 'रादर्तव्य' इति पाठः।
५. ग० मा० 'तस्मादुभयथा दर्शनमेव न्याय्यमिति' इति पाठः।
६. घ० मा० 'त यत्सत्यम्' इति पाठः।
७. घ० मा० 'ऐतमेव' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

फलभेदेन विज्ञाने भिन्न एव भविष्यतः।
तच्छब्देनानुकर्षश्च[1] विद्याभेदेऽपि युज्यते ॥

अत्र हि द्वे-एव विद्ये-अवगन्तव्ये फलभेदस्याम्नानात्। एकत्र हि 'जयतीमांल्लोकानिति फलमाम्नातम्। अपरत्र 'हन्ति पाप्मान' इति। न च[2] 'तद्यत्सत्यम्' इति सर्वनाम्ना पूर्वप्रस्तुतस्याकर्षणाद्विद्यैक्यमिति वाक्यम्। विद्याभेदेऽपि तदुपपत्तेरिति।

सिद्धान्तस्तु

तद्यदित्यादिवाक्यं हि पूर्वप्रस्तुतबोधकम्।
स्वरसं तद्धि विद्यैक्ये प्रबलं बाधकन्न चेत्॥
फलसङ्कीर्तनं त्वत्र[3] न विद्यैक्यस्य बाधकम्।
विद्यते तेन विद्यैक्यं हन्तीत्यादेः स्तुतित्वतः॥

'तद्यत्सत्यम्' इति पूर्ववाक्ये प्रस्तुतस्य सत्यब्रह्मण एव सर्वनाम्ना परामर्शपूर्वकमुपासनाव्युत्पादनेन विद्यैक्यस्य स्वरसताऽवगम्यमानत्वेन तत्परित्यागायोगात्। न च फलभेदाम्नानाद्विद्याभेदः शंक्यः 'हन्ति पाप्मान (बृ० ५।५।४) इत्यादेर्नामोपासनास्तुतित्वादतो वेद्यैकत्वाद्विद्यैक्यमिति।

कामाद्यधिकरणम्

कामादीतरत्र तत्र चायतनादिभ्यः ॥२५॥

छान्दोग्यशाखायाम् 'अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराआश' (छा० ८।१।१) इति दहरविद्यां प्रस्तुत्य सत्यकामत्वादयो गुणा आम्नाताः। तथा वाजसनेयशाखायां' स वा एष महाजन आत्मा, (बृ० ४।४।२५) 'योऽयं विज्ञानमयः प्राणेषु' (बृ० ४।३।७) 'य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते' (बृ० २।१।१७) इति'। तत्र संशयः। किं छान्दोग्यपठितानां सत्यकात्वादीनामुपसंहारो[4] वाजसनेयकविद्यायामस्ति नेति।

छान्दोग्यशाखाधीतानां गुणानां नोपसंहृतिः।
काण्वशाखोक्तविद्यायां प्रत्यभिज्ञाविवर्जनात्॥
ज्ञेय आकाश एकत्र ह्यन्यत्राकाशगो[5] भवेत्।
आकाशस्योभयत्रापि ब्रह्मत्वेऽपि न संहृतिः॥
छन्दोगशाखा विद्या हि सगुणं ब्रह्मगोचरा।
काण्वशाखास्थविज्ञानं निर्गुणब्रह्मगं यतः॥

१. घ० मा० 'विद्याभदे पि' इति पाठः।
२. घ० मा० 'तावत्सत्यम्' इति पाठः।
३. घ० मा० 'न' इति पाठो नास्ति।
४. घ० मा० 'त्वा' इति पाठो नास्ति।
५. ग० मा० 'पुनान्' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

छान्दोगशाखायामुक्तास्सत्यकामत्वादयो न वाजसनेयिशाखायामुपसंहर्तव्याः। वाजसनेयिशाखायां हि, आकाशशयस्य विज्ञानमुच्यते, छन्दोगशाखायां त्वाकाशस्यातो वेद्यभेदाद्विद्याभेदः।[1] यदि चोभयत्राप्याकाशशब्देन[2] ब्रह्मणः[3] वर्णनं तदाप्याकाशशमो[4] जीव एव वाजसनेयिशाखायां प्रतिपाद्यते ज्ञेयत्वेन। अथ जीवाभिन्नत्वेनैव ब्रह्म ज्ञेयत्वेन विवक्षितमिति चेदेवमपि सगुणत्वनिर्गुणत्वेन च वेद्यभेदाद्विद्याभेद आवश्यक इति। अभिधीयते—

हृदयायतनत्वेन ब्रह्मेह प्रतिपाद्यते।
ततश्च प्रत्यभिज्ञाता स्तुत्यर्था संहृतिर्भवेत्॥

छान्दोग्यवाजसनेयकयोर्हृदयायतनत्वेन ब्रह्मणः प्रतिपादनाज्ज्ञेयस्योभयत्रैक्येनैकत्रोक्तानां[5] गुणानामन्यत्रोपसंहारः। यद्यपि सगुणत्वनिर्गुणत्वादिना च विद्याभेदस्तथापि स्तुत्यर्थ उपसंहारः। न तु ध्यानार्थ इत्यदोषः।

आदराधिकरणम्

आदरादलोपः[6] ॥२६॥

छान्दोग्यशाखायां वैश्वानरविद्यां प्रस्तुत्य प्राणाग्निहोत्रमाम्नातम्। 'तद्यद्भक्तं प्रथममागच्छेत्तद्धोमीयम्' इति। तत्र सन्देहः। भोजनलोपे कर्तव्यन्नेति। तत्र पूर्वः पक्षः।

प्राणाग्निहोत्रं कर्तव्यं लुप्यमानेऽपि भोजने।
अतिथेर्भोजनं पूर्वं[7] जाबालानां श्रुतिर्यतः॥
प्राह[8] प्राणाग्निहोत्रस्य कर्तव्यत्वं हि सादरम्।

प्राणाग्निहोत्रं भोजनलोपेऽपि कर्तव्यं 'पूर्वेऽतिथिभ्योऽश्रीयात्[9] इति जाबालश्रुतौ[10] अतिथिभोजनात्प्राथम्यस्य बोधनेन भोजनाभावेऽपि कर्त्तव्यताया अवगमात्। न च भोजनार्थभक्तागमनसंयोगात्ततल्लोपे लोप इति वाच्यम्, 'पूर्वेऽतिथिभ्योऽश्नीयात्'[11] इति वचनस्य प्राणाग्निहोत्रमात्रस्यापकर्ष[12] विधायकत्वेन धर्मशास्त्रविरोधेनातिथिभोजनात्प्राक्भोजनविधायकत्वाभावाद्भोजनप्रयुक्तद्रव्योपजीवित्वस्यानाशङ्कनीयत्वात्।[13] अश्नीयादिति[14] पदं त्वास्ये प्रक्षेपसामान्येनाग्निहोत्र एवोपपन्नं तद्यद्भक्तमिति वाक्यमपि तत्रैव द्रव्यविधायकमिति।

---

१. घ० मा० 'विद्याभेदाविद्याभेदो' इति पाठः।
२. घ० मा० 'ब्रह्मणम्' इति पाठः।
३. घ० मा० 'वर्णनं' इति पाठो नास्ति।
४. घ० मा० 'शमो' इति पाठः।
५. घ० मा० 'प्राणानाम्' इति पाठः।
६. घ० मा० 'लोपः' इति पाठो नास्ति।
७. घ० मा० 'जबालानां' इति पाठो नास्ति।
८. घ० मा० 'अहः' इति पाठः।
९. घ० मा० 'अतिथिभ्यो श्रीयात्' इति पाठः।
१०. घ० मा० 'भोजनस्य' इति पाठः।
११. घ० मा० 'श्रीयात्' इति पाठः।
१२. घ० मा० 'स्यावकर्ष' इति पाठः।
१३. घ० मा० 'विधायकत्वो' इति पाठः।
१४. घ० मा० 'अश्रीयात्' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सिद्धान्तस्तु

भोजनार्थागतं ह्यन्नमाश्रित्यास्य विधानतः ।
प्राणाग्निहोत्रलोपस्स्याल्लुप्यमाने तु भोजने ॥
आग्नेयादिपुरोडाशनाशे स्विष्टकृदादिवत् ।

'तद्यद्भक्त[1] प्रथममारोहेत्तद्धोमीय इति[2] वाक्येन भोजनार्थागतं भक्तमाश्रित्य [3]प्राणाग्निहोत्रविधानेन भोजनलोपे तल्लोपस्य न्याय्यत्वात् । न च [4]'पूर्वोऽतिथिभ्योऽश्नीयात्[5] इति वाक्यं प्राणाग्निहोत्रस्यापकर्षकमित्यत्र[6] प्रमाणमस्ति[7] श्रुतिप्रामाण्येन स्मृतिबाधोपपत्तेः । अतो भोजनलोपे लोपः प्राणाग्निहोत्रस्याग्नेयादिपुरोडाशानां नाशादिषुस्विष्टकृदादीनां लोपाभावादिति ।

तन्निर्धारणाधिकरणम्

तन्निर्धारणनियमस्तद् दृष्टेःवृथा प्रतिबन्धफलम् ॥२७॥

'ओमित्येतदक्ष रमुद्गीथमुपासीत' (छा० १।२।१) इत्येवमादीन्यङ्गावबद्धोपासनानि नित्यकर्माङ्गानि नेति संशये पूर्वः पक्षः

कर्मसम्बन्ध्युपास्तीनाञ्ज्योतिष्टोमादिशेषता ।
वाक्येन पर्णताबुद्धिःस्ताविका तु फलश्रुतिः ॥

कर्माङ्गावबद्धान्युद्गीथाद्युपासनानि कर्माङ्गभूतानि पर्णतादिनामिवैषामपि वाक्येन क्रत्वर्थतावगमात् । न च पर्णादीनाम् फलार्थत्वाश्रयालाभेन वाक्येनैवाश्रयसम्बन्धे वाक्यभेदापत्त्या[8] क्रत्वर्थत्वमेव स्वीकृतम् । उपासनानान्तु स्वतः क्रियारूपत्वेनाश्रयापेक्षाविरहेण[9] स्वत एव फलसाधनत्वोपपत्तेः ।[10] उद्गीथद्वारा क्रतुं हृदयमागमय्य तच्छेषत्वकल्पनं युक्तमिति वाच्यम् । प्रयाजादीनामपि तथात्वेन फलकल्पनापत्तेः । न च प्रकरणबलेन क्रुत्वर्थत्वेऽवगम्ययानेनार्थवादस्य 'सन्नन्तविपरिणामादिना फलपरत्वकल्पनं युक्तमिति वाच्यम् ।[11] तद्युपासनानामपि कर्माङ्गत्वकल्पनमेव युक्तमिति फलश्रुतीनां स्तावकत्वस्योचितत्वात् । न च 'यदेव'[12] विद्याया करोति यदेवं[13]

---

१. घ० मा० 'त्रयद्भक्त' इति पाठः ।
२. घ० मा० 'छैन्न' इति पाठः ।
३. घ० मा० 'अग्निह्यन्न' इति पाठः ।
४. घ० मा० 'यूवे तिथि' इति पाठः ।
५. घ० मा० 'नश्रीयात्' इति पाठः ।
६. घ० मा० 'स्यावकर्ष' इति पाठः ।
७. घ० मा० 'अश्नुतिप्रागाण्येन' इति पाठः ।
८. घ० मा० 'कृत्वथंतावगमात्' इति पाठः ।
९. घ० मा० 'रहितत्वेन' इति पाठः ।
१०. घ० मा० 'साधनोपत्तेः' इति पाठः ।
११. घ० मा० 'हर्युपासन' इति पाठः ।
१२. घ० मा० 'यदेव' इत्यधिकः पाठः ।
१३. घ० मा० 'श्वदेव' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विद्याया श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति' (छा० १।१०) इति विद्यायुक्तकर्मणो वीर्यवत्तरत्वोक्त्या विद्याहीनमपि कर्म वीर्यवदित्यवगम्यते। अतो नाङ्गत्वमुपासनानामिति वाच्यम्, 'तेनोभौ कुरुते यश्चैतदेवं वेद यश्च[1] न वेद' (छा० १।१०) इति वाक्येन वैकल्पिकत्वोक्त्या फलमूलस्यावश्यकत्वेन[2] तदभिप्रायेण तरप उपपत्तेरिति।

सिद्धान्तस्तु

उपास्तीनां फलार्थत्वं फलश्रुतिबलाद्भवेत्।
पर्णतायास्तु सिद्धत्वात् क्रियापेक्षा हि विद्यते॥
उपास्तीनान्तु साध्यत्वात्मा क्रियापेक्षणं भवेत्।
वीर्यवत्तरमित्येवं श्रुत्या बोधात्स्वतन्त्रता॥

'यदेव विद्यया करोति तदेव वीर्यवत्तरं भवति, (छा० १।१०) इति विद्याविहीनादपि कर्मणः फलावगमेन विद्याया अङ्गत्वास्वीकारात्। न च वैकल्पिकत्वेनापि विद्यायास्तदुत्पत्तिरिति वाच्यम्। विद्याया अङ्गत्वबोधकप्रमाणाभावात्। न च वाक्यमेव [3]पर्णतादिवदङ्गत्वबोधकमिति वाच्यम्। पर्णतायाः सिद्धत्वेन फलार्थत्वे-आश्रयापेक्षणात्क्रत्वर्थत्वस्वीकारेऽप्युपासनानां क्रियारूपत्वेनाश्रयानपेक्षितत्वात्। क्रत्वर्थताबोधने उद्गीथपदस्य च लक्षणापत्त्या प्रयाजवैषम्येन[4] फलार्थत्वस्यैव युक्तत्वादिति।

प्रदानाधिकरणम्

प्रदानवदेव तदुक्तम् ॥२८॥

वाजसनेयके 'अथातो व्रतमीमांसा'[5] (बृ० १।५।२१) इत्युपक्रम्य 'वदिष्याम्येवाहमिति वाग्दध्रे' (बृ० १।५।२१) इत्यादिना, तत इन्द्रियव्यापारान् तानि तानीन्द्रियाण्यश्रान्त तया[6] कर्तुमारब्धानीति व्युत्पाद्य 'तानि मृत्युः श्रमो भूत्वोपयेमे'[7] (बृ० १।५।२१) इति तेषामङ्गं व्युत्पाद्य प्राणस्य[8] 'अथेममेव नाप्नोद्योऽयं मध्यमः प्राण' (बृ० १।५।२१) इत्यभग्नव्रतत्वं व्युत्पाद्योपसंहृतम्। इत्यध्यात्ममिति अथाधिदैवतमित्युपक्रम्याऽन्यादीनां भग्नव्रतत्वव्युत्पादनपूर्वकं वायोरभग्नव्रतत्वं व्युत्पाद्य तत्र च 'यतश्चोदेति सूर्योऽस्तं यत्र च गच्छति' (बृ० १।५।२३) इति मन्त्रमुदाहृत्य 'प्राणाद्वा एष उदेति, (बृ० १।५।२३) इति तस्य विवरणञ्च कृत्वेदमुक्तम्। तस्मादेकमेव व्रतञ्चरेत्प्राणाच्चैवापानाच्चेति। तथा छन्दोगशाखायां प्राणं संवर्गं व्युत्पाद्य वायुं सवर्गमधिदैवतं[9] च व्युत्पाद्य 'तौ

---

१. च० मा० 'स' इति पाठः।
२. ग० घ० 'मूल आवश्यकत्वेन' इति पाठः।
   च० मा० 'भूम्न आवश्यकत्वेन' इति पाठः।
३. च० मा० 'वर्णतादिवत्' इति पाठः।
४. घ० मा० 'वैषम्येष' इति पाठः।
५. च० मा० 'सृत मीमांसे' इति पाठः।
६. घ० मा० 'इन्द्रियाणयिश्रान्त' इति पाठः।
७. घ० मा० 'त्वोययम' इति पाठः।
८. घ० मा० 'प्रासस्य' इति पाठः।
९. घ० मा० 'सम्वर्ग' इत्यधिकः पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वा एतौ[१] । (छा० ४।३।४) इत्यादिना तत्रैव द्वित्वमुक्त्वा 'महात्मनश्चतुरो देव एकः कः स जगार भुवनस्य गोपा, (छा० ४।३।६) इत्येकत्वमुक्त्वोपसंहृता 'ते वा एते पञ्चान्ये पञ्चान्य' (छा० ४।३।८) इत्यादिना। तत्र संशयः किमुभयत्राप्येकरूपमेवोपासनमुतः प्राणत्वेन वायुत्वेन चेति । तत्र पूर्वः पक्षः

प्राणाद्वेति वाक्येन ह्येकमेवेति वाक्यतः ।
देवताबोधकाद्वाक्यात्क्रमस्थाच्च यामिति ॥
एकस्योपासनं न्याय्यं सम्वर्गश्रेष्ठविद्ययोः ।
'ते वा' इत्यादिभेदेन व्यपदेशो ह्युपाधितः[२] ॥

एकरूपेणैवोपासनं कर्तव्यं 'प्राणाद्वा एष उदेति' (बृ० १।५।२३) इति मन्त्रविवरणपरे वाक्ये-ऐक्यस्यैव प्रतिपादनात् । तस्मादेकमेव व्रतं चरेदिति सावधारणमेकस्यैव व्रतोक्तेश्च । सम्वर्गविद्यायामप्युक्तम्' 'एतां भगवो देवतां शाधियां[३] देवाऽमुष्य'[४] इत्येकस्या देवताया उपास्यत्वप्रतोतेः, 'महात्मनश्चतुरो देव एक' इति वाक्ये देवतैक्यप्रतिपादनाच्च । तस्मादेकरूपैव मतिः कार्या 'ते वा एते पञ्चान्य' इत्यादि भेदव्यपदेशस्त्वेकस्या एव देवताया आध्यात्मिककाद्युपाधिभेदविवक्षयेति ।

सिद्धान्तस्तु

अधिदैवतमध्यात्ममिति निर्देशभेदतः ।
उपासनं पृथक् कार्य्यं देवतैक्येप्युपाधितः ॥
एकमेवेति वाक्यन्तु वायुव्यापारलक्षकम्[५] ।
एकञ्च भेदनिर्देश उपपन्नो भविष्यति ॥

'अथाध्यात्ममथाधिदैवतम्' इति तत्र तत्रोपक्रमोपसंहारपूर्वकमुपासनाव्युत्पादने भेदस्यैव स्वीकार्यत्वात् । अन्यथा[६] तत्तदुपक्रमोपसंहारयोवैयर्थ्यमेव स्यात् । एकत्वोक्तिस्तु तत्त्वैकत्वाभिप्रायेण । एकश्च सति भेदनिर्देश उपपन्नतरो भवति । तस्मादेकमेव व्रतं चरेदिति वाक्यन्तु वायुव्रतस्याप्युपलक्षणम्[७] । विरूपा मतिः कार्या एकस्या अपि देवतायाः औपाधिकरूपेति[८] ।

लिङ्गभूयस्त्वाधिकरणम्

लिङ्गभूयस्त्वात्तद्धि वलीयस्तदपि ॥२८॥

वाजसेनेयिनोऽग्निरहस्ये 'नैवेदमग्र आसीत्' इत्यस्मिन् ब्राह्मणे 'मनोऽधिकृत्याधीयते[९], तत्षट्त्रिंशतं

---

१. च० मा० 'एतां द्वौ संवर्गावित्यादिना' इति पाठः ।
२. ग० मा० 'त भावतः' इति पाठः ।
३. च० मा० 'शाधियां' पाठक्रम विपरीतो दृश्यते ।
४. घ० मा० 'अमुस्स' इति पाठः ।
५. ग० मा० 'लक्षणम्' इति पाठः ।
६. घ० मा० 'त' इति पाठो नास्ति ।
७. च० मा० 'तस्मात्' इति पाठः ।
८. ग० मा० 'भेदसत्वात्' इति पाठः ।
९. च० मा० 'मनोऽधिकत्य' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सहस्राण्यपश्यदात्मनोऽग्नीनर्कान्मनोमयान्मनश्चित' इत्यादि। तथैव[1] वाक्यतः 'प्राणचित' इति सांपादिकानग्नीनामनन्ति[2]। तत्र संशयः। किं मनश्चिदादीनाञ्ज्योतिष्टोमादिकर्माङ्गता उत केवल विद्यात्मतेति। तत्र पूर्वः पक्षः

मनश्चिदादिकं मार्गं सन्निधानवशात्तथा[3]।
यावानित्यतिदेशाच्च मानसग्रहवद्भवेत्[4] ॥

मनश्चिदादीनां हि कर्माङ्गा (नि) सन्निधानात् कर्मणोऽपि बुद्धिस्थत्वेन तादर्थ्यं युक्तम्[5]। मनश्चिदादीन् प्रस्तुत्य तेषामेकैक एव 'तावान्यावानसौ पूर्व', इति पूर्वाग्निधर्मातिदेशेन कर्माङ्गत्वस्यैव प्रतीतेः मानसग्रहवदिति[6]।

सिद्धान्ततस्तु

'ते हैत' इति वाक्येऽस्मिन्नेवकारबलात्तथा[7]।
विद्यया हेति वाक्याच्च पुरुषार्थत्वमिष्यते ॥
मनश्चिदादेरेवञ्च ह्यतिदेशः कञ्चनः।
नेतव्य सन्निधानञ्च श्रुतेर्वाक्याच्च दुर्बलम् ॥

'ते हैते विद्या चित एव' इत्येवकारेण क्रत्वनुप्रवेशनिराकरणप्रतीत्या क्रत्वर्थत्वानुपपत्तेः। 'विद्यया हैवं विपश्चितो भवन्ति' इति वाक्येन एवंवित्संयोगेन पुरुषार्थत्वस्य प्रतीयमानत्वाच्च पुरुषार्थत्वं मनश्चिदादेः[8]। अतिदेशो ह्यग्न्यादिशब्दप्रयोगसाम्यमात्रेण कथञ्चिन्नेयः। सन्निधानन्तु श्रुतिवाक्याभ्यां दुर्बलमानसग्रहस्तु वचनबलात्क्रत्वर्थं इति।

ऐक्यात्म्याधिकरणम्

एक आत्मनः शरीरे भावात् ॥ ३० ॥

देहातिरिक्तात्माऽस्ति नेति चिन्त्यते। पूर्वाधिकरणे मनश्चिदादीनां[9] वा पुरुषार्थत्वव्युत्पादनात्पुरुषो बुद्धिस्थ इति प्रसङ्गात्तत्र[10] पूर्वः पक्षः[11]

---

१. घ० मा० 'तथैव वाक्यतः' इत्यधिकः पाठः।
२. घ० मा० 'सां पां दि' इति पाठः।
३. ग० मा० 'प्रमाणतः' इति पाठः।
४. घ० मा० 'मनसग्रहभवेत्' इति पाठः।
५. घ० मा० 'युक्त' इत्यधिक पाठः।
६. ग० मा० 'कर्मागतावत्' इति पाठः।
७. ग० मा० 'स्वातंत्र्यं प्रतिपत्तव्यम्' इति पाठः।
८. ग० मा० 'स्यादवधारणमानतः' इति पाठः।
९. ग० मा० 'चिदादीनाम्' इति पाठः।
१०. घ० मा० 'देहातिरिरिक्तत्वं 'युत्पाद्यते' इति पाठः।
११. घ० मा० 'तस्य देहातिरिक्तत्वं व्युत्पाद्यते' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चैतन्यं देहधर्मस्स्यात्ताम्बूले मदशक्तिवत् ।
देहे सत्युपलब्धत्वात्तद्भावेऽप्यभावतः ॥

देहस्यैव च चैतन्यं, देह सत्वे-उपलभ्यमानत्वात् स्थूलोऽहं जानामीति तदभावे[1]ऽभावाद्यथा ताम्बूले मदजनशक्तिरेवं भौतिके देहे चैतन्यमिति ।

सिद्धान्तस्तु

चैतन्यं देहधर्मश्चेन्न देहो विषयो भवेत् ।
यावद्देहञ्च वर्तेत गृह्यते च परैरपि ॥

चैतन्यस्य देहधर्मत्वे देहविषयत्वन्न[2] स्यात् । कतृत्वकर्मत्वयोर्विरोधात् । सिद्धान्ते तु चैतन्यन्न कस्यापि धर्मः स्वप्रकाशश्चातो[3] न कर्तृकर्मविरोधशङ्का, किञ्च चैतन्यस्य देहधर्मत्वे यावद्देहमनुवृत्तिः स्यान्न चानुवर्तते । सर्वैश्चोपलभ्येतः भूतविशेषगुणानां सर्वग्राह्यत्वनियमात्, श्रुत्यादिभिर्देहातिरिक्तस्य चैतन्यस्य बोधनाद्वा[4] देहातिरिक्तात्माभ्युपगम एव [5]स्तन्यपानादिप्रवृत्तिरुपपद्यते । तस्माद्देहातिरिक्तात्मास्तित्वसिद्धिः ।

अङ्गावबद्धाधिकरणम्

अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम् ॥ ३१ ॥

'ओमित्येतदक्षरमुद्गीथमुपासीत'[6] (छा० १।१।१) 'लोकेषु पञ्चविधं सामोपासीत' (छा० २।२।१) इत्येवमादीन्युपासनानि किं [7]तत्तच्छाखोद्गीथादिविषयाण्युत[8] शाखान्तरस्थोद्गीथादिविषयाण्यपीति ।

तत्र पूर्वपक्षः

उद्गीथादेरुपास्तिर्हि सन्निधानबलाद्भवेत् ।
तत्तच्छाखागतस्यैव नान्यस्येति[9] हि निर्णयः ॥

सन्निधानात्तत्तच्छाखोद्गीथादीनामेवोपासनं युक्तम् । यथा घटमायनयेत्यत्र घटशब्दस्य सामान्यवाचकत्वेऽपि सन्निहितव्यक्तिपरत्वदर्शनादिति ।

सिद्धान्तस्तु

सन्निधानाच्छ्रुतेर्नैव सङ्कोच उपपत्तिमत् ।
सन्निधानञ्च सर्वेषां कर्मैक्यादुपपद्यते ॥

---

१. ग० मा० 'भाभावात्' इति पाठः ।
२. घ० मा० 'देत्वविषयकत्वम्' इति पाठः ।
३. घ० मा० 'बातो न' इति पाठः ।
४. घ० मा० 'बोधना वा' इति पाठः ।
५. च० मा० 'शन्ययानादि' इति पाठः ।
६. घ० मा० 'ओमित्येदतद' इति पाठः ।
७. घ० मा० 'शाखोग्घी थादि' इति पाठः ।
८. घ० मा० 'मुतत्रशा' इति पाठः ।
९. ग० मा० 'व्यवधाननः' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

घटमानयेत्यादिस्थले हि सर्वव्यक्तीनामानयनासम्भवात्कस्याश्चिदेव व्यक्तेरानयनं वाच्यम् । तत्र सङ्कोचकाऽऽकाङ्क्षायां सन्निधिर्नियामिकाः । इह तु सर्वव्यक्तीनामुपासनसम्भवात्स चानपेक्षणात्सन्निधेर्दुर्बलत्वाद्बाध्यते । न च स्वरभेदभिन्ना-सूद्गीथव्यक्तिषु मध्ये कस्योपासनमित्याङ्क्षायां सन्निधानं नियामकमिति वाच्यम् । एवं[1] हि सर्वशाखाप्रत्ययन्यायेन कर्मण ऐक्यात्सर्वोपसंहारात्सर्वेषां[2] सन्निधानमस्त्वेति सर्वोद्गीथादीन्युपासनपराणि ।

भूमज्यायस्त्वाधिकरम्

भूम्नः क्रतुवज्ज्यायस्त्वं तथा हि दर्शयति ॥ ३२ ॥

वैश्वानरविद्यायां षण्णामृषीणां[3] द्यौलोकादित्यवाय्वाकाशजलपृथिवीनां[4] पृथक् पृथक्[5] वैश्वानरदृष्टिमुपन्यस्य तत्र निन्दां मूर्द्धा ते पतिष्यत्यादिनोपन्यस्य समस्तोपासनमुक्तम्, 'तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्द्धैव [6]सुतेजश्चक्षुर्विश्वरूप' (छा० ५।१८।२) इत्यादिना । तत्र संशयः किं व्यस्तोपासनं समस्तोपासनञ्च विधीयते । उत समस्तोपासनमेवेति ।

तत्र पूर्वः पक्षः

व्यस्तानाञ्च समस्तस्य ह्युपासनमिष्यते ।
आख्यातस्य फलस्यापि पृथक् श्रवणहेतुतः ॥

व्यस्तानामप्युपासनं[7] स्वीकार्यं फलाख्याततयोः श्रवणात् 'अत्स्यन्नं[8] पश्यसि प्रियमत्त्यन्नमिति 'य एतमेवमात्मानं वैश्वानरमुपास्त' (छा० ५।१४।२) इति । न चैकवाक्यतामङ्गः । एकस्मिन्नपि वाक्येऽवान्तरवाक्यभेदाङ्गीकारेण नामाद्युपासनवदुपपत्तेः । समस्तोपासनन्तु त्वयापि स्वीकार्यमेव । अत उभयोपासनमेव स्वीकार्यमिति ।

सिद्धान्तस्तु

व्यस्तोपास्तेर्निन्दितत्वाद्भ्रान्तित्वस्यापि बोधनम् ।
समस्तोपास्तिमेवातो वक्ति राजा हि केकयः ॥

समस्तोपासनमेव न्याय्यन्न तु व्यतोपासनम् 'मूर्द्धा ते व्यपतिश्यति' (बृ० ३।९।२६) इत्तादिना 'पादौ ते व्यश्लस्येताम्, इत्यन्तेन पृथगुपासनानां निन्दितत्वात् । न च 'नहि निदान्यायेन' तदन्यथा नेयमिति वाच्यम् । 'मूर्द्धात्वेष' इति तुशब्देन वैश्वानरैकदेशे भवतां कृत्स्नवैश्वानरत्वभ्रम इति बाधनेनैकदेशोपासनाया[9] अनुपपत्तेः । तस्मात्स्कनोपासनमेव[10] स्वीकार्यमिति ।

---

१. च० मा० 'एवमपि' इति पाठः ।
घ० मा० 'हि' पाठो नास्ति ।
२. घ० मा० 'त्सावांगोप' इति पाठः ।
३. घ० मा० 'ष एना' इति पाठः ।
४. घ० मा० 'वायाकाशा' इति पाठः ।
५. घ० मा० 'पृग्हृथर' इति पाठः ।
६. घ० मा० 'सुतोजा' इति पाठः
७. घ० मा० 'व्यस्तनामशु इति पाठः ।
८. घ० मा० 'अत्यन्नम्' इति पाठः ।
९. घ० मा० 'उपासन्तसा' इति पाठः ।
१०. घ० मा० ' तस्मात्स्न' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शब्दादिभेदाधिकरणम्

नानाशब्दादिभेदात् ॥ ३३ ॥

किं दहरशाण्डिल्योपकोसलादिविद्यानां प्राणादिविषयविद्यानाञ्च किमैक्यमुत भेद इति संशये पूर्वपक्षः

शाण्डिल्यदहरादीनां विद्यानामेकता[1] भवेत् ।
उपास्यब्रह्मणस्तादेवकत्वान्न तु भिन्नता ॥

दहरशाडिल्यादिविद्यानामेकत्वमेवस्वीकार्यमुपास्यस्य ब्रह्मण एकत्वान्न तु नानात्वं मानाभावादिति ।

सिद्धान्तस्तु

गुणानां भिन्नभिन्नत्वात्समाख्यायाश्च भेदतः ।
विद्यानां भेद एव [2]स्यान्नत्वैक्यमिह विद्यते ॥

दहरशाण्डिल्यादिविद्यानां भेद एव स्यान्नत्वेकत्वमुपास्यगुणानां भिन्नाभिन्नत्वेन विषयभेदात्समाख्याभेदाच्च विद्याभेदस्यावश्यकत्वात्[3] । अन्यथैकत्रोक्तानां गुणानामन्यत्र पुनः[4] कीर्तनवैकल्यापत्तेः । उपसंह्रारादेव लाभ सम्भवादिति ।

विकल्पाधिकरणम्

विकल्पो विशिष्टफलत्वात् ॥ ३४ ॥

अहङ्ग्रहोपासनेषु ब्रह्मलोकफलेषु विकल्पस्समुच्चयो वेत्यनियम उत विकल्प इति संशये पूर्वः पक्षः

एकस्वर्गफलानां हि दर्शादीनां[5] यथा भवेत् ।
[6]समुच्चयस्तथोपास्तेर्ब्रह्मप्राप्तिकृतो भवेत् ॥

यथैकस्वर्गफलानामग्निहोत्रदर्शपूर्णमासादीनां यथा काम्यम्, एवमहङ्ग्रहोपासनानां ब्रह्मलोकफलानां यथा काम्यमिति ।

सिद्धान्तस्तु

इह जन्मनि देवत्वं निश्चिनोति य आत्मनि ।
स सत्यलोकमाप्नोति 'देवो भूत्वा' इति शास्त्रतः ॥
'यस्य' स्यादिति शास्त्राच्च विकल्पोऽत्र[7] प्रयुज्यते ।
[8]समुच्चये हि नैकत्र चित्तस्य स्थापनं भवेत् ॥

---

१. ग० मा० 'स्यादभिन्नता' इति पाठः ।
२. ग० मा० 'स्यादेवकत्वेऽपि धर्मिणः' इति पाठः ।
३. ग० मा० 'समाख्याभेदादपि विद्यानां भेदस्यावश्यकत्वात्' इति पाठः ।
४. ध० मा० 'पुनः' इत्यधिकः पाठः ।
५. ष० मा० 'दक्षाधीनाम्' इति पाठः ।
६. ग० मा० 'ब्रह्मलोकप्राप्त्युपयांगिनाम्' इति पाठः ।
७. ष० मा० 'विकल्पोतो न युज्यते' इति पाठः ।
८. ष० मा० 'यथाकाम्येत्वचित्तस्य नैकत्र स्थापनं भवेत्' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'देवो भूत्वा देवानप्येति' (बृ० ४।१।२)इति शास्त्रात्' 'यस्य स्यादद्धा न विचिकित्सास्ति' (छा० ३।१४।४) इति शास्त्रायेह जन्मनि देवत्वसाक्षात्कारो यस्य जायते तस्यैव[1] ब्रह्मलोकाप्तिः तथा चैकस्मिन्नुपासने प्रक्रान्ते मध्ये-उपासनान्तरे क्रियमाणे चित्तविक्षेपेण[2] न[3] किमप्युपासनं सिध्येत् । अतो विकल्प एव न्याय्या इति ।

काम्याधिकरणम्

काम्यास्तु यथा कामं समुच्चीयेरन्न वा पूर्वहेत्वभावात् ॥३५ ॥

नामाद्युपासनान्युपासनत्वाविशेषाद्विकल्पेरन्नहंग्रहाभावात्तु यथा काम्यमिति[4] ।

यथाश्रयभावाधिकरणम्

अङ्गेषु यथाश्रयभावः ॥ ३६ ॥

अङ्गावबद्धानि यान्युद्गीथाद्युपासनानि तेषां किं समुच्चयो यथाकाम्यं वेति संशये पूर्वः पक्षः

अङ्गावबद्धोपास्तीनामाश्रयाणां समुच्चयात् ।
सम्बन्धाच्च[5] तासाञ्च समुच्चय इति स्थितिः॥

अङ्गावबद्धोपासनानि समुच्चैयानि तदाश्रयाणामुद्गीथादीनां समुच्चयात् । प्रधानसत्त्वेऽङ्गानामिवाश्रयसत्वे तदाश्रितसत्त्वस्य तत्सम्बन्धित्वाविशेषेण बाधकाभावेनावश्यकत्वात् । पुरुषाणां कामप्रवणत्वेनायुरादिफलकाम-वदाप्त्यादिफलकामनाया अपि नियतत्वकल्पनेन नित्यानित्यसंयोगविरोधाभावात् । गोदोहनादीनां त्वाश्रयाप्रणयन-सत्त्वेऽपि न नियमश्चमसेनाद्यः प्रणयतीति वाक्यवैयर्थ्यात् । प्रकृते चैकाङ्गस्थो[6] न निवेशाभावादिति ।

सिद्धान्तस्तु

नाश्रयाणां सत्त्वमात्रादुपास्तीनां समुच्चयः ।
मानाभावादतस्तासां यथाकाम्यं प्रतीयताम् ॥

नह्याश्रयसत्तामात्रेणश्रितानां सत्त्वनियमे किञ्चित्प्रमाणमस्ति, प्रधानसत्त्वेऽङ्गत्वन्तु प्रयोगवचनबलादङ्गीकार्यम् । अतो यथाकाम्यमेव । एवञ्च सति 'तस्मादेवं विदमेव ब्रह्माणं कुर्वीत, इत्यादिकमुपपद्यत[7] इति ।

श्रीमत्परमहंसपरिव्राजकाचार्यसर्वतन्त्रस्वतन्त्रश्रीमदद्वैतानन्दसरस्वतीचरणारविन्दमृङ्गायमाणस्य स्वय-प्रकाशानन्दस्य कृतिषु वेदान्तनयभूषणे तृतीयाध्यायस्य तृतीयपादः ।

---

१. ग० मा० 'दृढाभिमानलक्षण' इति पाठः ।
२. ग० मा० 'वित' इति पाठः ।
३. ग० मा० 'न' इति पाठः नास्ति ।
४. यासूपासनासु विनोपास्यसाक्षात्करणमदृष्टेनैव काम्यसाधनं तासां काम्यदर्श पौर्णमासादिवत्पुरुषेच्छावशेन विकल्पसमुच्चया-विति साम्प्रतम्' (भामती ०।३।६) ।
५. ग० मा० 'तत्पारतान्त्र्यात्तासाञ्च च भवेदेव सनुच्चयः' इति पाठः ।
६. ग० मा० 'उपासनानाम्' इति पाठः ।
७. ग० मा० 'श्रीमत्स्वयंप्रकाशानां वेदान्तनयभूषणं तुणोपसंहृति पादोरिक्तशकरेण वै'इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तृतीयाध्याये चतुर्थः पाद

पुरुषार्थोधिकरणम्

पुरुषोर्थोऽतश्शब्दादिति वादरायणः ॥१॥

पूर्वस्मिन्पादे ज्ञानस्य विषयो निरूपितः। इदानीन्तु ज्ञानाङ्गानि व्युत्पाद्यन्ते। तत्र ज्ञानस्य मोक्षफलत्वे सिद्धे सन्न्यासादितदङ्गनिरूपणमुपपाद्यत[2] इति प्रथमाधिकरणे मोक्षफलत्वं व्युत्पाद्यते किमात्मज्ञानं मोक्षसाधनमुत क्रियाविशेष इति संशये पूर्वः पक्षः

आत्मविद्याक्रियाशेषो नारभ्याधीतवाक्यतः।
'यदेव[3] विद्यये'त्यस्मात्सामर्थ्याच्चावगम्यते ॥

आत्मज्ञानं[4] कर्माङ्गं 'यस्य पर्णमयीजुहुर्भवति न स पापश्लोकं शृणोति' इति वाक्येन पर्णतायाः क्रत्वपूर्वीयजुहुं प्रति विधानेन तस्याः क्रत्वर्थत्वं यथा तथात्माज्ञानस्यापि 'आत्मा वारे द्रष्टव्य' (बृ० ४।५।६) इति वाक्यबलात्कर्माङ्गकर्तृद्वारा क्रत्वर्थत्वम्। न चेदमात्मज्ञानं परमात्मविषयमिति कथं कर्तृसंस्कार[5] इति वाच्यम्। प्रिया हि संसूचितस्यैवात्मनो द्रष्टव्यत्वोक्त्या जीवत्वनिश्चये कर्तृसंस्कार[6] इति स्वीकारात्। न चैवमपि यत्र 'तत्त्वमसि' (छा० ६।५।३) इति जीवे ब्रह्माभेददृष्टिस्तत्र तस्याः कर्माङ्गत्वन्नोपपद्यत इति वाच्यम्। तादृशस्थलेऽपि ब्रह्मदृष्टेः कर्तृसंस्कारत्वाभ्युपगमात्। किञ्च 'यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति, (छा० १।१०) इति श्रुत्या विद्यायाः[7] कर्माङ्गत्वबोधनेन क्रियाशेषत्वमेव स्वीकार्यम्। न चेदं वाक्यं [8]सन्निधानादुद्गीथ-विद्यापरमेवेति वाच्यम्। तदेवेत्येवकारबलेन कर्मत्वस्य व्याप्यत्वावगमेन सर्वेषु[9] च कर्मसूद्गीथविद्याया असम्भवेन देहातिरिक्तात्मज्ञानस्यैव तद्वाक्यं विनियोजकमिति स्वीकाराद्देहातिरिक्तात्मज्ञानं विना कर्मानुपपत्तेस्सामर्थ्याद-प्यात्मज्ञानं कर्माङ्गमिति। अत्राभिधीयते—

आत्मज्ञानन्न कर्माङ्गं फलबोधकवाक्यतः।
न च तस्यार्थवादत्वं कर्माङ्गत्वे हि तद्भवेत् ॥

न प्रमाणञ्च तत्रास्ति वाक्यस्यान्यपरत्वतः।
देवे[10] विद्ययेत्येतदुद्गीथज्ञानगं मतम् ॥

---

१. घ० मा० 'पुरुषार्थो....वादरायण' इत्यन्तः पाठो नास्ति।
२. ब० मा० 'सन्न्यासादि' इति पाठो नास्ति।
३. च० मा० 'यतेव' इति पाठः।
४. ग० मा० 'आत्मज्ञानं' इति पाठो नास्ति।
५. घ० मा० 'सकार' इति पाठः।
६. घ० मा० 'सरकार' इति पाठः।
७. घ० मा० 'विद्यायाः' इति पाठो नास्ति।
८. ग० मा० 'दुद्धाथ' इति पाठः।
९. घ० मा० 'सर्वेबुच' इति पाठः।
१०. घ० मा० 'त्वावदेव' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

देहातिरिक्तस्य ज्ञानस्य सामर्थ्याद्विनियोगधी[1] ।
इह ब्रह्मात्मविज्ञानं फलार्थमुपदिश्यते ॥
अत एवोर्ध्वरेतस्सु[2] विद्येयं परिदृश्यते ।
अतोऽस्याः पुरुषार्थत्वन्न कर्म प्रतिशेषता ॥

आत्मज्ञानन्न[3] क्रियां प्रत्यङ्गम् 'ब्रह्म वेद ब्रह्मैव भवति' (मु० उ० ३।२।९) इति फलबोधकशास्त्रस्य सत्त्वात् । न च 'न स[4] पापं श्लोकं शृणोति, इतिवत्तत्स्तावकमिति वाच्यम् । कर्माङ्गित्वं हि फलाकाङ्क्षाविरहेण[5] स्तावकता भवेन्नचात्र कर्माङ्गत्वे प्रमाणमस्ति 'आत्मा वारे द्रष्टव्य' (बृ० ४।५।६) इति वाक्यस्यात्मज्ञानविधायकत्वाभावेन पर्णतान्यायाप्रवृत्तेः । किञ्चात्मशब्देन ब्रह्मण एव ग्रहणेन जीवाभिन्नब्रह्मज्ञानस्य कर्मानुपयोगित्वात् । न चात्र प्रियादिसंसूचितस्य जीवात्मन एव ग्रहणान्न परमात्मविज्ञानमिति वाच्यम् । वाक्यान्वयाधिकरणे[6] मैत्रेयी ब्राह्मणस्य जीवाभिन्नब्रह्मपरत्वस्य व्यवस्थापितत्वात् । सामर्थ्यञ्च देहातिरिक्तात्मज्ञानस्येवावगतं बोधयति[7] । न तु वेदान्ते वेद्याशनायाद्यतीतात्मज्ञानस्येति प्रागेवोक्त, 'यदेव विद्यया' (छा० १।१०) इति वाक्यमप्युद्गीथविद्याविषयमेव 'यश्चैतदेव वेद' इत्येवं शब्देनोद्गीथविद्याया एव परामर्शेन यदेवेत्येकारबलेनोद्गीथयुक्तकर्मण एव व्याप्यत्वावगतिसम्भवात् । अतो ब्रह्मविद्या न कर्माङ्गम् । अत एवोर्ध्वरेतसां सन्न्यासिनामपि ब्रह्मविद्यादर्शनमुपपद्यते । अन्यथा तेषां कर्मभावेन तदीयविद्यावैयर्थ्यमेव स्यादिति ।

परामर्शाधिकरणम्

परामर्शं जैमिनिरचोदना चापवदति हि ॥२॥

कुतः—ऊर्ध्वरेतसस्सन्न्यासादयस्सन्ति नेति संशये न सन्तीति तावत्प्राप्तम् ।

ऊर्ध्वरेतो विधानं हि वेदेनैवोपलभ्यते ।
अग्नित्यागी हि दोषश्च श्रूयते वीरहेत्यर्तः ॥

सन्न्यासस्य वानप्रस्थस्य नैष्ठिकब्रह्मचर्यस्य च विधानं वेदे नोपलभ्यते । प्रस्तुताग्नित्यागपूर्वकं सन्यासे दोषः श्रूयते 'वीरहा वा एष देवानां योऽग्निमुद्वासयत' इति । न च 'तप एव द्वितीयम्' (छा० २।२३।१) इति वचनस्थस्य[9] ब्रह्मचार्याचार्यकुलवासी तृतीय इति नैष्ठिकस्य' (छा० २।२३।१) 'ब्रह्मसंस्थ' (छा० २।२३।१) इति

---

१. घ० मा० 'द्वितियोगाधी' इति पाठः ।
२. घ० मा० 'अत एवेर्वरेत' इति पाठः ।
३. घ० मा० 'न' इति पाठो नास्ति ।
४. घ० मा० 'साम्यातयम्' इति पाठः ।
५. च० मा० 'विरहेण' इति पाठो नास्ति ।
६. न वारे पत्युः कामायेति वाक्ये द्रष्टव्यत्वेन विज्ञानात्मा उपदिश्यत उत परमात्मेति संदिह्य संशयकारणं चोक्त्वा विज्ञानात्मोपदेश इति पूर्वपक्षस्य तदनन्तरं 'वाक्यान्वयात्' (ब्र० सू० १।४।१९) इति सूत्रव्याख्यानेन परमात्मोपदेश इति सिद्धान्तः ।
७. च० मा० 'बाधयति' इति पाठः ।
८. च० मा० 'वी' इति पाठो नास्ति ।
९. च० मा० 'वानप्रस्थस्य' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सन्न्यासिनश्च प्रतिपादनात्सन्त्यूर्ध्वरेतस इति वाच्यम् । तपः शब्दस्य गृहस्थ एवेन्द्रियादिनिग्रहयोगेन[१] प्रवृत्ति-सम्भवेनाश्रमान्तरबोधकत्वे मानाभावात् । ब्रह्मचारीति [२]वाक्यस्योपकुर्वाणपरत्वात्, 'ब्रह्मसंस्थ' (छा० २।२३।१) इति वाक्यस्य ब्रह्मज्ञगृहस्थपरामर्थकत्वात् । एवमन्यान्यपि वाक्यानि नेयानीति । एवं प्राप्तेऽभिधीयते—

सन्त्यूर्ध्वरेतसस्तावद्गृहस्थैस्सह पाठतः ।
अपूर्वत्वाद्विधिर्वा स्याद्वाक्यभेदः पुरस्सरः ॥

'त्रयो धर्मस्कन्धा[३] यज्ञोऽध्ययनदानम्' (छा० २।२३।१) (प्रथम) इति बहूनामपि धर्माणां प्राथम्यमुक्तम् । एते च गृहस्थेनानुष्ठेया इति । गार्हस्थोपलक्षणं त्रितयं' तप[४] एवेति' तपः शब्देन तपः प्रधानानां वनस्थानामुपलक्षणम् । तच्च तयोऽनशनादिरूपं तच्च वनस्थानामेव । ऐतेन तपःशब्देन केश्चित्सन्न्नासिनामपि[५] ग्रहणमित्युक्तं तन्निरस्तम् । अनशनरूपतपसस्सन्यासिष्व[६]सम्भवात्तस्य प्रधानविरोधित्वात् । इन्द्रियनिग्रहादीनाञ्च तपस्त्वा-भावात् । अत एव 'तप' इति, तपो नानशनात्परमित्युक्त्वा 'शम' इत्यरण्ये[७] मुनय इति तपोऽपेक्षया शमस्य पृथक्ग्रहणं कृतम् । एतेन तपः शब्देन गृहस्थस्यैव ग्रहणं, तत्र तपोऽपि सम्भवतीति परास्तम् 'तप एव द्वितीयम्' (छा० २।२३।१ इति द्वितीयशब्दप्रयोगाच्च 'ब्रह्मचर्याचार्यकुलवासी, (छा० २।२३।१) (तृतीय) इति नैष्ठिकब्रह्मचारिणो ग्रहणमत्यन्तमात्मानमाचार्यकुलेऽवसादयन्नितिवाक्यशेषात् । 'ब्रह्मसंस्थोऽमृतत्वमेति, (छा० २।२३।१) इति ब्रह्म-संस्थशब्देन सन्न्यासिनं परामृश्यते । ब्रह्मणि संस्था यस्येति वा ब्रह्मणि संतिष्ठत' इति वा व्युत्पत्त्या ब्रह्मज्ञानानुकूल-व्यापारमेव यः करोति तद्बोधकत्वेन गृहस्थस्य च तदसम्भवेन सन्न्यासस्य साधारणधर्मेण सन्न्यासिनो ग्रहणात् । तथा चानुष्ठेयत्वेन सम्प्रतिपन्नगार्हस्थ्यप्रायपाठेनेतरेषामप्याश्रमाणामनुष्ठेयत्वमवगम्यते ।[८] अथवा वाक्यभेदेन सन्न्यासविधि 'परमेवोपरि हि देवेभ्यो धारयतीतिवत् । वीरहे'ति वाक्यन्त्वविधिपूर्वकाग्नित्यागनिन्दापरमिति । वस्तुतस्तु[९] जाबालानां श्रुतौ सन्न्यासविधिः स्पष्टः श्रूयते । 'यदहरेव विरजेत्तदहरेव प्रव्रजेत्' (जा० उ० ४) इति । तस्मात्सन्त्युर्ध्वरेतस[१०] आश्रमिण[११] इति ।

---

१. घ० मा० 'ऐवेन्द्रियादिति' इति पाठः ।
२. च० मा० 'इतरत्वाद्' इति पाठः ।
३. च० मा० 'इत्यत्र त्रित्वं न धर्माभिप्रायं किन्तु तदनुसात्र श्रमि पुरुषाभिप्रायं, अन्यथा हि धर्माण मानन्त्येन त्रित्वानुपपत्तेः । अतएव इति पाठः ।
४. घ० मा० 'तया एव' इति पाठः ।
५. घ० मा० 'सन्न्यासिनामाप' इति पाठः ।
६. घ० मा० 'सन्नासिषा' इति पाठः ।
७. घ० मा० 'इत्परण्ये' इति पाठः ।
८. घ० मा० 'आश्रमाणाचानुष्ठेय' इति पाठः ।
९. घ० मा० 'वस्तुवस्तु' इति पाठो नास्ति ।
१०. घ० मा० 'सन्त्यू' इति पाठोनास्ति ।
११. च० मा० 'अनुष्ठेयत्वमवगम्यत' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्तुतिमात्राधिकरणम्

स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात् ।।३।।

'स एव रसानां रसतमः परम पराध्योऽष्टम यदुद्गीथ' (छा० १।१।३) इत्यादि श्रूयये । तत्र सन्देहः । किमेवं तत्कर्मोद्गीथस्तावकमुत प्रकृतोपासनाया विषय समर्पकमिति । तत्र पूर्वः पक्षः

क्रतोरङ्गं समुद्दिश्य गुणस्य प्रतिपादनात् ।
मुक्तास्तावकतैवास्य सत्यकामादिवाक्यवत् ॥
इयमित्यादिवाक्येषु स्तावकत्वं तथेष्यते ।
तथेह भवितुं युक्तन्नत्वत्र विधिसम्भवः ॥

'स एष रसानां रसतमः [1]पराध्योंऽष्टम यदुद्गीथ' (छा० १।१।३) इति वाक्येनोद्गीथमुद्दिश्य रसतमत्वादि-गुणकीर्तनं क्रियमाणं स्तावकमेव स्वीकार्यम् । न च 'यस्य पर्णमयीजुहुर्भवति' इत्यत्र जुह्वनुवादेन पर्णताविधि-वदिहापि रसतमत्वादिगुणविधायकत्वं किन्न स्यादिति वाच्यम् । इयमेव 'जुहुरसावादित्यः कूर्म' इति वद्विधिश्चानर्थक इति न्यायेन विधायकत्वानुपपत्तेः । न च व्यवहितोद्गीथस्तावकत्वानुपपत्तिरिति[2] वाच्यम् । सत्यकामादीनां दहरविद्यान्तरगतानां हृदयायतनत्वसाम्यमात्रेण बुद्धिस्थनिर्विशेषब्रह्मविद्यास्तावकत्ववदिहापि व्यवहितस्तावकत्वोपपत्तेः ।[3] कामाद्यधिकरणन्यायेन[4] व्यवहितकर्माङ्गस्तावकत्वस्यावश्यकत्वेन तदैकरूपायात्रापि स्तावकत्वस्यैव युक्तत्वाच्च । अत एवञ्जातीयकस्य स्तावकत्वमेव युक्तमिति ।

सिद्धान्तस्तु

विधीयमानोपास्तिर्हि[5] सन्निधानेन हेतुना ।
विषयार्पकतैवास्या युक्ता स्तावकता नहि ॥
उपासनाविधिश्चात्र लिङ्गबलादवगम्यते (?) ।
उद्गीथादिस्तावकत्वं भवेत्केन निवार्यते ॥

'स एष रसानाम्' (छा० १।१।३) इति वाक्यं 'ओमित्येतदक्षरमुद्गीथमुपासीत' (छा० १।१।१) इति लिङ्गबलादवगम्यमानविधिविषयीभूतोपासनाया विषयाकाङ्क्षायां सन्निधानबलेन विषयसमर्पकत्वस्यापि सम्भवेन स्तावकतामात्रकल्पनन्न न्याय्यम् । एवञ्च कामाद्यधिकरणन्यायेन कर्माङ्गोद्गीथस्तावकत्वमायति चेदस्तु का क्षतिरिति । एवञ्च सति दहरविद्यायां कामानामुपास्यत्वोक्तिलिङ्गदर्शनविषयो वोपयोक्ष्यतीति ध्येयम् ।

---

१. घ० मा० 'पराघ्योष्टमो' इति पाठः ।
२. घ० मा० 'स्ताकक' इति पाठः ।
३. घ० मा० 'व्य' इति पाठो नास्ति ।
४. कामादीतरत्र तत्र चायतनादिभ्यः (ब्र० सू० ३।३।३९)
५. घ० मा० 'उपास्तौ हि' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पारिप्लवाधिकरणम्

पारिप्लवार्था इति चेन्न विशेषितत्वात् ॥४॥

अश्वमेधे 'पारिप्लवमाचक्षीत' इति विधाय सर्वाण्याख्यानानि शंसन्तीति विनियुक्तेषु वेदान्तगतान्याख्यानानि 'अथ ह याज्ञवल्क्यस्य' इत्यादीनि अन्तर्भवन्ति[1] नेति संशये प्रक्रमे सर्वशब्दस्य श्रवणात्सर्वमेव ह्याख्यानं विनियुक्तं स्यादतः सर्वस्य शंसनं[2] नह्युपक्रमगतसर्वशब्दस्योपसंहारगत 'प्रथमेऽहनि[3] मनुर्वैवस्वतो राजा, इत्यादि[4] वाक्यशेषानुसारेण सङ्कोचमर्हति; अपि तु वाक्यशेषोपलक्षणपरो भविष्यति। तस्मादथ हेत्यादीन्यपि पारिप्लवशंसने विनियुक्तानीति। पूर्वःपक्षः

प्रक्रमे सर्वशब्दोऽयन्नासङ्कोचेन वर्तते।
वाक्यशेषानुसारेण सङ्कोचोऽतोऽत्र[5] युज्यते॥

नहि सर्वाण्याख्यानानि शंसितुं शक्यानि। अतस्सङ्कोचेऽवश्यके वाक्यशेषानुसारेण 'प्रथमेऽहनि मनुर्वैवस्वतो राजा' इत्यादिनामाख्यानविशेषाणामेव ग्रहणम्। एवञ्चाथहेत्यादीनां ब्रह्मविद्यास्तावकतया तदेकवाक्यतोपपन्नं भवतीति सिद्धान्तः।

अग्नीन्धनाद्यधिकरणम्

अत एव चाग्नीन्धनाद्यनपेक्षा ॥५॥

अत्र प्रथमाधिकरणोक्तं ज्ञानस्य मोक्षहेतुत्वमुपजीव्याग्नीन्धनादिसापेक्षकर्मानपेक्षत्वं[6] मोक्षस्य व्युत्पाद्यते। तत्र यद्यपि 'तमेतं[7] वेदानुवचनेन ब्राह्मणाः विविदिषन्ति यज्ञेन दानेन तपसानाशकेन, (बृ० ४।४।२२) इति श्रुत्या विद्यायां कर्मणो विनियोगाद्विद्यास्वरूपे च कर्मणोऽनुपयोगात्प्रयाजादिवत्फलोपकार्याङ्गत्वं स्वीकृत्य ज्ञानानुष्ठानकाले कर्मणामनुष्ठेयत्वाज्ज्ञानकर्मसमुच्चयः। न च विविदिषाया[8] एव भाव्यत्वावगमात्कथं विद्याया भाव्यत्वं प्रत्ययार्थप्राधान्यादिति वाच्यम्। इच्छेष्यमाणसमभिव्याहरस्थले-इष्यमाणस्यैव[9] भाव्यत्वेनान्वय इति स्वर्गकामादिवाक्यस्थले कृतस्य[10] विशेषन्यायस्यैव स्वीकार्यत्वादतो ज्ञानकर्मसमुच्चय इति, तथापि प्रत्ययार्थप्राधान्यपरित्यागे प्रमाणाभावेन विविदिषाया एव भाव्यत्वं स्वीकृत्य तादर्थ्यमेव कर्मणां स्वीक्रियते। स्वर्गकामादिस्थले तु कामनाया भाव्यत्वानुपपत्त्या इच्छाविषयत्वेन प्रतीयमानस्वर्गादेरेव भाव्यत्वं स्वीक्रियते। अतो न ज्ञानकर्मसमुच्चय इति।

---

१. घ० मा० 'अन्तर्भवनन्ति' इति पाठः।
२. घ० मा० 'क्षंसनं' इति पाठः।
३. घ० मा० 'प्रथमे हनि' इति पाठः।
४. घ० मा० 'राजेत्यादि' इति पाठः।
५. ग० मा० 'व्यवस्थातो त्र युज्यते' इति पाठः।
६. घ० मा० 'कर्मन्नपेक्षत्वम्' इति पाठः।
७. घ० मा० 'तमेवं' इति पाठः।
८. घ० मा० 'विविदिषार्यावि' इति पाठः।
९. ग० मा० 'इष्यमणस्वव' इति पाठः।
१०. घ० मा० 'कृयस्प' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वापेक्षाधिकरणम्

सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् ।।६।।[1]

'तमेतं वेदानुवचनेन' (बृ० ४।४।२२) इति वाक्यं कर्मणां विविदिषायां विनियोजकमुतार्थवाद इति संशयेऽनुवाद इति प्राप्तम् । कुतः

पुरुषार्थत्वराहित्यात्तस्यामिच्छा स्वतो नहि ।[2]
विद्यायां रागश्चेत्स्यात्कर्म तु स्यादनर्थकम् ।।

विविदिषामुद्दिश्य कर्माण्यनुष्ठातुमशक्यानि विविदिषायामिच्छां विना तदनुपपत्तेः । तदिच्छा त्वानुपपन्ना, नहि स्वतस्तदिच्छा संभवति स्वतः पुरुषार्थत्वात् । नापि विद्यारूपफलसाधनत्वादिच्छा तस्यामिच्छां विना तत्साधन इच्छानुपपत्तेः । विद्यायां चेच्छायां सैव विविदिषेति किं कर्माभिरतो विद्यास्तुतये 'तमेतं' इति वाक्यमिति । एवं प्राप्तेऽभिधीयते ।

विद्यया फलहेतुत्वात्तन्न रागोऽभिजायते ।
तद्धेतुत्वाद्विद्यायाः[3] प्रयोगः कर्मणां ततः ।।
रुच्यात्मक[4]विशेषस्य कर्मभिस्साध्यता यतः ।
अतो न तेषां व्यर्थत्वं तस्माद्वाक्यं विधायकम् ।।

विविदिषोद्देश्येन कर्मणां विनियोजकं, न च विविदिषायामिच्छानुपपत्तिः । विद्याया मोक्षसाधनत्वेन तत्रेच्छायां सत्यां तत्साधने विविदिषायामपीच्छायास्सम्भवात् । न च कर्मणां वैयर्थ्यं शंक्यमिच्छाविशेषस्य प्रवृत्तिपर्यवसायिनः कर्मसाध्यत्वेन तत्सार्थक्योपपत्तेः ।' एवं 'तस्मादेवंविच्छान्तो दान्त [5]उपरतस्तितिक्षुः' (बृ० ४।४।२३) इति वाक्यमपि तस्माच्छब्देन प्राशस्त्यबोधनेन शमादीनां विधायकमिति स्वीकार्यम् । अतस्सिद्धान्तमेतमिति वाक्यं विविदिषायां कर्मणां विनियोजकमिति ।

सर्वान्नानुमित्यधिकरणम्

सर्वान्नानुमितिश्च प्राणात्यये तद्दर्शनात् ।।७।।

प्राणोपासकं प्रस्तुत्य 'यत्किञ्चेदमाश्वभ्य आशकुनिभ्य आकीटपतङ्गेभ्यस्तत्तेऽन्नं' (बृ० ६।१।१४) । इति प्राणस्यान्नमुक्त्वा 'न ह वा एवं विदि किञ्चन तन्न भव' इति श्रूयते । तत्र संशयः किं प्राणविदः सर्वान्नभक्षणं विधीयते । उत ध्यानमात्रमिति । तत्र

१. घ० मा० 'श्रुतेरश्ववत्' इति पाठः ।
२. ग० मा० 'अपुमर्थत्वतस्तस्यो कामना न स्वतो भवेद् ।
विद्यायां रागतश्चेत्स्यात्कर्मैव स्यादनर्थकम् ।। इति पाठः ।
घ० मा० 'च रागतवत्स्यात्स्यात्' इति पाठः ।
३. घ० मा० 'तदिच्छायाम्' इति पाठः ।
४. ग० मा० 'विद्यायां रुचिभेदस्य' इति पाठः ।
५. घ० मा० 'उपरति' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्राणविद्यावतस्सर्वमन्नमद्यं विधेर्बलात् ।
'न काञ्चने' ति वाक्येन सर्वत्रापरिहारवत् ॥

सत्यं हि 'पूर्वं मनुष्या अश्नन्त अञ्जत [?] इतिसिद्धवन्निर्द्देशन्यायानुपपत्तिकल्पितविधिना सर्वान्नभक्षणं प्राणोपाकस्य विधीयते। न च भक्ष्याभक्ष्यशास्त्रविरोधः, वामदेव्यसामोपासकस्य 'न काञ्चनं परिहरेत्' इति विधिबलेन परस्त्रीगमननिषेधशास्त्रबाधवत्प्राणविदोऽपि तद्बाधोपपत्तेरिति पूर्वः पक्षः ।

सिद्धान्तस्तु

प्रत्यक्षविधिना तावद्बाधो युक्तो न चेह स ।
श्रूयमाणे विधौ नैव कल्पनं तस्य विद्यते ॥
सर्वान्निभक्षणञ्चैव कर्तुंन्नैवेह शक्यते ।
अतः प्राणविदस्सर्वमन्नं ध्येयमिहेष्यते ॥

वामदेव्योपासने हि 'न काञ्चनं परिहरेत्' इति स्पष्टविधिना सकलस्य[1] परिहारबोधनेना गम्यगमान-निषेधशास्त्रबाधनेऽपि प्रकृते भक्ष्यभक्षणप्रतिषेकशास्त्रेण 'न सुरां पिबेत्, इत्यादिना प्रत्यक्षेणे विरोधेन सर्वान्नभक्षण-विधिकल्पनस्यैवानुपपत्तेः। अशक्यत्वाच्च सर्वान्नभक्षणस्य नहि वटकाष्टादिकञ्जजाद्यन्नप्राणविदा भक्षयितुं[४] शक्यम् । अतः प्राणविदः सर्वंप्राणस्यान्नमिति ध्यानमेव विधीयते। अपां वासस्त्वाध्यानविधानप्रायपाठाच्च । अतो न सर्वान्नभक्षणप्रसक्तिः ।

आश्रमकर्माधिकरणम्

विहितत्वाच्चाश्रमकर्मापि ॥ ८ ।

अग्निहोत्रादिकं किं विविदिषार्थतयैव कर्तव्यमुत गृहस्थेनाप्यविविदिषुणा[५] प्रत्यवायपरिहारार्थं कर्तव्यमिति संशये

अग्निहोत्रादिकं कर्म विद्येच्छा साधयेद्यदि ।
तदा नाश्रमिमात्रेण तस्यानुष्ठानमिष्यते ॥
नह्येकमेव[६] नित्यं स्यादनित्यमिति चेष्यते ।
विरोधात्तेन हीच्छार्थं कर्माणीति विनिश्चयः ॥

'तमेतं वेदानुवचनेन ब्राह्मणाः विविदिषन्ति' (बृ० ४।४।२२)' इति वाक्येन विविदिषार्थत्वेन कर्मणामभ्युपगमे[७] तदर्थमेवानुष्ठानं स्यान्न तु प्रत्यवायपरिहार्थम्। तथात्वे नित्यानित्यसंयोगविरोधापत्तेरतो विविदिषार्थत्वमेव

१. घ० मा० 'एकलस्य' इति पाठः ।
२. ग० मा० 'अगमत्रन' इति पाठः ।
३. घ० मा० 'असक्यत्वात्' इति पाठः ।
४. घ० मा० 'प्राणविदामक्षमयितुम्' इति पाटः ।
५. घ० मा० 'विविदिषणाम्' इति पाठः ।
६. च० मा० 'ह्य' इति पाठो नास्ति ।
७. ग० मा० 'प' इति पाठो नास्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कर्मणाम् । न च वचनद्वयबलादुभयार्थत्वं[1] 'खादिरादिवात्' इति वाच्यम् । प्रमाणविरोधाभावेऽपि वस्तुविरोधानपायादिति पूर्वपक्ष ।

सिद्धान्तस्तु

अग्निहोत्रादिकं[2] कर्म ह्युभयार्थं भवेद्यथा ।
[3]विनियोगपृथक्त्वेन[4] खादिरत्वादिकं भवेत् ॥
नित्यादिविरोधेऽपि नात्र कश्चिद्धविष्यति ।
मानद्वयस्य सद्भावो वस्तुनोऽ[5]नैकशक्तितः ॥

'तमेवं वेदानुवचनेन' (बृ० ४।४।२२) इति वाक्येन '[6]यावज्जीवमग्निहोत्रञ्जुहोति' (मै० सं० १।८।६) इति वाक्येन चोभयत्र विनियोगेनोभयार्थतयानुष्ठानसम्भवात्[7] । यथा 'खादिरं वीर्यकामस्य खादिरो यूपो भवति'[8] इत्याभ्यां वाक्याभ्यां खादिरत्वस्योभयार्थता, तथा[9] कर्मणामपि[10] भविष्यति । न च नित्यानित्यसंयोगविरोधो[11] विनियोजकप्रमाणद्वयस्य सत्त्वम् । नापि वस्तुविरोधो विचित्रशक्तित्वेन कर्मणां नानाफलजनकत्वोपपत्त्या प्रमाणोपाधितयाऽनुष्ठानोपपत्तेः । अतोऽग्निहोत्रादानामाश्रमकर्मत्वमपीति ।

उभयलिङ्गाधिकरणम्

सर्वथापि[12] त एवोभयलिङ्गात् ॥ ६ ॥

पूर्वस्मिन्नधिकरणे कर्मणां विविदिषार्थत्वं प्रत्यवायपरिहारार्थञ्चोक्तम् । इहाधिकरणे तयोर्भेदाभेदौ चिन्त्येते । तत्र पूर्वः पक्षः

सामाग्निहोत्रन्यायेनानित्यभ्यो भेद इष्यते ।
असन्निधानादेतेषामिच्छार्थानामिति स्थितिः ॥

---

१. घ० मा० 'उभयार्थवं' इति पाठः ।
२. घ० मा० 'होक्षादिकम्' इति पाठः ।
३. घ० मा० 'सा विमियोग प्रथकन खादिरत्वादिकं तथा' इति पाठः ।
४. घ० मा० 'पृथग् केन' इति पाठः ।
५. घ० मा० 'वस्तुनो नेक' इति पाठः ।
६. घ० मा० 'होत्रं तु बुह्वति' इति पाठः ।
७. घ० मा० 'उभयार्थतयातु' इति पाठः ।
८. घ० मा० 'भवतीति पात्याम्यां' इवि पाठः ।
९. घ० मा० 'यथा' इति पाठः ।
१०. घ० मा० 'कर्मादि इति पाठः ।
११. घ० मा० 'विरोधा' इति पाठः ।
१२. (क) इदं सूत्रं सत्यानन्दसरस्वतीसम्पादितस्य टेढ़ोनीमवाराराणीस्थगोविन्दमठात् सं० २०२२ संवत्सरे प्रकाशितस्य शांकरभाष्ये-अधिकरणत्वेन पृथक् नोपन्यस्तं किन्त्वाश्रमकर्माधिकरणे समाविष्टमस्ति ।
(ख) छोटूपतिशास्त्रिसंशोधितस्य संवत् १९७० वेंकटेश्वरमुद्रणालयमुम्बईतः प्रकाशितस्य शाङ्करभाष्येऽपि सूत्रमिदन्नास्यग्गतमविरणत्वेनेति । एवं रोत्या म० म० अनन्तकृष्णशास्त्रिसम्पादित सन् १९३८ निर्णयसागरनुम्बईतः प्रकाशितग्रन्थेऽवपि बहुषु सूत्रमिदन्नाधिकरणत्वेन स्वीकृतम् । किन्त्वत्र ग्रन्थे लिपिकारानवधानाद्वा, अथवा ग्रन्थकारेणऽधि स्वयमेवाधिकरणम् स्वीकृतमिति स्फुटतरकारणन्न विद्मः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'तमेतं वेदानुवचनेन ब्राह्मणा विविदषन्ति' (बृ० ४।४।२२) इति वाक्येन विनियुक्तानां कर्मणां नित्याग्निहोत्रादिभ्योऽभेदोऽङ्गीकार्योऽनुपादेयसमभिव्याहृतासन्निधेः कर्मभेदकत्वस्य 'उपसद्भिश्चरित्वा मासमग्निहोत्रञ्जुहोत्यन्नं[1] जुहुति' इत्यादौ व्यवस्थापितत्वादिति।

सिद्धान्तस्तु

अग्निहोत्रादिशब्दा हि धर्माणामतिदेशकाः ।
तेन रूपस्य लब्धत्वात्कर्मान्तरविधिर्भवेत् ॥
इह यज्ञादिशब्दास्तु धर्माणान्नातिदेशकाः ।
नातः कर्मान्तरविधिरतस्तेषां परिग्रहः ॥

'मासमग्निहोत्रं जुहोति' इत्यत्राग्निहोत्रशब्दस्य नैयमिकाग्निहोत्रधर्मातिदेशकत्वेन रूपलाभेन कर्मान्तर विधायकत्वसम्भवात्। यज्ञादिशब्दानाञ्च धर्मतिदेशकत्वाभावेन रूपालाभेन कर्मान्तरविधायकत्वानुपपत्त्या प्रसिद्धानामेवाग्निहोत्रादीनां विनियोग इति न कर्मान्तरत्वमिति ।

विधुराधिकरणम्

अन्तरा चापि तु तद्दृष्टेः ॥१०॥

किमनाश्रमिणां विधुरादीनां विद्यायामधिकारोऽस्ति नेति सन्देहे पूर्वः पक्षः :—

अग्निहोत्रादिकर्माणि विधुरादौ न सन्ति हि ।
विद्यायामधिकारोऽतो विधुरादेर्न विद्यते ॥

नहि विधरादेरग्निहोत्रादिकर्माणि सन्ति। नहि कर्मभिर्विनाशविशेषविद्याफलं प्रसूते। अग्निहोत्रादित्याधिकरणे सविशेषविद्यायां कर्मसमुच्चयोक्तेः, नापि निर्विशेषविद्यानुष्ठानं' तदनुष्ठानं हि तत्साधनानुष्ठानं, तच्च श्रवणादि, यज्ञादिश्च न सन्न्यासिनां श्रवणाद्यनुष्ठानं[2] शक्यम्। अगृहस्थेन च न यज्ञादि। अत 'एवानाश्रमी न तिष्ठत[3] (दक्षस्मति १।१०) इति निन्दाप्युपपद्यत इति।

सिद्धान्तस्तु

[4]जपादियज्ञसद्भावाद्विधुरादेरधिक्रिया ।
विद्यासु रैक्वप्रभृतेर्विद्यानां दर्शनादपि ॥

विधुरादेरपि जपस्वाध्यायादिसम्भवेन[5] तत्समुच्चितायास्सविशेषविद्यायाः फलजनकत्वसम्भवात्। जपादीनामेव[6] विविदिषार्थत्वसम्भवाच्च श्रवणादिष्वपि प्रसिषेधाभावेन, न विधुरादेरप्यधिकारोपपत्तेश्च। अत एव

१. घ० मा० 'अन्नमिति' अधिकः पाठः।
२. घ० मा० 'अनुष्ठातुं शक्यत्' इति पाठः।
३. घ० मा० 'निष्व' इत्यधिकः पाठः।
४. घ० मा० 'जयादि' इति पाठः।
५. घ० मा० 'जय' इति पाठः।
६. घ० मा० 'जयादीनाम्' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जपेनैव[1] तु संसिध्येद्ब्राह्मणो नात्र संशयः ।
कुर्यादन्यत्र वा कुर्यान्मैत्र[2]ब्राह्मण उच्यते ॥

इति स्मृत्या जपादिकर्मप्रतिपादनमुपपद्यते[3] । किञ्चैकस्मिन्नेव जन्मनि[4] कृतैः कर्मभिर्न विविदिषा[5] जायते । 'अनेकजन्मसंसिद्धस्ततो याति परां गतिम्' (गी० ६।४५) इति स्मरणात् । अतो विधुराणामपि जन्मान्तरार्जितकर्म सम्भवाद्विविदिषोपपत्तिः 'अनाश्रमी न तिष्ठेत्' (दक्षस्मृति १।१०) इति वचनन्तु गार्हस्थ्यस्य प्रशस्तत्वबोधनार्थमिति[6] द्रष्टव्यम् ।

तद्भूताधिकरणम्

तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमात्तद्रूपाभावेभ्यः ॥११॥

सन्न्यासिनां[7] पुनः गार्हस्थ्यादिप्रवेश उपपद्यते नेति संशये

सन्न्यासाश्रममाविष्टस्सम्यक्कर्मचिकीर्षया ।
[8]गृहस्थत्वञ्च सम्पाद्य कर्म कुर्वीत यत्नतः ॥

सन्न्यासोत्तरं वैराग्यमान्द्यादिना पुनस्तद्त्याज्याय सम्यक्कर्मचिकीर्षायां सत्यां गार्हस्थ्यं सम्पाद्य कर्माणि कुर्वीतेति पूर्वः पक्षः

सिद्धान्तस्तु

सन्न्यासमाश्रमं प्राप्य गृहस्थो नाभवद्यतः ।
नियमादेस्तु सद्भावे तस्मात्कर्माननुस्थितिः ॥

सन्न्यासादिकं प्राप्तो हि न पुनः गार्हस्थ्यं प्रतिपद्यते । अरण्यभियादिपदं (?) ततो न पुनरेयादित्यादिनियमबोधनात् । आरोहक्रमवदवरोहक्रमात्तूक्तेः शिष्टानामेवाचाराभावाच्चेति ।

---

१. घ० मा० 'जयेनैव' इति पाठः ।
२. घ० मा० 'मोत्रोब्राह्मण' इति पाठः ।
३. घ० मा० 'जयादिकर्म' इति पाठः ।
४. घ० मा० 'जन्माति' इति पाठः ।
५. घ० मा० 'वि' इति पाठो नास्ति ।
६. च० मा० 'प्रशंसाबोधनार्थम्' इति पाठः ।
७. च० मा० 'सन्न्यासादिनां' इति पाठः ।
८. गृहस्था अपि चतुर्विधा भवन्ति वार्ताकवृत्तयः शालीनवृत्तयो यायावरा घोरसन्न्यासिकाश्चेति । तत्र वार्ताकवृत्तयः कृषिगोरक्षवाणिज्यमगर्हितमुपयुञ्जानाः शतसंवत्सराभिः क्रियाभिर्यजन्त आत्मानं प्रार्थयन्ते । शालीनवृत्तयो यजन्तो न याजयन्तोऽधीयाना नाध्यापयन्तो ददतो न प्रतिगृह्णन्तः शतसंवत्सराभिः क्रियाभिर्यजन्तः आत्मानं प्रार्थयन्ते । यायावरा यजन्तो याजन्तोऽधीयाना अध्यापयन्तो ददतः प्रतिगृह्णन्त शतसंवत्सराभिः क्रियाभिर्यजन्त आत्मानं प्रार्थयन्ते । घोरसन्न्यासिकाः उद्धृतपरिपूताभिरद्भिः कार्यं कुर्वन्तः प्रतिदिवसमाहृतोञ्छवृत्तिमुपयुञ्जानाः शतसंवत्सराभिः क्रियाभिर्यजन्तः आत्मानं प्रार्थयन्ते । (आ० उ० पृ० ६५२) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आधिकारिकाधिकरणम्

न चाधिकारिमपि पतनानुमानात्तदयोगात् ॥१२॥

'यो ब्रह्मचर्योऽवकिरेत्स नैर्ऋतं गर्दभं पशुमालभेत' इति विधीयमानं प्रायश्चितं किमुपकुर्वाणस्यैवोत-नैष्ठिकस्यापीति संशये

नैष्ठिकस्यावकीर्णित्वं प्रायश्चित्तन्न विद्यते ।
आरूढो नैष्ठिकं धर्ममिति वाक्यान्निषेधतः ॥

उपकुर्वाणस्येदं प्रायश्चित्तन्न नैष्ठिकस्य नहि छिन्नशिरसः प्रतिसन्धानमुपपद्यते ।

आरूढो नैष्ठिकं धर्मं यस्तु प्रच्यवते नरः ।
प्रायश्चित्तन्न पश्यामि येन शुद्धेत्स आत्महा ॥

(लघुशातातपस्मृति ५८)

इति प्रायश्चित्ताभाववचनाच्चेति पूर्वःपक्षः । सिद्धान्तस्तु

ब्रह्मचारीति शब्देन ह्यसङ्कुचितवृत्तिना ।
उभयांग्रहणात्तावत्प्रायश्चितं द्वयोरपि ॥

उपकुर्वाणनैष्ठिकयोरुभयोरपि प्रायश्चितं ब्रह्मचारिशब्दस्य सङ्कुचितवृत्तित्वाद्वनस्थसन्न्यासिनोरपि 'वनस्थो दीक्षाभेद इत्यादिना प्रायश्चितं स्मृतम् । 'आरूढ़ नैष्ठिकम्' (लघुशातातपस्मृति ५८) इति स्मरणस्य तु गतिरग्रिमाधिकरणे वक्ष्यत इति सिद्धन्नैष्ठिकस्यापि प्रायश्चितम् ।

बहिरधिकरणम्

बहिस्तूभयथापि स्मृतेराचाराच्च ॥१३॥

किमेते नैष्ठिकादयः कृतप्रायश्चिता व्यवहार्या नेति संशये

प्रायश्चित्तेन पापस्य निवृत्तौ व्यवहार्यता ।
कुतो न स्यादतस्तेषां व्यवहारसमन्वयः ॥

कृते प्रायश्चित्ते पापानिवृत्ते व्यवहार्या इति प्राप्ते सिद्धान्तः

स्मृत्याचारविरोधेन न तेषां व्यवहार्यता ।
दुःखादिशक्तिहानेऽपि पाप्मनः शुद्धिहेतुता ॥
प्रायश्चित्तेन नापेति[1] न पश्यामीति शास्त्रतः ।
अतो न व्यवहारस्तैः कर्तव्यस्तु कदाचन ॥

पापानां हि नरकजनकताशक्तिरैहिका शुद्धिजनकता चेति शक्तिद्वयम् । तत्र प्रायश्चित्ते नाना शक्तिरपगता[2] द्वितीया तु नापगता 'प्रायश्चितन्न पश्यामि' इति स्मरणात् । अप्रत्यासत्तिस्मरणाच्च [3]शिष्टाचारविरोधाच्च न संव्यवहार्या एता इति ।

१. घ० मा० 'नापेता' इति पाठः ।
२. घ० मा० 'रयगता' इति पाठः ।
३. घ० मा० 'शिष्टायार' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वाम्यधिकरणम्

स्वामिनः फलश्रुतेरित्यात्रेयः ॥१४॥

किमङ्गावबद्धान्युपासनान्यङ्गं येनानुष्ठीयते तेनैव कर्तव्यान्युत यजमानेनेति संशये

उपास्तिकर्तृगामित्वं फलस्य श्रूयते यतः ।
यजमानेन कर्तव्यं ह्युपासनमतो भवेत् ॥
परिक्रमश्च साङ्गस्य प्रधानस्य[1] सिद्धये ।
प्रधानयागवच्चात्र[2] यजमानस्य कर्तृता ॥
फलहेतुतयास्यापि[3] प्रधानत्वेन हेतुता ।
नर्त्विजामत्र कर्तृत्वं याजमानमनोगतम्[4] ॥

'ओमित्येतदक्षरमुद्गीथमुपासीत' (छा० १।१।१) इत्येवमादीन्याङ्गावबद्धोपासनानि यजमानकर्तृकाणि 'आपयिता ह वै कामानां भवति य एतदेवं विद्वानक्षरमुदगीथमुपास्ते' (छा० १।१।७) इत्युपासकस्येव फलश्रवणात् । न चर्त्विगेवोपासनं करोतु फलमपि प्राप्नोत्विति वाच्यम् । 'यजेत' इत्यात्मनेपदानुसारिणा साङ्गप्रधानकर्तृयजमानगामित्वस्य फलावश्यकत्वात् । न च 'यजेत' इत्यत्मनेपदानुसारेण यजमानेनैव साङ्गप्रधानस्य कर्तव्यत्वेऽपि दक्षिणादानविधिबलादृत्विजां[5] कर्तृत्वमेवोपासनेऽपि स्यादिति वाच्यम् । परिक्रमो हि साङ्गप्रधानानुष्ठानाय न तूपासनानुष्ठानाय । अतो यजमानेनैवोपासनानुष्ठानं कर्तव्यम् । किञ्च यागवत्फलसाधनेनोपासनस्य प्रधानत्वाद्यजमानानुष्ठेयत्वं न्याय्यमिति पूर्वःपक्षः ।

सिद्धान्तस्तु

यागभावनया यद्यत्सम्बद्धं तस्य तस्य हि ।
अनुष्ठानस्य सिद्धार्थं परिक्रम इति स्थितिः ॥
ततश्चोपासनस्यापि तत्सम्बन्धात्परिक्रमः ।
तदर्थोऽपीति विज्ञेयस्तेन कर्तरि[6] ऋत्विजः ॥
उपासनस्य प्राधान्यं यजमानत्वसाधकम् ।
शक्यानुष्ठानतो[7] नैव [8]तस्मादार्त्विज्यनिर्णयः ॥

---

१. ग० मा० 'प्रधानस्यैव' इति पाठः ।
२. ग० मा० 'नत्विजत्र कर्तृत्वं यजमान मनोमतम्' इति पाठः ।
३. ग० मा० 'फल....हेतुता' इत्यन्तः पाठो नास्ति ।
४. च० मा० 'मतम्' इति पाठः ।
५. घ० मा० 'बलाहर्त्विजाम्' इति पाठः ।
६. घ० मा० 'कत्रैण' इति पाठः ।
७. च० मा० 'शक्यानुष्ठान' इवि पाठो नास्ति ।
८. घ० मा० 'तस्माहार्त्विज्य' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्रतौ परिक्रमो हि यस्य यस्य भावनासम्बन्धित्वं तस्य सर्वस्याप्यनुष्ठानाय, उपासनमपि तत्सम्बन्ध्येवेति परिस्कृतेरेव ऋत्विग्भिः कर्त्तव्यं यागस्य न प्रधानत्वं प्रयुक्तम् । याजमानत्वं किमृत्विग्भिरनुष्ठातुमशक्यत्वं प्रयुक्तम् । नहि परकीयं द्रव्यं परेण त्यक्तुं शक्यम् । अत एव दक्षिणादानस्याङ्गत्वेऽपि यजमानत्वम् । तस्मादृत्विक्कर्मैवोपासनमिति । तस्मादेवंविद्दुगाता ब्रूयात्कन्ते कामभागीयानीत्येष ह्येव सामगानस्येष्टे 'य एतदेवं विद्वान् सामगायत, इति वाक्यमप्युपपद्यत इति ।

सहकार्य्यन्तरविध्यधिकरणम्

सहकार्य्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् ।।१५।।

'तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेद् बाल्यञ्च पाण्डित्यञ्च निर्विद्याथ मुनिरमौनञ्च मौनञ्च निर्विद्याऽथ ब्राह्मणः' (बृ० ३।५।१) इति वाजसनेनियनससमामनन्ति । तत्र संशयः किं मौनं विधीयत उत नेति । तत्र पूर्वः पक्षः—

मुनिशब्देन हि ज्ञानप्रकर्षं प्रतिपाद्यते ।
पाण्डित्येनास्य[1] लब्धत्वान्न[2] विधिस्तस्य विद्यते ।।

मौनशब्दार्थो हि ज्ञानप्रकर्षः, स च पाण्डित्यशब्देनैव लब्ध इति न तस्य विधानम् । तथा च 'अथ[3] ब्राह्मण' इति प्रायपाठोऽप्युपपद्यत इति । सिद्धान्तस्तु—

मौनं ध्यानमिह प्रोक्तं तच्च प्राप्तं कदाचन ।
अतस्तस्य विधेयत्वन्निर्वेद्यत्वस्य बोधनात् ।।

मौनं ध्यानन्न ज्ञानप्रकर्षमात्रं, तच्च यद्यपि निरतिशयानन्दरूपत्वादात्मनः प्राप्तम् । तथापि भोजनाद्यर्थं यदा व्युत्थानं प्रसक्तं तदापि चित्तसमाधानं[4] ब्रह्मणि कर्तव्यमिति विधानमावश्यकम् । अत एव 'मौनञ्च निर्विद्यो' इति निर्देश उपपद्यत इति ।

अनाविष्काराधिकरणम्

अनाविष्कुर्वन्नन्वयात् ।।१६।।

तत्रैव वाक्ये किं बाल्यशब्देन बालचरितं सर्वं तिष्ठन्मूत्रत्वादिगृह्यत उत प्ररूढेन्द्रियत्वादिगृह्यत इति संशये पूर्वः पक्षः

बालस्य कर्म बाल्यं स्यात्तत्तिष्ठन्मूत्रताद्यपि ।
अतस्तदप्यनुष्ठेयं विदुषो वचनाद्भवेत् ।।

'बाल्येन तिष्ठासेत्' इत्यत्र बाल्यशब्देन बालस्य कर्मोच्यते । न तु बालभावो वयो[6] विमर्शरूपं तस्य[7]

१. ग० मा० 'पाण्डित्येनैव' इति पाठः ।
२. च० मा० 'बलत्वात्' इति पाठः ।
३. च० मा० 'बाघ ब्राह्मण' इति पाठः ।
४. घ० मा० 'समाधानूमे' इति पाठः ।
५. ग० मा० 'मूलसूत्रन्न' लिखितम् ।
६. घ० मा० 'वो' इति पाठो नास्ति ।
७. ग० घ० मा० 'विशप रूपस्य' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुरुषेणानुष्ठातुमशक्यात्वात् । बालकर्मावतिष्ठन्मूत्रत्वाद्यपि[1] सङ्कोचे मानाभावात् । न च शास्त्रान्तरेण विरोधः सङ्कोचकः, प्रत्यक्षविधिरूपेण विशेषशास्त्रेण सामान्यशास्त्रस्य बाधोपपत्तेरिति ।

सिद्धान्तस्तु

त्रियाशेषतया चापि प्रतिषिद्धस्य वर्जनम् ।
श्रूयते [2]श्रुतिवाक्येषु तस्मात्सर्वस्य न ग्रहः ॥

बाल्यशब्दो हि नासङ्कुचितवृत्तिः सन्न सर्वं बालकर्माह 'नाविरतो दुश्चरितात्' (क० उ० १।२।२४) इति श्रुत्या तिष्ठन्मूत्रत्वादीनां[3] विद्याङ्गतया प्रतिषेधबोधनात्[4] । किन्त्वप्ररूढेन्द्रियत्वादाह । अतो विदुषां दम्भदर्पादिवर्जनोयमिति सिध्यति । अत एव स्मृतिषु तत्र तत्र गूढचर्यादिकं विदुष उच्यत इति ।

ऐहिकाधिकरणम्

ऐहिकमप्यप्रस्तुतप्रतिबन्धे तद्दर्शनात् ।।१७।।

ब्रह्मविद्यैहिकमेवो तामुष्मिक्यपीति संशये

ऐहिकी ब्रह्मविद्या स्याद्विद्या[5] मे स्यादिहेति हि ।
कामना दृश्यते तेन चैहिकत्वस्य निश्चयः ॥

ब्रह्मविद्यैहिक्येवेह जन्मनि विद्या मे स्यादिति कामनया प्रभृतिदर्शनात् । न च चित्राफलस्य पश्वादेरैहिकामुष्मिकत्ववदुभयरूपत्वं ब्रह्मविद्याया अपि स्यादिति वाच्यम् । श्रवणादिजनितनियमादृष्टसद्भावेऽपि चक्षुरादिजनितसाक्षात्कारस्यैहिकत्वनियमेन ब्रह्मविद्याया अपि तादृक्त्वनियमाभ्युपगमादिति पूर्व पक्षः ।

सिद्धान्तस्तु

ऐहिकयामुष्मिकी चैवं[6] ब्रह्मविद्या प्रपद्यते ।
प्रतिबन्ध (स्य) सद्भावे हीह विद्या न दृश्यते ॥
गर्भस्थवामदेवादेर्विद्यादर्शनतोऽपि च ।
नहि कल्याणकृत्कश्चिदिति गीताबलादपि ॥

ब्रह्मज्ञानमामुष्मिकमपि शीतप्रतिबन्धकीभूतानां प्रारब्धरूपाणां पापानां श्रवणादिना निवृत्त्ययोगेनेह जन्मनि ज्ञानपरिपाकसम्भवे जन्मान्तरीयकत्वस्यावश्यकत्वात् । एवञ्च 'विद्या मे स्यात्' इति कामनया प्रवृत्तिः स्वीक्रियते ।

अत एव 'श्रवणायापि बहुभिर्यो नलभ्य श्रृण्वन्तोऽपि बहवो यं न विद्युः'[7] (क० उ० १।२।७) इति शास्त्रमप्युपपद्यते । अत एव गर्भस्थस्य वामदेवस्य ज्ञानोत्पत्ति[8] श्रुतिः प्रतिपादयति । न हि तदा श्रवणाद्यनुष्ठान-

---

३. ग० घ० मा० 'बलकभवतिष्ठम्' इति पाठः ।
४. ग० मा० 'तेन बाल्यस्य सर्वस्याप्यपरिग्रहः' इति पाठः ।
५. च० मा० 'मात्रत्वादिना' इति पाठः ।
६. च० मा० 'बाधनात्' इति पाठः ।
७. ग० मा० 'दिह मे जायतमिति इति पाठः ।
८. ग० घ० मा० 'ऐहिकामुष्मिकत्वंहि ब्रह्मविद्या प्रपद्यते' इति पाठः ।
१. घ० मा० 'विद्युरिति' इति पाठः ।
२. घ० मा० 'ज्ञानोसन्ति' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मस्ति । अत एवार्जुनेन 'अयतिः श्रयोपेत' (गी० ६।३७) इत्यादिनेह जन्मनि[१] ज्ञानसाधनमनुष्ठितवताज्ञानानुत्पत्तौ किं भवतीति पृष्टो भगवान् 'नहि कल्याणकृत्कश्चित्' इत्यादिनेह जन्मनि ज्ञानाभावेऽपि जन्मान्तर उत्पद्यत इति प्रतिपादयतिस्म । तस्मादामुष्मिक्यपि[२] विद्या ।

मुक्तफलाधिकरणम्

एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः ॥१८॥

निर्विशेषब्रह्मविद्याफलं तारतम्ययुक्तन्नेति संशये

साधने तारतम्येन फलेऽपि तदपेक्षितम् ।
सगुणब्रह्मविद्यावन्निर्गुणायाः फलं भवेत् ॥

निर्गुणविद्याफलं तारतम्यभावग्रस्तं साधनतारतम्ये फलतारतम्यस्यावश्यकत्वात् । विद्यायाश्च तत्साधनविचारतारतम्येन तारतम्यस्यावश्यकत्वात्सगुणविद्यावदिति पूर्वः पक्षः ।

सिद्धान्तस्तु—

निर्गुणब्रह्मविद्याया एकरूपत्वमिष्यते ।
तत्फले तारतम्यन्तु वक्तुन्नैवोपपद्यते ॥

श्रवणमनननिदिध्यासनादिसाधनैर्जायमाननिर्विशेषब्रह्मविद्या अविद्यां निःशेषमुच्छिनत्ति[३] । तत्रानन्दतारतम्यरूपमोक्षतारतम्यानुपपत्तिरसम्भावनादिदोषविरहसहकृतस्यैव ज्ञानशब्दार्थत्वात् । तस्माच्चैकरुप्यात् । सगुणब्रह्मविद्यान्तु गुणतारतम्यप्रयुक्ततारतम्यमुपपद्यते । अतोऽभिव्यक्तितारतम्यैवानन्दरूपमोक्षस्य तारतम्यमित्यपि शङ्काया अनवकाशः । तस्मादेकरूपैव मुक्तिरिति[४] ।

इति श्रीपरमहंसपरिव्राजकाचार्यसर्वतन्त्रस्वतन्त्र श्रीमदद्वैतानन्दसरस्वतीचरणारविन्दभृङ्गायमानस्य स्वयम्प्रकाशानन्दस्य कृतिषु वेदान्तनयभूषणे तृतीयस्याध्यायस्य चतुर्थः पादः ।

---

१. घ० मा० 'इत्यादिनोइह' इति पाठः ।

२. घ० मा० 'क्यपि आदि' इति पाठः ।

३. 'मुच्छिततत्ति' इति पाठः ।

१. क —वैराग्यत्वं पदाद्यर्थो गुणानामुपसंहृतिः
ससन्न्यासमिह ज्ञानं मुक्तये चेति वर्णितम् । इति ।

ख —तत्फलन्तु कस्यचिदत्यनुग्रहेण पुष्टौ प्रवेशने भवतीति''''''एवं सति मुक्तिपर्यन्तसाधनं भगवद्भाव इति निर्णयः' (अ०भा० ३/४/५१) ।

ग —पूर्वाधिकरणसमयमुपसंहरति, एवमिति, तदर्थश्च, एवम्, गृहिणोऽपि-ऐहिक ब्रह्मापरोक्षज्ञाने सति, मुक्तिफलानियमः, प्रव्रज्यायामेव मुक्तिफलन्न गृहिणामिति नियमो न, तदवस्थावधृतेः, तस्मान्नास्ति मुक्तौ सन्न्यासिगृहिणोः कश्चिद्विशेष इति' (शां०भा० ३/४,५२) ।

घ —एवं भूतस्य गृहिणो 'जीवन्मुक्तस्य मुक्तेर्यत्फलं भगवद्रसानुभवस्तस्यानियम एव । अत्र हेतुमाह, तदवस्थेत्यादि 'न स पुनरावर्तत' इत्यादिश्रुत्या मोक्षावस्थाया एव नियम स्वीक्रियते । न तु पुष्टिमार्गीयफलस्य जीवनमुक्तिदशा तु तस्यौत्सर्गिकयेवेति भावः । अतस्तद्वदित्यर्थः । अत्र भक्तस्य भगवद्रसानुभवानियम उक्तः स तु भक्तिमार्गीयसर्वाभिप्रायेण । तत्र शुद्धपुष्टिभक्तस्य परमानुग्रहभाजनत्वान्मुक्तेर्यत्फलं भगवद्रसानुभवस्तदेव तादृशसाधनसम्पत्तौ नियमेन भवति । येषां भक्तानां शुद्धपुष्टिमार्गीयसाधनसम्पन्नं तेषां तु साधनाभावादेव न विलक्षणभगवत्सम्बन्धात्मकं फलं भवति, मोक्षस्तु भवत्येव सर्वेषामित्यभिप्रायेण मुक्तिफलानियम उक्तः' (ब्र०सू०वृ० मरीचिका ३/४/५१) ।

ङ०—ब्रह्मविद्योपासकानां नित्यनिरतिशयानन्दस्वाभावाद् द्वितीयसशरीराशरीमुक्तिद्वयं स्वेच्छानुसारेण लभ्यते । तस्मान्नैका मुक्तिरिति' । (श्रीकर भाष्य ३।४।५२) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चतुर्थाध्याये प्रथमः पादः

आवृत्त्यधिकरणम्

आवृत्तिरसकृदुपदेशात्॥८॥

ससाधना ब्रह्मविद्या तृतीये प्रतिपादिता।
अथेदानीञ्चतुर्थेऽस्मिन् तत्फलं प्रतिपाद्यते॥

तत्रादौ केषुचिदधिकरणेषु साधन[1] एव विचारः क्रियते 'श्रोतव्यो मन्तव्य' (बृ० ४।५।६) इत्यादिश्रूयमाणं श्रवणादिकं किमावर्तनीयन्न वेति संशयस्तत्र पूर्वः पक्षः

श्रवणादेरिहावृत्तिः प्रमाणाभावतो नहि।
अदृष्टार्थत्वस्तस्य ह्यवघातो[2] नयोऽत्र नः॥

श्रवणादिकं नावर्तनीयं मानाभावात्। न च 'व्रीहीनवहन्तीति' श्रुतमवहनं, यथाऽऽवर्त्यते तथा श्रवणादिकमपीति वाच्यम्।[3] अवघातो [4]दृष्टार्थत्वादावर्त्यत इति युक्तं [5]श्रवणन्त्वदृष्टार्थत्वात्सर्वौषधावहननवन्निवर्तनावर्तनीयम्[6]। न च श्रवणमपि दृष्टार्थमेव, विचारस्य विचार्यनिर्णयार्थत्वादत्र[7]। विचारस्यैव श्रवणशब्दार्थत्वादिति वाच्यम्। तथात्वे विधिवैयर्थ्यापत्तिविधिबलाच्चादृष्टार्थत्वमेव[8]स्वीकार्यम्। तथा हि 'तमेतं वेदानुवचनेन' (बृ० ४।४।२२) इति वाक्यं यथा कर्मणां[9] विविदिषायां विनियोजकं तथेदर्मापि, तत्र हि कर्मणां पापनिवर्तकताधर्मेण 'पापमपनुदति (म०ना०उ० २२।१ इति शास्त्रसिद्धम्[10]।

पापक्षयस्य च विविदिषाद्वारा ज्ञानहेतुना '[11]ज्ञानमुत्पद्यते पुसांमिति[12]' शास्त्रसिद्धः। एवं सति विधानं किमर्थमिति चेद्विविदिषाप्रतिबन्धकी[13]भूतानामेव[14] पापानां निवर्तकता कर्मणामेतद्विधिबलात्सिध्यति। नत्वेतद्विध्यभाव इति तद्विधिमार्थक्यं स्वीक्रियते। एवम्

---

१. ग० मा० 'आश्रय' इति पाठः।
२. ग० मा० 'नावघातनमीत्र च' इति पाठः।
३. च० मा० 'अवघातसन्यासमिजहसानं मुक्तये चेति वर्णितम्' इति पाठः।
४. च० मा० 'हि' इत्यधिकः पाठः।
५. घ० मा० 'सर्वाषधीवहं' इति पाठः।
६. च० मा० 'यथाव हननवद्' इति पाठः।
घ० मा० 'ननवत्' इति पाठो नास्ति।
७. घ० मा० 'त्वादस्त्र' इति पाठः।
८. घ० मा० 'पत्ते नविधि' इति पाठः।
९. च० मा० 'धमंनेविविदिवा' इति विपरीतः पाठः क्रम दृश्यते
१०. घ० मा० 'शास्त्रसिद्धान्तपाप' इति पाठः।
११. घ० मा० 'उत्पद्यतेषुसाम्' इति पाठः।
१२. च० मा० 'क्षयात्वायस्य कर्मण' इति पाठः।
१३. घ० मा० 'प्रतिपन्थकी' इति पाठः।
१४. घ० मा० 'भूवानाम्' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दिने दिने च वेदान्तश्रवणाद्भक्तिसंयुतात् ।
गुरुशुश्रूषया लब्धात्कृच्छ्राशीति फलं लभेत् ॥

इति वाक्याच्छ्रवणस्य पापनिवर्तकतावगमेऽपि पापक्षयस्य च ज्ञानसाधनत्वा[1] कामेऽपि ज्ञानप्रतिबन्धकीभूतानामेव पापानां निवृत्त्यर्थं श्रवणविध्युपपत्तेरतोऽपूर्वार्थत्वाच्छ्रवणादीनामनावृत्तिरिति ।

सिद्धान्तस्तु

आवृत्तिश्रणादेस्तु दृष्टार्थत्वादपेक्षिता ।
अदृष्टार्थत्वपक्षेऽपि दृष्टताया[2] अहानितः ॥

श्रवणादिकं तावदावर्तनीयमसंभावनादिनिवृत्तिद्वारा तस्य साक्षात्कारार्थत्वात् । विचारो[3] हि विचारनिर्णयहेतुत्वेन प्रसिद्धः । अतः पूर्वोक्तरीत्याऽपूर्वविधित्वेऽपि विचार्यनिर्णयहेतुत्वेनाश्रयणीयैव ।

मिश्रानुसारिणस्तु श्रवणे विधिर्नास्त्येवान्वयव्यतिरेकाभ्यामेव वेदान्तवाक्यविचाररूपश्रवणस्य वेदान्तप्रतिपाद्यात्मनिर्णयहेतुत्वात्[4] । न च साक्षात्कारं प्रति श्रवणस्य विचारितशब्दज्ञानरूपस्य हेतुत्वेना प्राप्तेस्तद्विधानमिति वाच्यम् । शाब्दापरोक्षमते तस्यापि प्राप्तत्वादितरमते विधानादपि शब्दस्यापरोक्षज्ञानजनकत्वानुपपत्तेरतो न श्रवणे विधिः । एवञ्च विचार्यनिर्णयप्रतिबन्धकीभूतशङ्कानिवृत्तिपर्यन्तमावृत्तिः[5] स्वीकार्येत्याहुः ।

विवरणानुयायिनस्तु यद्यपि शब्दो ब्रह्मसाक्षात्कारजनकस्तद्विचारोऽपि [6]विचार्यनिर्णयात्मकसाक्षात्कारजनकोऽन्वयव्यतिरेकाभ्यां 'क्लृप्तस्तथापि[7] श्रवणे विधिरावश्यकः, श्रवणं हि तात्पर्यनिर्धारणानुकूलो[8]व्यापारविशेषो विचारात्मकः । 'तस्य च फलं तात्पर्यनिर्धारणमेव[9], तत्र च तथा विचारस्य साधनया[10] प्राप्तिरेवं विचारनिर्णीततात्पर्यस्याप्यस्य[11] वचनमपि हेतुरतस्तन्निवृत्त्यर्थंतया नियमविधिरावश्यकः[12] । न [13]चाप्तपुरुवचने[14] श्रद्धारहित-

१. घ० मा० 'ज्ञान क्षय' इति पाठः ।
२. ग० मा० 'दृष्टार्थत्वानषायत' इति पाठः ।
३. घ० मा० विचार्शे हि' इति पाठः ।
४. ग० मा० 'हेतुत्वलाभात्' इति पाठः ।
५. ग० मा० 'पर्यन्तमावृत्तिः' इति पाठो नास्ति ।
६. घ० मा० 'निर्णायाकात्मक' इति पाठः ।
७. ग० मा० 'प्राप्त' इति पाठः ।
८. घ० मा० 'निर्धारणपुनुकूलो' इति पाठः ।
९. घ० मा० 'मेव' इत्याधिकः पाठः ।
१०. च० मा० 'साधनतया' इति पाठः ।
११. घ० मा० 'तात्पर्यस्यात्यस्य' इति पाठः ।
१२. ग० मा० 'आवश्यक' इति पाठो नास्ति ।
१३. घ० मा० 'न चास पुरुष' इति पाठः ।
१४. घ० मा० 'न' इत्यधिकः पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्याप्तवचनं पक्षे[१] न प्राप्तमिति वाच्यम् । अतिश्रद्धालोः कुशलमतेरुभयप्राप्तौ[२] नियमोपपत्तेः तादृशस्य मन्दमतेस्तु परोपदेशेनैवात्मनिर्णयं सादृश्यध्यानादिकमनुष्ठेयं[३], अत[४] एव श्रुतिः 'तत्कारणं सांख्ययोगाभिगम्यम्,(श्वेता० ६।१३) इति । न च भृगुवल्यामिदमिति "ब्रह्मानुक्त्वालक्षणोक्त्या[६] लक्षणमुखेनैव[७] ब्रह्मावगन्तव्यमित्यवधरणं (स्था स्यात्) लक्षणस्य चाव्याप्त्यादिराहित्यज्ञानाय[८] विचारोऽर्थ प्राप्त इति विचारविधिरनर्थक इति वाच्यम् । गवाश्वादिवत्[९] प्रत्यक्षेण ब्रह्मणो दर्शयितुमशक्यत्वात् । स्वरूपानुक्तिस्त्वसिद्धाः सत्यमित्यादिवाक्यैस्तदुक्तैस्तटस्थलक्षणोक्तैस्तु प्रयोजनं जन्मादिसूत्र एवोक्तम् । अतो विचारविधिरावश्यकस्तथाचावहननादिवदसंभावनादिनिवृत्तिपर्यन्तं श्रवणादिरावर्तनीय[१०] एवेत्याहुः[११] ।

आत्मत्वोपासनाधिकुरणम्

आत्मेति तूपगच्छन्ति ग्राहयन्ति च ॥२॥

'तत्त्वमसि' (छा० ६।१५।३) इति वाक्यञ्जीवब्रह्मणोरैक्यं बोधयति नवेति सन्देहे पूर्वः पक्षः

जीवस्य ब्रह्मणैकत्वं विरोधो[१२]ऽत्रोपपद्यते ।
सर्वज्ञत्वं तदन्यत्वं नह्येकत्रोपपद्यते ॥

जीवो ह्यवस्थात्रययुक्तस्सर्वज्ञश्चानुभूयते,[१३] ब्रह्म चावस्थात्रयरहितं सर्वज्ञञ्चेति श्रुतिस्मृतिप्रसिद्धमतो विरोधान्नैक्योपपत्तिरिति ।

---

१. घ० मा० 'पक्षेन' इति पाठः ।
२. घ० मा० 'कुशमते' इति पाठः ।
३. ग० घ० मा० 'सादृश्यध्यानादि' इति पाठः ।
च० मा० 'सश्माद्य' इति पाठः ।
४. घ० मा० 'अनुष्ठेयमत अत्र एव' इति पाठः ।
५. घ० मा० 'ब्रह्मानुत्तात' इति पाठः ।
६. घ० मा० 'क्ष' इति पाठः ।
७. घ० मा० 'लक्षणमुखेनैव' इति पाठः ।
८. घ० मा० 'चाव्यात्प्यादि' इति पाठः ।
९. घ० मा० 'गवश्वादिवत्' इति पाठः ।
१०. क—दर्शनपर्यवसानत्वादेषाम्, दर्शनपर्यवसानानि हि श्रवणादीन्यावर्त्यमानानि दृष्टार्थानि भवन्ति । यथा-अवघातादीनि तण्डुलादिपर्यवसानानि तद्वत् । (शा० भा० ४।१।१) ।
ख—अत्र पूर्वपक्षे श्रवणादेः प्रयाजवददृष्टार्थत्वात्सकृदनुष्ठानफलम्, सिद्धान्ते त्ववघावत् दृष्टार्थत्वाद्यावत्फलमावृत्तिरिति भेदः (र० प्र०, पृ० १२४१) ।
ग—ननु 'व्रीहीनवहन्ति' इत्यवघातमात्रश्रवणेऽपि यथा वितुषीभावपर्यन्तं तस्यावृत्तिः, एवं श्रवणादीनामप्यावृत्तिः किन्न स्यात् । न स्यात् । अवघातस्य हि वितुषीभावो दृष्टं फलम् । अतस्तत्सिद्धयेऽश्रुताप्यावृत्तिस्तत्राक्षिप्यते ।' (ब्र० वि० भ० ४।१।१) ।
११. घ० मा० 'एवेत्याह्हनु' इति पाठः ।
१२. घ० मा० 'विरोधान्नोपपद्यते' इति पाठः ।
१३. ग० मा० 'असर्वज्ञ' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सिद्धान्तस्तु

सर्वज्ञत्वादिधर्माणां मिथ्यात्वप्रतिपादनात् ।
तच्च[1] चैतन्ये (?) तस्मादैक्यं तयोर्द्वयोः ॥

सर्वज्ञत्वादिधर्माणां मिथ्यात्वेन विरोधाभात्तत्त्वमस्यादि (छा० ६।१५।३) वाक्यञ्चैतन्यांशे विरोधाभावादैक्यस्य बोधकम् । तत्र [2]त्वंपदवाच्यमवस्थात्रयविशिष्टं, तत्पदवाच्यजगत्कारणत्वविशिष्टं, तत्र विशेषणांशयोरैक्यबाधेऽपि तत्परित्यागपूर्वकं विशेष्यांशचैतन्यैक्यबोधकमतो नैक्यविरोधः ।[3]

प्रतीकाधिकरणम्

न प्रतीके न हि स ॥३॥

'मनो ब्रह्मेत्युपासीत' (छा० ३।१८।१) 'आदित्यो ब्रह्मेत्यादेशः' (छा० ३।१९।१) इत्येवमादिप्रतीकोपासनेष्वहंग्रहः[4] कर्त्तव्यो नेति संशये पूर्वपक्षः

प्रतीके[5]ऽहंमतिः कार्या सगुणेषु यथा तथा ।
ब्रह्माभिन्नत्वतो [6]हेतोर्बाधो नैवात्र विद्यते ।

सगुणेषु ब्रह्मोपासनेष्वहङ्ग्रहो यदा स्वीक्रियते तदा प्रतीकोपासनेष्वपि स्वीकार्यः । न च तत्र 'त्वं वाहमस्मि भगवो वो दैवत अहं वै तत्त्वमसि' इति वचनबलादहङ्ग्रहः स्वीकार इति वाच्यम् एवमपि । यत्र वचनन्नास्ति सगुणोपासनेन[7] तत्रागतेः । न च तत्र ब्रह्मणो जीवाभिन्नत्वसम्भवादहङ्ग्रह इति वाच्यम् । इहापि मनसो ब्रह्मविकारत्वेनारम्भणाधिकरणन्यायेन ब्रह्माभिन्नत्वसम्भवेन जीवस्य स्वाभिन्नब्रह्माभिन्नत्वमनसाप्यभेदा[8] सम्भवेनाहंग्रहोपपत्तिरिति । सिद्धान्तस्तु

बाधेन[9] मनसा नैक्याज्जीवस्याहम्मतिः कुतः ।
जडांशस्य विकारस्य ब्रह्मणा[10] वापि नैकता ॥
तदीयसत्तामादाय यद्यैक्यं मन्यते त्वया[11] ।
प्रतीकबाध एव स्यादतो नाहंग्रहो भवेत् ॥

---

१. ग० मा० 'अविरोधाच्च चैतन्येतस्मादैक्यं तयोर्द्वयोः' इति पाठः ।
२. जाग्रत्स्वप्नसुषुप्त्यवच्छिन्नजीवात्मा त्वंपदवाच्यः स एव जीवात्माऽवस्थात्रयविशिष्टः तच्च चैतन्यमात्रबोधान्नविरोधः ।
३. घ० मा० 'नैक्यविशेष:' इति पाठः ।
४. घ० मा० 'उपासनो ह्यहंग्रहः' इति पाठः ।
५. घ० मा० 'प्रतीहं मतिः' इति पाठः ।
६. घ० मा० 'हेतुर्बाध' इति पाठः ।
७. ग० मा० 'न' इति पाठो नास्ति ।
८. घ० मा० 'ब्रह्मभिष' इति पाठः ।
९. घ० मा० 'बाधिक मनसा' इति पाठः ।
१०. घ० मा० 'ब्रह्माचणान्वापि' इति पाठः ।
११. घ० मा० 'त्वयो' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सगुणेषूपासनेषु 'देवो भूत्वा देवानप्येति' (बृ० ४।१।७) इति शास्त्रपर्यालोचनयैव देवभावनिश्चयस्या नाहङ्ग्रहस्याव स्यकत्वेऽपीह[1] न स्वीकारे प्रमाणाभावाज्जीवस्य जडेन मनसा सहैक्ये मानाभावाच्च। ब्रह्मणापि मनसो नैक्यं जडाजडयोरैक्यायोगादारम्भणाधिकरणस्य च जडवर्गमिथ्यात्वे [2]तात्पर्यंतत्त्वभेदः[3]। अत एव भाष्यम् 'तदनन्यत्वं[4] तदव्यतिरेकेणाभाव'[5] (शां० भा० २।१।१४) इति। अत एव च भामती 'न वयमभेदं ब्रूमः किन्तु भेदं व्यासेधाम'[6] (भा० २।१।१४) इति। न च सत्तांशमादाय ब्रह्माभेदः शंक्यास्तथा सति प्रतोकोपमर्दन तत्त्वप्रतिपादकवाक्यमेतत्स्यान्न प्रतीकोपासनपरस्तस्मान्नाहग्रहः प्रतीकेति।[7]

ब्रह्मदृष्टयधिकरणम्

ब्रह्मदृष्टिरुत्कर्षात् ॥४॥

'आदित्यो ब्रह्मत्यादेशः' (छा० ३।१६।१) 'मनोब्रह्मेत्युपासीत' (छा० ३।१८।१) इत्यादावेव संशयः किं मन आदिषु ब्रह्मदृष्टिरुत ब्रह्मणि मन आदिदृष्टिरिति किं प्राप्तं, ब्रह्मणि मन[8] आदिदृष्टिरिति, कुतः

ब्रह्मणः फलदातृत्वाद्ब्रह्मोपास्यमिहेष्यते।
[9]फलहेतुत्वराहित्यान्मनो नोपास्यमिष्यते॥

सिद्धान्तस्तु

एवं प्राप्ते ब्रवीम्यत्र [10]मानस्युपास्यतामहम्।
अन्यथा हि भवेद्दोषो निकृष्टत्वेन दर्शनात्॥
उत्कृष्टब्रह्मणस्तावत्फलदानञ्च युज्यते।
[11]ब्रह्मासम्बन्धवाग्धेन्वा ह्युपास्तिवदिहापि च॥
ब्रह्मणोऽत्रापि सम्बन्धो गुणत्वेन प्रतीयते।
अतो न [12]लौकिको न्यायस्त्यक्तव्योऽत्र कथञ्चन॥

तस्मान्मन[13] आदिषु ब्रह्मदृष्टिरिति।

---

१. घ० मा० 'अपि इहन' इति पाठः।
२. घ० च० मा० नत्व' इति पाठः।
३. घ० मा० 'भेदेप्यत्र' इति पाठः।
४. 'अनन्तयत्वं व्यतिरेकेणाभाव' इति भाष्य पाठः।
   ग० मा० 'तदन.....' इति भाष्यपाठो नास्ति।
५. घ० मा० तद्व्यतिरेकेण भाव'इति पाठः।
६. न खल्वनन्यत्वमित्यभेदं ब्रूमः किन्तु भेदं व्यासेधामः' इति भामती पाठः।
   घ० मा० 'न क्यं.....भेदं व्यासेधीम' इति पाठः।
७. ग० मा० 'प्रतीकेषु' इति पाठः।
८. घ० मा० 'मत आदि' इतयधिकः पाठः।
९. ग० मा० 'फलदातृत्वराहित्याज्ज न्नोपास्यामिष्यते' इति पाठः।
१०. ग० मा० 'मन आदेरुपास्यताम्' इति पाठः।
११. ग० मा० 'ब्रह्मणोऽत्रापि सम्बन्धो गुणत्वेनानुवर्तनम्' इति पाठः।
१२. च० मा० 'लौकिकताक' इति पाठः।
१३. ग० मा० मन आदिषु तस्माद्ब्रह्मदृष्टिरिति स्थितिम्' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आदित्यादिमत्यधिकरणम्

आदित्यादिमतयश्चाङ्ग उपपत्तेः ॥५॥

'ओमित्येतदक्षरमुद्गीथमुपासीत'[१] (छा० १।१।१),, 'लोकेषु पञ्चविधं सामोपासीत' (छा० २।२।१) इत्येवमादिष्वङ्गावबद्धोपासनेषु संशयः, किमङ्गेष्वादित्यादिमतिः कर्तव्या उतादित्यादिष्वङ्गदृष्टिरिति। किं प्राप्तम्, आदित्यादिष्वङ्गदृष्टिरिति। कुतः

आदित्यादिर्हि सिद्धस्य साध्यकर्माङ्गदर्शनात्।
साध्यतां प्रतिपन्नस्य फलदातृत्वसम्भवात् ॥
सिद्धात्मना तु दृष्टत्वे[२] कर्माङ्गस्यापि सिद्धता।
ततश्च फलहेतुत्वन्नैव स्यादिति मन्यते ॥

पूर्वत्र ह्युत्कृष्टस्य निकृष्टात्मनोपासेन दोषवदिह दोषाभावेऽपि क्रियाया फलसाधनत्वेन सिद्धस्यैव साध्यात्मना दर्शने फलसाधनत्वमुपपद्यते, न[३] तु वैपरीत्ये, एवञ्च 'लोकेषु पञ्चविधं सामोपासीत' (छा० २।२।१) इत्यादि वाक्ये लोकेष्विति सप्तमीति विशेष्यतार्थिकोपपन्ना। अत एव 'पृथिवीर्हिंकार' (छा० २।१७।१) इत्यादौ पृथिव्यादीनां प्राथम्यनिर्देश उपपद्यते 'इयमेवर्गग्निः' (छा० १।६।१) 'साम'इत्युक्त्वा[४] 'तदेतदेतस्यामृच्यध्यूढा' (छा० १।६।१) इति ऋक्शब्देन[५] पृथिव्यास्सामशब्देनाग्नेश्च निर्देश उपपद्यते। ऋगादौ पृथिव्या[?]बोष्ठो हि पृथिव्यादि शब्देनेव ऋगादीनामभिधानं स्यादत आदित्यादिष्वङ्गदृष्टिरेव कर्तव्येति।

सिद्धान्तस्तु

उपास्तिसंस्कृतं ह्यङ्गं फलातिशयकृद्भवेत्।
'य एव[६]' इत्यादिवाक्येन फलातिशयहेतुता ॥
उक्तोपास्तेः प्रयुक्तेश्च[७] लाघवं ह्यत्र लभ्यते।
आदित्यादेः फलत्वेन प्रकृष्टत्वस्य सम्भवात् ॥
अतः पूर्वनयादेव ह्यङ्गोपास्तिरिहेष्यते।
उपास्तेस्साध्यरूपत्वात्फलमप्युपपद्यते ॥

---

१. ग० मा० 'प्रस्तुत्य आदित्य उद्गीथ इति श्रुतम्' इति पाठः।
च० मा० 'प्रशस्त्यादो वा आदित्य उद्गीथ इत्युक्तं तथा' इति पाठः।
२. ग० मा० 'दृष्टस्य' इति पाठः।
३. घ० मा० 'नतु' इति पाठः।
४. घ० मा० 'त्युत्वा' इति पाठः।
५. घ० मा० 'क्रक्शब्देन' इति पाठः।
६. ग० मा० 'विघयेत्येवम्' इति पाठः।
च० मा० 'यद् एव' इति पाठः।
७. घ० मा० 'प्रयुक्त' इत्यधिकः पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'यदेव विद्यया करोति तदेव वीर्यवत्तरं भवति' (छा० १।१०) इत्युपासनरथ[1] कर्म वीर्यवत्तरत्वहेतुनावगम्यते। सा च कर्माङ्गसंस्कारद्वारोपपद्यते दृष्टार्थत्वसम्भवादितरथादृष्टार्थत्वापत्ते[2]। किञ्च कर्माङ्गेषूपासनेऽभ्युपगम्यमाने[3] प्रयुक्तिलाघवं लभ्यते। इतरस्योपास्त्यर्थमेव सामप्रयुक्तिकल्पना स्यात्। किञ्चादित्यादे:[4] फलत्वेनोत्कृष्टत्वात् पूर्वाधिकरणन्यायेनोदगीथादिष्वेवादित्यदृष्टिरत[5] एव 'इयमेवर्गग्निः साम' (छा० १।६।१) इति निर्देश उपपद्यते। 'तदेतदेतस्यामृच्यध्यूढम्[6]' (छा० १।६।१) इति निर्देशोऽपि कथञ्चिदुपपादनीयः। 'लोकेषु पञ्चविधम्[7]' (छा० २।२।१) इत्यत्र सप्तमीप्रकारतायां समस्तस्य खलु साम्न उपासनमिति साम्न एवोपास्यत्वोपक्रमणन्तु पञ्चविधस्येत्यवान्तरोपसंहारेण 'अथ तु सप्तविध' इत्यवान्तरोपक्रमेण च साम्न एवोपास्यत्वावगमातु 'पृथिवी हिंकार' (छा० २।१७।१) इत्यादिनिर्देशाच्च कथञ्चिद्योज्या[8] इति।

आसीनाधिकरणम्

आसीनस्सम्भवात् ॥६॥

यान्यङ्गावबद्धोपासनानि तानि यदवस्थेनर्त्विजाङ्गानि क्रियन्ते तदवस्थेनैव तिष्ठतासीनेन वा कर्तव्यानि। यानित्वनङ्गावबद्धोपासनानि तिष्ठता वासीनेन वा कर्तव्यानीत्यनियमः। उदासीनेनैवेति संशये नियामकाभावानियमे प्राप्ते

आसीनेनैव [9]कर्तव्यमुपासनमिहेष्यते।
अन्यथा चित्तविक्षेप दोषादीनां प्रसक्तितः ॥

शयानेन, ध्यायमाने निद्रा स्यात्, तिष्ठता व्रजता वा ध्यायमाने चित्तविक्षेपः स्यात् अङ्गावबद्धो-

---

१. घ० मा० 'उपासनप्र' इति पाठः।
२. घ० मा० 'सम्भवादितया' इति पाठः।
३. घ० मा० 'कर्माङ्गेपु' इति पाठः।
४. घ० मा० आदित्यूदे' इति पाठः।
५. च० मा० 'कर्तव्यः' इति पाठः।
६. ग० मा० 'समिति' इति पाठः।
७. ग० मा० 'सामेत्यादौ' इति पाठः।
८ साम्न एवोपास्यत्वोपक्रमात्तस्मिन्नेवादित्याध्यासः। एतस्मादेव च साम्न उपास्यत्वावगमात् 'पृथिवी हिंकार' (छा० २।२।१) इत्यादिनिर्देशविपर्ययेऽपि हिंकारादिष्वेव पृथिव्यादिष्टिः। तस्मादनङ्गाश्रया आदित्यादिमतयोऽग्रेषूद्गीथादिषु क्षिप्येरन्। (शा० भा० ४।१।६)।
९. ग० मा० 'मितीष्यते' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पासनेषु तु सम्भावितचित्तैकाग्र्यमात्रेणोपासनाभ्युपगमेऽपि प्रकृते-आसीनेनैवोपासनस्य कर्तुं शक्यत्वादासीनस्यैवोपासनमत एव शास्त्रेषु[1] तत्र तत्रासननियमः प्रतिपाद्यत इति सिद्धान्तः।

एकाग्रताधिकरणम्

यत्रैकाग्रता तत्राविशेषात् ॥७॥

पूर्वादिः कालः प्राच्यादि दिक्, देशविशेषश्च प्राचीनप्रवणादिर्विवक्षितो[2] नेति संशये

ध्यानस्य वैदिकत्वेन देशादीनामपेक्षणम्।
इति प्राप्ते वदामोऽत्र देशादेरनपेक्षणम् ॥
चित्तैकाग्र्यं हि येन स्यात्तादृग्देशाद्यपेक्षणम्[3]।
अत एकाग्रता यत्र तत्र ध्यानक्रिया भवेत् ॥

---

१. (क) योगादिशास्त्रेष्वित्यर्थः। तथा च 'अत एव च पद्मकादीनामासनविशेषाणामुपदेशो योगशास्त्रे' (शा० भा० ४।१।१०) अवधेलिमोऽयं विषयः—
'एतेन योगः प्रयुक्त' इति सूत्रे सूत्रकृता भगवता व्यासेन योगशास्त्रस्य प्रत्याख्यानं कृतं प्रतिभाति, तद्रीत्या श्रीमच्छङ्कराचार्यपादेनापि भाष्ये प्रत्याख्यातमिति। परं सूक्ष्मेक्षिकया निभालनेन खल्वित्थं प्रतिभाति न सर्वथानुपूर्विकप्रत्याख्यानमपितु वेदादिशास्त्रविरुद्धांशस्यैव प्रत्याख्यानं स्यादिति। अन्यथा असीनाधिकरणस्य व्यर्थत्वात् सूत्रकारस्यैव दौर्बल्यं स्यात्। प्रकृते श्रवणमनननिदिध्यासने च चित्तवृत्तिनिरोधपूर्वकयमनियमासनाद्यष्टाङ्गयोगस्यावश्यकत्वात्। अत एव तु भाष्यकाराः पद्मकाद्यासनपूर्वकयोगशास्त्रस्य प्रामाण्यमभ्युपगच्छन्ति।

(ख) मनो देहयोर्भिन्नत्वेऽपि देहचाञ्चल्यं मनसोऽनवस्थानस्यानुभवसिद्धत्वान्मनोव्यापारेषूपासनेषु देहस्थैर्यार्थमासननियमापेक्षा' (र० प्र० पृ० १२६६) देहेऽनवस्थिते मनोऽनवस्थितेरध्यक्षत्वादासीनस्यैवोपासनमनुष्ठेयमिति परिशेषसिद्धमर्थमाह–आसीनस्य' (आ० गि० ४।१।७)।

(ग) अङ्गावबद्धोपासनानां स्वतन्त्रतया तत्रासननियमाभावेऽप्यगत्या यावच्चित्तैकाग्र्यं सम्भविष्यति, तावदेव स्वीक्रियते। स्वतंत्रोपासनेषु तु तादृशागतिकत्वाभावात्सम्यक्चित्तैकाग्र्यं सम्पादनीयम्। तत्रासीननियमोऽपेक्षितः। येषां तु व्याध्यादिपीडितानामासननियमोऽनुष्ठातुमशक्यः, तेषामप्यासननियमो नादर्तव्यः। अपि तु यावच्चितैकाग्र्यं भविष्यति तावतैव यथाकथञ्चिदुपासनं सम्पादनीयम्। सति सम्भवे दृढचित्तैकाग्र्यायासननियम आदर्तव्य इति'।
(भा० का० पृ० ७७६)

२. (क) प्राचीनप्रवणः प्राग्भागे निम्नः (भा० व्या० पृ० ७७७)
(ख) प्राचीनप्रवणे प्राग्देशे निम्नस्थाने वैश्वदेवं कुर्यात्। (र० भा० पृ० १२६७)

३. समे शुचौ शर्करावह्निवालुकाविवर्जिते शब्दजलाश्रयादिभिः
मनोऽनुकूले न तु चक्षुपीडने गुहानिवाताश्रयणे प्रयोजयेत्।
(श्वे० उ० २।१०) 'मनोऽनुकूले' (श्वे० उ० २।१०)
इति चैषा श्रुतिर्यत्रैकाग्रता तत्रैवेत्येतदेव दर्शयति' (शा० भा० ४।१।११)
यत्र मनः प्रसीदत्युपासनायां स एव तस्यामुपासनायामङ्गभूतो देशः।
(भा० व्या० पृ० ७७७)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आप्रायणाधिकरणम

आप्रायणात्तत्रापि हि दृष्टम् ।।८।।

सविशेषोपासनानि यानि ब्रह्मप्राप्तिफलानि किमाप्रायणमावर्तनीयानि नेति सन्देहे पूर्वः पक्षः

आप्रायणमनुष्ठाने[1] प्रमाणं नैव विद्यते ।
'देवो भूत्वे'ति वाक्येन देवभाव इहेप्सितः[2] ।।
अन्त्यप्रत्ययसिद्धिश्च क्रियासाध्यफलेष्विवं[3] ।
अदृष्टात्सम्भवत्येव तस्मादामरणं[4] वृथा ।।

उपासनानामावृत्तिरन्यजन्म (ज !) बुद्धिवत्[5] । उपासनानां हि 'देवो भूत्वा' (बृ० ४।१।७) इति वचनानुसारेणैव देवभावोऽपेक्ष्यते नत्वामरणमावृत्तिर्मानाभावात् । न चान्त्यप्रत्ययानुसारेण पारलौकिकफलावाप्तेः स्वीकारेण तद्भावे ब्रह्मलोकावगतिरुपासनया न स्यादिति वाच्यम् । यागजन्यस्वर्गादावामरणमावृत्त्यभावेऽप्यदृष्ट-वशादेवान्त्यप्रत्ययस्वीकारात् । अन्यथा जन्मान्तरानुष्ठितोपासनस्य कर्मविशेषवशात्प्रतिबद्धस्यान्त्यप्रत्यये का गतिः । तस्मान्नाप्रायणमावृत्तिरिति ।

सिद्धान्तस्तु

'देवो भूत्वे'ति [6]बचनाद्देवभावोह्यपेक्षितः ।
आवृत्तिमन्तरा[7] तावत्स च नैवोपपद्यते ।।
अन्त्यप्रत्ययसिद्धौ च ह्यावृत्तेः द्वारतेष्यते ।
स्वर्गादौ गत्यभावेन ह्यदृष्टं द्वारमिष्यते ।।
उपास्तेः प्रतिबन्धोऽपि न कर्मकृत इष्यते ।
तथा च श्रुतिलिङ्गनि स्मृतिलिङ्गानि चैव हि ।।

'देवो भूत्वा देवानपेति' (बृ० ४।१।७) इत्यादिशास्त्रानुसारेण देवभावस्यावश्यकत्वे तस्य चोपास्तिमन्तरा-नुपपत्तेः । अन्त्यप्रत्यये च तस्या एव द्वारत्वोपपत्तावदृष्टस्य द्वारत्वाकल्पनात् । यागजन्यस्वर्गादौ त्वगत्याऽ दृष्टमेवान्त्यप्रत्यये नियामकत्वेन कल्प्यते । एवञ्च सति 'स यो ह वै तद्भगवन्मनुष्येषु प्रायणान्तमोंकारमभि' ध्यायीत[8], इत्यादीनि श्रुतिलिङ्गानि, 'यं यं वापि स्मरन्भावं त्यजत्यन्ते कलेवरम् तं तमेवैति कौन्तेय सदा तद्भाव

१. तथा चाप्रायणशब्दस्यार्थः 'मरणपर्यन्तमावृत्तिरिति' (र० प्र० पृ० १२६९)
२. घ० मा० 'इहेक्षित' इसि पाठः ।
३. घ० मा० 'फले विव' इति पाठः ।
४. थ० मा० 'तस्मादासमरणम्' इति पाठः ।
५. ग० मा० 'पूर्वजन्मकृतोपास्ति प्रतिबद्धान्यजन्नजा' इति पाठः ।
६. ग० मा० 'देवभाव ह्यपेक्षितः इति पाठो नास्ति ।
७. घ० मा० 'उपास्तेः, इति पाठः ।
८. घ० मा० 'ध्यायोत्याबोनि' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भावितः' (गी० ८।६) [1]इत्यादिस्मृतिलिङ्गान्युपपद्यन्ते । न च यत्र [2]जन्मान्तरकृतमुपासनं प्रतिबन्धवशाज्जन्मान्तरे फलप्रदं तत्र का गतिरिति वाच्यम् । तादृशप्रतिबन्धे मानाभावादिति ।

तदधिगमाधिकरणम्

तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद् व्यपदेशात् ।। ६ ।।

इतः परं सविशेषनिर्विशेषविधयोः फलन्निरूप्यते, 'तद्यथेषीका तूलमग्नौ प्राप्तं प्रदूयत एवं ह्-अस्य सर्वे पाप्मानः प्रदूयन्त, (छा० ५।२४।३) इति। तथा 'क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे' (मु० उ० २।२।८) इति । एवमेव 'विधिविहितपापकर्मं न श्लिष्यत, इत्येवमादीनि किं पापनिवृत्तिफलप्रतिपादकपराणि-उत नेति संशयः । किं प्राप्तं फलप्रतिपादकानि नेति, कुतः

फलदानं विना नाशः कर्मणा नोपपद्यते ।
'नाभुक्त'[3] मिति शास्त्रेण विरोधःस्यात्तथा सति ।।
प्रायश्चित्तस्य शास्त्रञ्च गृहेष्टि (क?) शास्त्रवत् ।
पापस्याह निमित्तत्वन्न तु तत्क्षयशेषता[4] ।।

ज्ञानादीनां[5] पापक्षयं प्रति न हेतुता 'नाभुक्तं क्षीयते कर्म' (ब्र० वै० पु० प्र० ख० अ० २६।७० इति शास्त्रविरोधापत्तेः । प्रायश्चित्तशास्त्रन्तु पापे निमित्ते प्रायश्चितकर्त्तव्यतामाह, न तु पापक्षयहेतुता[6] प्रायश्चित्तस्य, तथा 'यस्य गृहान्वहत्यग्नपेक्षाभक्ते[7] पुरोडाशमष्टाकपालन्निर्वपेत्' (तै० ब्रा० १।१।६) इति शास्त्रं गृहदाहे निमित्ते तथेति प्राप्ते ब्रूमः, [8]पापनिवृत्तिफलपराणीति कुतः

---

१. घ० मा० 'ज्युपपद्यते' इति पाठः ।
२. 'न केवलं ज्ञानधारोपासनमपि तु विजातीयप्रत्ययान्तरितज्ञानधारा' । (अद्वैतमंजरी, पृ० ७७७)
३. घ० मा० 'नाभुतम्' इति पाठः ।
४. च० मा० 'तत्' इति पाठः ।
५. घ० मा० 'ज्ञानदांदीनाम्' इति पाठः ।
६. घ० मा० 'पापजयहेतुताम्' इति पाठः ।
७. घ० मा० 'हत्यग्रे' इति पाठः ।
८. तदधिगमे ब्रह्माधिगमे सति, उत्तरपूर्वाघयोरश्लेषविनाशो भवतः। उत्तरस्याश्लेषः, पूर्वस्य विनाशः (शा० भा० ४।१।१३) । 'तस्माद्ब्रह्माधिगमे दुरितक्षय इति स्थितम् (शां० भा० पृ० १२७५), ब्रह्मज्ञाने सत्यद्वैतसिद्धौ दुरितक्षय इति सिद्धम् (भामती, पृ० १२७५),' मोक्षशास्त्रबलात् ज्ञानात्कर्मक्षयसिद्धिः र० प्र० ४।१।१३) अत एव 'ज्ञानसमकालं पापनाशाज्जीवनमुक्तिरिति फलम्' (र० प्र० ४।१।१३) यद्यपि पापक्षयोऽर्थवादेभ्योऽवगम्यते, तथापि तस्य ब्रह्मप्राप्तिरूपप्रधानफलापेक्षत्वात् तद्विवक्ष्यावश्यं वक्ताव्या इत्याह—एवमेव चेति । कर्मफलस्यैहिकत्वनियमाभावात्प्रतिबन्धकाभावे, सति देशकालानुसारेण तद्भवतीति वक्तुं युक्तम् । विद्याफलं तु ब्रह्मापरोक्ष्यसमानकालं पुनरावृत्तिरहितमिति वक्तव्यम्' (भा० व्या० पृ० ७८२) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उपासनं फलाकांक्षी तस्य[1] पापक्षयफलम् ।
'रात्रिसत्रनये' तावत् (कर्मि ?[2]) संयोगवर्जनात् ॥
प्रायश्चित्तस्य[3] पापस्य निवृर्ति प्रति साधनम् ।
फलाकाङ्क्षानिवृत्तिर्हि नान्यथा तस्य जायते ॥

सगुणविद्याया हि फलाकाङ्क्षायामर्थवादस्थमेव 'रात्रिसत्रन्यायेन' फलं कल्प्यं, नह्येकत्र कर्मियुक्त[4] किञ्चित्फलं श्रूयते, तथा चार्थवादस्थत्वाविशेषात्पापक्षयोऽपि फलत्वेन कल्पते। निर्विशेषविद्यायान्तु हृदयग्रन्थ्यादिरूपमूलोच्छेदेन पापनिवृत्तिः सिद्धैव, प्रायश्चित्तस्यापि फलाकाङ्क्षायां नैमित्तिकत्वेऽपि [5] पापनिवृत्तिरेव फलत्वे कल्पनीये-उपस्थितपापस्यैव निवृत्तिफलत्वेन कल्प्यते। एवञ्च प्रायश्चितशब्दोऽप्युपपन्नो भवति। गृहदाहेष्टेस्त्वगत्या प्रत्यवायपरिहार एव फलत्वेन कल्प्यते। तथा च पूर्वकृतानां पापानान्नाशः। उत्तारभाविनां त्वश्लेषः। न च विदुषः पापसम्भवः प्रमादसम्भवादन्यकृतसम्भवाच्चेति।

इतरासंश्लेषाधिकरणम्

इतरस्याप्येवमसंश्लेषः पाते तु (षोतेति) ॥१०॥

पापे-उक्तन्यायं पुण्येऽतिदेशार्थमिदमधिकरणम् , पुण्यस्य न [6]ज्ञाननिवर्त्यत्वमविरोधित्वादिति शङ्का

पापवद्बन्धकत्वस्य[7] पुण्यसत्वेन[8] हेतुना ।
पुण्येऽपि पापशब्दस्य[9] शास्त्रे तत्र प्रयोगतः ॥

'न सुकृतन्न दुष्कृतम्' इत्युपक्रम्य 'सर्वे पाप्मनः तानि वर्तन्त' इति शास्त्रे प्रयोगदर्शनात्पुण्यनिवृत्तिरपि[10] विदुषोऽपेक्षितेति परिहारः।

---

१. ग० मा० 'फलापेक्षं तस्य पापाश्रयफलम्' इति पाठः ।

२. घ० मा० 'कल्प्यः' इति पाठः ।

३. ग० मा० 'न' इति पाठः ।

४. 'किमि' इति पाठः ।

५. च० मा० 'फलस्य कनिय तथोपस्थित' इति पाठः :

६. घ० मा 'निवर्त्यर्त्थत्वम्' इति पाठः ।

७. घ० मा० 'पापवदन्धक' इति पाठः ।

८. च० मा० 'पुण्यत्वेन हेतुना' इति पाठः ।

९. घ० मा० 'शब्दस्याशास्त्रे' इति पाठः ।

१०. क —ब्रह्मज्ञानमपेक्ष्य पुण्यस्य निकृष्टफलत्वात्तत्फलं हि क्षयातिशयवत्, नह्येवं मोक्षो निरतिशयत्वान्नित्यत्वाच्च। दृष्टप्रयोगश्चायं पाप्मशब्दो वेदे पुण्यपापयोः तद्यथा पुण्यपापे-अनुक्रम्य सर्वे पाप्मानो, अतो निवर्तन्त' इत्यत्र। तस्मादविशेषेण पुण्यपापयोरश्लेषविनाशाविति सिद्धम्' (भामती ४।१।१४)।

ख —यत्तु पुण्यपापे विधूयेत्यत्र पुण्यं फलभोगेन पापं विज्ञानेन विधूयेते विभजनं तन्नाश्रुतकल्पनाहेत्वभावाविति मत्वा ज्ञानसामर्थ्यादशेषकर्मक्षये तदश्लेषे च फलितमर्थं सूत्रावयवमवतार्य व्याकुर्वन्नाह पातेत्विवीति'

(आ०गि० न्या नि० ४।१।१४)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनारब्धाधिकरणम्

अनारब्धकार्ये एव तु पूर्वे तदवधेः ॥११॥

प्रारब्धयोः पुण्यपापयोर्नाशोऽस्ति[१] नेति संशये ।

अज्ञानहेतुकत्वेन[२] नाशः प्रारब्धकर्मणा ।
युक्तो ज्ञानस्य हि ज्ञानान्नाशे कारणनाशतः ॥

प्रारब्धकर्माप्यज्ञानोपादानकमेवाज्ञानस्य[३] [४]ज्ञानान्नाशे कारणनाशवदुपादेयप्रारब्धनाशोऽप्यावश्यकः 'तस्य तावदेव चिरम्' इत्यादिश्रुतिस्त्वेवकारार्थं[५] प्रधानेति पूर्वपक्षे, सिद्धान्तः

प्रारब्धकर्मणो नाशो न ज्ञानेनोपपद्यते ।
'तस्य' [६]इत्यादिकशास्त्राच्च विदुषामपि देहतः ॥

तत्त्वज्ञाने जातेऽज्ञाननाशोऽपि तत्संस्कारवशात् प्रारब्धोपादानांशस्य वा स्वारम्भकप्रारब्धप्रतिबन्धवशेन ज्ञानेन [७]नाशकल्पनाद्वा प्रारब्धास्थित्युपपत्तेर्न ज्ञानं प्रारब्धनाशकमत एव 'तस्य तावदेव चिरम्,' 'तद्यथा हि निर्ल्वयनी' (बृ० ४।४।७) 'स चक्षुरक्षुरिव' 'स्थितप्रज्ञस्य का भाषा' (गी० २।५४) इत्यादिशास्त्रं विदुषां देहश्चोपपाद्यत इति ।

अग्निहोत्राद्यधिकरणम्

अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् ॥१२॥

अग्निहोत्रादिकर्मणां किं विद्या नाशिका नेति संशये पूर्वपक्षः

अग्निहोत्रादिकर्माणि [८]कर्मान्तरवदेव हि ।
विद्यया नाशितव्यानि न विद्याङ्गानि तेन वै ॥
'तमेत' मिति वाक्यञ्च वर्तमानापदेशतः ।
स्तावकं ब्रह्मविद्यायां प्रवृत्तावुपयुज्यते ॥

---

१. ग० मा० 'ज्ञानेन' इति पाठः ।
घ० मा० 'माशोऽस्ति' इति पाठः ।
२. घ० मा० 'जज्ञान' इति पाटः ।
३. घ० मा० 'प्रारब्धकमप्यज्ञान' इति पाठः ।
४. ग० मा० 'ब्रह्मज्ञानम्' इति पाठः ।
५. घ० मा० 'स्त्वेकारार्थं इति पाठः ।
६. घ० मा० 'क' इति पाठो नास्ति ।
७. घ० मा० 'नाशकल्पना' इति पाठः ।
८. ग० मा० अञ्जसा' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ब्रह्मविद्यायां विविदिषाद्वारा न कर्माण्युपयुज्यन्ते, नाश्यजातीयस्य नाशकं प्रत्यजनकत्वात्। 'तमेतम्' इति वाक्यञ्च[1] ब्रह्मविद्यास्तावकं [2]सत्तत्साधने प्रवृत्तावुपयुज्यते, सविशेषविद्यायान्तु कर्मसाधनाबोधकं वचनमेव नास्ति। अत [3]इतरकर्मवदग्निहोत्रादिकर्मणान्नाश इति।

सिद्धान्तस्तु

नाश्यजातीयकाष्ठादेरग्निसाधकता यथा।
तथाग्निहोत्रकर्मादेर्विद्यासाधनतेष्यताम् ॥
'तमेत' मिति वाक्यञ्च ह्यर्थवत्स्यात्तथा सति।
विद्यानाश्यत्वमेतेषामतो [4]नास्तीति निश्चयः ॥

अग्निनाश्यजातीयस्य[5] काष्ठस्याग्निसाधनत्ववद्विद्यानाश्यजातीयस्य कर्मणो विद्यां प्रति विविदिषाद्वारा[6] साधकत्वमुपपद्यते। अत एव 'तमेतम्' (बृ० ४।४।२२) इति वाक्यं विधायकत्वेनार्थवत्। [7]इतरथार्थवादमात्रमनर्थकं[8] स्यात्। सविशेषविद्यायामप्याचार्यकुलाद्वेदमधीत्य (छा० ८।१५।१) इत्यदिना 'स खल्वेवं वर्तयत यावदायुषम्, (छा० ८।१५।१) इत्यन्तेन वाक्येन सविद्यायाः कर्मसमुच्चिताया एव ब्रह्मलोकसाधनत्वावगमात्। कर्मणा चान्त्यप्रत्ययप्रतिबन्धकीभूतपापनिवृतावुपयोगः।

अविद्यया मृत्युं तीर्त्वा विद्यया मृतमश्नुते तदुक्तं विद्याञ्चाविद्याञ्चयस्तद्वेदोभयं सह। (य० जु० ४०।११)। इति। न च केषाञ्चित्कर्मणां विद्यया[9] नाशः' प्रारब्धानान्तु भोग एवाग्निहोत्रादिकर्मणां विद्यार्थत्वमेव कथं तर्हि तेषां सुहृद्विषद्गामित्वं[10] सुहृदः साधुकृत्यं द्विषतः[11] पापकृत्यमिति[12] शास्त्रप्रतिपाद्यमिति वाच्यम्। ययोः पुण्यपापयोश्लेषविनाशश्चोक्तस्तयोरेव सुहृद्द्विषद्गामित्वमिति[13]।

---

१. घ० मा० 'च' इति पाठो नास्ति।
२. घ० मा० 'सत्तत्साधने' इति पाठः।
३. घ० मा० 'कर्मवदाग्नि होत्रे इति पाठः।
४. ग० मा० 'ततश्च विद्यया नाश्यमग्निहोत्रादिकन्महि' इति पाठः।
५. घ० मा० 'नाश्यपातीय' इति पाठः।
६. घ० मा० 'विविक्षा' इति पाठः।
७. घ० मा० 'इतरथार्यवाद' इति पाठः।
८. घ० मा० 'मत्रर्थकु स्यात्' इति पाठः।
९. घ० मा० 'विद्यायाः' इति पाठः।
१०. घ० मा० 'सुहृद्वेष' इति पाठः।
११. घ० मा० 'द्विपतः' इति पाठः।
१२. घ० मा० 'पापकृत्वामिति' इति पाठः।
१३. घ० मा० 'सुहृद्विष' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विद्याज्ञानसाधनाधिकरणम्

यदेव विद्ययेति हि ॥१३॥

किमङ्गावबद्धोपास्ति युक्तं कर्मविविदिषायां [1]हेतुरुत तद्रहितमपीति[2] संशये पूर्वःपक्षः

उपास्तियुक्तं कर्मैव विद्येच्छां[3] (विद्यायाम्) प्रतिसाधनम् ।
प्रसंशायोगतोऽस्या हि शषतायाः प्रकल्पतात् ॥

विद्यायुक्तमेव विविदिषाङ्गन्न च 'यज्ञेन दानेन' (बृ० ६।२।१६) इत्यविशेषेण यज्ञसामन्यस्य विविदिषार्थत्वावगमे कथं विद्यायुक्तस्यैव ग्रहणतिमि वाच्यम् । 'यदहरेव जुहोति तदहरेव मृत्युञ्जयति य एवं विद्वान्' इति प्रशंसावगमेन प्रस्तोतुर्या देबता[4] प्रस्तावमन्वायत्ता तां वेद विद्वान्प्रस्तोष्यसि मूर्द्धा ते विपतिष्यति'[5] इति विद्याविहीनस्य निन्दावगमेन चोपासनायाः कर्माङ्गत्वनिश्चये तद्युक्तस्यैव विविदिषार्थत्वस्य स्वीकार्यत्वात् । उपास्तिरहितानां प्रस्तोत्रादीनां[6] कर्मणि प्रवृत्तिस्तु यथा शक्त्यङ्गोपसंहारेण कर्मानुष्ठानं कर्तव्यमित्याशयेन, अत[7] एव विद्यालाभसंभवे तत्त्यागोऽनुचित इत्यभिप्रेत्योषस्तिशापानन्तरं '[8]तूष्णीभावस्थानमित्युपपद्यते 'तदेव वीर्यवत्तरं (छा० १।१०) तरबपि स्वार्थिकः, यथाशक्त्यङ्गानुष्ठानाद्यत्फलं तदपेक्षया साङ्गानुष्ठानात्फलाधिक्यप्रतिपादनार्थो वा द्रष्टव्यः । विविदिषार्थंकर्मणस्तु काम्यत्वेन सर्वाङ्गयुक्तस्यैवानुष्ठानं कर्तव्यमित्युपास्तियुक्तं कर्मैव विविदिषा-साधनमिति ।

उपासनन्न कर्माङ्गं श्रुतिलिङ्गाद्यभावतः ।
प्रशंसा च प्रवृत्त्यर्था नाङ्गता बोधनक्षमा[9] ॥

तदभावे प्रशंसाया उपपन्नतरत्वतः ।
तरबश्चापि सार्थक्याद्विद्येच्छां[10] प्रति हेतुता ॥

उपासनाविहीनस्य कर्मणोऽपि [11]भवेद्ध्रुवम् ।
अतो विद्याविहीनानां प्रवृत्तिरुपपद्यते ॥

उपास्तीनां कर्माङ्गत्वे श्रुतिलिङ्गादीनां प्रमाणानामभावेन तदभावात् । प्रशंसायाश्चोपासनायां प्रवृत्त्यर्थत्वेनोपपन्नत्वेनाङ्गत्वकल्पकत्वाभावात् । अत एव विद्याविहीनानामपि प्रस्तोत्रादीनां कर्मणि प्रवृत्तिरुपपद्यते । कर्मणस्सकाशादुपरमस्तु शापभीत्या, तथा च विद्याविहीनेऽपि कर्मवि विदिषायामुपयुज्यत इति सिद्धम्[12] ।

१. ग० मा० 'हेतुरूप उत' इति पाठः ।
२. घ० मा० 'रहितमपिति' इति पाठः ।
३. घ० मा० 'विद्येछां' इति पाठः ।
४. घ० मा० 'प्रस्तोर्यदिवता' इति पाठः ।
५. घ० मा० 'विपतिष्यतिति' इति पाठः ।
६. घ० ध० मा० 'प्रस्तवात्रादिनाम्' इति पाठः ।
७. ग० मा० 'अत एव' इति पाठो नास्ति ।
८. घ० मा० 'तुदुणी' इति पाठः ।
९. घ० मा० 'बोधनक्षम्या' इति पाठः ।
१०. घ० मा० 'द्विद्येछा' इति पाठः ।
११. घ० मा० 'भवेदद्रुवम्' इति पाठः ।
१२. घ० मा० 'सिद्धं' इति पाठो नास्ति ।

द. नं. ९८३४८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इतरक्षपणाधिकरणम्

भोगेन त्वितरे क्षपयित्वा सम्पद्यते ॥१४॥

प्रारब्धभोगोत्तरं मुक्तिनियमोऽस्ति नेति सन्देहे

प्रारब्धहेत्वविद्याया नाशकाभावतो भवेत् ।
पुनर्देहान्तरप्राप्तिः पुनःकर्मादिसञ्चयः ॥

आत्मज्ञानेन[1] प्रारब्धोपादानभूताज्ञानस्यानाशेन प्रारब्धभोगोत्तरं तन्नाशकाभावेनाज्ञानेन पुनर्जन्मप्राप्तौ पुनः कर्मच्चये देहपरम्परेव स्यान्न मोक्षः, तस्य[3] प्रारब्धभोगानन्तरं ज्ञानादेव तदुपादानाज्ञाननाशक इति वाच्य, पुनर्ज्ञानोत्पत्तौ मानाभावात् । ज्ञाने सत्यपि [4]प्रागनष्टत्वेनाधुनिकज्ञानेन[5] नश्यतीत्यत्र प्रमाणाभावात्, प्रारब्धवशाज्ज्ञानोत्तरज्जन्मान्तरपरिग्रहे ज्ञानसंस्कारच्युतिसम्भवेन पुनर्ज्ञानोत्पत्त्ययोगाच्चेति पूर्वपक्षः

सिद्धान्तस्तु

प्रारब्धकर्मणां भोगान्नाशे[6] ज्ञाने न नश्यति ।
तद्धेतुभूता विद्या हि तस्मान्मुक्तिरिति स्थितिः ॥

प्रारब्धकर्मणां भोगान्तरे नाशे सत्यभिव्यक्तचैतन्यरूपज्ञानेन प्रारब्धहेतुभूताज्ञाननाश[६]सम्भवात् । पूर्वं तु प्रतिबन्धकसद्भावेन तदनाशकत्वेऽपि[7] पश्चात्तदभावेन[8] तन्नाशोपपत्तेः, प्रारब्धवशाज्जन्मान्तरपरिग्रहेऽपि तद्भोगे दृढाभ्यासवशेन संस्कारच्युत्यभावात् । अत एव 'अथ सम्पत्स्यत' इति श्रुतिरथ प्रारब्धभोगोत्तरं मोक्ष इत्यार्थिकोपवद्यतेति ।

इति श्रीमत्परमहंसपरिव्राजकाचार्यसर्वतन्त्रस्वतन्त्रश्रीमदद्वैतानन्दसरस्वतीचरणारविन्दभृङ्गायमानस्य स्वयम्प्रकाशानन्दस्य कृतिषु वेदान्तनयभूषणे चतुर्थाध्यायस्य प्रथमपादः ।

---

१. घ० मा० 'आत्माज्ञानेन' इति पाठः ।

२. च० मा० 'न च' इति पाठः ।

३. घ० मा० 'प्रागनत्वष्ट' इति पाठः ।

४. घ० मा० 'ज्ञानोननश्यति' इति पाठः ।

५. च० मा० 'नाशेनानेनाश्यते' इति पाठः ।

६. मिथ्याज्ञानावष्टम्भं हि कर्मान्तरं देहपाते, उपभोगान्तरमारभते । तच्च मिथ्याज्ञानं सम्यग्ज्ञानेन दग्धमित्यतः साध्वेतदारब्धकार्यक्षये विदुषः कैवल्यमवश्यं भवति । (शां० भा० ४।१।१४) पूर्वपक्षे विदेहकैवल्यासिद्धिः; सिद्धान्ते तत्सिद्धिरिति भेदः, सञ्चितकर्मान्तरं तन्न निमित्तं फलस्य, दग्धमूलत्वात् । अविद्यादयो हि क्लेशाः कर्मणस्तत्फलस्य च मूलम् । तदुक्तं योगशास्त्रे 'क्लेशमूलःकर्माशयः' (पा० यो० सू० १।१२) 'सति मूले तद्विपाकः' (पा० यो० सू० २।१३) तच्चमूलञ्ज्ञानाग्निना दग्धमिति कुतः पुनः संसारः । तस्माद्देहपाते कैवल्यमिति सिद्धम् । (र० प्र० पृ० १२(४) 'प्रारब्धकर्मफलभोगादूर्ध्वं मोक्षेऽपि तत्कर्मजन्यानेकदेहसम्भवात्तत्र च विद्याप्रमोषोपपत्तेस्तत्कृतकर्मणामश्लेषाभावेन मुक्त्यभावमाशंक्याधिकारिणां देहान्तरे ज्ञानप्रमोषस्याऽऽगामिकत्वादस्मदादीनामथ 'सम्पत्स्य' इति श्रुतिसिद्धत्वादारब्धभोगानन्तरं मुक्तिरवश्यं भाविनो (न्या० नि० ४।१।१४) प्रारब्धक्षपणानन्तरमविद्याया निरासको ब्रह्मसाक्षात्कार एव' (ब्र० वि० भ०, पृ० ७८६) ।

७. घ० मा० 'श' इति पाठो नास्ति ।

८. घ० मा० 'वारचात्' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चतुर्थेऽध्याये द्वितीयः पादः

वागधिकरणम्

वाङ्मनसि दर्शनाच्छब्दाच्च ॥१॥

पूर्वस्मिन्पादे सविशेषनिर्विशेषविद्ययोः फलभूतः पापक्षयो[१] निरूपितः। अस्मिंस्तु पादे सविशेषविदामुत्क्रान्तिर्निरूप्यते।

'अस्य सौम्य पुरुषस्य प्रयततो वाङ्मनसि सम्पद्यत' (छा० ६।८।६) इति छन्दोगास्समामनन्ति। तत्र संशयः किं मनसि वाच एव लय[२] उत वाक्वृत्तेरिति। तत्र पूर्वः पक्षः

वाच एव लयो युक्तो न तु वृत्तेस्तथा सति।
वाक्शब्दे लक्षणापत्तिस्सा च नैवोपपद्यते[३] ॥
सम्भवन्त्यां श्रुतौ तेन वाच एव लयो भवेत्।
उपादानत्वराहित्यं वृत्तिं[४] प्रतिसभं भवेत् ॥

'वाङ्मनसि सम्पद्य' इत्यत्र वाच एव मनसि लयो वक्तव्यो न तु वाक्वृत्तेस्तथात्वे वाक्यादस्य[५] लक्षणापत्तेः। न च सत्यां गतौ लक्षणा युक्ता, न चानुपादानत्वान्मनसि[६] लयानुपपत्तिर्बाधिका, वृत्तिं प्रत्यप्यनुपादानत्वस्य तुल्यत्वात्।

वचनप्रामाण्याल्लयस्तु[७] वाचोऽपि तुल्य एव, तस्माद्वाच एव लय इति। अत्राभिधीयते

वाचो रूपलये[८] तस्या उत्क्रान्तिर्नोपपद्यते।
अतो वृत्तिलयो ग्राह्यो लोकदृष्टयनुसारतः ॥
लक्षणाकल्पनञ्चैवं[९] गत्यभावाद्भविष्यति।
मनसीति च सप्तम्या भावलक्षणतार्थता ॥

---

१. ग० मा० 'कर्म' इति पाठः।
२. घ० मा० 'एलय' इति पाठः।
३. च० मा० 'कृविद्यावोपपद्यते' इति पाठः।
४. घ० मा० 'शुभं' इति पाठः।
५. घ० मा० 'क्याक्यादस्य' इति पाठः।
६. घ० मा० 'अनुपादन' इति पाठः।
७. घ० मा० 'लयस्तु' इति पाठः।
८. ग० मा० 'वाचस्स्वरूपम विलयेतमुत्क्रान्तिर्न युज्यते' इति पाठः।
घ० मा० 'वाक्स्वरूपलये' इति पाठः।
९. घ० मा० 'कल्पनञ्च' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वाचो यदि[1] स्व स्वरूपेण लयोऽभ्युपगम्यते तदा 'तमुत्क्रामन्तं प्राणोऽनुत्क्रामति[2] प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति[3], (बृ० ४।४।२) इति सर्वेन्द्रियाणामुत्क्रान्त्युच्यमाना पीडिता[4] स्यात् । न च सर्वपदं वागिन्द्रियव्यतिरिक्तसर्वपरमस्तु वाचो लीनत्वादिति वाच्यम्, वाचो लीनत्वे 'तस्मादुपशान्तं तेजः[5] पुनर्भवमिन्द्रियैर्मनसि सम्पद्यमान (प्र०उ० ३।९) इत्यार्वणिकश्रुत्यनुसारेण [6]वाग्ग्रहणस्य सर्वेन्द्रियोपलक्षणार्थत्वेन सर्वेषां स्वरूपलयप्रसङ्गात् । तथाचोत्क्रान्त्यनुपपत्त्या वृत्तिलय एव स्वोकार्यः । अत[7] एव लौकिकानां तथैव व्यवहारः । एवञ्च वाक्पदस्य[8] लक्षणाप्यगत्या स्वीक्रियते । मनसीति[9] सप्तमी[10] 'यस्य च भावेन भावलेक्षणम्' (सि० कौ० २।३।३७) इति प्राणादिकमाधारत्वं वा भविष्यतीति न काप्यनुपपत्तिः ।

मनोऽधिकरणम्

तन्मनः प्राण उत्तरात् ।।२।।

तत्रैव वाक्ये 'मनः प्राण' इति श्रूयते । तत्रापि पूर्ववत्संशयः पूर्वोत्तरवच्च ।

प्राणस्य जलकार्यत्वं मनसश्चान्नकार्यता ।
अतः प्राणे लयो युक्तो मानसस्येति निर्णयः ।।

वाङ्मनसोरुपादानोपादेयभावाभावेन मनसि वाचो, लयासम्भवेऽपि[11] प्राणे मनसो लय उपपद्यते । प्राणस्य 'आपोमयः प्राणः' (छा० ६।५।४) इति श्रुत्या विकारत्वेन[12] प्रतिपाद्यमानत्वान्मनसश्च 'अन्नमयं हि सौम्य' (छा० ६।५।४) इति श्रुत्या पृथिवीविकारत्वावगमात् । प्रकृतिविकारयोश्चाभेदात्प्राणे मनसो लय उपपद्यत इति विशेषशङ्का, तत्परिहारस्तु

१. ग० मा० 'स्व' इति पाठो नास्ति ।
२. घ० मा० 'प्राणो नोत्क्रामति' इति पाठः ।
३. घ० मा० अनूत्क्रामन्तिति' इति पाठः ।
४. घ० मा० 'पीज्ति' इति पाठः ।
५. घ० मा० उपशान्तन्नतजा' इति पाठः ।
६. घ० मा० 'वावग्ग्रहणस्य' इति पाठः ।
७. घ० मा० 'स्वीकार्यो अत एव' इति पाठः ।
८. घ० मा० 'वाक्यादस्य' इति पाठः ।
९. क—मनसीति 'यस्य च भावेन भावलक्षण' मिति सप्तमी भविष्यति । यदि तु सोपपदविभक्तिः न कारकविभक्तौ सम्भवन्त्यां स्वीकर्तुमुचिता वृत्तिलयानुवादेन तदा मनोऽधिकरणताविधिपरमेव भवतु । न च वागादिवृत्तीनां प्रकृतौ मनसि लयो नोपपद्यत इति वाच्यम्, मनसो वृत्तिलयप्रयोजकवागादिसंयोगाधारत्वेन वृत्तिलयं प्रत्यधिकरणत्वोपपत्तेः जलेऽग्नि शाम्यतीतिवत् (भा० व्या० पृ० ७८८)
ख—मनसो वागादिकं प्रत्यनुपादानत्वात् 'उपादान एव कार्यस्य स्वरूपे लयः' इति मृद्घटादौ व्याप्तिदर्शनान्न वागादीनां स्वरूपेण लयः वृत्तिस्त्वनुपादानेऽपि लयमर्हति । अङ्गारेषु जलमध्ये प्रक्षिप्तेषु वह्निवृत्तेर्दाहप्रकाशात्मिकाया अनुपादने जले लयदर्शनात् । श्रुतौ तु वाक्यशब्देन वृत्तिर्लक्ष्यते । वृत्तिवृत्तिमतोरभेदोपचारात् । वागादीनां मनसि वृत्तिलयः । (वै० न्या० भा० पृ० १७१)
१०. घ० मा० 'सत्प्रमि' इति पाठः ।
११. च० मा० 'लयसम्भवेऽपि' इति पाठः ।
१२. घ० मा० 'श्रुत्याविकार' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्राणस्य मनश्चैव न विकार विकारिता ।
अतो न मानसस्येह स्वरूपेण लयो भवेत् ।।

प्राणस्य मनसश्च जलान्नविकारत्वेऽपि प्राणमनसोः प्रकृतिविकारभावाभावेन प्राणे मनसो लयानुपपत्तेः, 'आपोमयः प्राणः' (छा० ६।५।४) इति श्रुतिराप्यायितत्वपरा न तु तद्विकारत्वपरेति चोक्तम् । अतः प्राणे मनसो लयो-वृत्तिलय[१] एवेति ।

अध्यक्षाधिकरण्

सोऽध्यक्षे तदुपगमादिभ्यः ।।३।।

'मनः प्राणे प्राणस्तजसि' (छा० ६।८।६) इत्यत्र जीवस्योपसंहारोऽस्ति नेति संशये पूर्वः पक्षः

जोवस्य संहृतौ नैवं प्रमाणमिह विद्यते ।
'एवमित्यादि' वाक्ये तु न प्राणस्य गतिः श्रुता ।।

अत्र जीवोपसंहारे प्रमाणाभाव' अथैनमेते[२] प्राणा अभिसमायन्ति (बृ० ४।४।१) श्रुतिरपि जीवं प्रतीन्द्रियाणामेव गमनं प्रतिपादयति, न तु प्राणस्यात एव 'तमुत्क्रान्तं प्राणोऽनूत्क्रामति, (बृ० ४।४।२) इति वाक्यञ्जीव-व्यतिरेकैण[३] प्राणस्योत्क्रान्तिं दुमुपपद्यते[४] 'सविज्ञानो भवति, (बृ० ४.४।२) इति वाक्यं प्रत्यप्रत्ययप्रतिपादनपरं[५], न तु[६] विज्ञायत अनेनेति व्युत्पत्या प्राणादिवर्गपरमिति न जीवोपसंहारे प्रमाणमस्तीति ।

सिद्धान्तस्तु

एवमित्यादिवाक्येन जीवे प्राणगतिः श्रुता ।
नहीन्द्रियाणां गमनं लीनानामुपपद्यते ।।
'तमुत्क्रान्त' मित्यत्र सहोत्क्रान्तिर्विवक्षिता ।
जोवस्थाँनस्य तेनेह प्रक्षिप्तो जीव इष्यताम् ।।

---

१. क—तस्मान्न मनसः प्राने स्वरूपाप्ययः' (शां० भा० ४।२।३) ।

ख—तस्माद्यो यस्य साक्षाद्विकारस्तस्य तत्र लय इत्यत्रान्नस्याप्सु लयो नत्वब्विकारे प्राणेऽन्नविकारस्य मनसः तथा चात्रापि मनोवृत्तेर्वृत्तिमति प्राणे लयो न तु वृत्तिमतो मनसः इति । (भामती ४।२।३)

ग—अबन्नयोः प्रकृतिविकृतिभावेऽपि न तद्विकारयोः प्राणमनसोः तद्भावः । हिमघटयोरपि तद्भावप्रसङ्गात् । अतो न्याय-विरोधात्पूर्ववच्छ्रुतिर्बोध्येति विवेकः । आत्मगृहीताः बाह्येन्द्रियवृत्तयो येन तत्तया लीनेन्द्रियवृत्तिकं मनोऽपि वृत्ति-लयेनैव प्राणे लीयत इति' (र० प्र० ४।२।३) तस्मान्मनसः प्राणे साक्षादनुपादाने वृत्त्या प्रविलयो द्रष्टव्य' (वे०सि० न्या० भा० ४।२।३) अस्मिन्नधिकरणे प्राणमनसोः कस्य कस्मिंल्लय इत्यस्मिन्विषये प्रकृतग्रन्थकारस्य भाष्यकारेण सह मतभेदो दृश्यते ।

२. घ० मा० 'एवमेवेमेयो' इति पाठः ।

३. घ० मा० 'व्यतिरेक्रेण' इति पाठः ।

४. घ० मा० 'ब्रुवदपपद्यते' इति पाठः ।

५. ग० मा० 'प्रत्यप्रत्यय' इति पाठो नास्ति ।

६. घ० मा० 'ननु' इति पाठः ।

७. घ० मा० 'जीवस्यानस्य' इति पाठः ।
ग० मा० 'जीवस्यानस्य' इति पाठो नास्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जीवस्य तावदुपसंहार आवश्यकः 'एवमेनमिति[1] वाक्ये जीवं प्रति प्राणस्यानुगमनस्योक्तेः। यद्यपि तत्रेन्द्रियाणामेव गमनं श्रूयते, तथापीन्द्रियाणां[2] प्राणे लीनवृत्तिकत्वेन स्वातन्त्र्येण गमनानुपपत्तेरिन्द्रियगमनोक्तिरेव-लभ्यते 'तमुत्क्रामन्तं प्राणोऽनूत्क्रामति[3], (बृ० ४।४।२) इति वाक्यमपि जीवस्य प्राणेन सहोत्क्रान्ति ब्रूते। न तु जीवं विहाय प्राणस्योत्क्रान्तिः[4] निरूपाधिकस्य जीवस्य गमनानुपपत्तेः। अत एव 'स ह्येतावस्मिञ्छरीरे वसतस्सहोत्क्रामति' इति 'कस्मिन्न्वहमुत्क्रान्त उत्क्रान्तो भविष्यति, इति निर्देश उपपद्यते।

न चैवमपि तेजसोऽनन्तरमेव जीवस्योपसंहारोऽस्त्विति वाच्यम्। जीवस्य क्वचिदुपसंहारे कर्तव्ये श्रुत्यन्तरे प्राणजीवसम्बन्धस्य च[5] दर्शनादिहापि प्राणानान्तरमुपसंहारस्तेजः पदं त्वितरभूतलक्षकत्वेन[6] लक्षणा-सहिष्णुत्वाज्जीवमपि लक्षयिष्यामीति नोपसंहारस्तेजोमात्रेण शरीरारम्भानुपपत्त्येतरभूतस्यावश्यकत्वात्[7]। 'तस्मादुपशान्त तेजः' (प्रश्न० ३।९) इत्यादिश्रुतिस्तु न क्रमपरेति न विरोधः। आर्तभागब्राह्मणे कर्मव्युत्पादनन्तु निमित्तकारणप्रतिपादनायेति द्रष्टव्यम्[8]।

आसृत्युपक्रमाधिकरणम्

समाना चासृत्युपक्रमादमृतत्वञ्चानुपोष्य: ॥

किमियमुत्क्रान्तिर्विद्वदविदुषोरुताविदुष एवेति यदापि विदुषस्तदापि किमविदुषः तुल्या नेति शंशयः, तत्र पूर्वपक्षः

उत्क्रान्तिर्विदुषो नैव ह्यमृतत्वं फलं श्रुतम्।
तच्च ब्रह्मस्वरूपं[9] हि सर्वव्यापि तदिष्यते ॥
सम्भाविते चोत्क्रमणे विदुषोऽविदुषो नहि।
तुल्यं फलस्य वैजात्यात्तेनोत्क्रान्तिर्विलक्षणा ॥

सविशेषविदां ह्यमृतत्वं फलं श्रूयते तच्च ब्रह्मरूपं, ब्रह्म च सर्वव्यापि, नहि तस्य गमनमपेक्षितम् 'तयोर्ध्वमायानिति[10] च 'गता कला' (मु० उ० ३।७) इत्यत्रैवाविद्वद्भ्रान्तिकल्पितोत्क्रान्त्यनुवादकमस्तु। अस्तु

१. ग० मा० 'वेति' इति पाठः।
२. ग० मा० 'तेषाम्' इति पाठः।
३. घ० मा० 'प्राणो नत्क्रमति' इति पाठः।
४. घ० मा० 'प्राणस्योक्ति' इति पाठः।
५. घ० मा० 'च' पाठो नास्ति।
६. घ० मा० 'वेतरभूत' इति पाठः।
७. घ० मा० 'अनुपपत्यसेतर' इति पाठः।
८. बृहदारण्यकोपनिष्दार्तभांगब्राह्मणे निमित्तकारणं पुरस्कृत्य कर्मव्युत्पादनेऽपि सिद्धान्तपुरस्सरञ्जीवेन सहितः प्राणः पश्चात्तेजः आदि भूतेषु लीयत इति व्याख्यातुं शक्यत्वात्। तस्मात्प्राणो जीवे प्रथमतो लयं प्राप्य पश्चात्तद्वारा भूतेषु लीयते। (वै० ति० न्या० मा० ४।२।३)
९. ग० मा० 'स्यात्' इति पाठः।
१०. घ० मा० 'तयोर्ध्वमायन्नि' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वोत्क्रान्तिर्विदुषां[१], तथापि वाङ्मनः सम्पत्यादिकयोत्क्रमणे[२] वैलक्षण्यं स्वीकार्यं, फलवैलक्षण्यानुसारेण साधनवैलक्षण्यस्यावश्यकत्वादिति ।

सिद्धान्तस्तु

नामृतत्वमिदं मुख्यं किन्तु सापेक्षमिष्यते ।
संसारबीज[३]भूताया अविद्याया अनाशनात् ॥
मार्गोपक्रमपर्यन्तं समानमुभयोरपि ।
वैलक्षण्यं फलस्यापि मार्गभेदाद्भविष्यति ॥

नात्र विदुषामुत्क्रान्त्यभावो वक्तुं शक्यः, नह्यस्या [४]अविद्यानिवृत्तिक्षमज्ञानमुत्पन्नमतोऽमृतत्वमापेक्षिकमेव[५] । अत उत्क्रान्तिरपि वाङ्मनसो सम्पत्त्यादिरूपा स्वीकार्यैव । सा च विद्वदविदुषोस्तुल्या[६] आमार्गप्राप्तेः । तदन्तरञ्च विद्वान्मूर्द्धन्यया नाड्या निष्क्रामति[७] अविद्वांस्त्वितरनाड्या[८] फलवैलक्षण्यमपि मार्गवैलक्षण्यादेवोपपन्नमिति ।

संसारव्यपदेशाधिकरणम्

तदापीतेस्संसारव्यपदेशात् ॥५॥

तत्रैव 'तेजः परस्यां देवतायाम्' (छा० ६।८।६) इति श्रूयते, तत्र तेजः पदं लक्षणासहिष्णुत्वेन सकरग्रामसम्भूतजीवं प्रतिपादयतीत्युक्तम् । तादृशस्य तेजः पदार्थस्य किं परदेवतायां संयन्ति (सम्पत्ति ?) रात्यन्तिकी उत सावशेषेति संशये पूर्वः पक्षः

१. घ० मा० 'वोत्क्रान्ति विदुषाम्' इति पाठः ।
२. घ० मा० 'क्रयणेनैवलक्षण्यम्' इति पाठः ।
३. ग० मा० 'कारणीभूत मूलाज्ञानाविनाशनात्' इति पाठः ।
४. घ० मा० 'उत्पन्नमर्तापि अमृत' इति पाठः ।
५. घ० मा० 'मेवात अत' इति पाठः ।
६. (क) समाना चैषोत्क्रान्तिः (वाङ्मनसि न्या० सू० ४।२।१) इत्याद्या विद्वदविदुषोरासृत्युपक्रमाद्भवितुमर्हति अविशेषश्रवणात् (शांभा० ४।२।४) ।
(ख) समाना चैषोत्क्रान्तिर्वाङ्मनसीत्याद्या विद्वदविदुषोः । कुतः आसृत्युपक्रमात् । सृतिः सरणं देवयानेन पथा कार्यब्रह्मलोकप्राप्तिरासृतेराकार्यं ब्रह्मलोकप्राप्तेः । (भामती ४।२।४) ।
(ग) उत्क्रान्तो ब्रह्मलोकभागीति फलभेदः (र० प्र० ४।२।४) ।
(घ) समाना चासृत्युपक्रमादिति । सृतिः मार्गः मूर्धन्यनाडीमारभ्य ब्रह्मलोकप्राप्त्यर्थं समाम्नातः । तावत्पर्यन्तं समानेनैवोत्क्रान्तिः विद्वदविदुषोः । अनन्तरं विद्वान् मूर्धन्यानाडीं प्राप्तो भवति, अविद्वान् नाड्यन्तरम् । तथा चोत्क्रान्तौ किञ्चित्सालक्षण्ये सत्यपि मूर्धन्यानाडीमारम्भ वैलक्षण्यस्य विद्यमानतया न फलवैलक्षण्यानुपपत्तिः (भा० न्या० ४।२।४)
(च) 'सगुणज्ञानिनो मूर्धन्यनाडीप्रवेश उत्तरमार्गोपक्रमः । ज्ञानरहितस्य नाड्यन्तरप्रवेशो मार्गान्तरोपक्रमः । मार्गपर्यन्तमिदमेव वर्तमानं जन्म । अत ऐहिकसुखदुःखवदुत्क्रान्तिरपि समाना । उपक्रान्ते तु मार्गे त्वदुक्तफलभेदाद्वैषम्यमस्तु' (वै० न्या० मा० पृ० १७४) ।
७. घ० मा० 'नाड्यानि क्रामति' इति पाठः ।
८. घ० मा० 'इतर नाड्या फल' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सम्पत्तिर्देवतानां[1] या सा मतात्यन्तिकी यतः ।
निर्गुणब्रह्मविद्यायाः[2] प्रक्रियायामियं श्रुता ॥

इयं सत्सम्पत्तिरात्यन्तिक्येव[3] स्वीकार्या, निर्विशेषविद्याप्रकरणेऽस्याः श्रुतत्वात् । न [4]चाग्निमाधिकरणविरोधस्तस्य[5] देहापादानकापसृप्तिनिराकरणपरत्वात्[6] । इयञ्चोत्क्रान्तिः स्व स्वगोलकादीन्द्रियाणान्निर्गमनरूपा, 'स एतास्तेजोमात्रा समभ्याददानो हृदयमेवाक्रमति' (बृ० ४|४|१ , इति **शास्त्रसिद्धाविदुषां नोत्क्रान्त,**[7] कुतो लिङ्गशरीरन्नोपलभ्यते, [8]अहिरिव विलान्निर्गच्छतीति ।

सिद्धान्तस्तु

यत्सम्पत्तिरियं[9] तावत्स्वापकालवदिष्यते[10] ।
निर्गुणप्रक्रियायाश्च सृप्तिर्न विदुषो मता ॥

अत्र हि साधारणोत्क्रान्तिरुच्यते[11] । न नु ब्रह्मविद एव ब्रह्मविद्याप्रकरणेऽपीदं वाक्यं यस्यां देवतायां स्मरणकाले[12] जीवानां सम्पत्तिस्तत्त्वमसीति व्युत्पादनायेति तत्र कारणविरोधः[13] । न च सकृत्[14] प्राणेन्द्रियाद्युत्क्रान्तिः सामग्रीसमवधाने-उत्क्रान्तिरेव वक्तव्येति, ब्रह्मसम्पत्तिव्युत्पादनमफलमिति वाच्यम् । उत्क्रान्तिप्रयुक्तश्रान्त्यपनोदनार्थत्वात्[15] । तथा च सत्सम्पत्तिः [16]स्वापकालवत्सावशेषैव[17] वक्तव्याः, अन्यथा सर्वेषां मरणकाले मोक्षापत्तेः[18] । लिङ्गशरीरस्य निर्गमनवेलायामनुपलभ्यस्तु सूक्ष्मत्वादुपपन्न इति ।

---

१. घ० मा० 'संयन्ति' इति पाठः ।
२. च० मा० निर्गुणब्रह्मविद्याया ?' इति पाठः ।
३. घ० मा० 'आत्यन्तिकेव' इति पाठः ।
४. घ० मा० 'न चाग्निम' इति पाठः ।
५. घ० मा० 'रो' इति पाठो नास्ति ।
६. घ० मा० 'देहायादान' इति पाठः ।
७. घ० मा० 'न्वोत्क्रान्वो' इति पाठः ।
८. घ० मा० 'अतहिरिवविल्वनिर्गच्छति' इति पाठः ।
९. घ० च० मा० 'सत्सम्पत्ति' इति पाठः ।
१०. 'अत्रायं सिद्धान्पःभिप्रायः । नास्य प्रकरणानुसारेण निर्विशेषविद्विषयता उपगन्तुं न्याया । तदीयेन्द्रियादीनां स्वप्नप्रपञ्चप्रविलयवद्युगपदेवाधिष्ठाने ब्रह्मणि प्रविलयस्य वक्तव्यतया वाङ्मनसीत्यादि क्रमानुपपत्तेः । अत्रोऽनन्तरोत्क्रान्तिरपि सम्भाविता । अतोऽस्य वाक्यस्य सुषुप्त्यादिवाक्यवत्सर्वसाधारणमेव पूर्वोक्तमुपगन्तुं न्याय्यम्' (ब्र० वि० भ० ४|२|५) ।
११. घ० मा० 'उत्क्रान्ति स ननु' इति पाठः ।
च० मा० 'प्रयुक्तश्रुत्यपनोदनार्थत्वम्' इति पाठः ।
१२. घ० मा० 'समरण' इति पाठः ।
१३. घ० मा० 'कारणविरोधः' इति पाठः ।
१४. घ० मा० 'सकृत' इति पाठः ।
१५. घ० मा० 'प्रयुक्तश्रान्त्ययनोदन' इति पाठः ।
१६. ग० मा० 'स्वापकाले' इति पाठो नास्ति ।
१७. घ० मा० 'वत्सत्वशेषैव' इति पाठः ।
१८. ग० मा० 'अतस्वापकालवत्सावशेषंव' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रतिषेधाधिकरणम्

प्रतिषेधादिति चेन्न शारीरात् ॥६॥

किन्निर्विशेषविदो देहात्प्राणानामुत्क्रान्तिरस्ति नेति संशये पूर्वः पक्षः

निर्गुणब्रह्मविदुषामप्युत्क्रान्तिर्हि विद्यते ।
'न तस्मा'दिति वाक्येन जीवापादानिका[1] हि सा ॥
निषिध्यते शरीरात्तु[2] तस्या न क्वापि दृश्यते ।
निषेधो वो हि विदुषा सह प्राणा न निर्गतिः ॥

निगुर्णब्रह्मविदुषोऽपि प्राणानां देहादुत्क्रान्तिरस्ति तद्भावे मानाभावात् । न च 'न तस्य प्राणा उत्क्रामन्ति' (बृ० ४।४।६) इति श्रुत्योत्क्रान्तिप्रतिषेध एव तद्भावे मानमिति वाच्यम्,[3] 'तस्मात्प्राणा उत्क्रामन्ति' इति माध्यन्दिनपाठानुसारेण न तस्येति वाक्यस्य नेयत्वात्तद्धि वाक्यं विद्वदपादानकप्राणोत्क्रान्तिनिषेधपरम् ।

तथा च जीवं विहाय प्राणा न गच्छन्ति, किन्तु[4] जीवेन सहैव गच्छतीत्यर्थलाभान्न तस्येति वाक्यमपि 'न[5] तस्य पशृणेतीतिवन्नेयमिति[6] ।

सिद्धान्तस्तु

'उदस्मादि'ति वाक्ये हि शरीरमिदमुच्यते ।
'स उच्छ्र्यति' वाक्ये हि स शब्दो देहबोधकः ॥
एतद्वाक्यानुसारेण देहापादानिकाङ्गतिम् ।
[7]न तस्मादिति वाक्यञ्च प्राहैवं सति युज्यते ॥
अत्रैवेत्युत्तरं वाक्यमुत्क्रान्तिश्चाप्रयोजना ।
जीवापादानकोत्क्रान्तेः प्रतिषेधोऽप्यनर्थकः ॥
अप्रसक्तत्वतस्मात्प्राणानां (?) लय इष्यते ।
[8]आर्तभागस्य वाक्यञ्च ब्रह्मविद्विषयं स्थितम् ॥

---

१. ग० मा० 'एव' इतिः पाठः ।
२. घ० मा० 'शरात्तु' इति पाठः ।
३, घ० मा० 'न' इत्यधिकः पाठः ।
४. घ० मा० 'किन्तु' इति पाठो नास्ति ।
५. ग० मा० 'नास्य' इति पाठः ।
६. घ० मा० 'नैयाम्मीति' इति पाठः ।
७. ग० मा० 'निषेधति न तस्मादित्येवं सति युज्यते' इति पाठः ।
८. घ० मा० तस्मादार्थभागप्रश्नेऽपि शरीरादुत्क्रान्तिर्न प्रतिषिध्यति । अविदुषस्तदवश्यं भावात्, किन्तु शरीरादेवेति' (वे०क०प० ४।२।६)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आर्तभागस्य 'उदस्मात्प्राणा उत्क्रामन्ति' (बृ ३।२।११) उताहो नेति याज्ञवल्क्यं प्रति प्रश्नस्तस्योत्तरन्नेति 'होवाच याज्ञवल्क्य' इति तर्हि 'अमृत' [1]इत्याशंक्योक्तमत्रैव 'समवनीयन्ते[2] स उत्च्छ्वयत्याध्मायत्याध्मातो-मृतश्शेत'[3] (बृ०उ० ३।२।११) इत्यधोच्छ्रयतादिलिङ्गाच्छरीरमेव तच्छब्देन परामृश्यत इति स्वीकार्यम्। तस्य पूर्वप्रस्तुतत्वनिर्वाहाय 'उदस्मात्' (बृ० ३।२।११) इति वाक्यस्येदं पदमपि शरीरपरामर्शकमेव स्वीकार्यम्। तथाच देहापादानिकोत्क्रान्तिप्रतिषेधपरत्वमेव[4] स्वीकार्यम्। एवञ्चैतदनुसारेण 'न तस्मात्' (अथर्व शिर० ६) इति [5]माध्यन्दिनवाक्यमपि देहापादानिकामेवोत्क्रान्तिं[6] ब्रूत इति स्वीकार्यम्। तच्छब्दस्य विद्वत्प्रावधिदेहपरत्वात् न च 'उदस्मात्' (बृ० ३।२।११) इति वाक्यस्येदं पदम्, 'अयं पुनर्मृत्यु जयति य एवं वेद, (बृ० ३।२।१०) इति पूर्ववाक्ये पुरुषस्य प्राधान्येन [7]प्रस्तुतत्वात्तत्परामर्शकः। तथा चोपक्रमानुसारेणोपसंहारस्थं[8] सपदमेवान्यथा[9] नेयमिति वाच्यम्। एवं हि 'यत्रायं पुरुषोम्रियते किमेनं न जहाति' (बृ० ३।२।१२) इति प्रश्नस्यासाङ्गत्यं[10] स्यात्। प्राणस्य लये हि प्राणो लीनः किन्न जहात्येनमिति प्रश्न[11] उपपद्यते, नामैवेत्युत्तरञ्च। तथा चोपसंहारगतानेकानुग्रहायोपक्रमस्य बाधो युक्तः, एव चात्रैव समनीयन्ते। तत्र 'ब्रह्मसमश्नुत' इत्यादिश्रुतीनामुपपत्तिः, किञ्च निर्विशेषविदामुत्क्रान्तेरुपयोगाभाव इहैव ब्रह्मप्राप्तेः सम्भवादत[12] एव स्मृतिः

सर्वभूतात्मभूतस्य[13] सम्यग् भूतानि पश्यतः।
देवा अपि मार्गे [14]मुह्यन्ति अपदस्य [15]पदैषिणः॥

किञ्च जीवादानोत्क्रान्तिरप्रसक्तत्वेन तन्निषेधे प्रसक्तप्रतिषेधत्वापत्तेश्च। कथञ्चित्प्रसक्तिप्रतिपादनं त्वतितुच्छत्वादुपेक्ष्यन्न चार्तभागब्राह्मणे ब्रह्मज्ञानन्न प्रस्तुतमिति, कथं तद्वतोऽनुत्क्रान्तिः प्रतिपाद्यते, प्रत्युत तत्र मृतस्य जीवस्य कर्माश्रितत्वव्युत्पादनादविदुष एवैतत्प्रकरणं प्रतिपाद्यत इति वाच्यम् 'याज्ञवल्क्य होवाच यदिदं सर्वं मृत्योरन्नं

---

१. घ० मा० 'इत्यारावयोक्त' इति पाठः।
२. घ० मा० 'सवनोयात् त' इति पाठः।
३. घ० मा० 'मृतशेत' इति पाठः।
४. घ० मा० 'देहापादानकोत्क्रान्ति' इति पाठः।
५. घ० मा० 'नाध्यान्दिन' इति पाठः।
६. च० मा० 'एवोत्क्रान्ति' इति पाठः।
७. घ० मा० 'प्रस्तुत् वा त' इति पाठः।
८. घ० मा० 'उपसंधास्थं' इति पाठः।
९. घ० मा० 'स पदमेवान्वय' इति पाठः।
१०. घ० मा० 'प्रश्नयस्य' इति पाठः।
११. घ० मा० प्रश्न' इति पाठः।
१२. ग० मा० 'अत एव' इत्यधिक पाठः।
१३. घ० मा० सर्वाभूत्सत्य '''सम्यण्' इति पाठः।
१४. घ० मा० 'मुद्यन्ति' इति पाठः।
१५. पद्यमिदं महाभारतस्येति भाष्ये व्यक्तम्—यथा' स्मर्यतेऽपि च महाभारते गत्युत्क्रान्त्योरभावः' (शां० भा० ४।२।७,१४)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कास्वित्सा[1] देवता यस्या मृत्युरन्नम्' (बृ० ३।२।१०) इति पूर्ववाक्ये[2] मृत्युरूपपरमेश्वरस्य[3] एव चेदिति विद्यायाश्च प्रस्तुतत्वात् कर्माश्रयव्युत्पादन्तु ग्रहलक्षणस्य बन्धस्य[4] वीजव्युत्पादनायेति द्रष्टव्यम् ।

वागादिलयाधिकरणम्

तानि परे तथा ह्याह ॥ ७ ॥

तत्त्वविदः प्राणादयः[5] कला[6]: किं स्वस्वोपादाने[7] लीयन्त उत ब्रह्मणीति[8] संशये

प्राणादयः कलास्तावल्लोकदृष्टानुसारतः ।
स्वोपादाने विलीयन्ते तत्त्वविद्यावतोऽपि हि ॥

लोके हि घटादयो विकाराः मृदि लीयमानाः दृश्यन्त एवं ब्रह्मविदोऽपि प्राणादिकलाप्रलयः स्वोपादान एवोचित । एवञ्च सति 'गता कलाःपञ्चदश प्रतिष्ठा' (मु० उ० ३।७) इति श्रुतिरुपपद्यत एवमेवास्य 'परिद्रष्टुरिमा' इति श्रुतिस्तु लोकदर्शनानुसारिश्रुत्यनुसारेणान्यथा नेयेति प्राप्ते ।

ज्ञानेनाज्ञाननाशादि स्वोपादाननिवृत्तितः ।
द्रष्टर्यैव लयो युक्तो वाह्नि(?)दग्धपटो यथा ॥

ब्रह्मज्ञानेनाज्ञानस्य नष्टत्वेनोपादानस्यापि निवृत्तेः, कलालयः[9] प्रतिपाद्यते प्राणादिकलानाम्[10] । तस्माद्द्रष्टात्माभूते[11] ब्रह्मण्येव लय इति यथाग्निना दग्धे पटे [12]तदुपादानभूततन्तूनामभावान्नोपादाने लयस्तद्वदेव-ञ्चैवमेवास्य 'परिद्रष्टु' इति श्रुतिरुपपन्तरा 'गताः कला' (मु० उ० ३।७) इति श्रुतिस्त्वविद्वद्भ्रान्तिसिद्धस्वोपादानलयानुवादिनीति सिद्धान्तः ।

---

१. घ० मा० 'कारिवत्सा' इति पाठः ।
२. घ० मा० 'मृत्यु नृत्युरूप' इति पाठः ।
३. घ० मा० 'प्रसक्तत्वेन' इति पाठः ।
४. घ० मा० 'संसारस्य' इति पाठः ।
५. घ० मा० 'प्रामाणादयः' इति पाठः ।
६. घ० मा० 'कजाः' इति पाठः ।
७. घ० मा० 'स्वस्योवाने' इति पाठः ।
८. घ० मा० 'ब्रह्मविवोति' इति पाठः ।
९. घ० मा० 'कुलय' इवि पाठः ।
१०. ग० मा० 'प्राणादि' इति नास्ति पाठः ।
११. घ० मा० 'तस्मादुष्टातमा इवि पाठः ।
१२. घ० मा० 'दग्धपटेनदुपादन' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अविभागाधिकरणम्

अविभागो वचनात्[1] ॥ ८ ॥

किं विदुषां प्राणादिलयस्सावशेषो निरवशेषो वेति संशये [2]सावशेष इति प्राप्तम् । कुतः

ज्ञानेनाज्ञाननाशेन सर्वनाशो यदीष्यते ।
बद्धस्यापि तदा तावत्प्रपञ्चो[3] नैवसम्भवेत् ॥

यदि ब्रह्मविदो ज्ञानादज्ञाननिवृत्या निश्शेषप्रपञ्चलयोऽभ्युपगम्येत तदा बद्धानामपि[4] प्रपञ्चो नोपलभ्येत । अतो निश्शेषलयानुपत्तिरिति प्राप्तेऽभिधोयते निश्लेषलय इति । कुतः

ज्ञानेनाज्ञाननाशे हि न शेषा युज्यतेऽस्य[5] हि ।
स्वस्वाविद्यावशाद्बद्धाः पश्यन्ति स्वस्थकल्पितम् ॥

ज्ञानेनाज्ञाने निवृत्ते न प्रपञ्चस्य शेषो वर्तत इति वक्तुं शक्यते । बद्धास्तु स्वस्वाज्ञानकल्पितं प्रपञ्चं पश्यन्तीति न काप्यनुपपत्तिः ।

तदोकोऽधिकरणम्

तदोकोऽग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीता शताधिकया ॥ ९ ॥

'तस्य[6] हैतस्य हृदयस्याग्रं प्रद्योतते तेन[7] प्रद्योतेनैष आत्मा निष्क्रामति चक्षुष्ठो वा मूर्ध्नो वान्येभ्यो वा शरीरदेशेभ्यः' (बृ० ४।४।२) इति श्रूयते, तत्र सन्देहः, किं विदुषोऽप्यनियमेन यतः कुतश्चिन्निष्क्रमणमुत मूर्द्धन्यनाडीत इति तत्र पूर्वः पक्षः

---

१. मुद्रिते वै० न्या० मा० पृ० १७७ पुस्तकें 'लोकवत्' इति पाठो दृश्यते ।

२. (क) विमतः कलालयः सावशेषः कलालयत्वात् सुषुप्तिवदिति पूर्वपक्षः । विमतः निरवशेषः विद्याकृतत्वात् रज्वां विषया सर्पलयवदिति युक्त्युपेश्रुत्या सिद्धान्तयति (र० प्रं० पृ० १३०३) ।

(ख) स एषोऽकलोऽमृतो भवतीति पुरुषमात्रपरिशेषता प्रतिपाद्यते । अतो वचनबलान्न सावशेषलय उपगन्तव्यः । न च निरवशेषलये संसारिशून्यतापत्तिः । अज्ञाननानात्वस्वोकारेण तदीयत्त्वज्ञानेन तदीयाज्ञाननिवृत्या तन्मूलकस्य प्रपञ्चैकदेशस्यापगमेऽवशिष्टप्रपञ्चसत्वेऽनुपपत्त्यभावादिति सिद्धान्तयति 'अविभाग एवेतीति' (अद्वैतमंजरी, पृ० ७६९) ।

(ग) तस्मात्तत्वविदो वागादीनां विशेयेण परमात्मनि लयः (वै० न्या० भा० पृ० १७७) ।

३. ग० मा० 'देहादिप्रतिमासनम्' इति पाठः ।

४. ग० मा० 'ब्रह्मानामपि' इति पाठः ।

५. ग० मा० 'अस्योपपद्यते' इति पाठः ।

६. घ० मा० 'तस्य' इति पाठः ।

७. घ० मा० 'तेने' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उत्क्रान्तिद्वारनियमो विदुषामपि नेष्यते ।
नियामकस्य राहित्यादविशेषश्रुतेरपि ॥
न च नाड्याः परिज्ञानं तस्मिन्काले हि विद्यते ।
सुषुम्नया तूत्क्रमणे सत्यलोकाप्तिरिष्यते[1] ॥

विदुषामप्यनियमेन निष्क्रमणं नियमकारिणोऽभावाच्चक्षुष्ठो वेत्यादिश्रुत्याप्यविशेषप्रतिपादनात् । किञ्च मूर्द्धन्यनाडीज्ञानमप्यस्य न सम्भवति, उत्क्रान्तिसमये मरणवेदनाग्रस्तत्वेन विवेकानुपपत्तेः 'शतञ्चैका[2]' (छा० ८।६।६, कठ० २।३।६) इति वाक्यञ्च कदाचिन्मूर्द्धन्यनाड्याः निर्गच्छन्सत्यं लोकं प्राप्नोतीत्येवपरमिति[3] ।

सिद्धान्तस्तु

विद्वान्मूर्द्धन्यया नाड्या निष्क्रामति न चान्यथा ।
विद्यायाः[4] व्यर्थता स्यात्तथा सति भविष्यति ॥
मूर्द्धन्यनाडीज्ञानञ्च मार्गस्याप्यनुचिन्तनात् ।
हार्दस्य परमेशस्य ह्यनुग्रहवशादपि ॥

विद्वान्तावन्मूर्द्धन्यया नाड्याः निष्क्रम्य ब्रह्मलोकं गच्छतीति तावदङ्गीकार्यम् । न च '[5]नाडीज्ञानासम्भवः, उत्क्रान्तिजनितवेदनायाः 'तेजः परस्यां देवतायाम्' (छा० ६।८।६) इति वाक्यबोधितपरदेवताविश्रान्त्यपगतत्वेन[6] चित्तस्य विवेचकत्वसम्भवेन 'तस्य हैतस्य हृदयस्याग्रं प्रद्योतत' (बृ० ४।४।२) इति शास्त्रोक्तज्ञाने बाधकाभावात् । विशिष्य मूर्द्धन्यनाडीज्ञानन्तु विद्यासामर्थ्यात् । अन्यथा हि विद्याऽनर्थिकैव स्याद्विद्याङ्गत्वेन मार्गस्यानुचिन्तनाच्च हृदयस्थपरमेश्वरानुग्रहाच्चातो[7] मूर्द्धन्यनाड्या विदुषो निष्क्रमणमिति ।

---

१. घ० मा० 'सत्यलोकामिरिष्यते' इति पाठः ।
२. च० मा० 'रोतञ्चैका' इति पाठः ।
३. घ० मा० 'प्राप्नोतित्यिवं दति पाठः ।
४. ग० मा० 'अपार्थपैव विद्यायास्तथा सति भविष्यति' इति पाठः ।
५. घ० च० मा० 'नाड्यज्ञान' इति पाठः ।
६. ग० मा० 'अभ्युपगमेन' इति पाठः ।
७. तस्माद्धृदयालयेन ब्रह्मणा समुपासितेनानुगृहीतस्तद्भावमापन्नो विद्वान्मूर्धन्ययैव शताधिकया शतादतिरिक्तयैकशततमया नाड्या निष्क्रामति' (शा० भा० ४।२।१७)
'हार्दविद्याविशेषभूता हि मूर्धन्या नाडो गत्यै उपदिष्टा । तदनुशीलनेन खल्वयं जीवो हार्देन सूपासितेन ब्रह्मणानुगृहीतस्तस्यानुस्मरंस्तद्भावमापन्नो मूर्धन्ययैव शताधिकया नाड्या निष्क्रामति । हृदयादुद्गता हि ब्रह्मनाडी भास्वरा तालुमूलं भित्वा मूर्धानमेत्य रश्मिभिरेकीभूता आदित्यमण्डलमनुप्रविष्टा तामनुशीलयतस्तयैकान्तकाले निर्गमनं भवतीति' (भामती ४।२।१७) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रश्म्यधिकरणम्

रश्म्यनुसारी ॥१०॥

आदित्यरश्मीनाञ्च[1] 'तद्यथा महापथ आतत उभौ ग्रामौ गच्छतीमञ्चामुञ्चैवमेवेता वादित्यस्य रश्मय उभौ लोको गच्छतीमञ्चामुञ्चामुष्मादादित्यात्प्रतायंते ता आसु नाडीषु सृप्ता आभ्यो नाडीभ्यः[2] प्रतापयन्ते तेऽमुष्मिनादित्य' (छा० ८।६।२) इति वाक्येन नाडीनां रश्मीनाञ्च सम्बन्धमुक्तत्वात्[3] 'अथ यत्रैतदस्माच्छरीरादुत्क्रामत्यथ तैरेव रश्मिभिरूद्धमाक्रमत[4], (छा० ८।६।५) इति रश्मिद्वारा निष्क्रम्य ब्रह्मलोकं प्राप्नोतीति श्रुतम् । तत्र संशयः किं रात्रौ मृतः ब्रह्मलोकं गच्छति नेति । संशये

रात्रौ प्रेतस्य[5] विदुषो ब्रह्मलोको न विद्यते ।
सूर्यरश्मेस्तदाभावादिति प्राप्तेऽभिधीयते ॥
सूर्यरश्म्य[6]भिसम्बन्धो याव[7]देह हि विद्यते ।
अतो निदाघरात्रिषु ह्युष्माणं लभते जनः ॥
अन्यथा पाक्षिकं हि स्यात्सगुणोपासनाफलम् ।
दिवसस्य प्रतीक्षायां त्वरावचनपीडनम् ॥
स यार्व[8]दिति वाक्येन त्वरया गमनं श्रुतम् ।
तस्माद्रात्रौ मृतस्यापि ब्रह्मलोक इति स्थितम् ॥

रात्रौ मृतोऽपि ब्रह्मलोकं प्रतिपद्यत एव, तदानीमपि रश्मीनां विद्यमानत्वादत एव निदाघरजनीषूष्मा[9] उपलभ्यते । एवञ्च ब्रह्मविद्यायाः नियतफलत्वं सिध्यति । इतरथा रात्रौ मृतस्य ब्रह्मलोकाभावेन[10] पाक्षिकफलत्वं स्यात् । दिवस प्रतीक्षणे च यावत्क्षिपेन्मनस्तावदादित्यं[11] गच्छति (छा० ८।६।५) इति त्वरावचनपीड्येत[12] । तस्माद्रात्रौ[13] मृतस्यापि ब्रह्मलोकप्राप्तिरिति सिद्धम् ।

---

१. ग० मा० 'नाडीना च' इति पाठः ।
२. घ० मा० 'नाडीभ्यो प्रतापयन्ते' इति पाठः ।
३. घ० मा० 'सम्बन्धमुवा' इति पाठः ।
४. घ० मा० 'रमीभिरूर्द्ध आक्रमन' इति पाठः ।
५. घ० मा० 'प्रतस्य' इति पाठः ।
६. ग० मा० 'नाडी' इति पाठः ।
७. ग० मा० 'अबाधित' इति पाठः ।
८. ग० मा० 'न चास्ति मृत्युकालस्य नियम प्राणिनामिह' इति पाठः ।
९. घ० मा० 'निदाघरज्जीषूष्मोपलम्यते' इति पाठः ।
१०. घ० मा० 'भावेनापाक्षिक' इति पाठः ।
११. ग० मा० 'स याबत् क्षिप्येत' इति पाठः ।
१२. ग० मा० 'नच विद्वानहन्येव म्रियेत इति नियमो स्थित' इति पाठः ।
१३. रात्रावहनि चाविशेषेण रश्म्यनुसारी सन्नादित्यमण्डलं प्राप्नोतीति सिद्धान्तपक्ष प्रतिज्ञा (भामती ४।२।१८) 'रात्रौ मृतस्य रश्मिप्राप्त्यर्थं सूर्योदयप्रतीक्षास्ति, सिद्धान्ते नास्तीति मत्वा प्रतिजानीत–अविशेषेणेति (र० प्र० ४।२।१८) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दक्षिणायनाधिकरणम्

अतश्चायनेऽपि हि दक्षिणे ॥११॥

—दक्षिणायने[१] मृतस्यापि ब्रह्मलोकप्राप्तिरस्तीति पूर्वोक्तन्यायातिदेशार्थमिदमधिकरणम् ।

अयने दक्षिणे प्रेतो ब्रम्हलोकन्न गच्छति ।
उत्तरायणवीक्षा हि दृष्टा भीष्मस्य यत्नतः ॥

उत्तरायणप्राशस्त्यप्रतिपादनाद्भीष्मादेरुत्तरायणप्रतीक्षादर्शनाच्च दक्षिणायने मृतानां विदुषान्न ब्रह्म प्राप्तिरिति विशेषशङ्का ।

भीष्मप्रतीक्षणं तावत्स्वच्छन्द (मतितां ?) पितुः ।
प्रसादेन परिप्राप्तां प्रख्यापयितुमिष्यते ॥

उत्तरायणप्राशस्त्यप्रतिपादनं त्वविद्वद्विषयम् 'अग्निर्ज्योतिरहःशुक्ल' (गी० ८।२४) इति स्मृतिवचनन्तु [२]स्मार्तसांख्ययोगाद्युपासनविषयमतिवाहिकविषयं[३] वा, आतिवाहिकानां प्रायेण कालाभिमानित्वेन 'तं कालं वक्ष्यामि' (भ० गी० ८।२३) इत्युपक्रमो न विरुध्यते, तथापि दक्षिणायने मृतानामपि विदुषां ब्रह्मलोकप्राप्तिरविरुद्धेति सिद्धम् ।

इति श्रीमत्परमहंसपरिव्राजकाचार्यसर्वतन्त्रस्वतन्त्र
श्रीमदद्वैतानन्दसरस्वतीचरणारविन्दभृङ्गायमानस्य
स्वयंप्रकाशानन्दस्य कृतिषु वेदान्तनयभूषणे
चतुर्थाध्यायस्य
द्वितीयः पादः

---

१. ग० मा० 'योगिनः प्रति च स्मर्यंते स्माते चै ते' इति पाठः ।

२. स्मार्तयोगिनान्तु कालाक्षेप स्मृतावुच्यत इत्यविरोधमाह–योगिन इति योगी दहराद्युपासक एव स्मृत्युक्तः किन्न स्यादित्यत आह स्मृतीति । भगवदाराधनबुध्याऽनुष्ठितं कर्मयोगः ।

अनाश्रितः कर्मफलं कार्यं कर्म करोति यः ।
स सन्न्यासी च योगी च........ ॥ इति स्मृतेः ।

धारणपूर्वकोऽकर्तृत्वानुभवः सांख्यम् 'इन्द्रियाणीन्द्रियार्थेषु वर्तन्त' 'इति स्मृते' (र० प्र० पृ० १३ ०(९

३. ग० मा० 'देवता' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ चतुर्थेऽध्याये तृतीयः पादः

अर्चिराद्यधिकरणम्

अर्चिरादिना तत्प्रथितेः ॥१॥

पूर्वस्मिन्पाद उत्क्रान्तिर्निरूपिता, अस्मिन्पादेऽर्चिरादिमार्गो[1] निरूप्यते। तत्र ब्रह्मलोकगमनाय किन्नाना उतैक एव मार्ग इति संशये पूर्वः पक्षः

